ईश्वरसंहिता

ĪŚVARASAṀHITĀ

VOLUME II

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

Viṣṇuism has given rise to two very important schools of ritual and philosophy, namely Vaikhānasa and Pāñcarātra. *Īśvarasaṁhitā* is an important text of the Pāñcarātra school of Viṣṇuism.

Whereas Vaikhānasa is relatively archaic in character and leans more upon the Vedic tradition for its repertoire of Mantras used in religious rites and ceremonies, the Pāñcarātra is more liberal and open in its approach. It has a text tradition going back to some two thousand years - which has also been the main source of the Viśiṣṭādvaita philosophy of Ramānuja (11th - 12th c.). In most of the Vaiṣṇava temples in South India, especially in Tamilnadu, worship is conducted in accordance with the prescription of one of the important Pāñcarātra Saṁhitās.

Īśvarasaṁhitā is an important text of the Pāñcarātra school and is followed meticulously for conduction of daily Pūjā ceremony and performances of various religious festivals in the Nārāyaṇasvāmī temple of Melkote. It can safely be dated to 8th - 9th Century at least on the basis of its reference in the *Āgama Prāmāṇya* of Shri Yāmunācārya. It is supposed to be a simpler and smaller version of the older *Sāttvata-saṁhitā* of this school which is the earliest available work of Pāñcarātra and is considered as one of three *ratnas*, (jewels), along with *Pauṣkara-* and *Jayā-saṁhitās.* In 25 long Adhyāyas the *Īśvarasaṃhitā* describes in great detail the rites, rituals and ceremonies taking place (or ought to take place) in a Vaiṣṇava temple.

Palmleaf Manuscripts of the *Īśvarasaṁhitā* were procured mainly from the Nārāyaṇasvāmī temple of Melkote for the sake of authenticity. We have also appended to the text the gloss of Aḷasiṃha Bhaṭṭa (early 19thc.) which shall be helpful in comprehending certain difficult or sectarian expressions. The English translation on the opposite (right) page has been provided for the facility of the modern scholars working on Philosophy, Ritual and Iconography of Viṣṇuism.

A proper understanding of ritual is obviously indispensable for the study of Art.

ईश्वरसंहिता

ĪŚVARASAṀHITĀ

Critically edited and translated in Five Volumes

Volume II

(Chapters I-X)

By

M. A. LAKSHMITHATHACHAR

Revised by

V. VARADACHARI

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS
NEW DELHI
and
MOTILAL BANARSIDASS PUBLISHERS PVT. LTD.
DELHI

CONTENTS

VOLUME TWO
Text and Translations

ईश्वरसंहिता
ĪŚVARASAṀHITĀ

VOLUME TWO
Text and Translation

॥ श्रीः ॥

अळशिङ्गभट्टविरचितभाष्योपेता

ईश्वरसंहिता

॥ श्रीमच्छाण्डिल्यादिगुरुभ्यो नमः । श्रीमते रामानुजाय नमः ॥

प्रथमोऽध्यायः

शास्त्रावतारः

[मङ्गलाचरणम्]

नमः सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥ १ ॥

॥ श्रीः ॥
श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥ १ ॥
कल्याणं नस्तनोतु प्रचुरतरनिजालोकपूर्णाखिलाशः
प्रोद्दृप्यद्यातुधानप्रमुखशलभहृद्धेतियुक्तः प्रदोषे ।
पूज्यः प्राज्यःश्रियाढ्यो विमलशुभदशान्ताश्रितोऽन्तस्तमोभिः
प्रह्लादारोपितोऽयं यदुगिरिशिखरे श्रीनृसिंहाख्यदीपः ॥ २ ॥
आनन्दमयमध्यस्थमजगेहाधिदैवतम् ।
श्रीमत्सात्वततन्त्रार्च्यं यदुशैलाधिपं भजे ॥ ३ ॥
श्रीपुष्टिकरपाथोजलालिताङ्घ्रिसरोरुहः ।
भूयः श्रेयप्रदो भूयात् सम्पत्पुत्रो यतीशितुः ॥ ४ ॥
अमितागसेऽपि लोके सकृदञ्जलये ददाति याऽभीष्टान् ।
यदुशैलनायकीं तां कलये हृदि सन्ततं कृपाम्भोधिम् ॥ ५ ॥
श्रीसात्वताख्यतन्त्रं यद्द्रीशार्चने क्रमप्राप्तम् ।
सन्त्यज्य चान्यमार्गं भजतः प्रत्याधुनोतु हेतीशः ॥ ६ ॥
श्रीमत्सूत्रवतीकान्तं शठजिन्नाथयामुनान् ।
महापूर्णाभिधार्यं च प्रपद्ये करुणाम्बुधीन् ॥ ७ ॥

१. प्रात्या - A

ĪŚVARASAṂHITĀ

CHAPTER I

Rise (origin) of the System

(Benediction)[1]

1. Salutation to Cakrapāṇi,[2] the bestower of all auspiciousness and the cause for rescuing those who are immersed in the ocean of (enjoyment of) worldly objects.

(Rise[3] of the System in the hermitage[4] of Nara and Nārāyaṇa)

2-5a. All the great sages,[5] who were dependent[6] upon Nārāyaṇa,[7] were

1. This is called *maṅgala*. Indian tradition makes the performance of *maṅgala* and or its inclusion, when it is in the form of one or more *ślokas*, at the beginning of a literary work, as an obligatory act which the author of a work should attend to. Failure to conform to this practice will entail the rise of obstacles affecting the successful completion of the work.

   The Pāñcarātra Āgama texts are held to have been composed by Lord Nārāyaṇa Himself; vide: *Pañcarātrasya kṛtsnasya vaktā nārāyaṇaḥ svayam/ Mbh.* Śānti. CCCLIX. 68a. It was not Nārāyaṇa that could have composed this *śloka* which is in praise of Himself and placed it at the commencement of this work. Some one, who had a hand in the later period, in preparing a copy of this text, must have included this *śloka* at the beginning of this text.

   The text begins accordingly with the second *śloka* in which the first word is Nārāyaṇa. This word serves the purpose of the *maṅgala*. This *maṅgalaśloka* is identical with the *maṅgalaśloka* in *Pāram.s.*
2. Cakrapāṇi: holding the discus (*cakra*) in the hand (*pāṇi*).
3. *Śāstrāvatāra* : *avatāra* divine descent. The Pāñcarātra system has come down from a higher region, the place of Viṣṇu. Therefore, the sense of how this text came into being is dealt with here. The word *śāstra* means a system dealing with some specific topic. It is derived as *śiṣyate'nena trāyate'nena* meaning that it gives directions for knowledge and undertakings and protects those who take to the study of it.
4. *Naranārāyaṇāśrama*: Nara, Nārāyaṇa, Hari and Keśava were born of *dharma*. Nara and Nārāyaṇa performed penance in the Badarikāśrama. Nārada visited them there and received instructions on *mokṣa* from Nārāyaṇa. Hence, Nārada is one of the interlocutors in this *Saṁhitā*. For details, ref. *Mbh.* Śānti. Ch. 334.
5. *maharṣayaḥ* : *mahāntaḥ* + *ṛṣayaḥ* seer, lit. knower.
6. *parāyaṇa* : dependent, one whose source is (based upon) another.
7. Nārāyaṇa: name of Viṣṇu; one who is the source or substratum for men or human beings. *Narāṇāṃ samūhaḥ nāraḥ*, group of men; *ayana* = support. He is the support of all men or human beings.

श्रीसात्वतोक्तविधिना त्रिदिनं सम्पूज्य यादवाद्रीशम् ।
प्रकटीचकार यस्तत् तन्त्रं लोके स पातु योगीन्द्रः ॥ ८ ॥
योगानन्दसुधाब्धीन्दुकौस्तुभौ यतिभूपतेः ।
पादुके रङ्गराजार्यवामनार्यावुपास्महे ॥ ९ ॥
जीयाच्छ्रीरङ्गराजान्वयकलशपयोराशिराकासुधांशुः
यद्वद्रीशाङ्घ्रिपाथोरुहपरिचरणप्राप्तसौजन्यलक्ष्मीः ।
त्रातश्रीपाञ्च[२]रात्रस्तुहिनरुचिकचग्राहिकीर्तिप्रवृत्तिः
योगानन्दार्यभट्टः शुभगुणजलधिर्विद्वदग्रेसरोऽयम् ॥ १० ॥
तत्सूनुनाऽळशिङ्गाख्यभट्टार्येण यथामति ।
व्याख्यास्यते चेश्वराख्यसंहिता विदुषां मुदे ॥ ११ ॥
चिकीर्षिताया व्याख्याया भवन्तु मम[३] सिद्धिदाः ।
दीक्षाचार्या इमे पञ्च शाण्डिल्याद्या मुनीश्वराः ॥ १२ ॥
इदमीश्वराख्यतन्त्रं व्याख्यारूपं हि सात्वतादीनाम् ।
विवृतं यदीह सर्वे विवृतप्राया हि सात्वताद्याश्च ॥ १३ ॥
सुस्पष्टमेतत्तन्त्रार्था विशदाः सात्वताऽमृते[४] ।
तानेवाम्रेडयामोऽद्य गीर्भिर्व्याख्यानरीतिभिः ॥ १४ ॥
क्व शास्त्रं मुनिभिर्ज्ञेयं क्वाहमज्ञस्तथाऽपि मे ।
व्याख्यां चिकीर्षोर्वाग्दोषान् क्षन्तुमर्हत सज्जनाः ॥ १५ ॥

[नरनारायणाश्रमे शास्त्रावतारः]

नारायणपदाम्भोजसमाराधनलालसाः ।
वेदवेदाङ्गनिपुणास्तपोनिष्ठा महर्षयः ॥ २ ॥
इतिहासपुराणज्ञा धर्मशास्त्रविशारदाः ।
भगवद्भक्तिनिरताः शमादिगुणसागराः ॥ ३ ॥
नारायणं तपस्यन्तं नरनारायणाश्रमे ।
संसेवन्तः सदा भक्त्या मोक्षोपायविवित्सवः ॥ ४ ॥
संस्थिता मुनयः सर्वे नारायणपरायणाः ।

२. पञ्च - A
३. सन्तु निर्विघ्न - A
४. मुने - A

assembled together (there) They were ardently desirous[8] of worshipping[9] the Lotus-feet[10] of Nārāyaṇa. Those great sages were conversant with the Vedas[11] and Vedāṅgas[12] and devoted[13] to do penance. They had a thorough knowledge of the Epics[14] and Purāṇas[15] and were proficient[16] in the

8. *lālasā* : excessively desirous.
9. *samārādhana*: *sam* + *ārādhana: sam* = well; *ārādhana* = fulfilment; The sages were eager to accomplish their acts or wishes at the feet of Nārāyaṇa, that is, service, worship.
10. *padāmbhoja* : feet resembling lotus.
11. Vedas: earliest literary records of the Hindus. They are four in number with the names *Ṛk, Yajus, Sāman* and *Atharvaṇ.*
12. Vedāṅgas are auxiliaries of the Vedas. They are six in number: *Śikṣā* (phonetics), *Vyākaraṇa*(grammar), *Chandas* (prosody), *Nirukta* (science of etymology); *Jyotiṣa* (astronomy), and *Kalpa* (subject of ceremonials).
13. *taponiṣṭhāḥ* : *niṣṭhā* accomplishment, capable of undertaking penance with success.
14. Itihāsa: Epic: *Rāmāyaṇa* and *Mahābhārata* are the two well-known epics of India. These two contain within themselves narratives of limited extent also called Itihāsa, e.g. *Rāmāyaṇa*, Yuddha. Ch. 120; Mbh. Udyoga. Ch. 36, 133; Droṇa. Ch. 52; Śānti. Ch. 103, 104, 111 and Anuśāsana. Ch. 50. The word *itihāsa* is split up as *iti hetyavyayaṃ pāramparyopadeśābhyadhāyī, tasya asanam āsaḥ avasthānam eteṣviti itihāsaḥ.* An epic records the teachings and narrates previous occurrences.

    Its characteristic features are thus stated:

    dharmārthakāmamokṣāṇām
    upadeśasamanvitam /
    purāvṛttakathāyuktam -
    itihāsaṃ pracakṣate //
15. The Purāṇas are narratives of incidents which occurred long ago. They are eighteen in number. Their features are stated thus:

    sargaśca pratisargaśca
    vaṃśo manvantarāṇi ca /
    sarveṣveteṣu kathyante
    vaṃśānucaritaṃ ca yat // VP.III.6.24

    cf. Bh. p. II 10. 1, 2a for a different definition.
16. *Viśārada:* proficient; *vi* (special); *śārada* (intuition), having a specific kind of intuition.

[नारदस्यागमनम्]

कालेन केनचित् स्वर्गान्नारायणदिदृक्षया ॥ ५ ॥
तत्रावतीर्य देवर्षिर्नारदः सकुतूहलः ।
दृष्ट्वा नारायणं देवं नमस्कृत्य कृताञ्जलिः ॥ ६ ॥

अत्र खलु परमभागवताग्रेसरः श्रीवासुदेववदनारविन्दमकरन्दायमानसात्वतपौष्करजयाख्यादिदिव्यशास्त्रविशारदो नारदो भवजलधिनिपतितजन्तुसन्तारणायाष्टोत्तरशतस्थानसारभूतयदुगिरिनिलयश्रीमन्नारायणचरणकमलार्चनप्रक्रियागर्भितं श्रीसात्वतादिदिव्यशास्त्रार्थोपबृंहणमीश्वराख्यतन्त्रमुपदिदिक्षुः तदवतारक्रमं दर्शयति- **नारायण** इति । अत्रादौ नारायणशब्दप्रयोगेण चिकीर्षितग्रन्थपरिसमाप्तिसाधकं निरवधिकं मङ्गलं कृतं भवति॥

आदावेतादृशानां मुनीनां मोक्षोपायबुभुत्सया श्रीबदरिकाश्रमवासिनां नारायणसन्निधौ संस्थितिमाह- **नारायणपरायणाः** इत्यन्तैः श्लोकैः । विवित्सवः वेत्तुमिच्छवः । नारायणपरायणा नारायणैकगतिका इत्यर्थः ।

तत्र नारदस्यागमनादिकमाह-**कालेन** इत्यादिभिः । दिदृक्षया द्रष्टुमिच्छया ।

पुलकाञ्चितसर्वाङ्गः प्रहृष्टवदनो मुनिः ।
स्तुत्वा नानाविधैः स्तोत्रैः प्रणम्य च मुहुर्मुहुः ॥ ७ ॥
पूजयामास तं देवं नारायणमनामयम् ।

Dharmaśāstras.[17] They were engaged in (the practice of) the devotion to Bhagavān.[18] They were an ocean (as it were) of *śama* and other[19] virtues. They were always serving Nārāyaṇa who was doing penance in the hermitage of Nara and Nārāyaṇa with devotion. They were desirous to know the means of getting *mokṣa*.[20]

(Arrival of Nārada)

5b-8a. In course of time, the divine sage Nārada[21] who was enthusiastic to see Nārāyaṇa, came down there from heaven with eagerness. He (the

17. Dharmaśāstra: system on *dharma*, treating law, code of conduct, custom and other aspects of life. *Manusmṛti, Yājñavalkyasmṛti, Nirṇayasindhu* and other works come under this head.
18. Bhagavān: God; He who knows production (creation), dissolution, course and its absence of the beings, knowledge and ignorance, is said to be Bhagavān:

    vide:

    utpattiṃ pralayaṃ caiva
    bhūtānāmagatiṃ gatim /
    vetti vidyāmavidyāṃ ca
    sa vācyo bhagavāniti // VP. VI. 5.78

    Bhagavān is said to possess in full the six qualities, knowledge (*jñāna*), power (*śakti*), strength (*bala*), sovereignty (*aiśvarya*), virility (*vīrya*) and lustre (*tejas*) and does not possess any defect;

    vide:

    jñānaśaktibalaiśvarya -
    vīryatejāṃsyaśeṣataḥ /
    bhagavacchabdavācyāni
    vinā heyairguṇādibhiḥ // *ibid.* VI. 5. 79

    heyaguṇa: qualities of matter which are to be avoided. Thus the name Bhagavān refers primarily to Nārāyaṇa alone.
19. *śama*: control of mind, it is really non operation of the senses in respect of bad objects; *dama*: control over the senses, it is really non-exertion while doing acts that are enjoined; Haradatta's comm. on *Āpastamba-dharmasūtra*, I.3.18-19. *titikṣā*: forbearance and others are meant by the word *ādi*.
20. *mokṣa*: release, that is, release from bondage in the world. Like the systems of Indian thought, Āgamas also aim at providing the means to escape from worldly miseries.
21. Nārada: mind-born son of Brahmā, a devout worshipper of Nārāyaṇa, see MS. I. 35.

[सात्वततन्त्रमुपदेष्टुं परमात्मन आदेशः]

अथ नारायणो देवस्तमाह मुनिपुङ्गवम् ॥ ८ ॥

मुनयो ह्यत्र तिष्ठन्ति प्रार्थयाना हरेः पदम् ।
एतेषां सात्वतं शास्त्रमुपदेष्टुं त्वमर्हसि ॥ ९ ॥

इत्युक्त्वाऽन्तर्दधे श्रीमन्नारायणमुनिस्तदा ।
तच्छ्रुत्वा भगवद्वाक्यं मुनिर्हृष्टतनूरुहः ॥ १० ॥

तेषां मुनीनां सात्वतोपदेशे नारदं नियोज्य भगवानन्तर्हित इत्याह- **अथ** इत्यादिना ।

एवं भगवन्नियुक्तो नारदः तेषां मुनीनामाश्रमं गत्वा तत्र तैः सत्[6]सम्बन्धं संश्लाघ्य तेषामिदं[7] हितमुपदिष्टवानित्याह-**तच्छ्रुत्वा** इत्यादिभिः ।

६. सतस्तत् - A
७. तेषाम् - A

sage) saw the Lord Nārāyaṇa and bowed (to Him) again and again with folded palms. The sage[22] extolled (the Lord) with various kinds of hymns[23] of praise, with the hairs in all his limbs bristling and with a very happy countenance. He worshipped the Lord Nārāyaṇa who is free from material defects.[24]

(*Command of Paramātman for teaching the Sātvata Tantra*)

8b-10. Thereupon Lord Nārāyaṇa said to that eminent[25] sage, "Sages (*munayaḥ*) are just staying here longing for (to get at) the feet of Hari.[26] Be pleased to instruct these (sages) the Sātvata[27] system". The venerable[28] sage Nārāyaṇa said thus and then disappeared. The sage (*muni*) had the bristling hairs on hearing the utterance of Bhagavān.

22. *muni* : sage, one who thinks deeply of spiritual matters.
23. *stotra* : hymn of praise, it protects the person who praises; *stotāraṃ trāyeta iti.*
24. *anāmaya* : free from illness (*āmaya*). The word *āmaya* stands for the traits of human beings which assail them. The Lord is free from all the defects that arise consequent upon the material influences.
25. *munipuṅgava* : eminent sage; words like *puṅgava, śārdūla, siṃha* and others give the sense of eminence when they occur at the end of compounds.
26. Hari is a name of Viṣṇu. The name Hari means that Viṣṇu destroys the sins of His devotees. Nārāyaṇa is here the speaker. He is mentioned in the context as a sage. He directs Nārada to guide the sages worshipping Hari for knowing the means for *mokṣa.*
27. Sātvata: Parāśarabhaṭṭa explains this name in the following way: *sātvika brahmavidasteṣāmidaṃ karma śāstram vā sātvataṃ tat kurvāṇā ācakṣāṇā vā sātvikāḥ sat (Paramātmā) sa eteṣāmastīti vā sātvatāḥ Bhagavadguṇadarpaṇa,* the commentary on the Viṣṇusahasranāmastotra, *śloka,* No. 54. Sātvikas are those who have realised Brahman. Sātvatam is the name of a system which the Sātvikas follow and engage themselves in their activities consistent with the principles of that system. Another explanation is *sat* means the Supreme Soul. Those who have Him are Sātvatas. To have Him means to treat Him as their Supreme Being. Those who attend to the duties laid down in the Sātvata system or preach them (speak about them) are Sātvikas.
28. Śrīmannārāyaṇamuni: Nārāyaṇamuni refers to Nārāyaṇa who is stated here to have been doing penance in the Badarikāśrama. The adjective *Śrīmat* indicates reverence which he commanded. This suggests that as the word Nārāyaṇa and the word *Śrīmat* are compounded, here is there an indication referring to the concept of the Ultimate Reality as Nārāyaṇa ever associated with Śrī, a concept recognised in Vaiṣṇavism and Pāñcarātra system, though He is stated here to be *muni*; vide: LT. IIb, xi. 15.

[नारदेन मुनीनामाश्रमगमनम्, तेषां हितोपदेशश्च]

तदाज्ञां कर्तुकामोऽथ निर्जगाम मुनीश्वरः ।
अपश्यदाश्रमवरमृषीणामूर्ध्वरेतसाम् ॥ ११ ॥

नानापक्षिगणाकीर्णं नानामृगनिषेवितम् ।
तरुपुष्पलताद्याढ्यं वापीकूपह्रदान्वितम् ॥ १२ ॥

तत्र गत्वा मुनिवरस्तत्रत्यैर्द्विजसत्तमैः ।
पूजितश्चार्घ्यपाद्याद्यैः विष्टरेऽभिनिवेशितः ॥ १३ ॥

मुनीनां प्रीतिजनकं वाक्यमेवमुवाच सः[५] ।
नारायणोऽत्र सततं भवद्भिः सेव्यते यतः ॥ १४ ॥

भवत्सु करुणा तस्य परिपूर्णा हि वर्तते ।
भवद्भिः सह सम्बन्धात् कृतार्थोऽद्य भवाम्यहम् ॥ १५ ॥

आदिष्टोऽहं भगवता भवदर्थे मुनीश्वरा ।
अधीत्य साम्प्रतं सर्वे रहस्याम्नायमुत्तमम् ॥ १६ ॥

अद्यप्रभृति देवेशमाराधयत योगिन ।

(*Nārada's going to the hermitage of munis and his salutary advice to them*).

11-17a. The chief of *munis*, thereupon, set out to carry out (His) order. He saw the excellent hermitage[29] of the sages (*ṛṣis*) who were celibates.[30] It was filled[31] with the groups of various birds. It was resorted to by various animals. It was abounding in trees, flowers, creepers and others and had ponds, wells and deep lakes. That eminent sage was honoured on his going there, by the best[32] twice-borns[33] living (present) there, with *arghya*,[34] *pādya*[35] and others and was offered a seat made of *kuśa* grass.[36] He (Nārada) said the words in this way[37] which caused delight to the *munis*, "Nārāyaṇa's compassion is quite full for you, as He is constantly attended here by you. I am now satisfied[38] with (my) association with you. O masters of sages! I am ordered for your sake, by Bhagavān. O Yogins![39] You all worship the Lord of gods from now, after studying the best Sātvata Rahasyāmnā."[40]

29. *āśramavara*: best or good hermitage, *vara* — at the end of this compound means best or eminent.
30. *ūrdhvaretasām*: those whoes vital fluid (*retas*) is turned to move up (*ūrdhva*) and thus kept in that condition adding strength to control the senses effectively.
31. *ākīrṇa*: literally strewn here and there. The hermitage had the habitations of the birds here and there.
32. *sat*: good; *tama*: superlative suffix; *sattama*: best.
33. *dvija*: twice-born, those who have two births first from their mothers and latter by having *upanayana*, investiture with sacred thread making them fit for the study of the Vedas.
34. *arghya*: water offered to a guest on his arrival.
35. *pādya*: water for washing the feet. This is offered by the host to the guest.
36. *viṣṭara*: seat made of grass (*darbha*).
37. *evam*: in this manner, refers to what follows.
38. *kṛtārtha*: one who has accomplished his work and achieved the purpose. Hence he is held to be fortunate.
39. *yoginaḥ*: those who do *yoga*. This address is apt, as they are sure to take up the act of worship in the perfect way (*sam*) having enough concentration acquired through yogic practice.
40. *rahasya*: secret; *āmnāya*; Veda; Rahasyāmnāya: another name for the Sātvata system, cf. SS - I, 1.16a.

[निःश्रेयसलाभार्थमृषीणां प्रश्नः]

मुनयः –
मुने चिरप्रपन्नानामस्माकं त्वं परा गतिः ॥ १७ ॥
नारायणपदप्राप्तेरुपायं सम्प्रकाशय ।

[एकायनशब्दार्थविवरणपूर्वकं तस्य वैभवकथनम्]

नारदः –
शृणुध्वं मुनयः सर्वे वेदमेकायनाभिधम् ॥ १८ ॥

मोक्षायनाय वै पन्था एतदन्यो न विद्यते ।
तस्मादेकायनं नाम प्रवदन्ति मनीषिणः ॥ १९ ॥

मूलभूतस्तु महतो वेदवृक्षस्य यो महान् ।
सद्ब्रह्मवासुदेवाख्यपरतत्त्वैकसंश्रयम् ॥ २० ॥

दिव्यैर्बलादिकैर्मन्त्रैः साक्षात् तत्प्रतिपादकैः ।
अलङ्कृतमसन्दिग्धमविद्यातिमिरापहम् ॥ २१ ॥

(*Question of the sages for obtaining niḥśreyasa*)[41]

17b-18a. Sages: O Sage! You are the supreme means[42] for us who had surrendered ourselves[43] long ago.[44] Show (illumine) the means for attaining the feet of Nārāyaṇa.

(*Explanation of the word Ekāyana with the narration of its glory*)

18b. *Nārada* : O Sages! You all listen to the Veda called Ekāyana.[45]

19-21. There is certainly no course other than this to get liberation.[46] Therefore the scholars call this by the name Ekāyana. This is the main root for the huge tree of the Vedas.[47] It treats the only subject namely, the Supreme Reality called Sat, Brahman and Vāsudeva.[48] It is adorned with the divine *mantras* like *bala*[49] others which directly present it (Paramatattva) that is not indistinct[50] and dispels the darkness of *avidyā*.[51]

41. *niḥśreyasa*: beatitude; *niḥ+śreyas = niḥśreyasaṃ, niścitaṃ ca tat śreyaśca; niḥ*: determined (*niścita*), *śreyas*: comparative degree of *praśasya*, laudable, good. This compound is irregular in formation; vide: *Aṣṭādhyāyī*, V. 4.77. The word *śreyas* meaning the ideal goal must be contrasted from the word *preyas* which means mostly desired; vide: Kaṭh. up. I. 2. 1, 2. These two words denote thus what is spiritually good and materially desirable respectively. When the word *niḥśreyas* means what is determined to be good, what is ultimately good for the soul, is, *mokṣa*.
42. *gati*: course
43. *prapannānām*: surrendered themselves to God.
44. *cira*: for a long time, long before; *ciraprapanna* and *gati* raise an issue when these are taken to mean that Nārada is the meant for the sages who have surrendered themselves to God long before, a contradiction. Those, who have surrendered themselves to God, have nothing to worry about. *Prapatti* is the means which they have already adopted. Nārada need not be requested to tell them the means for attaining *mokṣa*. Therefore *prapanna* in the context must be taken in the sense of approached. The sages have approached the Lord long before for His favour.
45. The word *ekāyana* is made up of two parts, *eka + ayana; eka* : one, *ayana* : path, *ekāyana*: one path or only one path.
46. *mokṣāyanāya*: *mokṣa*— liberation, *ayana*— path; going the path intended to get *mokṣa*.
47. cf. Pāram. S, I.76.
48. The word *sat* denotes Supreme Reality; vide: *Oṃ tatsaditi nirdeśo brahmaṇastrividhaḥ smṛtaḥ*, Bh. G XVII: 23a. cf. Ch. U, VI.8.6; Brahman and Vāsudeva are also the names of Supreme Reality.
49. *Oṃ bhagavato balena, bhagavato vīryeṇa, bhagavatastejasā* etc.
50. *asandigdha*: which does not give room for doubt, nor of uncertain nature, that is, could be identified beyond the trace of doubt.
51. *avidyā*: ignorance, *timira*: darkness: *avidyātimirāpaham*: which dispels the darkness of ignorance on account of which Reality is not properly understood.

इत्युक्त्वाऽध्याप्य योगीन्द्रान् सङ्गादाऽस्य वैभवम् ।

एवं नारदोक्तं हितं श्रुतवतां मुनीनां प्रश्नप्रकारमाह-**मुने** इत्यादिना ।

एवं तैः पृष्टो नारद एकायनशब्दार्थविवरणपूर्वकं तं वेदं मुनीनध्याप्य तस्य वैभवं सङ्गादेत्याह-**शृणुध्वम्** इत्यादिभिः । सद्ब्रह्मेत्यादि अविद्यातिमिरापहमित्यन्तविशेषणचतुष्टयस्यापि एकायनं वेदं शृणुध्वम इत्यत्रान्वयः । बलादिकैर्मन्त्रैः ॐ भगवतो बलेनेत्यादिभिः । अविद्याऽज्ञानम् ।

एष प्रकृतिधर्माख्यो वासुदेवैकगोचरः ॥ २२ ॥
प्रवर्तते कृतयुगे ततस्त्रेतायुगादिषु ।
विकारवेदाः सर्वत्र देवतान्तरगोचराः ॥ २३ ॥

[एकायनवेदस्य मूलवेदत्वप्रतिपादनम्]

महतो वेदवृक्षस्य मूलभूतो महानयम् ।
स्कन्धभूता ऋगाद्यास्ते शाखाभूताश्च योगिनः ॥ २४ ॥
जगन्मूलस्य वेदस्य वासुदेवस्य मुख्यतः ।
प्रतिपादकतासिद्धा मूलवेदाख्यता द्विजाः ॥ २५ ॥

अस्यैकायनवेदस्य प्रकृतिवेदत्वं वासुदेवैकविषयत्वमितरवेदानां विकारवेदत्वं देवतान्तरविषयत्वं चाह-**एषः** इत्यादिना । अत्र विकारवेदाः प्रवर्तन्ते इत्यध्याहार्यम् । अयमेवार्थः पारमेश्वरे प्रथमेऽध्याये विस्तरेणोक्तः - "ऋग्यजुःसामसंज्ञाऽस्तु" इत्यारभ्य "देवतान्तरवर्जित" (४२-५३) इत्यन्तैः श्लोकैः ।

अस्य वेदस्य मूलत्वमितरेषां वेदानां शाखात्वमाह-**महतः** इत्यादिना । इदमेवं विवृतं श्रीपाञ्चरात्ररक्षायां प्रथमेऽधिकारे-"तदेतत् महतो वेदवृक्षस्य मूलभूतो महानयम् इत्याद्युक्तानन्तशाखाश्रय-ऋगादिस्कन्धभिदुरनिगमतरुमूलभागोपबृंहणरूपं स्वमूलनिगमभेदादृगादिवदेव चतुर्धाऽवतिष्ठते" (पृ॰३) इति । तत्रैवोक्तमेतद्वेदभेदनिरूपकं भोजराजबलदेवाचार्यकृतपद्यं च- "यो वेदवृक्षं बहुमूलशाखं नानाफलार्थिद्विजसङ्घसेव्यम् । पूर्वश्रवानुश्रवभेदभिन्नमारोपयत् तं पुरुषं प्रपद्ये ॥" पा. र. पु. ५. इति ।

अस्य मूलवेदत्वं युक्त्यन्तरेणाप्याह-**जगन्मूलस्य** इत्यादिना । 'प्रतिपादकतया सिद्धा' इति तत्समस्तं पदम्, यद्वा 'प्रतिपादकता सिद्धा' इति व्यस्तं पदम् । ततो मूलवेदाख्यतास्येति शेषः । काण्वमाध्यन्दिनशाखयोरप्येतन्मूलवेदान्तर्गतत्वं प्रतिपादितम् । पाद्मे चर्यापादे एकविंशेऽध्याये - "काण्वीमाध्यन्दिनीं शाखां स्वशाखान्तर्हिते उभे ॥ अधीध्वं मूलशाखे ते निषेकादींश्च संस्कृतीः । ताभ्यामेवानुतिष्ठध्वं सोमयागादिकर्म च ॥" (पाद्मसं० चर्या. २१.९-१०) इति । अत एवैकायनत्वं चोक्तमस्य शुक्लयजुषः; अथर्वशिरसि पूर्वखण्डे - "तमेनं पुनरूचुः; भगवन् क उ स्विदेकायन इति । स एभ्यः प्रत्युवाच - तत्र शौक्लीयानि यजूंषि द्विसहस्राणि तान्येकायनानीत्याचक्षते" इति । एवमेतस्य

22a. Instructing the eminent yogins, after saying this, he (Nārada) spoke about its (Ekāyana) greatness.

22b-23. This (Ekāyana) is called *prakṛtidharma*[52] which treats only of Vāsudeva. It is in practice in the Kṛtayuga.[53] Then there were modified Vedas everywhere in the Tretāyuga and others (as they dealt) dealing with other deities.

(*Ekāyana Veda shown as Mūlaveda*)

24-25. This great Veda (Ekāyana) is the principal root of the huge tree of the Vedas. O Yogins! *Ṛk* and others are the trunks and branches (of the Mūlaveda). It treats mainly Vāsudeva and (therefore) the Veda (Ekāyana), which is the root of the world, O brahmins! has acquired the name Mūlaveda.[54]

52. *prakṛti*: source, *dharma* which is the source for all other *dharmas*, that is, the Ekāyana Veda is the primary *dharma*.
53. *yuga*: long mundance period of years. *Yugas* are four namely, Kṛta, Tretā, Dvāpara and Kali, their durations being 1728000, 1296000, 864000 and 432000 years respectively; vide: Bh. P. III. 11.18-19.
54. cf. Pāram. s I. 33; cf. PR. P. 3; *ibid.* P.5 where Bhoja, Baladevācārya and others are stated to have noted in their works the different branches of the Ekāyana. Bhoja (1005-1054 A.D.): this reference in his *Prayogapaddhatiratnāvalī*.

पैङ्गलोपनिषद्वायुपुराणादिष्वप्येकायनत्वं स्पष्टमुक्तम्। एतेन प्रायश: शुक्लयजुषो मूलभूतैकायनवेदोक्तधर्म-प्रतिपादकत्वात्तदन्तर्गतत्वमेकायनव्यवहारश्चेति ज्ञेयम् ॥

आद्यं भागवतं धर्ममादिभूते कृते युगे ।
मानवा योग्यभूतास्तेऽनुतिष्ठन्ति नित्यश: ॥ २६ ॥
ततस्त्रेतायुगे सर्वे नानाकामसमन्विता: ।
व्यामिश्रयाजिनो भूत्वा त्यजन्त्याद्यं सनातनम् ॥ २७ ॥
अन्तर्दधाति सर्वोऽयं वासुदेवसमाहृत: ।
ततो योग्याय भगवान् प्रादुर्भावयति स्वयम् ॥ २८ ॥
एवं मया पुराऽधीत: श्वेतद्वीपे मुनीश्वरा:! ।
सन: सनत्सुजातश्च सनकश्च सनन्दन: ॥ २९ ॥
सनत्कुमार: कपिल: सप्तमश्च सनातन: ।
एत एकान्तिधर्मस्य आचार्याश्च प्रवर्तका: ॥ ३० ॥

एकायनोक्तधर्मस्य कृतयुगप्राचुर्यमाह-**आद्यम्** इति ।

त्रेतायुगादिषु प्राचुर्याभावमाह- **तत:** इति ।

अन्तर्हितधर्मं पुनरपि भगवानेव प्रकाशयतीत्याह-**अन्तर्दधाति** इति ।

एष मूलवेद: श्वेतद्वीपे स्वेनाधीत इत्याह-**एवम्** इत्यर्धेन। ब्रह्मण: पुत्रा अप्येतद्धर्मनिष्ठा इत्याह-**सन:** इत्यादिना सार्धेन ।

[मरीच्यादिभिर्मूलवेदाध्ययनं शास्त्ररचनं च]

मरीचिरत्र्यङ्गिरसौ पुलस्त्य: पुलह: क्रतु: ।
वसिष्ठश्च महातेजा एते चित्रशिखण्डिन: ॥ ३१ ॥
मनु: स्वायम्भुवश्चापि समाराध्य जगत्पतिम् ।
महता तपसा चैव देवं नारायणं प्रभुम् ॥ ३२ ॥
दिव्यं वर्षसहस्रं तु तदन्ते समधीत्य च ।
मूलश्रुतिं यथावच्च ऋषयोऽध्यापितास्तु ते ॥ ३३ ॥

मरीच्यादयोऽप्यष्टौ महाप्रयत्नेन भगवतो मूलवेदमधीत्यान्यांश्चाध्यापितवन्त इत्याह-**मरीचि:** इत्यादिभिस्त्रिभि: श्लोकै: ।

ततस्ते ऋषयस्त्वष्टौ लोकानां हितकाम्यया ।
श्लोकानां शतसाहस्रैर्मूलवेदं निरीक्ष्य च ॥ ३४ ॥

26-30. Those men who were qualified, observe constantly the foremost Bhāgavatadharma[55] in the first Kṛtayuga. Then all (of them) who were completely possessed of all (kinds of) likings (desires) for the objects of the world became worshippers in a mixed way and left off the ancient eternal *dharma* (*sanātana*). All this (*dharma*) disappear, withdrawn by Vāsudeva. Then Bhagavān Himself makes it (*dharma*) appear to him who is qualified (fit). O great sages! This (*dharma*) was thus[56] learnt formerly by me in the Śvetadvīpa.[57] Sana, Sanatsujāta, Sanaka, Sanandana, Sanatkumāra, Kapila, Sanātana the seventh — these are the teachers[58] and promulgators of the Ekāntidharma.[59]

(*Study of Mūlaveda by Marīci and others and compilation of the Śāstra*)

31-35. Marīci, Atri, Aṅgiras, Pulastya, Pulaha, Kratu and Vasiṣṭha of great splendour, these are Citraśikhaṇḍins.[60] Svāyambhuva Manu[61] too worshipped the lord of the worlds, the powerful Lord Nārāyaṇa with severe penance for divine[62] one thousand years and studied well, at the end of it (period) the *Mūlaśruti*. Those sages were taught (this Veda) as it was (learnt). O Twice-borns! Then those eight sages found the Mūlaveda (containing) hundred thousands of *ślokas* and noticed carefully, likewise

55. *bhāgavatadharma: prakṛtidharma*, primary *dharma*. This is enjoined in the Sātvata system, the duty or worship of Bhagavān who is none else than Nārāyaṇa.
56. described thus above.
57. Śvetadvīpa: Nārada's visit to this island is described in Mbh. Śānti. CCCXXXVII-CCCXXXIX. This is said to be located in Central Asia near Pamir mountains. Geologists hold that the area to the north of Himālayas was a sea in the remote past. Perhaps, the Śvetadvīpa was an island there.
58. Pāram-s I.59.
59. *Ekānti: eka + anti; eka*: one, *anti*: having a settled opinion (*anta*). *Ekānti* is one who has abiding faith in Nārāyaṇa alone. For details see Mbh. Śānti. Ch. CCCLXXXIII.
60. *citraśikhaṇḍinaḥ*: bright crested; vide: Mbh. Śānti. CCCXL.III.28-52. Curiously enough, these seven sages are stated as the pupils of Vikhānas; vide: Vimānārcanakalpa, introduction P. 5.
61. Svāyambhuvamanu: Manu represents man and is the father of the human race. A *Manvantara* is a period of 4320000 years presided over by a Manu. Svāyambhuva Manu was the first and he was followed by Svārociṣa, Auttami, Tāmasa, Raivata and Cākṣuṣa. Vaivasvata Manu presides over the present *Manvantara* which would be followed by seven more in future, thus making the total number of *Manvantaras* fourteen which makes up one day of Brahmā. For details see VP. III. Ch. 1&2.
62. *divyaṃ varṣasahasram*: One thousand divine years. One divine year is equivalent to 360000 years of man. cf. VP. I.3.10.

तथा दिव्यानि शास्त्राणि सात्वतादीनि चादरात् ।
निरीक्ष्यान्यत् तु तन्त्राख्यं शास्त्रं विदधिरे द्विजा: ॥ ३५ ॥

तैर्मुनिभिर्लोकानुग्रह: कृत इत्याह- **तत:** इत्यादिना श्लोकद्वयेन । एवमेवोक्तं पारमेश्वरेऽपि - ''ततस्ते ऋषयस्त्वष्टौ लोकानां हितकाम्यया । श्लोकानां शतसाहस्रैर्मूलवेदं निरीक्ष्य च । तथा दिव्यानि तन्त्राणि सात्वतादीनि चक्रिरे । अन्यच्छास्त्रं तु तन्त्राख्यम्'' (२.६३-६४) इति । अस्यार्थ: - ते मरीच्यादयोऽष्टावृषयो, मूलवेदं तथा सात्वतादीनि तन्त्राणि च निरीक्ष्य लोकहितार्थं लक्षग्रन्थमितं तन्त्राख्यं शास्त्रं कृतवन्त इत्यर्थ: । पारमेश्वरव्याख्यातारस्तु क्रियापदस्योपरि स्थितम् 'अन्यच्छास्त्रं तु तन्त्राख्यम्' इति कर्मपदमनालोच्य 'सात्वतादीनि चक्रिरे' इति योजनां भ्रमेण चक्रिरे । लोके प्राचुर्यं कृतवन्त इत्यर्थ: । तेषां लुप्तप्रायत्वादिति भाव: । अन्यथा प्रोक्तं भगवता स्वयमिति पूर्वोक्तविरोध: स्यादिति व्याख्याय 'अन्यच्छास्त्रं तु तन्त्राख्यम्' इत्यस्याप्युत्तरश्लोकेष्वेव योजनां चक्रु: ।

[अस्य वेदस्य सकलशास्त्रयोनित्वं तथा चतुर्विधपुरुषार्थसाधनत्वम्]

एवं मूलश्रुतेरर्थान् ज्ञात्वा मन्वादयोऽपि च ।
धर्मशास्त्राण्यनेकानि करिष्यन्ति यथातथम् ॥ ३६ ॥
अन्येषामपि शास्त्राणां योनिरेतद्भविष्यति ।
अस्मिन् धर्मश्च कामश्चार्थश्चोक्त: सविस्तरम् ॥ ३७ ॥
मोक्षश्च सूचित: पश्चात्तस्मात्सारतमो ह्ययम् ।

अस्य सकलशास्त्रयोनित्वं चतुर्विधपुरुषार्थसाधनत्वं चाह- **एवम्** इति सार्धद्वाभ्याम् । ननु मोक्षैकसाधन-भूतेऽस्मिन् शास्त्रे कथमर्थकामादिविस्तरोक्तिरिति चेत्; सत्यम् । ''प्रत्ययार्थं च मोक्षस्य सिद्धय: सम्प्रकीर्तिता:'' इत्युक्तमेव । अस्य सकलशास्त्रयोनित्वं महाभारतेऽप्युक्तं नारायणीये - ''इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम् । ऋग्यजु:सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा ॥ भविष्यति प्रमाणं वै एतदेवानुशासनम् । एतद्धि सर्वशास्त्राणां शास्त्रमुत्तमसंज्ञितम् ॥ पञ्चरात्रमितिख्यातं नारायणमुखोद्गतम् । अस्मात् प्रवक्ष्यते धर्मान् मनु: स्वायम्भुवोऽपि च ॥ अन्येषां धर्मशास्त्राणामेतद्योनिर्भविष्यति ।'' (महाभा० १२.३२२) इति ।

Sātvata and other divine systems. O Twice-borns! They composed another *Śāstra* called Tantra[63] with a desire to do good to the worlds.

(This Veda as the source for all systems and as accomplishing the fourfold pursuits of men)

36-37. Manu and others too will learn the sense (substance) of the *Mūlaśruti* thus (described) and produce exactly many Dharmaśāstra texts. This (Mūlaveda) will become the source of other *Śāstras* as well. *Dharma, kāma* and *artha* are dealt with (here) in detail.

38a. *Mokṣa* is indicated later[64] and therefore this is the very best (among the *Śāstras*).

63. Tantra and Āgama have slight difference in their connotations. The former is concerned more with the realisation by the self that it has all the potentiality (*śakti*) within itself, the latter gives more importance to the understanding of the external world also and worship of the deity both internally and externally.

It is stated here that the eight sages noticed the divine Śātvata Sāstra and produced another *Śāstra* called *Tantra.* The words *divyāni śāstrāṇi sātvatādīni* should mean the divine kind of Sātvata texts like *Sātvata, Pauṣkara* and *Jayākhya.* The words *anyat tantrākhyaṃ śāstram* must be taken to mean that a different text was composed by them. This is given the name *Tantra.* The word *Śāstra* here and in the previous line should mean a text and not a system distinct and different from the Pāñcarātra. But a text with the name *Tantra* is not known to have existed. Besides, did all the eight sages produce it or only one among them? There are of course some Pāñcarātra texts, whose names are associated with the names of those sages. See Introduction to LakṣmīTantra, Adayar Ed. PP. 10-13. See H.D. Smith: Pāñcarātra Catalog for a fragment of the *Citraśikhaṇḍisaṁhitā*, PP. 28-29. There is no evidence to show that this was written by all or one among the *Citraśikhaṇḍins.*

64. The topic of *mokṣa* is stated here to have got treated later (*paścāt*). This is stated to have been indicated (*sūcita*). Yet, it must be noted that here treatment is given primarily to the topics of *trivarga* (*dharma, artha* and *kāma*). The purpose of this must be the need for man to pursue the *trivarga* by worshipping God and lead a prosperous life consistent with the ideals of this Āgama. Release could be thought later in life.

[शाण्डिल्येनैतद्वेदाध्ययनमध्यापनं च]

पुरा तोदाद्रि[८] शिखरे शाण्डिल्योऽपि महामुनिः ॥ ३८ ॥
समाहितमना भूत्वा तपस्तप्त्वा महत्तरम् ।
अनेकानि सहस्राणि वर्षाणां तपसोऽन्ततः ॥ ३९ ॥
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ।
साक्षात् सङ्कर्षणाल्लब्ध्वा वेदमेकायनाभिधम् ॥ ४० ॥
सुमन्तुं जैमिनिं चैव भृगुं चैवौपगायनम् ।
मौञ्जायनं च तं वेदं सम्यगध्यापयत् पुरा ॥ ४१ ॥

पूर्वं शाण्डिल्योऽपि सङ्कर्षणादेतद्वेदमधीत्य सुमन्तुप्रभृतीन् स्वशिष्यानध्यापयामासेइत्याह-**पुरा** इत्यादिभिः सार्धैस्त्रिभिः । एवमेवोक्तं पारमेश्वरेऽपि ।

नरनारायणाभ्यां च जगतो हितकाम्यया ।
तथाऽनुष्ठीयते मूलधर्मोऽत्र मुनिपुङ्गवाः ॥ ४२ ॥

नरनारायणावपि मूलधर्माधिकारिणावित्याह-**नर** इत्यादिना ।

[अस्य वेदस्य प्रतिबुद्धनिषेव्यत्वम्]

एष एकायनो वेदः प्रख्यातः सर्वतो भुवि ।
दुर्विज्ञेयो दुष्करश्च प्रतिबुद्धैर्निषेव्यते ॥ ४३ ॥

[मन्दाधिकारिणामनुग्रहार्थं प्रश्नः]

मुनयः -
भगवन् सर्वशास्त्रज्ञ शरणागतवत्सल ।
त्वत्प्रसादेन सम्प्राप्तो मूलवेदो महानयम् ॥ ४४ ॥
तत्प्रभावश्च विदितः सर्वलोकेषु पूजितः ।
प्रतिबुद्धैर्निषेव्योऽयं मूलवेदः सनातनः ॥ ४५ ॥
कथमप्रतिबुद्धैस्तैर्मग्नैर्भवमहाम्बुधौ ।
प्राप्यते भगवन् धर्म एकान्तिभिरनुष्ठितः ॥ ४६ ॥

८. तोदाद्रिः - D, E

(*Śāṇḍilya's study of this Veda and his teaching of it*)

38b-41. The great sage Śāṇḍilya did severe penance formerly on the peak of *Todādri*[65] with a composed mind. At the end of the penance (which lasted) for many thousands of years, he acquired the Veda called Ekāyana directly from Saṃkarṣaṇa at the end of the Dvāparayuga and beginning of the Kaliyuga. And he taught, during (that) early period that Veda in the correct manner (fully) to Sumantu, Jaimini, Bhṛgu, Aupagāyana and Mauñjāyana.[66]

42. O eminent sages! The basic *dharma* is here practised in that way by Nara and Nārāyaṇa with a desire to do good to the world.

(*Adoption of this Veda by the enlightened*)

43. This Ekāyana Veda, which is well-known all over the world, is hard to know and difficult to practice, is followed by the enlightened.

(*Question about the benefit by the study of this Veda for those who are of weak equipment*)

44-46. Sages: O Venerable Sir! Learned in all the *Śāstras*! Affectionate to those who resort (you) for security (or protection). This huge basic Veda has been acquired (by us) through your favour. Its glory is known and respected in all the worlds. This ever-lasting basic Veda is fit to be pursued by the enlightened. O Bhagavān! How can those, who are not enlightened and are drowned in the huge sea of worldly existence, acquire this *dharma* which is practised by the Ekāntins?

65. Todādri is the name of Vānamāmalai in the Tirunelveli district of Tamilnadu. The reading Todādri seems to be correct, as it means a hill which gives pain that is, drives away the sins and sufferings of devotees of God. This place is wronly spelt as Jatādri.

66. These names are given in Pāram. s I, 72b-73a; IS. XXI.519-533 gives the names as Śāṇḍilya, Aupagāyana, Mauñjyāyana, Kauśika and Bhāradvāja.

[सङ्कर्षणादिभिरस्य शास्त्रस्य प्रवर्तनम्]

नारदः -
श्रूयतामभिधास्यामि सर्वलोकहितैषिणः ।
पुरैवं भगवानेव समालोच्य हरिः स्वयम् ॥ ४७ ॥
परित्यज्य परं धर्मं मिश्रधर्ममुपेयुषाम् ।
भूयस्तत्पदकाङ्क्षाणां श्रद्धाभक्ती उपयेयुषाम् ॥ ४८ ॥
अनुग्रहार्थं वर्णानां योग्यताऽऽपादनाय च ।
तथा जनानां सर्वेषामभीष्टफलसिद्धये ॥ ४९ ॥
मूलवेदानुसारेण छन्दसाऽऽनुष्टुभेन च ।
सात्वतं पौष्करं चैव जयाख्येत्येवमादिकम् ॥ ५० ॥
दिव्यं सच्छास्त्रजालं तदुक्त्वा सङ्कर्षणादिभिः ।
प्रवर्तयामास भुवि सर्वलोकहितैषिभिः ॥ ५१ ॥

अस्यैकायनवेदस्य प्रतिबुद्धनिषेव्यत्वमाह-**एषः** इत्यादिना ।

मुनयः पुनरपि मन्दाधिकारिणामनुग्रहाय पृच्छन्ति-**भगवन्** इति त्रिभिः ।

इममर्थं पुरा भगवानेव समालोच्य मिश्रयाजिनामनुग्रहाय सात्वतादीन्युक्त्वा सङ्कर्षणादिभिः प्रवर्तयामासेत्याह-**श्रूयताम्** इत्यादिपञ्चभिः ।

एवं दिव्यानि शास्त्राणि शाण्डिल्योऽपि महामुनिः ।
सङ्कर्षणाद्भगवतः श्रुत्वा[१] चाध्यापयन्मुनीन् ॥ ५२ ॥
मलयाचलनिष्ठाश्च पुरा रामस्य चाज्ञया ।
प्रथमं सात्वतं शास्त्रं सम्यगध्यापिता मया ॥ ५३ ॥

शाण्डिल्योऽपि सङ्कर्षणात् सात्वतादीनि श्रुतवानित्याह-**एवम्** इत्यादिना । अनेन नारदःसाक्षाद्वासुदेवादेव सात्वतादिकमधीतवानिति ध्वन्यते । तथा स्पष्टमेवोक्तं पारमेश्वरे-"नारदोऽपि पुरा चैतदपि सङ्क्षेपतो विभोः । क्षीरोदशायिनो देवात् साक्षात् संश्रुतवान्द्विज ॥" (१. ९४) इति ।

पूर्वं सङ्कर्षणाज्ञया मलया-चलनिष्ठेभ्योऽपि स्वेन सात्वतमुपदिष्टमित्याह-**मलयाचल** इत्यादिना । अयमर्थः सात्वते प्रथमपरिच्छेदे स्पष्टः ।

१. श्रुत्वा - D, E

(*Propagation of this Śāstra by Saṃkarṣaṇa and others*)

47-51. Nārada: Listen O (sages!) Wishing for the good of all the worlds. I shall tell (the answer to your question). The Lord Hari Himself reflected thus (on this matter) formerly. He said (communicated) the divine collection of the good *Śāstra* Sātvata, Pauṣkara, Jayākhya and others (like these) which are in conformity with the basic Veda composed in *Anuṣṭubh*[66a] metre for the sake of people who had given up the supreme *dharma* and had taken to the mixed *dharma*, who are again desirous to get at His feet and are endowed with faith and devotion. (He propagated) for favouring the members of the castes and to provide them with fitness (to pursue this *dharma*) and likewise for the realisation of the desired result by all the people. Then he propagated it in the world by Saṃkarṣaṇa and others who wish for the welfare of all the worlds.

52-53. The great sage Śāṇḍilya too, learnt thus (described as above) the divine *Śāstras* from Bhagavān Saṃkarṣaṇa and taught them to the sages. The sages who were staying in the Malaya mountain[67] were formerly taught well the foremost Sātvata *Śāstra* by me at the order of Rāma.[68]

66a. Anuṣṭubh: name of a metre in which the four quarters of a *śloka* are composed with eight syllables in each quarter.

67. Malaya mountain is hard to identify in the present day. Perhaps, it refers to the range of hills lying on the borders of Kerala and Karnataka states which abounds in sandal wood trees.

68. Rāma is identified by the commentator with Balarāma who is the same as Saṃkarṣaṇa from whom Nārada learnt the Pāñcarātra system.

The *Sātvatasaṁhitā*, however, on which the *Īśvarasaṁhitā* is held to be based, mentions Paraśurāma as having directed Nārada to give instructions to the sages; vide: SS. I.3.

jñātvā tasyācalāṃ bhaktiṃ devaḥ paraśulāñchanaḥ /

pratyakṣatāṃ jagāmāśu sānukampena cetasā //

[दिव्यशास्त्रेष्वस्य श्रेष्ठत्वनिरूपणम्]

वासुदेवेन यत् प्रोक्तं शास्त्रं भगवता स्वयम् ।
अनुष्टुप्छन्दोबद्धेन समासव्यासभेदतः ॥ ५४ ॥
तथैव ब्रह्मरुद्रेन्द्रप्रमुखैश्च प्रवर्तितम् ।
लोकेष्वपि च दिव्येषु तद्दिव्यं मुनिसत्तमाः ॥ ५५ ॥
ब्रह्मरुद्रमुखैर्देवैर्ऋषिभिश्च तपोधनैः ।
स्वयं प्रणीतं यच्छास्त्रं तज्ज्ञेयं मुनिभाषितम् ॥ ५६ ॥

दिव्यशास्त्रे श्रैष्ठ्यनिरूपणार्थं दिव्यमुनिभाषितस्वरूपमाह-**वासुदेवेन** इति त्रिभिः ।

[सात्त्विकशास्त्रस्वरूपम्]

एतत् तु त्रिविधं तद्धि सात्विकादिविभेदतः ।
विज्ञाय पुण्डरीकाक्षादर्थजातं यथास्थितम् ॥ ५७ ॥
तद्बोधकं प्रणीतं यच्छास्त्रं तत् सात्त्विकं स्मृतम् ।

[राजसशास्त्रस्वरूपम्]

तस्माज्ज्ञातेऽर्थजाते तु किञ्चित्तदवलम्ब्य च ॥ ५८ ॥
स्वबुद्ध्युन्मेषितस्यैव ह्यर्थजातस्य बोधकम् ।
यत् प्रणीतं द्विजश्रेष्ठा[११] तथा विज्ञानतत्त्वतः ॥ ५९ ॥
ग्रन्थविस्तरसंयुक्तं शास्त्रं सर्वेश्वरेश्वरात् ।
तत्सङ्क्षेपप्रवादेन[१२] स्वविकल्पविजृम्भणैः ॥ ६०
ब्रह्मादिभिः प्रणीतं यत् तथा तदृषिभिर्द्विजाः ।
ब्रह्मादिभिः परिश्रुत्य तत्सङ्क्षेपात्मना पुनः ॥ ६१ ॥
स्वविकल्पात् प्रणीतं यत् तत् सर्वं राजसं स्मृतम् ।

१०. विद्धि - B
११. पुण्डरीकाक्षो - E
१२. प्रसादेन

(This Śāstra is shown to be the best among the divine Śāstras)

54-55. That *śāstra*, which the Lord Vāsudeva Himself uttered and composed briefly in *Anuṣṭubh* metre and (also) elaborately was propagated in the same way by Brahmā, Rudra, Indra and others. O eminent sages! That is divine (*śāstra*) in the divine worlds also.

56. That *śāstra*, which was composed by gods, Brahmā, Rudra and others and sages rich in austerities by themselves is to be taken as uttered by the sages.

(Form of Sāttvika Śāstra)

57-58a. This *śāstra* is of three kinds. Know it to have the divisions Sāttvika and others and as having their contents, as they are, to have sprung from Puṇḍarīkākṣa. That *śāstra* is held to be Sāttvika which was composed conveying that (those) contents.

(Form of Rājasa Śāstra)

58b-62a. O best among the twice-borns! (that which is Rājasa) is composed basing it (contents) slightly on the matters known to be in that *śāstra* (Sāttvika). It conveys the matters included (within it) and formed on the strength of its (author's) imagination. That *śāstra* is composed true to the right knowledge (as obtained therefrom) and (listened to) from the Lord of the Lords as an elaborate work and composed in brief expressions by Brahmā and others developing it in a variety of ways and likewise O twice-born ones, by sages. All that is considered as Rājasa, which was composed in various forms by Brahmā and others after hearing it (from Nārāyaṇa) and again condensing it.[69]

69. This *Saṁhitā* does not mention any text that was promulgated by Brahmā, Rudra, Indra and sages. It will not be wrong to cite in this context the *Sanatkumārasaṁhitā*, which contains four divisions each called *rātra* with the names Brahma, Śiva (Rudra), Indra and sages. Bṛhaspatirātra is supposed to have formed part of this text but not extant now. However, it is possible to treat the following texts as conforming to the classification stated here:

The Rātratraya is the group of texts revealed by God. *Paramasaṁhitā* and *Pādma* may be added to this list. Śrī teaches the system to Indra in the *Lakṣmītantra*. Bhagavān's discourse to Śrī is found in the *Śrīpraśnasaṁhitā*. Brahmā's teachings to Vasiṣṭha and Viśvāmitra are recorded in the *Vāsiṣṭhasaṁhitā* and *Viśvāmitrasaṁhitā* respectively. The *Ahirbudhnyasaṁhitā* contains Rudra's discourse with his name Ahirbudhnya to Nārada in the *Ahirbudhnyasaṁhitā*. Nārada, Sanaka, Sumati and Śāṇḍilya describe the Pāñcarātra tenets to different sages in the *Īśvara*, *Parama*, *Viṣṇu* and *Śāṇḍilya Saṁhitās* respectively.

For a treatment of the texts classified under the various categories see PR. PP. 69-70.

तत् स्याद् द्वेधा पञ्चरात्रवैखानसविभेदतः ॥ ६२ ॥

[तामसशास्त्रस्वरूपम्]

केवलं स्वविकल्पोक्तैः कृतं यत् तामसं स्मृतम् ।

[पौरुषेयशास्त्रस्वरूपम्]

केवलं मनुजैर्यत् तु कृतं तत् पौरुषं स्मृतम् ॥ ६३ ॥

मुनिभाषितत्रैविध्यं दर्शयन् सात्विकशास्त्रस्वरूपमाह-**एतत्तु** इति सार्द्धेन ।

राजसशास्त्रस्य त्रैविध्यं पुनरपि पञ्चरात्रवैखानसभेदेन द्वैविध्यं चाह-**तस्मात्** इत्यादिभिः सार्धैश्चतुर्भिः।

तामसस्वरूपमाह-**केवलम्** इत्यर्धेन ।

पौरुषस्वरूपमाह-**केवलम्** इत्यर्धेन । न चात्र राजसतामसव्यवहारतः क्वचिदप्यप्रामाण्यमाशङ्कनीयम्। सत्वरजस्तमःप्रचुरतत्तत्फलसिद्धिविशेषतारतम्याभिप्रायेण सात्विकादि-व्यवहारः । अयमेवार्थः पाञ्चरात्ररक्षायां विस्तरेण निर्णीतः ।

[सात्त्वतादिदिव्यशास्त्रमाहात्म्यम्]

अतो दिव्यात् परतरं नास्ति शास्त्रं मुनीश्वराः ।
सात्वतं पौष्करं चैव जयाख्यं च तथैव च ॥ ६४ ॥
एवमादीनि दिव्यानि शास्त्राणि हरिणा स्वयम् ।
मूलवेदानुसारेण प्रोक्तानि हितकाम्यया ॥ ६५ ॥

[सात्त्वतादितन्त्रत्रयस्य स्थानत्रयनैयत्यम्]

सात्वताद्यं त्रिकं चैतद्व्यापकं मुनिसत्तमाः ।
यथा चाष्टाक्षरादीनां मन्त्राणां त्रितयं बुधाः ॥ ६६ ॥
एतत्तन्त्रत्रयोक्तेन विधिना यादवाचले ।
श्रीरङ्गे हस्तिशैले च क्रमात् सम्पूज्यते हरिः ॥ ६७ ॥

दिव्यशास्त्रमाहात्म्यमाह-**अतः** इति द्वाभ्याम् । उक्तं खलु पाञ्चरात्ररक्षायां वेदान्ताचार्यैः - "भगवन्मुखोद्गततया रत्नत्रयम्"(पाञ्चर० अधि० २, पृ. ४७)इति प्रसिद्धानि सात्वतपौष्करजयाख्यानीति।

एतत्सात्वतादितन्त्रत्रयस्य मूलमन्त्रादिवद्व्यापकतया सर्वस्थानार्हतायामपि तदनुरूपस्थानत्रयनैयत्यमाह-**सात्वताद्यम्** इति द्वाभ्याम् । ननु श्रीयादवाचलरङ्गनाथयोः सात्वतपौष्करोक्तरीत्याऽऽराधनादिकमुपलभ्यते । हस्तिशैले तु पाद्मोक्ताचाराणामेव प्राचुर्यं ज्ञायते । तत् कथम् ? इति चेद् ब्रूमः । इदं सात्वतपौष्करजयाख्यतन्त्रत्रयं मूलवेदस्य सूत्ररूपम्, ईश्वरपारमेश्वरलक्ष्मीतन्त्राख्यतन्त्रत्रयं क्रमेण तेषां वृत्तिरूपम् । तत्रेश्वरपारमेश्वरयोरुत्सवादीनां पौष्कल्यमस्ति । लक्ष्मीतन्त्रे तु तन्नास्ति । अतः 'अनुक्तमन्यतो

62b. It is of two kinds with the divisions into Pāñcarātra and Vaikhānasa.[70]

(*Form of Tāmasa Śāstra*)

63a. That is held to be Tāmasa, which is composed by a writer merely on the basis of his own findings.

(*Form of the śāstra of human origin*)

63b. That is considered to be of human origin which is produced merely by men.

(*Greatness of the divine śāstra like Sātvata*)

64-65. O eminent sages! Therefore there is no *śāstra* superior to the divine (*śāstra*) Sātvata, Pauṣkara and Jayākhya. The divine systems like these were uttered by Hari Himself following the original Veda (Ekāyana) wishing for the well-being (of the world).[71]

(*Regulated distribution of the three systems Sātvata and others among the three places*)

66-67. O best sages! The (group of the) three (*śāstras*) Sātvata and others are comprehensive, O learned men! like the three mantras[72] Aṣṭākṣara and

70. Here the Vaikhānasa system is stated to be of the Rājasa kind of the Śātvata Śāstra. This may be conceded, since the four well-known Vaikhānasa texts are the compositions of Atri, Marīci, Bhṛgu and Kāśyapa, the sages steeped in their devotion to Viṣṇu and strict adherents of the directions preached by sage Vaikhānasa.

    A reference could be made here to the fivefold classification of the followers of the Viṣṇu cult. They are Vaikhānasa, Sātvata, Śikhin, Ekāntika and Mūlaka; vide: VS. II.266.267a. Other texts on the Pāñcarātra refer to Vaikhānasas 1; vide: JS. XX.266b; XXI.78a; XXII.13b-15a; SKS. Brahma. V.25.

    Though there is mention of the Vaikhānasa in this context, this same text ĪS refers to the Vaikhānasa system as inferior and to be shunned while performing the rituals. ĪS XIX.135b, 136; other texts also contain similar unkind references to the Vaikhānasṛāgamas. XIX.373-374; Pād. s. IV.18, 113.

71. The commentator Alaśiṅgabhaṭṭa observes correctly that the classification of the texts into Sātvika, Rājasa and Tāmasa kinds does not affect their validity. This classification suggests only the relative nature of the results that are obtained by following them. A text of human origin has its own merits with few disadvantages; vide: PR. P. 43.

72. The three all-comprehensive mantras are Aṣṭākṣara, Ṣaḍakṣara and Dvādaśākṣara which are respectively *Oṃ namo nārāyaṇāya, Oṃ namo viṣṇave* and *Oṃ namo bhagavate vāsudevāya*. Aṣṭākṣara and Dvādaśākṣara are the only two Mūlamantras according to SKS. Brahma. IX.106-11a.

ग्राह्यम्' इत्युक्तरीत्या हस्तिशैलनाथार्चकैः पाद्मोक्तानामुत्सवाद्याचाराणां परिग्रहः कृत इति सूक्ष्मदृष्ट्या द्रष्टव्यमायुष्मता । अपि च जयाख्यसंहितायामेव जयाख्यस्य व्याख्यानं पाद्ममिति पठितम् (पृ० ८)।

[सात्त्वतसंहितायाः श्रेष्ठत्वम्]

एतेषु दिव्यशास्त्रेषु सात्वतं तूत्तमोत्तमम् ।
वक्ता साक्षादीश्वरोऽस्य श्रोता सङ्कर्षणः प्रभुः ॥ ६८ ॥
किं वर्ण्यतेऽस्य माहात्म्यं सात्वतस्य मुनीश्वराः ।

others. Hari is worshipped at Yādavācala,[73] Śrīraṅga[74] and Hastigiri[75] respectively according to the rules laid down in these three Tantras.

(*Superiority of the Sātvata Saṁhitā*)

68-69a. Yet, the Sātvata (system) is the very best among these divine systems for which the lord Himself is the speaker and the Lord Saṃkarṣaṇa is the listener. O great sages! Is it possible to speak of the greatness of this Sātvata (system)?

73. Yādavācala: Melkote in the Karnataka state where the *Īśvarasaṁhitā* is adopted for the worship of God Śrī Sampatkumāra in the shrine there. This text is based on the *Sātvatasaṁhitā*, one of the ratnatraya, three gems, as it were, on the most ancient principal texts of the Pāñcarātra.

74. Śrīraṅgam: The most important shrine for the Vaiṣṇava community. The temple, where the deity is called Śrī Raṅganāthasvāmin, is situated here on the banks of the river Kāverī. The *Pārameśvarasaṁhitā*, which is based on the *Pauṣkarasaṁhitā*, one of the three principal texts of Pāñcarātra, is adopted here for worship.

75. Hastigiri: Kāñcīpuram. The deity is called Śrī Varadarājasvāmin whose temple is situated on the Hastigiri, really not a hill but a raised mound, may be taken as a hillock. Elephants are stated to have adored this deity in this hill and hence the name of the place.

The *Jayākhyasaṁhitā*, one of the principal texts called ratnatraya, is held to be attached to this temple for worship. The *Pādmasaṁhitā*, which is based on the *Jayākhyasaṁhitā*, is now followed for the worship of this deity. The *Jayākhyasaṁhitā* is also followed by some priests of this temple. Alaśiṅgabhaṭṭa makes a curious statement that the *Lakṣmītantra*, a Pāñcarātra text, is based on the *Jayākhyasaṁhitā*. This text does not deal with the ways and means of temple worship and therefore the *Pādmasaṁhitā* is adopted here. There is no evidence available in support of this interpretation.

The *Jayākhyasaṁhitā* contains 163 1/2 *ślokas* in Chapter-I which are evidently interpolated later. Herein the *Pādmasaṁhitā* is stated (p. 8) to be a commentary upon the *Jayākhyasaṁhitā*.

[निगमनम्]

अत: साक्षादीश्वरोक्तशास्त्राणां द्विजपुङ्गवा: ॥ ६९ ॥
सारभूतं विशेषेण सात्वतार्थोपपादकम् ।
ऐश्वराख्यमिदं तन्त्रं साक्षात् सङ्कर्षणाच्छ्रुतम् ॥ ७० ॥
सम्प्रवक्ष्यामि मुनय: शृणुध्वमवधानत: ।
इत्युक्त्वा नारदो योगी नत्वा नारायणं प्रभुम् ॥ ७१ ॥
सङ्कर्षणं नमस्कृत्य वक्तुं समुपचक्रमे ।

त्रिष्वपि विशेषत: सात्वतसंहिताया: श्रैष्ठ्यमाह-**एतेषु** इति सार्धेन ।

तादृशसात्वतादिदिव्यशास्त्रसारभूतं विशेषेण सात्वतार्थप्रतिपादकं स्वेन सङ्कर्षणाच्छ्रुतमैश्वराख्यं तन्त्रं शृणुध्वमित्युक्त्वा निर्विघ्नोपदेशसिद्ध्यर्थं प्रथमाचार्यं नारायणमेतत्तन्त्रोपदेष्टारं सङ्कर्षणं च प्रणम्य वक्तुमुपचक्रने-त्याह-**अत:** इत्यादिभिस्त्रिभि: । ऐश्वराख्यमिदं तन्त्रम् इत्यत्रेश्वरो भगवान् वासुदेवस्तस्येदमैश्वरम् । एवं चेश्वरकर्तृकसात्वतपौष्करादिदिव्यशास्त्रवचनानामेवात्रोक्तत्वात्; अस्येश्वरतन्त्रवव्यवहार इति ज्ञेयम् । तथा पारमेश्वरम् इत्यत्राप्ययमेवार्थो बोध्य: । वस्तुतस्त्विदमीश्वरतन्त्रं पारमेश्वरस्यापि प्राचीनमिति ज्ञायते । यत: परमेश्वर एव दशमेऽध्याय- "संहिता चेश्वरस्यापि भारद्वाजस्य संहिता । सौमन्तवी तथा ह्येतत् पारमेश्वरसंज्ञितम् ॥" (३७७-३७८) इत्युक्तम् । यतश्चैतदीश्वरतन्त्रोक्तवाक्यसन्दर्भादय एव बहुश: पारमेश्वरेऽपि दृश्यन्ते ॥

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां शास्त्रावतारो नाम प्रथमोऽध्याय: ॥

॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य
यदुगिरीशचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन श्रीअळशिङ्गभट्टेन विरचितायां
सात्वतार्थप्रकाशिकाख्यायामीश्वरतन्त्रव्याख्यायां प्रथमोऽध्याय: ॥

(*Conclusion*)

69b-72a. O best among the twice-borns! O sages! I will tell (you) this system called Aiśvara[76] which was heard (by me) directly from Saṃkarṣaṇa—which is therefore the essence of the systems uttered by the Lord in person and which contains particularly the contents (matters) of the Sātvata (system). Listen to me with attention. The Yogin Nārada said this, bowed to Lord Nārāyaṇa, paid obeisance to Saṃkarṣaṇa and began to narrate (the matters of the system).

Thus (ends) the first chapter called the Rise of the śāstra in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra.*

76. *Aiśvara: īśvarasya idam,* belonging to Īśvara, who is identical with Nārāyaṇa.

द्वितीयोऽध्यायः

मानसयागविधिः

[पाञ्चकालिकधर्मोपदेशः]

नारदः -

आराधनविधिं वक्ष्ये शृणुध्वं मुनिपुङ्गवाः ।

[ब्राह्ममुहूर्तादारभ्य देशिकस्य कर्तव्यम्]

ब्राह्मे मुहूर्ते सम्प्राप्ते मन्त्रज्ञः प्रयतः शुचिः ॥ १ ॥
नाम्नां सङ्कीर्तनं कुर्यादुत्थाय शयने स्थितः ।

अथ द्वितीयोऽध्यायो व्याख्यास्यते। आदौ तावन्मुमुक्षुभिर्भागवतोत्तमैरहरहरवश्यमनुष्ठेयान् भगवत्कैङ्कर्यरूपान्निखिलधर्मविलक्षणानभिगमनोपादानेज्यास्वाध्याययोगरूपान् पाञ्चकालिकधर्मान् मुनिभ्यः समुपदिदिक्षुः भगवान् नारदस्तान् प्रत्याराधनविधिं शृणुध्वमित्याह- **आराधन** इत्यर्धेन । अत्र पाञ्चकालिकधर्मेष्विज्यायाः प्राधान्येन केवलमाराधनोक्तिः ।

आदौ देशिकस्य ब्राह्ममुहूर्तप्रभृति कर्तव्यक्रममाह- **ब्राह्मे** इत्यादिश्लोकद्वयेन । अत्र काल्योक्तकर्माणि विनिवर्त्येति सङ्क्षेपेणोक्तम् । अतोऽत्रापेक्षिता भगवन्नामसङ्कीर्तनशौचाचमनदन्तधावनस्नानोर्ध्वपुण्ड्रधारणप्रकारादयो बहवो विशेषाः पारमेश्वरादिषु विस्तरेणोक्ता द्रष्टव्याः । अत्र यद्यपि पारमेश्वरोक्तः (२.९०-१०२) ''अङ्गुष्ठमूलं ब्राह्मं तु'' इति प्रक्रम्य ''ध्यात्वा नारायणं प्रभुम्'' इत्यन्तवैष्णवसन्ध्योपासनक्रमोऽप्यपेक्षितः तथापि तदुक्तप्रकारेणानुष्ठानादर्शनात्, स्वसूत्रोक्तमार्गेणैव सन्ध्यावन्दनादिकं कर्तुमुचितम्। तथा चोक्तं श्रीपाञ्चरात्ररक्षायां तृतीयेऽधिकारे (पृ. १२०) - ''तत्र यद्यप्यार्षी वैष्णवी प्राजापत्या'' इति त्रिविधाः सन्ध्योपास्तिभेदाः तत्तत्संहितासूच्यन्ते, तथापि तासां संहितानां लुप्तप्रायत्वेन तत्तत्प्रकाराणां दुर्ज्ञेयत्वात्पारमेश्वरपरमसंहितादिषु परिदृश्यमानसन्ध्योपासनप्रकारभेदानामपि यथावदुपदेशानुष्ठानपारम्पर्यासिद्धेः भगवच्छास्त्रसंहितास्वेव स्वसूत्रोक्त-संस्काराचाराभ्यनुज्ञानात् प्रथमपरिगृहीतपरित्यागे निर्बन्धाभावाद्यथासूत्रमनुष्ठानेऽपि भगवत्समाराधनत्वसिद्धेः स्वसूत्रविहितमेव सन्ध्योपास्त्यादिकं कर्तुमुचितम्। उक्तं हि नारदीये-

CHAPTER II

Direction for mental worship[1]

(Introduction of dharma connected with the fivefold division of time)

1a. Nārada: O eminent sages! I shall describe the method of worship.[2] Listen.

(Duty (to be attended to) of the preceptor beginning with Brāhmamuhūrta)

1b-2a. The preceptor who knows the mantra and is pious and pure shall get up (from bed) in the Brāhmamuhūrta[3] and utter the names of God remaining in the bed.

1. Mānasayāga: *yāga* — sacrifice. This word is derived from the root *yaj* to worship God. *Pūjā* is thus given a ritualistic import in the Āgamas suggesting the influence of Vedic ritualism.

   This is of two kinds, Antaryāga or Mānasayāga and Bahiryāga. This chapter is devoted fully to the performance of Mānasayāga which stands for mental worship: vide: *sarveṣāmeva yajñānāṃ mānasayāga uttamaḥ*, Pāram-s. IV.70b. The entire process of worship that is undertaken (called here as Bāhyayāga) is reflected as it were in the Mānasayāga. The latter offers to the priest that scope for purifying himself, cleaning the surroundings and doing the actual work of worship, all done in the realm of the mind. The mind and body of the priest become attuned to undertake the act of worship soon after this is over, thus avoiding distractions and disturbances that would otherwise affect the act of worship.

2. The routine of a day (including night) is divided in the Pāñcarātra system into five parts with the names *Abhigamana, Upādāna, Ijyā, Svādhyāya* and *Yoga*. *Abhigamana* is proceeding to the temple or place of worship in the house after attending to the bath. *Upādāna* is procuring the materials for worship which includes collecting flowers. *Ijyā* is the actual act of worship. This word is of Vedic origin and is a synonym of the word *yāga* and is used in the system indicating the influence of the concept of the Vedic rituals. *Svādhyāya* means study of the Vedas, Śāstras and others and preaching the *dharmas* from the Purāṇas and epics and also teaching the sacred texts to students according to their requirement. *Yoga* is meditation on God after evening prayers and taking food. It may lead to sleep. For details see JS.XXVI.68-74a.

   Here the word *Ārādhana*, which means *Ijyā* is used to show that worship of God is the most important duty which in individual should attend to everyday.

3. Brāhmamuhūrta: a particular part of the day between the fourth and second *ghaṭikās*; *ghaṭikā*—duration of twenty four minutes. The Brāhmamuhūrta would roughly correspond to the period 4.24 to 5.12 a.m..

परिच्युतमलः स्नातः शुद्धवासा जितेन्द्रियः ॥ २ ॥

"स्वसूत्रविहितांश्चापि निषेकादीन् समाचरेदित्यादीति । एवं स्वसूत्रोक्तरीत्या सन्ध्योपास्तिकरणेऽपि वैष्णवानां बहवो विशेषाः पाञ्चरात्ररक्षायां प्रदर्शिता द्रष्टव्याः । पारमेश्वरे सन्ध्यावन्दननिरूपणानन्तरं करशुद्धिसमोपेतम्(२.२०८)" इत्यारभ्य सार्धैरष्टभिः श्लोकैर्जलमध्ये भगवदर्चनक्रम उक्तः । स चात्रावश्यमपेक्षितः । सात्वते दशमे परिच्छेदे-

"सर्वदा सर्वसिद्धीनामाप्तये कमलेक्षण । तीर्थमध्ये स्वहृत्पद्मे बिम्बे वेद्यां स्थले तु वा ॥ वह्निगर्भे तु निर्धूमे नित्यमस्मिंश्चतुष्टये । मन्त्राणामर्चनं कुर्यात् सिद्ध्यर्थमपि मुक्तये ॥ स जलाञ्जलिपूरैस्तु तीर्थेऽथ हृदयाम्बुजे । भावनामृतजैर्भोगैर्मूर्तैरर्घ्यादिकैर्बहिः ॥ समित्सप्तकपूर्वैस्तु साज्यैर्वह्निगतं तिलैः । पूजयित्वा यथान्यायं प्रत्येकस्मिन् पदे क्रमात् ॥ संन्यासं सञ्चयं वापि कृत्वा सम्यक् कृतस्य वै । मन्त्ररूपानुकारिण्या मुद्रणीयं च मुद्रया ॥" (४४-४८) इति ।

तीर्थादिस्थानचतुष्टये प्रत्यहमाराधनावश्यकत्वोक्तेः । एतदनन्तरकर्तव्याभिगमनप्रकारस्तु जयाख्य - संहितायामुक्तः -

"ब्राह्मान्मुहूर्तादारभ्य प्रागंशं विप्रवासरे ।
जपध्यानार्चनस्तोत्रैः कर्मवाक्चित्तसंयुतैः ॥
अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतम् ॥"(२२.६८-६९) इति ।

पाद्मेऽपि - "कल्याणाचरणान्तं यत्कर्मजातं चतुर्मुख । उत्थानादिक्रमादेतदभियानमुदीरितम् ॥"

धृतोर्ध्वपुण्ड्रः काल्योक्तकर्माणि विनिवर्त्य च ।

अत्राभियानमभिगमनमित्यर्थः ; "या प्रापणे" इति धातोः । कल्याणाचरणन्नाम, तत्रैवोक्तम् -
"प्रविश्य स्वाश्रमं देवमभिगम्य यथाविधि । अर्चयेज्जपहोमान्तं दद्याद्ग्रासं गवामपि ॥ अञ्जनालेपनैः स्रग्भिर्वासोभिर्भूषणैस्तथा । अलक्तकरसाद्यैश्च ताम्बूलमुखशोधनैः ॥ उपेतो मङ्गलैरन्यैर्नयेदभिगम-क्रियाम् ।" (३.२८-३०) इति

एवं च स्वगृहे भगवते यत्किञ्चित् पत्रपुष्पाद्युपहारसमर्पणमेवाभिगमनार्चनम् - "अर्चयित्वा परात्मानं देशकालाद्यपेक्षया । पत्रैः पुष्पैर्फलैर्वापि पूर्वकालोक्तवर्त्मना ॥ केवलाञ्जलिना वाऽपि विहितेन यथा तथा ।"वङ्गिवंशेश्वरैः आराधनकारिकायाम्(८७-८८) इत्यभियुक्तोक्तेः । अथास्मिन्नवसरे "कुर्याद्भोगार्चनं पश्चात्" (२-२२७) इति पारमेश्वरोक्तरीत्या भगवदाराधनार्थद्रव्योपादानं कार्यम्, यद्वा मन्दिरेऽपि भगवत्प्रबोधनप्रणामप्रदक्षिणयत्किञ्चिदर्घ्यादिप्रदानरूपाभिगमनक्रियां कृत्वा तदनन्तरमुपादानं कुर्यात् "यागोपस्करसम्भूतौ भगवन्तमनुस्मरन् । विनीतान् शिष्यपुत्रादीन् स्नातानाज्ञापयेत्ततः ॥"इति । तदानीमपि द्रव्योपादानस्यात्रैव वक्ष्यमाणत्वात्, यत्तूक्तं श्रीसात्वते नियमपरिच्छेदे -

2b. After cleaning himself[4] he shall take his bath[5] and wear clean dresses, with his senses under control.

3a. Wearing (putting) the *Ūrdhvapuṇḍra*,[6] he shall perform the deeds that are enjoined (by the Āgamas) to be attended early in the morning.[7]

4. This denotes *Śauca* like attending to the calls of nature, cleaning the teeth and others.
5. The Pāñcarātra texts prescribe the procedure for this in the Āgamic way: types of bath, primary and secondary with full particulars; Pārams. Ch. II briefly treated, VS VI.2-10.
6. *Ūrdhvapuṇḍra ūrdhva*— up or vertical. *Puṇḍra—mark*, ornamental. This is made on the face and eleven specified parts of the body. It consists in drawing two parallel lines vertically on the face from the edges of the two eyebrows at the nose reaching the root of the hairs. This is done with white mud. The lines at the nose to be connected with a horizontal line made with the same mud. A vertical line is to be drawn, with red or yellow powder between the two parallel lines starting from just above the white horizontal line and reaching the root of the hair. The marks are twelve in number and are therefore called *Dvādaśa Ūrdhvapuṇḍra*. For details see Pāram. S III.10-20; VT III.84b-96; IS XXI.293-317 and *Ūrdhvapuṇḍravidhi* in Vedāntadeśika's *Saccaritrarakṣā*.
7. *Kālyoktakarmāṇi*: acts to be attended to early in the morning *sandhyā, japa, tarpaṇa* etc. which are meant here. The well-known Sāvitrīmantra, also known as Gāyatrīmantra, is replaced in the Pāñcarātra Āgama texts by Viṣṇugāyatrī in the morning, Dvādaśākṣara at midday and Āṣṭākṣara in the evening; vide: SKS. Brahma V. 97b-98a.

   Jayantabhaṭṭa (890 A.D.) refers to this in his *Āgamāḍambara*, P. 75. The commentator Aḷaśiṅgabhaṭṭa observes that there is a controversy as to what kind of *saṃdhyā* and *japa* are to be undertaken and decides that an individual could follow the procedure laid down in the Kalpasūtra which he follows.

   See JS XIV.1-95a; SKS. Br IV.34-37 & V.79b-93a for *japa* and *tarpaṇa*.

"प्रातरुत्थाय चिन्वीयात् स्वारामात् स्वयमेव हि ।
पूजार्थमस्त्रमन्त्रेण पुष्पादीन् यत्नतः सदा ॥" (२२-२४) इति ।

तच्छक्ताधिकारिविषयम् । तथा चोक्तं पाञ्चरात्ररक्षायाम् - "स्वयमेवार्जितं मुख्यम्, अशक्तस्य तु पुत्रशिष्यादिमुखेन तत्प्रेरणरूपार्जितव्यापारैः" इति । 'प्रातरुत्थाय' इत्यत्र प्रातःशब्दोऽभिगमनानन्तर-कालपरः । उत्थानं चाभिगमनार्चनस्थानात्, न तु शयनादिति तत्रैव व्याख्यातं वेदान्ताचार्यैः ।

[आराधकस्य सुवेषत्वम्]

गन्धैः स्रग्भिरलङ्कारैर्कटकाद्यैरलङ्कृतः ॥ ३ ॥
सपवित्रकरो मौनी आसाद्य भगवद्गृहम् ।

अर्चकवेषमाह-**गन्धैः** इत्यादिना । अत्राभिगमनार्चनानन्तरं भगवत्प्रसादलब्धगन्धपुष्पादीनामेव धारणं विहितम् । तदप्यभिगमनोत्तराङ्गमेव । उक्तं खलु पाद्मे - "अञ्जनालेपनैः स्रग्भिर्वासोभिर्भूषणैस्तथा । अलक्तकरसाद्यैश्च ताम्बूलकरशोधनैः ॥ उपेतो मङ्गलैरन्यैर्नयेदभिगमक्रियाम् ॥" (२३.२९-३०) इति । अत्रार्चनात् पूर्वं ताम्बूलभक्षणं मुख-शोधनार्थकत्वात्र दोषावहमिति ज्ञेयम् । तथा च पारमेश्वरे - "ताम्बूलशुद्धवदन"(३.२९)इति । "* इक्षूनपः पयोमूलं ताम्बूलं च तथौषधम् । भक्षयित्वापि कर्तव्या स्नानदानादिका क्रिया ॥" इति ।

स्मृतिरप्यत्रानुकूला । सपवित्रकरः सपवित्रौ करौ यस्य स तथोक्तः । पवित्रलक्षणं तु पारमेश्वरे- "चतुरङ्गुलमग्रं तु सदा विष्णवधिदैवतम् । महाविष्ण्वधिदैवस्तु ग्रन्थिरेकाङ्गुलो भवेत् ॥ विष्ण्वधिदैवं वलयं द्वयमङ्गुलमुच्यते । पवित्रं हस्तयुग्मे चानामिकायां नियोजयेत् ॥" (३.२२-२३) इति ।

पवित्रदर्भसंख्या तु श्रीसात्वतानुसारेणात्रैवाग्निकार्यप्रकरणे वलयपवित्रप्रसङ्गाद् वक्ष्यति ।

* 'इक्षुरापः' इत्यप्यन्यत्र पाठः

(*The priest shall have a good appearance*)

3b-4a. He shall adorn himself with perfumes, flower-garlands,[8] and ornaments like bangles. Wearing the *pavitra*[9] he shall approach (without talking to anyone) the temple of God, silently.[10]

8. The commentator observes that what had been offered to God like perfumes and garlands are to be used by the priest alone on this occasion. The use of *tāmbūla* by the priest is supported by the commentator citing a passage from Pad. S. IV. 13.29b-30; ĪS does not refer to it.

9. *Pavitra*: two blades of *kuśa* (*darbha*) grass twined to form ring with the ends projecting upwards. It is to be worn in the fourth (*anāmikā*) finger (*anāmikā*—nameless, while others have their own names, (*aṅguṣṭha*- thumb, *tarjanī*- forefinger, *madhyamā*- middle and *Kaniṣṭhā*- little). It is to be worn in both the hands; vide: Param. S III.22-23, cf. JS IX.21.

10. *Bhagavadgṛha*: temple, literally house of God.

द्वाराद्वाह्ये यथाशास्त्रं शुद्धेन सलिलेन च ॥ ४ ॥

" .... आदायाथ पवित्रकम् । दक्षिणानामिकायां तु चतुष्काण्डविनिर्मितम् ॥ अङ्गुलीयकरूपं च कृत्वा वै तदनन्तरम् ।" इति । नन्वत्र केवलदक्षिणानामिकायामेव पवित्रधारणमुक्तम्; हस्तद्वयेऽपि पवित्रधारणं भवता कथं व्याख्यातमिति चेत्; उच्यते । अत्र होमकाले वामहस्ते वलयपवित्रसत्वात्तत्रोक्तम्। अन्यकाले हस्तद्वयेऽपि धार्यमेव । तथा चोक्तं जयाख्ये - "त्रिपञ्चसप्तकाण्डोत्थं दृढिमग्रन्थिसंयुतम् । पवित्रकद्वयन्दार्भमस्त्रमन्त्राभिमन्त्रितम् ॥ हस्तद्वयेऽपि निक्षिप्यानामिकाङ्गुलयोरधः ।" (९-२०-२२) इति। एतेन जयाख्यनिष्ठानां विषमदर्भैरेव पवित्रकरणमित्यपि ज्ञेयम् ।

पाणिपादप्रक्षालनाचमनपूर्वकमन्तः प्रविश्य मूलमन्त्रमुच्चरन् प्रणमेदित्याह-**द्वाराद्वाह्ये** इति सार्धेन। अत्राचमनप्रकारनिरूपकं पारमेश्वरोक्तम् अन्तर्जानुगतं कृत्वा" (२.५५-५६) इत्यादिसार्धश्लोकद्वयम् । "अङ्गुष्ठमूलं ब्राह्मं तु"इत्यारभ्य (२.९०-९५) श्लोकपञ्चकं चापेक्षितम् । अत्र पारमेश्वरव्याख्यातृभिरङ्गुष्ठ-तर्जन्यन्तरालेऽङ्गुष्ठमूलत्वभ्रान्त्या तस्य पितृतीर्थत्वमेव प्रसिद्धं खलु, अत्र तस्य ब्रह्मतीर्थत्वविधानं वैदिकमर्यादाविरोधीत्याशयेन तद्विरोधो विकल्पतः परिहरणीय इत्युक्तं तदसङ्गतम्, भ्रान्तिमूलकत्वात् "गोकर्णेन गृहीत्वापो मुक्त्वाङ्गुष्ठकनिष्ठिके । वीक्ष्य ब्राह्मेण तीर्थेन माषमग्नजलं पिबेत् ॥ अङ्गुष्ठमूलं ब्राह्मं स्यात् प्राजापत्यं कनिष्ठिकम् । प्रदेशिनी पैतृकं तु कराग्रं दैवतं स्मृतम् ॥ आग्नेयं मध्यमं विद्धि तीर्थान्येवं द्विजोत्तम ।" इत्यादिस्मृतिशतेष्वेकमपि तद्व्याख्यातृणां कर्णे न पतितम् । "मूले त्वङ्गुष्ठस्य ब्राह्मम्" इत्यमरवाक्यमपि तैर्न विचारितम् । एतेन तद्भ्रान्त्यैव । "पैतृकं चाङ्गुष्ठमूलमङ्गुल्यग्रं तु दैविकम् । ब्राह्मं तु हस्तमध्यस्थं तीर्थं दक्षिणहस्तजम् ॥" इति पाठव्यत्यासं कुर्वतां साहसोऽपि प्रत्युक्तः ।

आजानुपादौ प्रक्षाल्य हस्तौ चामणिबन्धनात् ।
आचम्य च प्रविश्याऽन्तः प्रणम्य मन्त्रमुच्चरन् ॥ ५ ॥

4b-5. He, outside the entrance, shall duly wash his feet upto the knees and hands upto the wrists (with pure water). After doing *ācamana,*[11] he shall enter within and bow to God uttering the mantra.[12]

11. *Ācamana* consists of sipping water thrice from the right palm. The quantity of water for each time being very little just to immerse a black gram. Acyuta, Ananta and Govinda are the names to be uttered for each in this order. The lips are just to be washed with water using the thumb in the right hand, which is to be washed again with water. The two eyes, chins, nose (external parts), ears, shoulders, navel, heart and head are to be touched uttering specific mantras using respectively the thumb, ring finger, fore-finger, little finger, middle finger, thumb and all the fingers. The right chin, eye and others are to be touched first and then the left. This is to be done for a number of times when a sacred act is undertaken. See VS VI.1-10-21; SKS. Brahma. V.109-117a.
12. The specific mantra is not mentioned here. It may be Aṣṭākṣara or Dvādaśākṣara.

[भगवत्प्रबोधनप्रकारः]

धाम प्रदक्षिणीकृत्य बोधयेत् पुरुषोत्तमम् ।
शङ्खध्वनिसमोपेतं दुन्दुभीपटहस्वनैः ॥ ६ ॥

वन्दिवृन्दोत्थितोच्चाभिर्नानावाग्भिर्महामते ।
महाजयजयारावैः पुनः पुनरुदीरितैः ॥ ७ ॥

प्रबोधलक्षणैः स्तोत्रैरुत्थाप्य शयनात् ततः ।

धामप्रदक्षिणपूर्वकं भगवत्प्रबोधनप्रकारमाह- **धाम** इत्यादिना सार्धद्वयेन। अस्मिन्नवसरे सात्वतामृतोक्तो विष्वक्सेनादिप्रणामः प्रवेशार्थक इति ज्ञेयः । तथा चोक्तं पाञ्चरात्ररक्षायाम् - ''प्रवेशे निर्गमे चैव विष्वक्सेननतिं चरेदिति विधानात्, विष्वक्सेनं तत्तद्द्वारपालांश्च प्रणम्यानुज्ञाप्य तत्र तत्र प्रविशेदिति । एतदनन्तरं घण्टानादश्चोक्तः सात्वतामृते, स तु कवाटोद्घाटनार्थकः। तथा च पाद्मे क्रियापादे त्रयोदशाध्याये-

''एवं तु संस्कृतां घण्टां नादयेत् सर्वकर्मसु । उद्घाटने कवाटस्य प्रस्तुते पूजने तथा ॥'' इति । अत्र प्रबोधनलक्षणं स्तोत्रं पारमेश्वरे त्रयोदशाध्यायोक्तम् (१३-२३७) -

''प्रबुद्ध त्वं जगन्नाथेत्यादिकं ग्राह्यम् ।''

[कवाटोद्घाटनप्रकारः]

द्वारमासाद्य तत्रस्थो दशदिग्बन्धपूर्वकम् ॥ ८ ॥

अवकुण्ठ्याऽथ तर्जन्या मन्त्रं कवचमुच्चरन् ।
स्थिते वा कल्पिते तत्र पूजयेद् बलिमण्डले ॥ ९ ॥

सर्वं खगेशपूर्वं तु परिवारं हि साच्युतम् ।
नमसा प्रणवाद्येन विष्णुमादाय कीर्तयेत् ॥ १० ॥

(*Method of awakening God*)

6-8a. He shall wake up the Lord, after circumambulating[13] the temple,[14] O great minded person![15] Awakening (Him) (from bed), by sounding (blow of) the conches, drums and tabors, using various expressions[16] uttered aloud by the host of bards, by (uttering) cries of victory raised again and again and with euologies expressive for (intended to) waking up the Lord.[17]

(*Method of opening the door*)

8b-12. He shall approach the entrance, stand there and do Daśadigbandhana[18] and *Avakuṇṭhana*[19] using the fore-finger uttering the Kavacamantra. He shall then worship all the secondary deities beginning with Garuḍa[20] (the king of birds) together with Acyuta[21] in the Balimaṇḍala[22]

13. *pradakṣiṇīkṛtya*: after circumbulating : *pradakṣiṇa* going round the person or an object of reverence keeping him or it to the right till it is over.
14. *dhāman*: temple, worship or a bow to Viṣvaksena is enjoined, as the commentator notes, at this stage according to the *Pāñcarātrarakṣā* (P. 114).
15. As the sages are addressed, *mahāmate* in the singular is incorrect. *mahāmatayaḥ* would be the correct reading which here would affect the principle of metre.
16. *nānāvāgbhiḥ*: various kinds of speeches or expressions; *nānā* — various; this may refer to the passages taken from various sources or various languages.
17. The commentator refers to the passages in Pāram. S. XIII.137-145a. In later years such *ślokas* have been named as Suprabhātastotra.
18. *digbandhana*: creation of a barricade as it were in the directions. It is done around one's own self so as to prevent evil forces from getting at himself. The word *daśa* is prefixed here and means the ten directions, that is, four main directions, four intermediate directions, upward and downward regions. The procedure for forming it is stated here. The fore-finger is to be used to form a ring as it were moving it horizontally around the head uttering the Kavacamantra. Kavacamantra is '*kavacāya huṃ phaṭ*'. This is to serve as an armour to protect the person who utters it. *Huṃ* is a mystic syllable expressive of menace, evidently to the evil forces that move about. *Phaṭ* is a mystic syllable, the sound produced, when uttered is supposed to have successfully caused terror to the evil forces driving them away. The use of the word *tarjanī* denotes that the fore-finger has significance as it displays the sense of threatening.
19. *avakuṇṭhana*: surrounding encircling.
20. *khaga*: moving in the sky, bird, *īśa* — Lord; Garuḍa — lord of birds.
21. *sācyuta*: with Acyuta, Acyuta is the name of one of the secondary deities. He too is to be worshipped along with the other secondary deities. See SKS. Indra. VII.112b-113a where Acyuta is mentioned as a secondary deity.
22. Balimaṇḍala: same as Balipīṭha, a raised pedestal adjacent to the *dhvajastambha*, where the balls of rice flowers and others called collectively by the name *bali* are offered.

समस्तपरिवाराय अच्युताय नमो नमः ।
वास्तुपूरुषमन्यांश्च समभ्यर्च्य यथाक्रमम् ॥ ११ ॥

मूलमन्त्रेण साङ्गेन निरङ्गेनाऽथ वा पुनः ।
न्यासं कृत्वा त्रिराचार्यो हस्ततालं हृदा ततः ॥ १२ ॥

द्वारसमीपे दिग्बन्धनमाह- **द्वारम्** इत्यादिना ।

खगेशादिसमस्तपरिवारसहिताच्युतार्चनमाह-**स्थिते** इत्यादि-द्वयेन । स्थिते पूर्वमेव प्रतिष्ठाकाले स्थापिते शिलामये, कल्पिते तदभावाद्गोमयलेपनादिना वा सद्यः कृते, बलिमण्डले बलिपीठे । प्रणवाद्येन नमसा ॐ नमः इति मन्त्रेण ।

गर्भद्वारदेवतार्चनमाह- **वास्तुपूरुषम्** इत्यादिना ।

मूलमन्त्रन्यासपूर्वकं हस्ततालमाह-**मूलमन्त्रेण** इत्यादिना । हृदा हृन्मन्त्रेण । हस्तताडनप्रकार उक्तः विहगेन्द्रषष्ठपटले -

"दक्षेण वामं सन्ताड्य वामहस्तेन दक्षिणम् । वामं दक्षिणहस्तेन कुर्यात्तालत्रयं बुधः ॥ एकतालेन मरणं द्विताले व्याधिपीडनम् । त्रिताले सुखमाप्नोति तस्मात्तालत्रयं कुरु ॥" इति ।

already available there or erected then (for the purpose). He shall (then) think of Viṣṇu[23] (uttering) the word *namas* after *Praṇava*, he shall euologise Him "Obeisance, obeisance to Acyuta[24] having all the secondary deities". Then he shall worship in due order *Vāstupuruṣa*[25] and others[26] and do *nyāsa*[27] with the Mūlamantra[28] with or without (its) constituent parts.[29] The preceptor shall then clap the hands thrice[30] using Hṛdayamantra[31] and he shall then stand in the midst of the hall of worship.

23. *Viṣṇumādāya*: bringing Viṣṇu to the mind, that is thinking of Him.

24. Here the word Acyuta occurs in the sense of Viṣṇu. For the derivative sense of the name Acyuta vide:

    avikāryasvabhāvatvādavyāpyatvattattacyutaḥ / Ahs. II.33a.

    His nature does not undergo change and He is not overpowered by any one.

25. Vāstupuruṣa: *Vāstu* — place or site where a building or temple is to be constructed; Puruṣa — a person presiding over that site. A figure is made to represent this person. and worship is done to him. This act is called Vāstupūjā or Vāstuyāga. For a detailed account see Pād. S. III.27 5.20; Spsn. II.49b-57a; *Viṣṇutantra* V.

26. *anyāṃśca*: refers to the guardians of the quarters, the lords of the site and others; vide: Pād. S. III.27-6.20.

27. *Nyāsa* means placing or applying. This is employed to infuse potency (*śakti*) into an object or the body of a person or the idol. The person who adopts it must have purified himself by the recitation of the mantras. *Nyāsas* are of different kinds:- Antarnyāsa, Bahirnyāsa, Aṅganyāsa, Karanyāsa and others.

    Antarnyāsa is intended to infuse power into the object or idol, the act of *nyāsa* must be only mental as the parts of the object or idol could not be then visualised. Much is to be imagined and so *nyāsa* in this case is a mental act. In the case of Bāhyanyāsa, *nyāsa* is to be made on the parts of the object or idol by touching the particular part with the tips of fingers to the accompaniment of citation of the mantras which are specific for each *nyāsa*.

28. See under 12.

29. The constituent parts are *hṛdaya*, *śiraḥ*, *śikhā*, *kavaca* and *astra*; vide: SKS. Brahma. XII. P. 91.

30. The left palm must be struck with the right palm, then the right with the left and again the left with the right. Death will result if it is done only once; disease will affect the priest, if it is done only twice; and happiness will be ensured if done thrice. See the commentary which cites the passage from the *Vihagendrasaṁhitā*.

31. Hṛdayamantra : the mantra is *Oṃ, hāṃ, namaḥ; oṃ haṃsaḥ suciṣaḍe hṛdayāya namaḥ*, cf. JS VI.107b-111a; *oṃ hrāṃ jñānāya hṛdayāya namaḥ*, LT XXXIII.5a; cf Ahs XIX.4-5.

मूलमन्त्रेण चोद्घाट्य कवाटं नेत्रमन्त्रत: ।
नित्यदीपांस्ततो ज्वाल्य हस्तौ प्रक्षाल्य वारिणा ॥ १३ ॥

कवाटोद्घाटनपूर्वकं दीपप्रज्वालनमाह- **मूलमन्त्रेण** इत्यादिना। अत्र गर्भगेहादिकवाटोद्घाटनमात्रमाचार्य-कर्तृकम्, अन्यत् सर्वं परिचारकै:कार्यम् । तथा च विष्णुतन्त्रे -

"द्वाराण्यन्यानि सर्वाणि ब्राह्मण: परिचारक: । उद्घाटयेन्मुक्तनाम्ना न शूद्रस्तु कदाचन ॥" इति । अत्र शूद्रशब्दो वैष्णवेतरशूद्रपर: । "न शूद्रा भगवद्भक्ता:" इत्युक्ते: ।

[गर्भगेहप्रवेशप्रकार:]

प्रासादान्त: प्रवेशार्थं ततो द्वारं तु चेतसा ।
त्रिभागीकृत्य तन्मध्यभागमेकं द्विधा पुन: ॥ १४ ॥
विभज्य वामदेशेन दक्षिणेनाङ्घ्रिणा तत: ।
शनै: शनै: प्रविश्यान्त: सास्त्रमन्त्रेण तेन वै ॥ १५ ॥
धरणीहननं कृत्वा भगवन्तं प्रणम्य च ।
मनसा गुरुवंशं च तदाज्ञां मानसीमथ ॥ १६ ॥
शिरसा धारयेत् स्वेष्टं फलं सङ्कल्प्य चेतसा ।
देवाय तन्निवेद्याऽथ यागागारस्य मध्यत: ॥ १७ ॥

द्वारान्त: प्रवेशप्रकारभूसन्ताडन प्रणामानाह- **प्रासादान्त:** इत्यादिना सार्धद्वयेन । अस्मिन्नवसर एव सात्वतामृते भद्रपीठे बिम्बसंशोधनादिकमुक्तम् । तदपि शास्त्रीयमेव ।

"यद्वा प्राग्यागभवनप्रवेशानन्तरं द्विजा: । न्यस्य भद्रासनाद्यन्तमन्यदन्यत् समाचरेत् ॥" इति वक्ष्य-माणत्वात् ।

स्वगुरुपरम्पराऽऽज्ञापूर्वकं स्वेष्टफलं सङ्कल्प्य भगवते विज्ञापयेदित्याह-**मनसा** इत्यादिसार्धेन । निवेदनमन्त्रस्तु श्रीसात्वतेऽष्टमे परिच्छेदे (७-८) -

[प्रासादस्य स्थूलसूक्ष्मरूपेण शुद्धिद्वयम्]

प्रासादं विग्रहं कृत्वा वर्ममन्त्रं सविग्रहम् ।
तज्जीवं भगवन्तं च ध्यात्वा यागगृहं तत: ॥ १८ ॥
सशलाकैस्ततो दर्भै: सहदेवीविमिश्रितै: ।
सम्मार्ज्य बहुतोयेन प्रक्षाल्याऽऽलिप्य गोमयै: ॥ १९ ॥

13. He shall then open the door uttering the Mūlamantra and kindle (illuminate or make it glow) the perpetual (ever glowing) lamps[32] with the Netramantra.[33] He shall then wash his hands with water.

(*Manner of entering the sanctum*)

14-17. He shall then mentally divide the entrance into three parts for entering into the temple.[34] The middle part shall be divided into two. He shall enter within quitely through the left portion (of that divided part) placing the right foot. He shall then touch the floor with the Astramantra,[35] bow to the Lord and show respect to the line of preceptors and recall in his mind their command, honouring it with his (bent) head. He shall offer[36] to God mentally the result which he seeks to be seeking for.

(*Purification of the temple in two ways, gross and subtle*)

18-21. The priest shall then treat the Varmamantra[37] which has the body in the shape of temple and meditate upon God having that as the soul. He shall then clean the hall of worship with the quills of the porcupine then with *darbha* mixed up with various herbs,[38] wash it with abundant water and smearing it with cow-dung; strike (pelt) it with the Astramantra and remove the potsherds[39] (from there). He shall then sprinkle (it) with liquid *pañcagavya*[40] uttering the Astramantra and smear (it) with (liquid) sandal

32. Nityadīpa : lamps which are made to burn all the time without break. Oil or ghee or change of wick makes it glow thus.
33. Netramantra : *Oṃ hrauṃ tejase netrābhyāṃ vauṣaṭ*, LT XXXIII.9a. It is light that is the source of the eyes; *vauṣaṭ* — exclamatory formula used with the dative. The use of this mantra is significant as it is to make the lamps glow.
34. *prāsāda* : temple, a place where the Lord's idol is installed and brings His grace to the priest and all others in the world. *Bhavana* also is temple which brings favour to the priest and his family, Param. S. XVIII.17-18.
35. Astramantra : *Oṃ hraḥ vīryāya astrāya ca phaṭ* — the mystic syllable serves the purpose as in the Hṛdayamantra.
36. *nivedya* : having offered. It may also mean having informed, having stated what he intends to get.
37. Varmamantra is Kavacamantra.
38. *sahadevī* : various kinds of herbs.
39. *śakala* : potsherds, dirt in general.
40. *pañcagavya* : a liquid mixture prepared with five products got from the cow — milk, curd, ghee, cow-dung and urine.

उपलिप्तमथाऽस्त्रेण संविध्य शकलं त्यजेत् ।
पञ्चगव्येन सास्त्रेण वारिणा प्रोक्ष्य चन्दनैः ॥ २० ॥
कुङ्कुमागरुकर्पूरैः समालिप्य समन्ततः ।
कुशदूर्वाऽक्षतांश्चैव विकिरेत् स्थानशुद्धये ॥ २१ ॥

"त्वदाराधनकामोऽयं व्रतं चरितुमिच्छति ।
सङ्कल्पसिद्ध्यै भगवन् पूरयास्य मनोरथान् ॥" इति ।

यद्यप्ययं व्रतप्रकरणे वक्तव्यश्लोकस्तथाप्यर्थसामञ्जस्यात्; वङ्गिवंशेश्वरकृतार्चनाकारिकादिष्वप्युक्त इति सात्वताऽमृतेऽपि लिखितः ।

प्रासादस्य सूक्ष्मशुद्धिमाह-**प्रासादम्** इत्यादिना । प्रासादरूपविग्रहं वर्ममन्त्रं ध्यात्वा सविग्रहं भगवन्तं तं जीवं ध्यायेदित्यर्थः ।

स्थूलशुद्धिमाह-**सशलाकैः** इति त्रिभिः ।

प्रासादं शोधयेदेवं स्यवमेव तु देशिकः ।
प्रासादोद्देशमखिलं मार्जयेत् प्रोक्षयेत् ततः ॥ २२ ॥
परिचारैस्तु कर्तव्यं बलिपीठान्तमेव हि ।
यागोपस्कारसम्भूतौ भगवन्तमनुस्मरन् ॥ २३ ॥
विनीतान् शिष्यपुत्रादीन् स्नातानाज्ञापयेत् ततः ।

[पात्रशोधनक्रमः]

पात्रशुद्धिं च तैरेव कारयेद्द्विजसत्तमः ॥ २४ ॥
आम्रकल्केन तोयेन हैमं ताम्रं च शोधयेत् ।
राजतं गृहधूमेन शान्ताङ्गारेण वा पुनः ॥ २५ ॥
भस्ममिश्रेण तोयेन लोहयुक्तं विशोधयेत् ।
शङ्खशुक्तिमयानां च लवणेन विशोधयेत् ॥ २६ ॥
फलपत्रमयानां च मृद्भिरद्भिश्च शोधयेत् ।
लेपगन्धापनोदेन शुद्धिर्भवति कारयेत् ॥ २७ ॥
द्रव्यशुद्धिर्भवत्येवं यथावद्विधिचोदिता ।
पात्राणि शोधयित्वैवं ततो मौनपरो द्विजः ॥ २८ ॥

mixed up with saffron, aloe and camphor. He shall scatter on all sides *darbha*, *dūrvā* and unbroken rice[41] to ensure purity of that place.

22-24a. The priest[42] shall himself thus clean the temple[43] in this manner. He shall have the entire area[44] of the temple cleaned and then sprinkled (with water) by the attendants; (this shall be done) upto the Balipīṭha. He shall then order pupils, sons and others and *snātas*[45] who are obedient (disciplined), to make arrangements[46] for the worship (sacrifice), thinking of God (all the while).

(*Method of cleaning the vessels*)

24b-28. The eminent twice-born (preceptor) shall have the vessels cleaned through them alone.[47] Golden and copper vessels are to be cleaned with the pulp of the mango (fruits) mixed up with water, the silver ones with the coke in the house[48] or extinguished charcoal, those made of metals[49] with water mixed with ashes, those made of conches and shells with salt (mixed up with water), and those made of fruits[50] and leaves[51] with mud and water. Cleanliness results on the removal of the odour of grease[52] (sticking to the vessels). When it is effected (by him) thus the articles (utensils) become cleaned when done according to the prescribed rules. The priest (twice-born) shall then remain silent while the vessels are thus cleaned.

41. *Akṣata* : unbroken rice made yellow with turmeric powder and little ghee.
42. *Deśikaḥ* : priest.
43. Here the word *prāsāda* means the site in and around the sanctum sanctorum.
44. *prāsādoddeśa* : *uddeśa* — area.
45. *snāta* : one who has completed the religious studies, that is Vedas. He must take religious ablution (*snāna*) to mark this stage so that he could enter the order of the householder. For details of this *snāna* see Āpastambadharmasūtra I.11.
46. *yāga* : worship; *upaskāra*: embellishment, decoration, preparations, arrangements; *sambhūti* : production, getting.
47. *taireva* : attendents mentioned in 24a.
48. *gṛhadhūmāt* : coke formed in the walls and roofs of the kitchen in the house.
49. *loha*: vessels, like ladles and others made of lead or iron. *Loha* is used generally to denote iron.
50. *phala* : Bilva fruit.
51. *patra* : made of Palāśa.
52. *lepagandha* : odour of grease sticking to the vessels in which food preparations were made. Vide: VS.

प्रासादस्य भगवच्छरीरत्वात् पूजकेनैव तच्छुद्धिः कार्येत्याह-**प्रासादम्** इत्यर्धेन ।

ततोऽन्यत्र परिचारकैः कार्यमित्याह प्रासादोद्देशमित्यादिना । प्रासादोद्देशं प्रासादप्रदेशम् । प्रारभ्येति शेषः ।

आराधनोपकरणार्जनमाह-**यागोपस्कार** इत्यादिना ।

पात्रशोधनक्रममाह **पात्रशुद्धिम्** इत्यादिभिः सार्धैश्चतुर्भिः । गृहधूमेन पाकस्थानोपरिभागसंलग्नधूममशीरजसा । शान्ताङ्गारेण पलालाङ्गारेण । फलमयानां बिल्वकरण्डादीनाम्, पत्रमयानां पालाशपत्रादिकृतानां फलमयानां मृद्भिः, पत्रमयानां केवलमद्भिः शोधनमिति क्रमालङ्कारः । एवमेवोक्तं विष्णुसंहितायामपि । शैलमृन्मयदारुपात्राणामपि शुद्धिरुक्ता कपिञ्जले-

"मृन्मयानां च पात्राणां दहनाच्छुद्धिरिष्यते । वस्त्राणां क्षालनाच्छुद्धिः पट्टानां सितसर्षपात् ॥ जलैः शर्करचूर्णैश्च शैलजन्तु विशुद्ध्यति । मणीनां मार्जनाच्छुद्धिः क्षालनाद्वा कुशादिषु ॥ प्रोक्षणाद्वा द्विजातीनां पुष्पाणां प्रोक्षणाच्छुचिः । भूगतानां च दारूणां तत्क्षणाच्छुद्धिरिष्यते ॥ सम्मार्जनेऽप्यशक्तानां संप्रोक्षणमुदाहृतम् ॥" इति ।

[पूजकस्योपवेशप्रकारः]

देवेशस्याग्रतो वाऽपि दक्षिणं भागमाश्रयेत् ।
ईश्वरप्राग्वशादेव ह्युत्तराभिमुखो द्विजः ॥ २९ ॥
अथोपविश्य वै दार्भे काष्ठजे वाऽजिनासने ।
आगमार्थं च देवानां गमनार्थं च रक्षसाम् ॥ ३० ॥
कुर्याद्घण्टारवं तत्र देवतास्थानलाञ्छनम् ।
शङ्खादिघोषसंयुक्तं गेयवाद्यसमन्वितम् ॥ ३१ ॥

[करशुद्धिः]

करशुद्धिं ततः कुर्याद्यथावन्मुनिपुङ्गवाः ।
द्वे तले हस्तपृष्ठे द्वे सर्वाश्चाऽङ्गुलयस्तथा ॥ ३२ ॥
अस्त्रमन्त्रेण संसोध्य ध्यानमुद्रान्वितेन तु ।
कृत्वैवं करशुद्धिं च स्थानशुद्धिं समाचरेत् ॥ ३३ ॥

अथ पूजकस्योपवेशनप्रकारमाह-**देवेशस्य** इति सार्धेन । अत्र कूर्माद्यासनकल्पनप्रकारः पारमेश्वरोक्तो ग्राह्यः ।

शङ्खादिवाद्यघोषैः सह घण्टाचालनमाह-**आगमार्थम्** इति सार्धेन ।

करशुद्धिमाह- **करशुद्धिम्** इतिद्वाभ्याम्।

(*Sitting arrangement for the priest*)

29-31. He (the brahmin) shall occupy the front or right side of God. He shall face the north, since God would be facing the east. He shall then occupy a seat[53] made of *darbha* or wood or deer's hide and then ring the bell, its sound indicating (marking) God's presence there so that gods could arrive and the demons go away (from there). The sound of the bell shall be accompanied by those of the conches and of music and musical instruments.

(*Cleaning of the hands*)

32-33. O eminent sages! He (priest) shall then duly clean his hands, the two palms, the backs of the two hands and likewise all the fingers using the Astramantra, along with meditation and *mudrā*.[54] The hands are thus to be cleaned. Then cleaning shall be done for that spot.

53. Kūrmāsana is meant here to be adopted by the priest. See Ahs. XXXI.35 for the description of Kūramāsana.

54. Meditation (*dhyāna*) on the Astramantra; *mudrā* for Astramantra is given in the following texts: LT XXXIV.27; JS VIII.22, 23; VS. VII.20b-21a; Pād. S IV.22.10; VS. VII.20b-21a.

Dhyānamudrā may also be taken as a single word but this *mudrā* is not found to have the description.

[स्थानशुद्धिः]

ध्यात्वा देवं ज्वलद्रूपं सहस्रार्कसमप्रभम् ।
ज्वालाकोटिसमाकीर्णं वमन्तं ज्वलनं मुखात् ॥ ३४ ॥
तेन संपूरयेत् सर्वमाब्रह्मभवनान्तिमम् ।
दिगोघं प्रज्वलन्तं च भावयेन्मन्त्रतेजसा ॥ ३५ ॥
क्ष्मामण्डलमिदं सर्वं स्मरेत् पक्वं च वह्निना ।
मन्त्रजेन द्विजश्रेष्ठाः मृन्मयं भाजनं यथा ॥ ३६ ॥
स्थानशुद्धिर्भवत्येवं सुधाकल्लोलसेचनात् ।

[दिग्बन्धनक्रमः]

सम्भाव्यैवं ततः कुर्याद्दिग्बन्धं हृदयादिकैः ॥ ३७ ॥

स्थानशुद्धिमाह- **ध्यात्वा** इति सार्धैस्त्रिभिः ।

दिग्बन्धनक्रममाह-**सम्भाव्य** इति द्वाभ्याम् । 'नेत्रेण त्वथ ऊर्ध्वतः' इत्यत्र दुःसन्धिर्दिव्यत्वान्न दोषावहः ।

अथ प्राणायामपूर्वकं भूतशुद्धिं कुर्यादित्याह-**सायामाम्** इत्यादिना । धारणाभ्यां दहनाप्यायनात्मकाभ्याम्। तथोक्तं पारमेश्वरे- "धारणापञ्चकं चैव सङ्क्षिप्तं विहितं द्वयम् । दहनाप्यायनाच्चैव यदा दाहेत्* स्वशुद्धये ॥" (३.२२३-२२४) इति ।

अस्त्रेणैव विदिग्बन्धं नेत्रेण त्वथ ऊर्ध्वतः ।
आदित्यायुतदीप्तेन ज्वलत्कञ्चुकरूपिणा ॥ ३८ ॥
कवचेन तु तर्जन्या रक्षार्थमवकुण्ठयेत् ।
सायामां भूतसंशुद्धिं धारणाभ्यां समाचरेत् ॥ ३९ ॥
केवलेन तु मन्त्रेण भावनासहितेन तु ।

[प्राणायामप्रकारः]

नाभिदेशस्थितं ध्यात्वा देवं सङ्गृह्य कल्मषम् ॥ ४० ॥
निःसृतं वायुमार्गेण द्वादशान्तावधौ क्षिपेत् ।
निरस्तपापमाकृष्य वातचक्रसमन्वितम् ॥ ४१ ॥

* 'दहेत्' इति शुद्धं प्रतीयते ।

(Cleaning of the spot)

34-37a. He shall then meditate on God as having a form blazing with a splendour equal to that of a crore of suns and overspread with crores of flames. Splendour (light) emanates from His mouth. The priest shall pervade everything with that splendour right from the abode of Brahmā upto the end (down) of the world. He shall envisage(imagine) all the directions to glow with the power of the mantra. He shall all this earth to have become fully developed (literally baked) by the fire (produced by) of the mantras, O eminent twice-borns! like a vessel made of mud. The spot is thus cleaned by sprinkling with the powder of mortar.

(Fortification of the directions)

37b-40a. He (priest) shall fortify, after having thus thought, the directions with the Hṛdaya[55] and other mantras, the intermediate directions (are to be fortified) with the Astramantra itself and the upper regions with the Netramantra. He shall then cover himself using the forefinger, with the Kavacamantra, for the sake of (self) protection, which is of the form of a glowing overcoat (armour) blazing forth like ten thousand suns. He shall then do Bhūtaśuddhi[56] with Prāṇāyāma[57] and (two) *dhāraṇās.*[58]

(Mode of performing prāṇāyāma)

40b-44. He shall then meditate upon god who is present in the region of the navel. He shall collect the dirt (on his body) which issues out through the exhaled air[59] and throw it out at Dvādaśānta.[60] He shall draw (inhale) into

55. Hṛdayamantra, see under 31.
56. Bhūtaśuddhi: purification of the elements (*bhūta*) of which the physical body is made. A detailed treatment of this is contained in LT. XXV; cf. for a brief treatment JS X.15-17a.
57. Prāṇāyāma : one of the eight limbs of Yoga. Here *āyāma* is used to mean control and from the context the control of the vital airs is meant. See Ahs. XXXII.51-55; SKS. Ṛṣi. III.60-87a gives a detailed description; cf. Pād. S. II.3; cf.Viṣṇucitta on VP VI.7.43-44.
58. *dhāraṇābhyām* : *dhāraṇā* is fixing the mind (*citta*) in a particular place or object; vide: *deśabandhaścittasya dhāraṇā*, YS. III.1. This is of two kinds serving two purposes, burning the impurities and giving nourishment to the body; vide: Pāram. S. III.222. It is of three kinds VS. VI.25a; Ahs. XXXII.58; JS. XXXIII.10 five kinds (Names not mentioned); LT. XXXIV.102; *dhāraṇābhiḥ* in the plural but not enumerated; SKS. Śiva. III.209-213; four kinds one for each direction are stated; *Vimānārcanakalpa* (p. 515) mentions eight kinds; *Garuḍapurāṇa* mentions ten kinds; vide: Vijñānabhikṣu on YS. III.1.
59. *Vāyumārga* : final *recaka* in the first *Prāṇāyāma* ; *Pūraka, Kumbhaka* and *Recaka* are the three parts of Prāṇāyama. They mean taking in external air, retaining it within and letting it out.
60. Dvādaśānta : a place twelve inches above the top of the head, Pād. S. II.2.2.

नासाग्रेण तु मन्त्रेऽमुं[१] देहसम्पूरणाय च ।
तं ध्यायेद्धृदयस्थं च गतिरुद्धेन वायुना ॥ ४२ ॥
चित्तोपशमनार्थं तु नूनं वायुजयाय च ।
शनैः शनैरथ बहिः केवलं मारुतं क्षिपेत् ॥ ४३ ॥
विनाऽन्त्यरेचकेनैवमन्येषामुत्तरोत्तरम् ।
कालाभ्यासं यथाशक्ति नित्यमेवं समाचरेत् ॥ ४४ ॥

प्राणायामप्रकारमाह– **नाभिदेशस्थितम्** इति सार्धैश्चतुर्भिः । वायुमार्गेण प्रथमप्राणायामान्त्यरेचकवायुमार्गेण । वातचक्रसमन्वितं द्वितीयप्राणायामपूरकवायुसहितम् । गतिरुद्धेन वायुना तृतीयप्राणायामकुम्भकेन। एवमेवैतद्व्याख्यातं श्रीभाष्यकारकृतनित्यग्रन्थव्याख्याने । अत्रापेक्षिताः नाडीसंस्थानदशवायुस्थानकर्मप्राणायामस्वरूपरेचकादिप्रकारकतत्तन्मन्त्रतत्तदङ्गुलितत्तन्मात्रासंख्यादयो बहवो विशेषाः पारमेश्वरोक्ता (तृतीयेऽध्याये) ग्राह्याः ।

[भूतशुद्धिः]

द्वादशान्तेऽथ मन्त्रेशं तप्तहाटकसन्निभम् ।
सहस्ररविसङ्काशवृत्तमण्डलमध्यगम् ॥ ४५ ॥
स्मृत्वाऽथ मुक्तं तन्मन्त्रैर्निर्दहेद्विग्रहं स्वकम् ।
दक्षिणाङ्घ्रेरथाऽङ्गुष्ठप्रान्ते देशे शिखाक्षरम् ॥ ४६ ॥
ध्यात्वा युगान्तहुतभुग्रूपज्वालासमावृतम् ।
तेन स्वविग्रहं ध्यायेत् प्रज्वलन्तं समन्ततः ॥ ४७ ॥
देहजां भावयेज्ज्वालां मन्त्रनाथे लयं गताम् ।
दिव्यप्रशान्ताऽगारं तु तमधिष्ठाय चेतसा ॥ ४८ ॥
स्वमन्त्रादमृतौघेन सेचयेद्विग्रहं स्वकम्
ततः स्वमन्त्रं तद्बिम्बमाकृष्य हृदि विन्यसेत् ॥ ४९ ॥

[मन्त्रन्यासमहिमा]

एवं स[२] शुद्धदेहोऽथ[३] मन्त्रन्यासं समाचरेत् ।
येन विन्यस्तमात्रेण देवदेवसमो भवेत् ॥ ५० ॥
पूजादिसर्वकार्याणामधिकारश्च जायते ।

१. मन्त्रेशम् - D, E
२. सं - D, E
३. अयं - E

the mantra (fresh) air associated with the group of air[61] through the tip of the nose (nostril) for filling the body with it. Then he shall meditate upon Him who remains in the heart with the air, whose course is restrained[62] for steadying the *citta* and indeed for controlling the air. Then he shall expel the mere air gently (or slowly). He shall always practise thus for other airs except for the last *recaka* according to his capacity increasing further and further the periods (for practice).

(*Bhūtaśuddhi*)

45-49. He shall then think at Dvādaśānta, of the Lord of the mantras, resembling heated (molten) gold, as being in the midst of a circular disc having the appearance of thousand suns. He shall consider himself as released (from bondage) and burn his body with those mantras. Then he shall meditate upon Śikhākṣara[63] at the extremity of the big toe in the right foot (of God) and consider his (own) body as encircled by the flames of fire (that would rage) at the end of *Yuga*, and glowing (with fire) on all sides. He shall imagine the flame produced in his body as dissolved in the Lord of the mantras. He shall occupy mentally that chamber divine and quiet, and sprinkle his own body with the rapidly flowing nectar arising from his own mantra.[64] He shall then draw out that figure (of God) which is in the form of one's own mantra[65] and place it in the heart.

(*Greatness of Mantranyāsa*)

50-51a. Mantranyāsa[66] is then to be done with a body thus purified which (mantranyāsa) when applied will make him (priest) equal to God of God and qualify him for all deeds like worship.

61. *Vātacakra* : air which is part of the second Prāṇāyāma.
62. This is a reference to *Kumbhaka*, the third Prāṇāyāma. For further details see Pārām. S. III.88-139.
63. *Oṃ śikhāyai vaṣaṭ* — this is Śikhāmantra; the syllable '*ṛ*'.
64. *svamantrāt*: Mūlamantrāt.
65. *svamantra* is Mūlamantra.
66. This is to be done in the various parts of his body by the priest, cf. Pāram. S. III.270; JS. XIII; LT. XXXV.54b55.

भूतशुद्धिप्रकारमाह-**द्वादशान्ते** इति पञ्चभिः । द्वादशान्ते स्वमूर्ध्नोर्द्वादशाङ्गुलोपरि । तत्रापि प्राण-सञ्चाराद्भगवतः स्थापनमिति ज्ञेयम् । तदुक्तं पाद्मे- ''देहमानं स्वाङ्गुलिभिः षण्णवत्यङ्गुलायतम् । प्राणः शरीरादधिको द्वादशाङ्गुलमानतः ॥'' (२.२.२.२) इति । तन्मात्रैर्मुक्तं तत्त्वसंहारक्रमेण गन्धतन्मात्रादि-भिर्मुक्तम् । स्वमन्त्रान्मूलमन्त्रप्रतिपाद्य द्वादशान्तः स्थितभगवतो निःसृतेनेति शेषः । तद्बिम्बं स्वमन्त्रं द्वादशाङ्गुलोपरि वृत्तमण्डलमध्यस्थं देवम् ।

मन्त्रन्यासमाहात्म्यमाह-**एवम्** इति सार्धेन ।

[करन्यासः]

हस्तद्वयेऽपि विन्यस्येद्दीप्तमष्टाक्षरं परम् ॥ ५१ ॥
मणिबन्धान्नखाग्रान्तमादित्यातपवत्ततः ।
सृष्टिसंस्थितिसंहारन्यासं कुर्याद्यथाविधि ॥ ५२ ॥
पर्वदक्षिणतर्जन्याः प्रारभ्याऽङ्गुलिपर्वसु ।
पर्वान्तं वामतर्जन्या न्यासः सृष्टिरुदाहृतः ॥ ५३ ॥
व्यत्यासेन तु संहारस्थिती[४] तु करयोर्द्वयोः ।
प्रारभ्य तर्जनीपर्वकनिष्ठापर्वविश्रमः ॥ ५४ ॥
अङ्गुष्ठाभ्यामङ्गुलीनां मध्यपर्वसु विन्यसेत् ।
मन्त्राक्षराणि त्वाद्यन्तपर्वसु प्रणवं न्यसेत् ॥ ५५ ॥

[षडङ्गन्यासः]

अङ्गुष्ठद्वितयं यावत् कनिष्ठाद्वितयावधि ।
ज्ञानाद्यं वीर्यपर्यन्तं विन्यसेदङ्गपञ्चकम् ॥ ५६ ॥
मूलवद्व्यापकत्वेन नेत्रमूर्ध्वाङ्गुलीषु च ।

प्रथमं व्यापकं करन्यासमाह-**हस्तद्वये** इत्यादिना । एवं व्यापकन्यासे कृते, अशक्त्या सृष्ट्यादिन्यासा-करणेऽपि न प्रत्यवाय इति ज्ञेयम् । व्यापकं कञ्चुकम् । यद्वा मन्त्रमक्षरशस्तथेति पाद्मे वैकल्पिकत्वोक्तेः । अत एव श्रीसात्वते सर्वत्र केवलव्यापकन्यास एवोक्तः ।

सृष्ट्यादिन्यासत्रयप्रकारानाह- **सृष्टिः** इत्यादिभिस्सार्धैस्त्रिभिः ।

अथ करयोः हृदयादिषडङ्गमन्त्रन्यासमाह-**अङ्गुष्ठद्वितयम्** इत्यादिना सार्धेन । एवं नेत्रमन्त्रान्तन्यासो मुमुक्षुविषयेति बोध्यः । तथा चोक्तं श्रीसात्वते द्वितीयपरिच्छेदे - ''प्राधान्येन त्वथैश्वर्यं मोक्षो यत्रानुषङ्गत।

४. स्थितो - D, E

(*Karanyāsa*)

51b-55. The splendid and great *Aṣṭākṣara* shall be placed on both the hands from the wrists to the tips of the nails (which would then seem to be) possessing sun's radiance (on them). Then Sṛṣṭi, Sthiti and Saṃhāra *nyāsas* are to be done according to rules. Sṛṣṭinyāsa is held to (be done) begin from the joint of the forefinger in the right hand moving over up to the joints of the forefinger in the left hand.[67] Saṃhāra[68] and Sthitinyāsas[69] are done reversely in both the hands beginning from the joints of the forefinger and ending in the joints of the littlefinger. Nyāsa is to be done with the thumbs (of both hands) on the middle joints of the fingers. The letters of the mantra shall be placed on the first (lowest) and last (top) joints and *praṇava* must be placed.

(*Nyāsa of six limbs*)

56-57a. This (Ṣaḍaṅganyāsa)[70] shall be done beginning from the two thumbs upto the two little fingers. It must have five limbs from *Jñāna* to *Vīrya*. The *nyāsa* of the Netramantra[71] is to be done at the top of the fingers, as it is all-pervasive like the Mūlamantra.

67. Sṛṣṭinyāsa: this is to be done to have a new body created purified by *nyāsa*.

68. Saṃhāranyāsa: this is to be done to destroy the impure body, see SKS. Brahma. IX.42b-52.

69. Sthitinyāsa: this is to retain the perfect body endure through the period of worship.

Pād. S. IV shows the way of using Aṣṭākṣara and Dvādaṣākṣasa mantras for doing these three *nyāsas*, III. 52-57a, Cf. SKS. Brahma. IX.14b-69.

70. The six limbs are: *hṛdaya, śiras, śikhā, kavaca, netra* and *astra*. Here the *aṅgas* are mentioned as *jñāna, śakti, bala, aiśvarya* and *vīrya*. This is to be done in the fingers of both the hands beginning with the little finger, JS. VI.105b-153a; Pād. S. IV.3.74-80.

71. Netramantra is held to be all comprehensive like the Mūlamantra and so it is to be done on the top (tip) of the finger. The commentator observes that the *nyāsa* of the Netramantra is concerned with those who seek *mokṣa*, cf. SS. II.39a-41a.

तत्र तद्विघ्नशान्त्यर्थमस्त्रान्तं विद्धि मन्त्रपम् ॥ विपर्यये तु नेत्रान्तो मन्त्रो यस्मान्महामते । दृग्दृष्टिशुद्धमार्गाणां क्व विघ्नाः शान्तचेतसाम् ॥'' (३९-४१) इति । एवमत्रापि वक्ष्यति त्रयोविंशेऽध्याये ।

[किरीटादिभूषणन्यासः]

किरीटं दक्षिणे हस्ते श्रीवत्सं वाममध्यतः ॥ ५७ ॥
कौस्तुभं दक्षिणतले वनमालां तथाऽपरे ।
दक्षिणे मध्यतः पद्मं प्रस्फुरत्किरणोज्ज्वलम् ॥ ५८ ॥
गदां वामतले न्यस्येज्ज्वलन्तीं स्वेन तेजसा ।
दक्षे महाप्रभं चक्रं शङ्खं वामतले न्यसेत् ॥ ५९ ॥
श्रियं दक्षिणहस्ते तु पुष्टिं वामतले न्यसेत् ।
अङ्गुष्ठाद्दक्षिणादादौ वामान्तं मूलदेशतः ॥ ६० ॥
गारुडं विन्यसेन्मन्त्रं दशस्वङ्गुलिषु क्रमात् ।
अनेन विधिना पूर्वं हस्तन्यासं समाचरेत् ॥ ६१ ॥

भूषणादिन्यासानाह- **किरीटम्** इति सार्धैश्चतुर्भिः । अत्र श्रीसात्वतानुसारेण भूषणन्यासानन्तरमायुधन्यास उक्तः । पारमेश्वरे तु तदनन्तरं भूषणन्यास उक्तः ।

एवं करन्यासस्य प्राथमिकत्वे युक्तिरुक्ता पारमेश्वरे (४.२०-२३) - ''या विभोः परमा शक्तिः हृत्पद्मकुहरान्तगा । वायव्यं रूपमास्थाय दशधा संव्यवस्थिता ॥ इच्छायाः सप्रवाहेण पाणिमार्गेण निर्गता । नाडीदशकमाश्रित्य ता एवाङ्गुलयोर्मताः ॥ अत एव द्विजश्रेष्ठ शक्त्याख्ये प्रभुविग्रहे । पूर्वं मन्त्रगणं न्यस्य ततो भूतमये न्यसेत् ॥'' इति । युक्त्यन्तरं चोक्तं तत्रैव (४.४-५) - ''व्यापारो मानसो ह्येष न्यासाख्यो यद्यपि स्मृतः । न बध्नाति स्थितिं सम्यक् तथाऽपि क्रियया विना ॥ कराधीना पुनः सान्तः प्राङ्न्यासस्तु तयोः स्मृतः ।'' इति ।

एवं भगवद्विग्रहेऽपि मन्त्रन्यासक्रियायाः पूजककराधीनत्वाद्भगवत्करयोः न्यासाभाव इति बोध्यम् । वक्ष्यति हि करन्यासं विना तत्रेति (९५) ।

५. ज्वलती - A

(*Nyāsa of Kirīṭa and other ornaments*)

57b-61. *Nyāsa* is to be done thus for the crown on the right palm, Śrīvatsa[72] in the middle (palm) of the left hand, Kaustubha[73] in the right palm, Vanamālā[74] in the other (left), lotus glowing with glittering beams in the middle (palm) of the right hand, Gadā[75] glowing with its own lustre in the middle (palm) of the left hand, Cakra[76] of great radiance in the right palm conch[77] in the left palm, Śrī in the right palm, and Puṣṭi[78] in the left palm. Garuḍamantra[79] shall be uttered while doing *nyāsa* beginning at first from the root of the right thumb upto that (thumb) in the left hand from the lowest part in all the fingers in their order. The *nyāsa* in the hands shall be done at first according to this rule.

72. Śrīvatsa: curl of hair in the chest of Viṣṇu.
73. Kaustubha: celebrated gem adorning the chest of Viṣṇu.
74. Vanamālā: garland containing flowers of all the seasons.
75. Gadā: club called Kaumodakī.
76. Cakra: Sudarśana is another name of cakra, the discus of Viṣṇu.
77. Śaṅkha: conch also called Pāñcajanya.
78. Puṣṭi: name of the goddess stationed on the one side of Viṣṇu, while Śrī is on the other. She represents another form of Śrī, cf. LT VIII.21b; SS XII.7a; Pauṣ. S XXI.8a.
79. Garuḍamantra: *oṃ khaṃ khagānanāya namaḥ.*

[शरीरे सृष्ट्यादिन्यासप्रकारः]

आ ब्रह्मरन्ध्रात् पादान्तं मूलमन्त्रं तु विग्रहे ।
व्यापकत्वेन विन्यस्य पादाद्भूयः शिरोऽन्तिमम् ॥ ६२ ॥
सृष्टिस्थितिलयन्यासेष्वेकं देहे समाचरेत् ।
मूर्धादिपादपर्यन्तं सृष्टिन्यासः प्रकीर्तितः ॥ ६३ ॥
पादादिमूर्धपर्यन्तं संहारन्यास इष्यते ।
नाभ्यादिहृदयान्तस्तु स्थितिन्यास उदाहृतः ॥ ६४ ॥
मूर्ध्नि मध्यमयाऽङ्गुल्या तर्जन्या च तदा दृशोः ।
साङ्गुष्ठयाऽनामिकया मुखमध्ये तु विन्यसेत् ॥ ६५ ॥
साङ्गुष्ठतर्जन्यग्रेण हृदये विन्यसेत् ततः ।
तथाऽङ्गुष्ठकनिष्ठाभ्यां नाभौ न्यासं समाचरेत् ॥ ६६ ॥
व्यङ्गुष्ठाभिश्चतसृभिरुपस्थे जानुनोरपि ।
सर्वाभिरङ्गुलीभिस्तु पादयोर्न्यासमाचरेत् ॥ ६७ ॥
मन्त्राक्षरं तु सर्वत्र तारसम्पुटितं न्यसेत् ।
एवमष्टाक्षरन्यासं कृत्वाऽङ्गन्यासमाचरेत् ॥ ६८ ॥

अथ शरीरे व्यापकन्यासपूर्वकं सृष्ट्यादिन्यासप्रकारानाह- **आ ब्रह्मरन्ध्रात्** इति सप्तभिः। अत्र सृष्ट्यादिन्यासत्रये एकतमं कुर्यादित्युक्तम्, तच्चाश्रमानुसारेण द्रष्टव्यम् । विष्णौ षष्ठे पटले (३५-३६) - "स्थितिन्यासो गृहस्थस्य सृष्ट्याख्यो ब्रह्मचारिणः । मुमुक्षोः संहृतिन्यास एवं न्यासस्त्रिधा स्मृतः ॥" इत्युक्तत्वात् । अत्र मुमुक्षुशब्देन वनस्थयत्योर्ग्रहणम् ।

[शरीरे हृदयादिषडङ्गन्यासः]

ततस्तु हृदये ज्ञानं यतो व्यज्येत तत्र तत् ।
ऐश्वर्यं शिरसो देशे यस्मादुपरि तिष्ठति ॥ ६९ ॥
प्राकृतं तात्त्विकं वाऽपि सर्वत्र कमलेक्षणम् ।
हार्दाग्नेरूर्ध्वगायान्तु शिखायां शक्तिमन्त्रराट् ॥ ७० ॥
बलं चाऽखिलगात्राणां त्वग्गतं वायुना सह ।
मूर्च्छितं सर्वगात्रैर्यत्तद्वीर्यं हस्तयोर्न्यसेत् ॥ ७१ ॥
अन्तर्बोधस्वरूपं यत् प्राकृतध्वान्तशान्तिकृत् ।
तेजस्तत्तैजसे स्थाने न्यासकाले समस्यते ॥ ७२ ॥

(*Method of doing Sṛṣṭi and other nyāsas on the body*)

62-68. *Nyāsa* of the Mūlamantra shall be done to pervade the body from the Brahmarandhra[80] up to the extremity of the feet as it is pervasive and again from the feet up to the head. One *nyāsa* among the Sṛṣṭi, Sthiti and laya shall be done on the body. Sṛṣṭinyāsa is said to begin from head to the feet, Saṃhāranyāsa from feet to the head and Sthitinyāsa[81] from the navel to the heart (chest). The middle finger is to be used for *nyāsa* on the head, forefinger on the two eyes and the thumb with the ring finger on the middle portion of the face. *Nyāsa* is to be done on the heart (chest) with the little finger together with the tip of the thumb. The thumb and the little finger are be used for *nyāsa* on the navel; the four fingers, leaving out the thumb, are to be used for doing *nyāsa* on the generative organ and the knees. The feet should have *nyāsa* with all the fingers. The syllables of the mantras shall be placed in all cases covered with Tāramantras,[82] Aṅganyāsa is to be done in this way after doing Aṣṭākṣaranyāsa.

(*Nyāsa of the six aṅgas, Hṛdaya and others on the body*)[83]

69-72. *Nyāsa* of *Jñāna* is to be done on the heart (chest) wherefrom it (knowledge) is manifested, Aiśvaryanyāsa on the region of the head above which it is stationed. The *nyāsa* of the *tattvas* of matter shall be done everywhere as the lotus-eyed Lord is present there. The prominent Śaktimantra[84] shall be placed on the flame of the fire glowing upwards in the heart. *Bala* shall be placed on the skin (spread) all over the body with air. *Vīrya* which fills all the limbs is to be placed on the two hands. Lustre, which is of the form of inner knowledge and which puts down the material darkness is to be put together in the place of *Taijasa* ego, when *nyāsa* is done.

80. Brahmarandhra: an aperture on the crown of the human body, through which the soul is held to leave the body.

81. Sthitinyāsa is for the house-holder, Sṛṣṭinyāsa for the Brahmacārins and Saṃhṛtinyāsa for him who seeks to get *mokṣa*; VS VI.35b-36a. The commentator notes that Saṃhṛti-*nyāsa* is applicable to Vānaprasthas also.

82. Tārasampuṭita: enclosed by Tāra which is Praṇava; which is to be used both at the begining and end of the *mantra*.

83. *Nyāsa* is to be done on the limbs of the body; here, the six qualities *jñāna* and others are to be placed on these *aṅgas*.

84. Śaktimantra is identical in the Pāñcarātra Āgama with Lakṣmīmantra: *oṃ lāṃ lakṣmyai namaḥ; parama-lakṣmāvasthe āyai lāṃ śrīṃ hrīṃ svāhā.* See JS. Introduction P.61 for other Śaktimantras.

[शरीरे भूषणादिन्यासः]

किरीटं मूर्ध्नि विन्यसेद् वह्न्यर्कायुतदीधितिम् ।
श्रीवत्सं वक्षसो वामे पूर्णेन्दुसदृशद्युति ॥ ७३ ॥
कौस्तुभं हृदये न्यस्य चण्डदीधितिलक्षणम् ।
नानाऽब्जवनपुष्पोत्थां वनमालां च कण्ठतः ॥ ७४ ॥
ततः पद्मगदाचक्रशङ्खान् प्राग्वत्तु विन्यसेत् ।
आ चांसाद्दक्षिणे भागे न्यस्याच्छ्रीरुत्तरे तथा ॥ ७५ ॥
पुष्टिं गुल्फावसाने च गरुडं चोरुमध्यतः ।
मन्त्रन्यासं तु कृत्वैवं ततः पाणिद्वयेन तु ॥ ७६ ॥

[देवताभावनम्]

मुद्रां बध्वा स्मरेद्ध्यानं देवोऽहमिति भावयेत् ।

हृदादिषडङ्गन्यासस्य सहेतुकं स्थानान्याह- **ततः** इति चतुर्भिः ।

भूषणादिन्यासानाह-**किरीटम्** इति सार्धैस्त्रिभिः ।

मूलादिमुद्रादर्शनपूर्वकं स्वस्मिन् देवत्वभावनामाह-**मन्त्रन्यासम्** इत्यादिना । एवमेव व्यक्तमुक्तं जयाख्येऽपि -

''अहं स भगवान् विष्णुरहं नारायणो हरिः । वासुदेवो ह्यहं व्यापी भूतावासो निरञ्जनः ॥ एवं रूपमहङ्कारमासाद्य सुदृढं मुने ।'' (२२-४०,४२) इति ।

[मानसाराधनक्रमः]

कृत्वैवं तु ततः पश्चान्मानसं यागमारभेत् ॥ ७७ ॥

[पद्मासनब्रह्माञ्जल्यादेर्विधिः]

पद्मासनादिकं बध्वा नाभौ ब्रह्माञ्जलिं दृढम् ।

[इन्द्रियादीनां प्रत्याहारः]

मनस्युपरतं कुर्यादक्षग्रामं बहिः स्थितम् ॥ ७८ ॥
चित्तं बुद्धौ विनिक्षिप्य तां बुद्धिं ज्ञानगोचरे ।
ज्ञानभावनया कर्म कुर्याद्वै पारमार्थिकम् ॥ ७९ ॥

(*Nyāsa of the ornaments of the body*)

73-76. *Nyāsa* of the crown having the brilliance of ten thousand suns and fire, is to be done on the head, of Śrīvatsa with a splendour equal to the full-moon on the left chest, of Kaustubha having the fierce rays on the heart (chest) and of Vanamālā made of the flowers got from various lotus-ponds on the neck. Then lotus, club, discus and conch are to be placed as stated above. Śrī shall be placed on the right side (of the chest) extending upto the shoulder. Similarly, Puṣṭi is to be placed on the left (side of the chest) upto the end of the ankle, Garuḍa shall be placed between the thighs.

(*Thinking of himself as God*)[85]

77a. After doing Mantranyāsa in this way, the *mudrā* is to be formed with the two hands and thinking of meditating (upon God), he should feel 'I am God'.[85a]

(*Method of mental worship*)

77b. After doing thus, the mental worship is then to be begun.

(*Method of forming Padmāsana and Brahmāñjali and others*)

78a. Forming Padmāsana[86] and others, Brahmāñjali[87] is to be firmly fixed in the navel.

(*Withdrawal of the senses and others*)

78b-79. The group of senses lying outside (the body) shall be made to remain quiet in the mind. Placing the *citta*[87a] in the *buddhi*, the *buddhi* must be placed in God who is the object of knowledge. Real (spiritual) deed is to be done treating it as knowledge.

85. The priest shall imagine that he himself is God, by doing the *nyāsa* of mantras.

85a. The priest becomes in a short time identical, or filled with God, with the result that he feels that he is God Himself. This is effected by *nyāsa* and *dhyāna*; cf. JS XI.39-43a.

86. Padmāsana: see Ahs. XXX.34 for the way of forming it, cf. Pād. S II.1.13-14a.

87. Brahmāñjali: this is formed by holding the palms at the navel; vide: LT. VS VII.5.

87a. *citta*: is used here in the sense of mind.

[आसनकल्पनम्]

अथ प्रणवपूर्वेण स्वनाम्नाऽऽनतिना सह ।

जयाख्योक्तरीत्या 'नाभिमेढ्रान्तरे ध्यायेत्' इत्यादिभिर्हृदि जाग्रदासनकल्पनमुक्तम् । अत्र तु श्रीसात्वतानुसारेण स्वप्नासनस्योक्तत्वात्, तत्स्थानविभागो यथासम्भवमत्रापि ग्राह्यः । स्वप्नजाग्रदासनभेदस्तु पारमेश्वरे (३-५७) - "स्वप्नः शेषाहिपूर्वं तु वह्निपर्यन्तमासनम् । क्षीरार्णवादितो भावासनान्तं जाग्रदासनम् ॥" इति ।

शेषपूर्वं तु वह्न्यन्तमासनं परिकल्पयेत् ॥ ८० ॥
तथाऽऽक्रम्याय तस्यैव कार्या स्वहृदि कल्पना ।

अथ मानसाराधनक्रममाह-**कृत्वैवम्** इत्यारभ्य यावदध्यायपरिसमाप्तिः ।

तदर्थमादौ पद्मासनादिनोपवेशनाञ्जलिबन्धानाह-**पद्मासनादिकम्** इत्यर्धेन । तल्लक्षणमुक्तमहिर्बुध्न्यसंहितायाम् - "ऊर्वोरुपरि संस्थाप्य उभे पादतले शुभे । पद्मासनमिदं प्रोक्तं सर्वकिल्बिषनाशनम् ॥" (३२.३४) इति ।

प्रत्याहारप्रकारमाह-**मनसि** इति सार्धेन । अक्षग्राममिन्द्रियसमूहम् । ज्ञानगोचरे भगवतीत्यर्थः । ज्ञानभावनया- "स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः । विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम् ॥" इति ।

बुद्ध्या हृत्पद्मस्थितस्य भगवतो आसनकल्पनमाह-**अथ** इत्यादिना सार्धेन ।

[शब्दब्रह्मस्वरूपम्]

चतुश्चक्रे नवद्वारे देहे देवगृहे पुरा ॥ ८१ ॥
कण्ठकूपधरारूढं हृत्पद्मं यदधोमुखम् ।
तत्कर्णिकावनेर्मध्ये रूढमूर्ध्वमुखं तु यत् ॥ ८२ ॥
शब्दव्यक्तिस्तदूर्ध्वे तु स्थितार्केन्द्वग्निलक्षणा ।

पारमेश्वरे- स्वहृदये भगवदभिव्यक्तिस्थाननिरूपणार्थं पूर्वं शब्दब्रह्मावस्थानमाह- **चतुश्चक्रे** इति द्वाभ्याम् । चतुश्चक्रे आधारनाभिहृत्कण्ठरूपचतुश्चक्रविशिष्टे । रूढं समुत्पन्नम्, ऊर्ध्वमुखं हृत्पद्ममित्यनुषङ्गः । तत्कमलद्वय-सम्पुटमध्येऽधः कमलोपरि शब्दव्यक्ति स्थिता । पारमेश्वरे तु योगपीठनिरूपणानन्तरम् "शब्दव्यक्तिस्तदूर्ध्वे तु"(५-८३)इत्यादिकमुक्तम् । अतस्तत्र तदूर्ध्वे योगपीठोर्ध्व इत्यर्थो वर्णनीयः । तावता नैकार्थ्य-विरोधः ।

(*Formation of the seat*)

80-81a. Then a seat is to be arranged (for God) with His name following *Praṇava* and the word *nāmaḥ*,[87b] beginning with Śeṣa[88] (Ādiśeṣa) and ending with Agni. It (seat) shall be arranged in one's own heart for His occupation[89] of it.

(*Form of Śabdabrahman*)

81b-83a. There is the lotus-like heart turned upside down formed long ago rising from the cavity of the neck, in the body, the house of God, with four circles and nine apertures. A (lotus) facing upwards and rising amidst the group of (lotus) pericarps[90] of it (lotus mentioned before). The distinct sound[90a] is there characterised by sun, moon and fire.[91]

87b. *oṃ namo nārāyaṇāya.*

88. God, who requires *Mānasapūjā* is to be offered a seat in his heart by the priest. The seats are in the order commencing from below: Śeṣa, Ādhāraśakti, Ādikūrma, Dharmajñāna, Vairāgya, Aiśvarya, Adharma, Ajñāna, Avairāgya, Anaiśvarya, Candramaṇḍala, Sūryamaṇḍala, Kālāgni *(vahni)*. For full details see the commentary; this is according to SS, 1S to the dream state. Cf. JS XIII.2; Pauṣ. S XXII.9-14. Pād. S IV.3.106-107; Pāram. S III.57.

89. *ākramya:* occupation; *ākramyāya* — dative of *ākramya.*

90. While undertaking the mental worship, a seat is to be provided for God. His position is located within the heart that is upside down. vide: *padmakośapratīkāśaṃ hṛdayaṃ cāpyadhomukham /........ tasya madhye mahānagnirviśvārciviśvatomukhaḥ /...... tasya madhye vihnśikhā aṇīyordhvā vyavasthitaḥ .... tasyaśśikhāyā madhye paramātmā vyavasthitaḥ. Mahānārāyaṇīya Upaniṣat* XV.7b-13.

True to this statement, the body is stated to be the abode of God. The body has nine apertures, namely, two eyes, two nostils, two ears, mouth, anus and organ of generation. It is shown at first that God is present in sound and called Śabdabrahman. Sound (*śabda*) exists in four states — Parā, Paśyantī, Madhyamā and Vaikharī; all within the human body, in the circles (*cakra*), *ādhāra* (in the navel), *hṛt* (heart), and *kaṇṭha* (throat). It is audible in the Vaikharī stage. The heart, which resembles a lotus is upside down rising in the cavity of the neck. Another lotus grows there turned upwards in the midst of the pericarps of that lotus. Thus there is a casket, as it were, where sound is above the lotus turned upwards.

90a. It is distinct there as an individual by itself, capable of identification and knowing.

91. It is in the form of fire in the navel, of sun in the heart and of moon above (head).

[सुषुम्नानाडीस्वरूपम्]

श्रीदीप्ति[६]भास्वरा नाडी त्वव्यक्तध्वनिविग्रहा ॥ ८३ ॥
व्यक्तचक्रद्वयस्योर्ध्वे वर्तते या महामते ।
निःसृता ब्रह्मरन्ध्रेण गता सूर्यपथात् परम् ॥ ८४ ॥
वायुद्वारेण पातालं भित्त्वा याता स्वगोचरम् ।
सङ्कल्पविषयः सर्वस्तद्बन्धः प्रतितिष्ठति ॥ ८५ ॥
सूत्रे मणिगणो यद्वन्मध्यनाडी ह्यतः स्मृता ।
लक्ष्यस्थाने तु पूर्वोक्ते तस्यामभ्यन्तरे तु वै ॥ ८६ ॥
सम्पुटे शशिसूर्याख्ये निमेषोन्मेषलक्षणे ।
तत्राब्जं चार्कमालम्ब्य परावाक् भ्रमरी स्थिता ॥ ८७ ॥

तस्मिन् हृदयकमल एवाव्यक्तपद्मत्वारोपात् ।

पुनः शब्दब्रह्मावस्थानमेव सुषुम्नानाडीस्वरूपकथनपूर्वकं विशदयति-**श्रीदीप्तिभास्वरा** इति षड्भिः। पूर्वोक्ते लक्ष्यस्थाने हृत्कमलस्थान इत्यर्थः। पारमेश्वरव्याख्याकारैस्तु "लक्ष्य इति पूर्वोक्तनिष्प्रपञ्च इति तृतीयोऽध्यायोक्तेः" इति व्याख्यातम्, तदज्ञानमूलकम्, यतः श्रीसात्वतद्वितीयपरिच्छेदोक्ता श्रीदीप्तिभास्वरा इत्यादिश्लोका एव पारमेश्वरे चोक्ताः, तदन्तर्गतं लक्ष्यस्थाने तु पूर्वोक्ते इति वाक्यं सात्वतानुसारेणैव व्याख्यातव्यम्। तत्र तद्वाक्यतः पूर्वं प्रथमे द्वितीये वा परिच्छेदे - "निष्प्रपञ्चे परे मन्त्रे पञ्चशक्त्याख्यविग्रहे" इति पारमेश्वरतृतीयोऽध्यायोक्तं वाक्यं तदर्थो वा न दृश्यते। न हि तदर्थपरत्वेन व्याख्यानेऽर्थसङ्गतिरपि दृश्यते। अलं प्रसक्तानुप्रसक्त्या। निमेषोन्मेषलक्षणे निमीलनोन्मीलनविशिष्टे। निमीलितोर्ध्वकमलस्य शशिसंज्ञत्वम्, उन्मीलिताधःकमलस्य सूर्याख्यत्वम्। तत्र कमलद्वये आर्कमर्कसम्बन्धि, अब्जमधः कमलमित्यर्थः। आलम्ब्याश्रित्य वागेव भ्रमरीस्थिता।

[परब्रह्मस्वरूपम्]

या सर्वमन्त्रजननी शक्तिः सर्वात्मनो विभोः ।
नदन्ती वर्णजं नादं शब्दब्रह्मेति यत् स्मृतम् ॥ ८८ ॥
अकारपूर्वो हान्तश्च धारासन्तानरूपधृक् ।
नादावसानगगने देवोऽनन्तसमन्वितः ॥ ८९ ॥
वरदाऽभयदेनैव शङ्खचक्राङ्कितेन तु ।
त्रैलोक्योद्धृतिदक्षेण युक्तः पाणिद्वयेन तु ॥ ९० ॥

६. आदीप्ति - D, E

(*Form of Suṣumnānāḍī*)

83b-87. O great-minded person! That vein,[92] brilliant with lovely radiance with an indistinct form, is above the two circles. It issues out of the Brahmarandhra goes high beyond the course of the sun, breaks through Pātāla, (passes along the course of mind) and reaches a place which is within its range. All that could be willed are bound by it and stands fixed, there like a cluster of gems in a string and therefore is called middle vein.[93] Parāvāk stays there resembling the moving bee, holding (resting upon) the lotus[94] related to the sun, within the casket called Śaśisūrya, closing and opening[95] within that place (lotus-like heart) noted above.

(*Form of Parabrahman*)

88-94a. That power, which belongs to (God), the omnipresent, the soul of all, is the mother (producer) of all mantras and which utters the sound arising from letters,[96] it is held to be Śabdabrahman. It begins with the letter '*a*' and ends with (the letter) '*ha*' in the form of continuous flow. There is the Lord with Ananta[97] in the sky lying at the extremity of sound[97a] with hands offering boon and security and (the two) hands marked (having) by the conch and discus; with the two hands dexterous in lifting up the three worlds together. He is calm, has a form of knowledge and though shapeless has assumed a shape with a peerless body, out of the desire to show favour

92. Suṣumnā; for a similar description see SKS. Ṛṣi. III.87-89.
93. *ibid.* III.88a; it is called *Amṛtā.*
94. *parāvākbhramarī*: *parā vāk* — supreme speech resembling the tree. This refers to the sound in the first stage called Parā. Speech itself is Brahman. The feminine gender is used for the word Bhramara, to agree with the word *vāk*, feminine in gender.
95. *nimeṣa*: closing; *unmeṣa*: opening. The lotus which is above is called Śaśin. The lotus which is opened is called Sūrya.
96. *nadantī varṇajaṃ nādaṃ*: *nādaṃ* must be taken with *bhramarī*. *Nāda* — sounds from '*a*' to '*ha*'; *varṇajaṃ* — adjective to *nāda.*
97. Ananta represents the letter *kṣa*, the last among the syllables.
97a. Viṣṇu is at the farther limit of *nāda.*

शान्तः संवित्स्वरूपस्तु भक्तानुग्रहकाम्यया ।
अनौपम्येन वपुषा ह्यमूर्तो मूर्ततां गतः ॥ ९१ ॥
विश्वमाप्याययन् कान्त्या पूर्णेन्द्वयुततुल्यया ।
रश्मिभिर्भास्करो यद्वत्समुद्र इव वीचिभिः ॥ ९२ ॥
स्वमूर्तिभिरमूर्ताभिरच्युतादिभिरन्वितः ।
दीप्तिमद्भिरमूर्तैस्तु सुधाकल्लोलसङ्कुलः ॥ ९३ ॥
पूर्णाभरणैः सर्वैः निर्विकाराङ्घ्रिविग्रहः ।

[मन्त्रन्यासः]

तस्माद् देवं समावाह्य हृदये कल्पितासने ॥ ९४ ॥

अकारादि-हकारान्तो यो नादः तं 'वर्णजं नादं नदन्ति' इति भ्रमरीविशेषणम् ।
तदन्ते द्योतमानपरब्रह्मस्वरूपमाह-**नादावसान** इति पञ्चभिः ।
तस्मात् स्थानात् स्वहृदयकल्पितयोगासने भगवदावाहनमाह-**तस्माद्देवम्** इत्यर्धेन ।
मन्त्रन्यासमाह-**मन्त्रन्यासम्** इत्यर्धेन । न्यासप्रकारस्तु वक्ष्यमाणरीत्या ग्राह्यः ।

मन्त्रन्यासं ततः कुर्याद्धस्तन्यासं विना विभोः ।
ततः खाब्जकमध्यात्तु ह्यूर्ध्वस्थात् संस्मरेच्च्युताम् ॥ ९५ ॥
गङ्गां भगवतो मूर्ध्नि तेनाऽमृतजलेन तु ।
अर्घ्याद्यखिलभोगानां कार्या वै शुभकल्पना ॥ ९६ ॥
यं यं सङ्कल्पयेद्भोगं तं तं भाव्यं सुधामयम् ।
पतन्तमम्बराद्वेगादमृतांशुपरिप्लुतम् ॥ ९७ ॥
साक्षादमृतरूपैस्तु तैस्तैरमृतसम्प्लवैः ।
बृंहितं मुदितं मग्नं स पुनर्मन्त्रराजं स्मरेत् ॥ ९८ ॥
ततस्तु देवदेवस्यार्घ्यं दत्त्वा यथाविधि ।
सन्निधिं सन्निरोधं च साम्मुख्यं च समाचरेत् ॥ ९९ ॥

[लययागस्वरूपम्]

हृदयादीनि साङ्गानि[७] किरीटाद्यं तु भूषणम् ।
गदाद्यं लाञ्छनं यत्तु लक्ष्म्याद्याः शक्तयस्तथा[८] ॥ १०० ॥

७. चाङ्गानि - D
८. सदा - E

to His devotees, filling the universe with a splendour equal to that of ten thousand full moons, like the sun with rays and the sea with waves. He is with Acyuta[98] and others who have their (own) forms but yet formless.[98a] He is filled (crowned) with the ripples of nectar by possessing all rich[98b] ornaments, refulgent but shapeless. He has an unchanging body right from the feet.[98c]

(*Mantranyāsa*)

94b-99. Invoking the Lord from there (*ākāśa*), he (the priest) shall do Mantranyāsa for God in his heart where a seat is (to be) provided without doing *nyāsa* of the hand.

Then he (priest) must feel the river Gaṅgā to have fallen on the head of God from the lotus-like[99] sky, from above. Auspicious arrangements are to be made with the water nectar for offering *arghya* and all other enjoyable services. Whichever enjoyment is provided must be considered to have been made up of nectar, falling fast from the sky, bathed in the sprays (small parts) of nectar, increased, rejoiced and immersed[100] in those flows of nectar, actually of the form of nectar. He (priest) shall feel that he has become the king of mantras.[101] *Arghya* must be duly offered then to the God of gods, bringing Him near,[102] keeping Him in that place[103] and making Him remain favourably to him.

(*Nature of Layayāga*)

100-101. Whichever remains in the body of God, heart and others with their subsidiary limbs, crown and other ornaments, club and other marks (of

98. See under 21.
98a. *mūrta*: limited shape; *amūrtābhiḥ* : having no definite shape.
98b. *pūrṇābharaṇa*: ornaments that are perfect in their formation.
98c. *aṅghri*: foot, bottom, base. The body of God is without change in any limb, changelessness is from the bottom or foot up to head.
99. *Khābjaka madhyāt*: from the vault of the sky and also from the the midst of lotus-like heart. *Kha*—sky, *abja*—lotus, *abjaka* also means lotus. The commentator observes that Gaṅgā flowed down from the sky, entered into the heart through *Brahmarandhra* and falls on the head of God from the midst of the upper lotus.
100. *magna* : immersed in the ocean of joy (*pramoda*)
101. *mantrarāṭ* : king of mantras.
102. *sannidhi* : appearance in the vicinity of the priest.
103. *sannirodha* : keeping Him there.

गरुडो मूर्तयो वाऽन्या देहे देवस्य याः स्थिताः ।
व्यापकस्य तथात्वेन स्वे स्वे स्थाने प्रभात्मकाः ॥ १०१ ॥
तद्देहसंस्थिताः सर्वे पूजनीयाः क्रमेण तु ।
परिवारं विना मन्त्रैः स्वैः स्वैरर्घ्यादिभिर्द्विजाः! ॥ १०२ ॥
लययागो ह्ययं विप्राः हृदादिष्वनुकीर्तितः ।

अर्घ्याद्युपकरणभावनाप्रकारमाह-**ततः** इति सार्धैस्त्रिभिः । खाब्जकमध्यात् क्रमेणाकाशमध्याद् हृदयकमल-मध्याच्चेत्यर्थः । ऊर्ध्वस्थादित्यब्जविशेषणम् । पूर्वमम्बरात् पतितां ब्रह्मरन्ध्रद्वारा हृदयान्तः प्रविष्टां तत्रोर्ध्वकमलान्तरालाद्भगवन्मूर्ध्नि च्युतां गङ्गां स्मरेदिति भावः । मग्नं प्रमोदार्णवमग्नमित्यर्थः । मन्त्रराट् मन्त्रराजम् ।

सान्निध्याद्यादिकमाह-**ततः** इत्यादिना । सन्निधिराविर्भावः, सन्निरोधस्तत्रैव स्थैर्यम्, साम्मुख्यम-पराङ्मुखत्वेन स्थितिः ।

यथाविधि वक्ष्यमाणविधिमनतिक्रम्य लययागप्रकारमाह-**हृदयादीनि** इति सार्धैस्त्रिभिः । पारमेश्वरव्याख्याने तु "हृदयादिन्यासमाह 'हृदयादीनि' इति सार्धद्वाभ्याम्" इत्युक्तम्; तदसङ्गतम्, पारमेश्वरे (५. २१९-२२०) पूर्वमेव-

"मूलमन्त्रोदितः प्राग्वत् सर्वमन्त्रगणस्य च । करन्यासं विना देहे न्यासं तस्य च संस्मरेत् ॥"

इत्यत्र सर्वमन्त्रपदेन हृन्मन्त्रादीनामप्युक्तत्वात् । अन्या मूर्तयो वा जयाख्योक्तरीत्या भगवतो मूर्ध्नि भुजेषु च सत्यवासुदेवादिपञ्चमूर्तीनां न्यासपक्षे ताश्च मूर्तयो हृन्मन्त्रादिवल्लययागे पूज्या इति भावः । अत्र यद्यपि पारमेश्वरव्याख्यातृभिः "अन्या मूर्तय इत्यनेनाष्टाद्यनेकभुजभूषितायुधमूर्तिविषया द्रष्टव्या" इति व्याख्यातं, तथापि 'गरुडो मूर्तयो वाऽन्या' इत्यादिश्लोकानां जयाख्यान्तर्गतत्वात्, तत्रत्यमूर्तिशब्दस्य सत्यादिपरत्वात्, तदाशयमतिक्रम्यान्यथा व्याख्यानमनुचितम् । व्यापकस्य मूलमन्त्रस्य तथात्वेन प्रभात्मकत्वेन प्रभात्मकाः केवलतेजोरूपा निराकारा इत्यर्थः । परिवारं विना तत्तन्मन्त्रपरिवारं विना । परिवारस्यापि परिवारकल्पनेऽनवस्थाप्रसङ्गादिति भावः । हृदाद्यङ्गमन्त्रकिरीटादिभूषणायुधलक्ष्म्यादिशक्तिगरुडानां स्वातन्त्र्येणार्चनं तत्तत्परिवारकल्पनं च जयाख्यसंहितायामेव सप्तविंशतिपटलादिषूक्तम् । पारमेश्वरव्याख्याने तु "परिवारं विना परिवाराकारत्वकल्पनं विना" इति व्याख्यातम् । तत्र परिवाराकारत्वं नाम किं साकारत्वं वा? उत परिवारत्वं वा? नाद्यम्; प्रभात्मकइत्यनेनैव तत्सिद्धेः । न द्वितीयम्; तदानीमपि परिवारत्वालो-पात् । तत्रैव 'मूलमन्त्रशरीरस्थं परिवारं यजेत् सदा' इति लययागप्रकरण एवोक्तत्वाच्च ।

भोगयागप्रकारमाह-**मन्त्रराट्** इत्यादिना ।

[भोगयागस्वरूपम्]

मन्त्रराट् कर्णिकामध्ये हृदाद्याः प्राग्दलादिषु[१] ॥ १०३ ॥
साकाराः केवलाः सर्वे पूज्या भोगाभिधो ह्ययम् ।

१. प्राग्गलादिषु - E

identification) Lakṣmī and other powers, Garuḍa or other forms,[104] which are splendourous to be kept in their respective places

102-103a. as they are so for the all pervading (mantra),[105] all of them, which remain in His body, are to be worshipped in their order, with respective mantras, *arghya* and others except the retinue[106] (on secondary mantras). This is said to be, O Brahmins! Layayāga in the case of Hṛdaya[107] and others.

(*Nature of Bhogayāga*)

103b-104a. The principal (king of) mantra (Mūlamantra) is to be worshipped amidst the pericarps, heart and others, on the petals and others lying to the east all having forms and also without them[108] are to be worshipped. This is called Bhoga.

104. *anyā mūrtayaḥ* : these refer to the forms of Satya, Vāsudeva and others.

105. Mantra is Mūlamantra. Therefore they are splendourous, that is, that are of the form of splendour and so do not have any form.

106. *parivāra* : secondary mantras; cf. JS. XXVII.

107. *hṛdādyāḥ* : mantras of six *aṅgas*, *hṛdaya*.

108. *Kevala*: without secondary mantras. The commentary refers to JS. III.76b-136 and Pāram. S. V.248a and discusses the relative difference in their treatment of Layayāga.

[अधिकारयागस्वरूपम्]

केवलेन च यागेन पृथग्भूतेन वै द्विजा: ॥ १०४ ॥
तेषामभ्यर्चनविधिरधिकाराभिध: स्मृत: ।

[लयभोगयोरेवानुष्ठेयत्वम्]

एवं कृत्वा लयाख्यं तु यागं भोगयागभिधं तथा ॥ १०५ ॥

केवला इत्यनेन पूर्ववत् परिवारराहित्यमुक्तम् । पारमेश्वरे तु लययाग: स्वपूर्वोक्तन्यासानुसारेण हृन्मन्त्रादिक्रमेणैवोक्त: । भोगयागस्तु केवलजयाख्यवचनेनैव प्रकटित: । तथापि पारमेश्तरसंहितानिष्ठै: हृन्मन्त्रादिक्रमेणैव भोगयाग: कार्य: । तस्यापि पूर्वोक्तन्यासानुसारेणैव कर्तव्यत्वात् । तथैव बाह्ययागे वक्ष्यमाणत्वाच्च । पारमेश्वरव्याख्यानेऽप्येवमेवोक्तम् - ''लक्ष्म्याद्या: केसरादिषु'' तत्र लक्ष्म्यादय:, अत्र तु दलादिषु हृदयादय इति विशेष इति । उत्तरत्रापि पारमेश्वरे मानसयागानन्तरं'' (५-२४८) भोगस्थानगतानां च लक्ष्म्यादीनां क्रमेण त्विति जयाख्यवचनमेवोदाहृतम् (१२.१२३) । अत्रापि व्याख्याकारैर्लक्ष्म्यादीनामिति नारदश्रुतग्रन्थे लक्ष्म्यादित्वम्, अत्र हृदयादीति विवेक इत्युक्तम् । एतदबुद्ध्वैव कैश्चन यथेच्छं प्रयोगपाण्डित्यं कृतम् ।

प्रसङ्गादधिकारयागस्वरूपं चाह- **केवलेन** इत्यादिना । केवलेन तत्तन्मन्त्रमात्रपरेण, पृथग्भूतेन स्वतन्त्रेण तेषां हृन्मन्त्रादीनां तेषां स्वातन्त्र्येणार्चनप्रकारो जयाख्ये विस्तरेण द्रष्टव्य: ।

लयभोगयोरेवानुष्ठेयत्वमाह- **एवम्** इत्यर्धेन । कस्मिंश्चिन्नवीने पारमेश्वरप्रयोगे केषुचित्तत्पूर्वप्रयोगेषु चास्मिन्नवसरेऽधिकारयागस्यापि कर्तव्यत्वं तस्य स्वबुद्धिकल्पितस्थानान्तरं चोक्तम् । तैरधिकारयागशब्दार्थ एव न ज्ञात: । व्याख्यानपङ्क्तिरपि न दृष्टा । लयभोगाधिकारयागेषु सकलनिष्कलध्यानक्रमो जयाख्ये विस्तरेणोक्तो ग्राह्य: । लययागादिशब्दार्थस्तु लयो नाम 'निराकारता तद्युक्तानां याग' इति मध्यमपदलोपी समास: । भोगो नाम भोगायतनं शरीरम्, साकारत्वमिति यावत् । तद्युक्तानां याग: । अधिकारो नाम स्वातन्त्र्यम्; व्यापकत्वमिति यावत्, तद्युक्तानां याग: ।

[सङ्ग्रहेण मानसपूजा]

ध्यात्वाऽथ भावनाजातैर्भोगै: परमपावनै: ।
अभ्यर्चयेत् स्वहृदये देवं विज्ञापयेदिदम् ॥ १०६ ॥
स्वागतं देवदेवेश सन्निधिं भज मेऽच्युत ।
गृहाण मानसीं पूजां यथार्थपरिभाविताम् ॥ १०७ ॥
ज्ञात्वा तु सुप्रसन्नं तं प्रसादाभिमुखं प्रभुम् ।

[विस्तरेण मानसपूजा]

विस्तरेण द्विजश्रेष्ठो[१०] मानसं यागमारभेत् ॥ १०८ ॥

१०. द्विजश्रेष्ठ D, E द्विजश्रेष्ठा: A

(Form of Adhikārayāga)

104b-105a. O twice-born ones! The method[109] of worshipping them, with a simple and separate *yāga*[110] is said to be Adhikārayāga.

(Laya and Bhoga are alone to be practiced)

105b. After doing thus the *yāga* called Laya and likewise Bhoga.

(Mental worship in brief)

106-108a. And doing meditation (the priest) shall worship. Him in his heart with very pure and pleasurable acts created in imagination, and make this request. O Lord of Lords! Welcome to you, O Acyuta, be present (here) for me. Receive the mental worship correctly imagined. Knowing Him, the Lord, as is well-pleased and inclined to show favour.

(Mental worship in detail)

108b-122. O the best among the twice-borns! Mental worship shall be undertaken at great length. The Lord who bears a body made up of mantra and who grants all the desires shall be worshipped with divine, purified,

109. The respective mantras alone are used in this *yāga*.

110. *pṛthagbhūta:* independent. The commentator explains the name *laya* as formless and Layayāga treats such matters which are formless; body is the seat for enjoyments (bhogāyatana); that is having form. The Bhogayāga is concerned with those which have form. Adhikārayāga: independence all-pervading *yāga* with this name has all-pervasive, comprehensive nature.

सङ्कल्पजनितैर्दिव्यैः पवित्रैरक्षयैः शुभैः ।
सर्वकामप्रदं देवं मन्त्रमूर्तिधरं यजेत् ॥ १०९ ॥
अभ्यङ्गोद्वर्तने पूर्वं स्नानं चाऽथ विलेपनम् ।
वस्त्रपूर्वाणि माल्यानि सुगन्धानि निवेद्य च ॥ ११० ॥
हारकेयूरकटकैर्मकुटैर्भूषितं स्मरेत् ।
चित्रेण कटिसूत्रेण हेमरत्नमयेन च ॥ १११ ॥
माणिक्यरचितैः शुद्धैर्मुक्ताहारैश्च भूषयेत् ।
सम्पूर्णेन्दुसमानं च हेमदण्डसमन्वितम् ॥ ११२ ॥
छत्रं निवेदयेद्विष्णोर्मायूरव्यजनं शुभम् ।
कर्पूरचूर्णसम्मिश्रं सुगन्धिमधुरं बहु ॥ ११३ ॥
धूपं भगवतो दत्त्वा दीपमालां घृतेन च ।
मधुसर्पिः प्लुतं चाऽथ मधुपर्कं निवेदयेत् ॥ ११४ ॥
पशुं च विविधं मूर्तं पावनं शकुनिं तथा ।
ओषधीः शालिदूर्वाश्च सत्फलाढ्यं वनस्पतिम् ॥ ११५ ॥
मूर्तं निवेदयेत् पूर्वमिदमन्नं चतुर्विधम् ।
निवेद्य विविधं शुद्धं भक्ष्यभोज्यान्यनेकशः ॥ ११६ ॥
हृद्यानि फलमूलानि षड्रसप्रभवानि च ।
षड्रसानि विचित्राणि पानान्यथ निवेद्य च ॥ ११७ ॥
सर्वाण्यात्मोपभोग्यानि भक्तिश्रद्धावशाद्द्विजाः ।
प्रदिक्ष्वप्यविरुद्धानि देवाय विनिवेदयेत् ॥ ११८ ॥
तन्त्रीवाद्यान्यनेकानि नृत्तगेयान्वितानि च ।
भेरीपटहघोषादिस्तुतिपाठान्वितानि च ॥ ११९ ॥
चिन्तयेद्देवदेवस्य लोकत्रयगतानि च ।
किङ्किणीजालयुक्तेन चामरेणोपवीज्य च ॥ १२० ॥
वितानकं पताकांश्च ध्वजानि विविधानि च ।
विनिवेद्य विभोर्भक्त्या प्रसन्नेनाऽन्तरात्मना ॥ १२१ ॥
गजाश्वधेनुयानानि सुवस्त्रालङ्कृतानि च ।
निवेद्य चाऽन्तरा तानि ग्राहयन्तं स्मरेत्ततः ॥ १२२ ॥

imperishable and auspicious materials, all produced mentally. (His body) shall be rubbed with unctuous substance (oil) and kneading shall be applied first and then bath is to be given. Perfumed powders are then to be smeared. Garments and garlands of sweet fragrance are to be offered. The priest shall then think that He is bedecked with necklaces, armlets, bangles and crowns. He shall decorate Him with bright coloured (or varieagated) girdles made of gold and gems and pure pearl necklaces made of (studded with) rubies. An umbrella resembling the full-moon having a golden handle and auspicious fan made of peacock's feathers shall be then offered to Viṣṇu. He shall then be offered much incense of sweet fragrance mixed up with powdered camphor. After giving a row of lamps, He shall be given *madhuparka*[111] overflowing with ghee, honey and clarified butter. Animals[112] of different kinds and in good shape, holy birds,[113] medicinal herbs, śāli rice, (tender) grass and trees rich in fruits and of definite shape shall be offered at first. Offerings are then to be made of food of four kinds,[114] *bhakṣya*, pure and various kinds and *bhojya* shall then be offered repeatedly. After the offerings of dainty fruits and roots and drinks of various kinds with six tastes,[115] O twice-born ones! to the Lord shall be offered all that are enjoyable to himself (priest), with devotion and faith that are not incompatible anywhere and many stringed instruments, with dance and vocal music, accompanied by the sound of kettle-drums and war-drums and recitations of eulogies. He (priest) shall think of (things) that are there in the three worlds. He (priest) must wave, before Him, the fans made of chouries with a cluster of small bells. He shall offer Him canopy, banner and flags of various kinds to the Lord with devotion and composed mind. Offering elephants, horses, cows and vehicles bedecked with good dresses, he shall feel now and then that He is receiving them.

111. *Madhuparka*: honey and clarified better.

112. Cows which are helpful in doing worship with their milk and other products like ghee.

113. *śakuni:* bird; such as parrots, swans, peacocks and others.

114. The four kinds are *śuddha, vicitra, miśra* and *amiśra*; vide: SKS. Śiva V.52b-53a; Pauṣ. S. XXVI.4b. *lehya, peya, śoṣya* (*coṣya*) and *dhāni*, Pād. S. IV.12.53-55. Paramānna, Gulānna, Mudgānna and Kevalānna.

115. *Madhura, amla, lavaṇa, kaṭu, kaṣāya* and *tikta* (sweet, acid, salt, pungent, astringent and bitter). It is not clear whether these are meant. The works on Āyurveda like the *Suśrutasaṁhitā*, enumerate certain varieties singly and in mutual combinations as condusive for the upkeep of health, cf. *Nyāyakośa* P. 682.

[आत्मसमर्पणम्]

आत्मानं ससुतं दारान् सर्वस्वेन समायुतान् ।
निवेद्य प्रणतो मूर्ध्ना आनन्दाश्रुसमन्वितः ॥ १२३ ॥

अथ मन्त्रासनोपचारैः भगवदर्चनमाह-**ध्यात्वा** इत्यादिना ।

विज्ञापनीयमाह-**स्वागतम्** इत्यादिना ।

भगवतः प्रसन्नतया आभिमुख्यमाह-**ज्ञात्वा** इत्यर्धेन ।

स्नानादिभोगसमर्पणक्रममाह-**विस्तरेण** इत्यादि-सार्धैश्चतुर्दशभिः । पशुं क्षीरादिभिः पूजोपयोगिनीं गाम् । शकुनिं भगवत्क्रीडार्थं शुकहंसमयूराद्यन्यतमपक्षिणम् । ओषधीः सुक्षेत्रसमुद्भवशालिमुद्गादिः । वनस्पतिं स्वारामसमुद्भवं नारिकेलादितरुम् ।

आत्मसमर्पणमाह-**आत्मानम्** इत्यादिना ।

[सुरभिमुद्राप्रदर्शनम्]

कामधेनुमयीं मुद्रां मनसा मन्त्रसंयुताम् ।
बद्धां सञ्चिन्तयेद्विष्णोः सर्वकामप्रपूरिणीम् ॥ १२४ ॥

[विशेषयजनम्]

ततो विशेषयजनं कल्पये[११]दच्युतस्य तु ।
सौवर्णपुष्पसम्पूर्णमञ्जलिं सम्प्रसार्य तु ॥ १२५ ॥
मूलमन्त्रं समुच्चार्य प्रयत्नैः पूरकादिभिः ।
दीर्घघण्टारवप्रख्यं यावत्तत्सम्भवावधि ॥ १२६ ॥
स्फुरद्रश्मिद्वयाकीर्णं वह्न्यर्केन्दुसम[१२]प्रभम् ।
ध्यात्वा नारायणं देवमञ्जलौ[१३] सन्निरोधयेत् ॥ १२७ ॥
तमञ्जलिं क्षिपेन्मूर्ध्नि तस्मिन् वै मन्त्रविग्रहे ।
अर्घ्यं निवेदयेद्भूयः पुनः पुष्पाञ्जलिं शुभम् ॥ १२८ ॥

[मानसजपः]

मुद्रां सन्दर्श्य मूलाख्यां मानसं जपमारभेत् ।
सङ्ख्याहीनं यथाशक्ति घण्टाख्याकरणेन च ॥ १२९ ॥

सुरभिमुद्राप्रदर्शनमाह-**कामधेनुमयीम्** इत्यादिना ।

११. कलये - A
१२. शत - D, E
१३. अञ्जतां - D, E

(*Offering One's own self*)

123. He should offer, with his head bent and flowing tears of joy, himself, with children, wife and all his possessions.

(*Showing Surabhimudrā*)

124. He should form mentally the *mudrā* called Kāmadhenu[116] with mantras and think of it as fulfilling all the desires of Viṣṇu.

(*Special worship*)

125-128. He shall then arrange for the special worship of Acyuta. Stretching forth the palms filled with golden flowers, he shall utter the Mūlamantra with Pūraka[117] and other efforts in a manner to make it resemble the long sound of the bell till the offering of the flowers is over.[118] He shall meditate upon Lord Nārāyaṇa, who is filled with two (kinds)[119] glittering rays and whose splendour is equal to that of fire, sun and moon and keep Him confined to the palms. He shall then throw them (kept in the folded palms) on the head of Him who has mantras for the body. He shall again offer *arghya* and the auspicious palmfuls of flowers.

(*Mental japa*)

129. He shall show the *mudrā* called Mūla[120] and begin the *japa* without any limit for its number, according to one's capacity with the use of the instrument[121] called bell.

116 Kāmadhenumudrā is also called Surabhimudrā. See for its description LT. XXXIV.87b-89; JS. VIII.113-117; Pād. S. IV.22.38-40; ĪS. XXIV.44b-46.

117. *pūrakādibhiḥ prayatnaiḥ: pūraka* and *kumbhaka* alone are meant here without *recaka*. These are called *prayatnas*.

118. *Yāvatsambhavāvadhi*: till *puṣpāñjali* offering is over.

119. The two rays (*raśmidvaya*) mean those of the sun and moon.

120. Mūlamudrā. What this *mudrā* like is not known. JS. however states that Mūlamantramudrā must be employed at first but it is not described. JS. VIII.2b.

121. *ghaṇṭākhyakaraṇa:* sound of the bell; *karaṇa* — instrument.

विशेषयजनप्रकारमाह- **ततः** इति चतुर्भिः । पूरकादिभिर्प्रयत्नैः पूरककुम्भकै रेचकरहितैरिति भावः।"व्यापकमाचरेद्दिव्यं कुम्भकेन स्मरन् विभुम्" इत्युक्तत्वात्। दीर्घघण्टारवप्रख्यं यथा तथा मूलमन्त्रं समुच्चारयेदिति योजना ।

यावत्तत्सम्भवावधि पुष्पाञ्जलिसमर्पणपर्यन्तं मूलमुद्राप्रदर्शनपूर्वकं मानसजपमाह-**मुद्राम्** इत्यादिना । घण्टाख्याकरणेन घण्टाध्वनिना सहेत्यर्थः । जपस्तुत्यवसानाभ्यामिति जपावसानेऽपि घण्टाशब्दस्य वक्ष्यमाणत्वात् ।

[हृन्मन्त्रादीनां सकृत् सकृज्जपः]

भोगस्थानगतानां च हृदादीनां क्रमेण तु ।
मनसा दर्शयेन्मुद्रां जपं कुर्यात् सकृत्सकृत् ॥ १३० ॥

[स्तोत्रम्]

स्तोत्रमन्त्रैः पवित्रैश्च स्तुत्वा सम्यक् प्रसादयेत् ।

[निगमनम्]

जपान्तं चैवमभ्यर्च्याऽप्यवतार्य बहिर्यजेत् ॥ १३१ ॥

भोगस्थानगतहृन्मन्त्रादीनां च मुद्रादर्शनं सकृत्सकृज्जपं चाह-**भोगस्थान** इत्यादिना ।

स्तोत्रमाह-**स्तोत्र** इत्यर्धेन। स्तोत्रमन्त्रा जितन्त इत्यादयः, गोदास्तुत्यन्तिमगाथाद्वयादयो वा ।

एवं मनसाभ्यर्च्य बहिर्यजेदिति निगमयति-**जपान्तम्** इत्यर्धेन। अत्र यद्यपि जयाख्योक्तमानसहोमोऽपि ग्राह्यः तथापि "पूजयित्वा जपान्तं चाप्यवतार्य बहिर्यजेत्" इति सात्वते जपान्तार्चनमात्रस्यैवोक्तत्वात्, अत्रापि जपान्तमेवोक्तमिति बोध्यम् । पारमेश्वरे "निवृत्त" इत्यादिभिः श्लोकैरुपसंहारक्रमोऽपि दर्शितः, सोऽयमत्राप्यपेक्षितः । यत्तु - "विसर्जयेन्न तं यावन्न कृता बाह्यतः क्रियाः । न्यसनीयो ह्यसौ यस्मान्मण्डलादिषु वृत्तिषु ॥" इति जयाख्यवचनं (२३.३) पारमेश्वरेऽप्युक्तम्। तत्कुम्भमण्डलाद्यर्चनोपयोगी। तत्रैव स्वहृदयाद्भगवदावाहनोक्तेः। ननु श्रीसात्वतसप्तदशपरिच्छेदे मण्डलाद्यर्चनप्रकरणे सत्यपि मानसयागे विसर्जनं तु बोद्धव्यम्।"सम्पन्ने तु क्रियाक्रमः" इत्युक्तं हि तद्वाक्यस्य का गतिरिति चेत् सत्यम्। तत्र मानसबाह्योभयक्रियाक्रमे सम्पन्ने सतीत्यर्थदृष्ट्या शङ्का परिहर्तव्या ।

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां मानसयागविधिर्नाम द्वितीयोऽध्यायः ॥

॥ इति श्रीमौञ्ज्ञायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य
श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां
सात्वतार्थप्रकाशिकाख्यायामीश्वरतन्त्रव्याख्यायां
द्वितीयोऽध्यायः ॥

(*Mantras of Hṛdaya and others for japa to be uttered (only) once for each*).

130. He shall then show mentally *mudrās* for the Hṛdaya (mantras) and others in the order, which had a place of enjoyment and *japa* once for each.

(*Stotra*)

131a. He shall please God after eulogising Him properly with the holy eulogistic mantras.

(*Conclusion*)

131b. He (priest) shall bring God down (from the mind) after worshipping thus upto the end of *japa* and external worship.

Thus (ends) the second chapter called the Method of Mental Worship in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra*.

CHAPTER III

Procedure for the worship of Vimānadevatā[1]

Bahiryāga (External Worship)

1-2a. After doing at first the mental worship according to this method, the idol must then be adored externally with acts filled with devotion. O eminent sages! listen properly to the procedure for external worship.

(Purification of things (materials) through beholding)[2]

2b-5a. God, who remains within the space in the lotus of the heart (of the priest) in the form of lustre, must be brought from that place and stationed in between the eyes. The priest shall resort to the deity called Vāsudeva mentioned before. O eminent sages! uttering the Locanamantra,[3] he shall then look at, with motionless pair of eyes, all the materials that are useful for the sacrifice (worship). The collected materials become thereby purified.

(Procedure for procuring the materials)

5b-6. That huge group of materials useful for the sacrifice which was procured before, shall all be kept to the right and the pitcher to the left which is filled with distilled water.[4] The auspicious seat[5] shall be placed in between them (between the materials and pitcher).

(Purification of the auspicious seat)

7-10. Whatever petals, fruits and others which are seen to be tawny[6] shall be collected with the hand and placed in a pure (or clean) place. The auspicious seat shall be cleaned (wiped) with the tails of cow or Camarī deer or plumes of peacock or *darbha* or a very white cloth and shall be washed afterwards with profuse water purified (filtered) with the cloth; uttering the

1. *vimāna*: Structure over and around the sanctum sanctorum including the portion down to the basement.
   Vimānadevatā: forms of deities are installed in the specific places in the upper portion which may be of the square or any particular form as enjoined in the science of sculpture and Āgama.
2. This act is enjoined only in the Āgamas.
3. Locanamantra is Netramantra.
4. *gālita:* distilled; literally, trickling down from above.
5. Bhadrāsana: auspicious seat. For a description see *Pauṣ. S.* XL.100-108.
6. The colour of the flowers and others indicated as tawny shows that they were used on the previous day for worship.

तृतीयोऽध्यायः

विमानदेवतार्चनविधिः

[बहिर्यागः]

पुराऽनेन विधानेन कृत्वा यागं तु मानसम् ।
कर्मणा भक्तियुक्तेन बहिर्बिम्बे यजेत्ततः ॥ १ ॥
बाह्ययागविधिं सम्यक् शृणुध्वं मुनिपुङ्गवाः ।

[निरीक्षणाख्यद्रव्यशुद्धिः]

देवं हृत्कमलाकाशे तेजोरूपतया स्थितम् ॥ २ ॥
तस्मात्स्थानात्समानीय तं कुर्यान्नेत्रमध्यगम् ।
वासुदेवाभिधानन्तु प्रागुक्तञ्च समाश्रयेत् ॥ ३ ॥
ततो लोचनयुग्मेन स्तब्धेन मुनिपुङ्गवाः ।
जपँल्लोचनमन्त्रन्तु पश्येद्यागोपयोगिनम् ॥ ४ ॥
सम्भारमखिलं तेन द्रव्यसङ्घो विशुद्ध्यति ।

[द्रव्यासादनक्रमः]

उपार्जितं पुरा यद्वै यागोपकरणं महत् ॥ ५ ॥
तत्सर्वं दक्षिणे[1] कृत्वा वामे तु करकं न्यसेत् ।
गालितेनाऽम्भसा पूर्णं मध्ये भद्रासनं न्यसेत् ॥ ६ ॥

[भद्रासनशुद्धिः]

यत्किञ्चित्पत्रपुष्पाद्यं परिदृश्येत पिङ्गलम्[2] ।
पाणिना तत्समाहृत्य शुचिस्थाने निधाय वै ॥ ७ ॥

१. तत्क्षणे A
२. पीठगम् B

अथ तृतीयोऽध्यायो व्याख्यास्यते । बाह्ययागं विधत्ते- **पुरा** इत्यादिना सार्धेन ।
निरीक्षणाख्यां द्रव्यशुद्धि-माह **देवम्** इति त्रिभिः ।
पूजोपकरणासादनक्रममाह- **उपार्जितम्** इति सार्धेन । गालितेन वस्त्रगालितेन ।
भद्रासनशुद्धिमाह- **यत्किञ्चित्** इति चतुर्भिः । पत्रपुष्पाद्यं पूर्वदिने भगवद्भुक्ततुलस्यादिकमित्यर्थः ।

गव्यैर्वा चामरैर्बालैश्शिखिपक्षैः कुशैरथ ।
सम्माार्ज्य भद्रपीठन्तु वाससा सुसितेन वा ॥ ८ ॥
बहुना वस्त्रपूतेन वारिणा तदनन्तरम् ।
प्रक्षाल्य द्वादशार्णेन प्रणवाद्यन्तकेन तु ॥ ९ ॥
एवमाराधनाधारं क्षालयित्वा च वारिणा ।
तत्तावदस्त्रपुष्पेण कुर्याद्विघ्नगणोज्झितम् ॥ १० ॥

[बिम्बस्य भद्रासनारोपणम्]

आराध्यायामथाऽऽरोप्य तत्र मन्त्रमयीं शुभाम् ।
सर्वोपकरणोपेतां सर्वलक्षणसंयुताम् ॥ ११ ॥
प्रतिमां धातुपाषाणनिर्मितामात्मसिद्धये ।

[अभिगमनार्चनपूर्वकबिम्बशुद्धिः]

दिव्यार्घ्यपाद्याचमनैर्देवमभ्यर्च्य वै ततः ॥ १२ ॥
भुक्तमर्घ्यादिकं तस्मादपनीयाऽभिवाद्य च ।
समर्प्य विष्वक्सेनस्य संशोध्य मृदुना द्विजाः ॥ १३ ॥
उशीरवंशकूर्चेन क्षालयेदम्भसा ततः ।
उच्चरन् मूलमन्त्रं वा कुर्यान्मार्गत्रयं विभोः ॥ १४ ॥
सुधौते देवदेवस्य वाससी परिधापयेत् ।

अस्त्रपुष्पेण अस्त्रमन्त्राभिमन्त्रितपुष्पताडनेन । भद्रपीठोपरि भगवद्बिम्बस्थापनमाह- **आराध्यायाम्** इति सार्धेन । एवं स्थापनं चरबिम्बविषयः । यत्किञ्चिदर्घ्यादिसमर्पणरूपाभिगमनार्चनपूर्वकं बिम्बशुद्धि-माह- **दिव्यार्घ्य** इति त्रिभिः । उशीरवंशकूर्चेन लामज्जपिञ्जूलेन । मार्गत्रयम् शुद्धित्रयमित्यर्थः । मृजू शुद्धौ इति धातोः । तच्च पूर्वोक्तरीत्या प्रथमं पाणिमार्जनम्, द्वितीयं कूर्चमार्जनम्, तृतीयं जलमार्जनम् । एवमेव वक्ष्यति चतुर्थाध्यायेऽपि पाणिनाप्यथ कूर्चेन तज्जलेन तु मार्जयेत् इति ।

twelve-syllabled mantra,[7] *Praṇava* at the beginning and end. Having washed the support (seat) of worship with water, it (the seat) shall be freed from the group of obstacles with the flower of (used as) Astramantra.[8]

(Placing the idol in the Bhadrāsana)

11-12a. Having placed, on the seat of worship,[9] the idol, auspicious, full of mantras,[10] having all the materials (needed for worship), possessing all good features and made of minerals or stone, for his (priest's) successful accomplishment (of aims).

(Purification of the idol by approaching it and adoration of it)

12b-15a. And then worshipping god with splendid (divine) *arghya, pādya* and *ācamana*, he shall remove from there *arghya* and others (already) used (before) and bow to Him. He shall offer them to Viṣvaksena.[11] O brahmins! having cleaned it (idol) with soft bunch of Uśīra roots it must be washed with water. The three ways (methods)[12] are to be adopted for god uttering Mūlamantra.[13] The god of gods is to be dressed with a pair of well-washed clothes.

7. *dvādaśārṇa:* twelve-lettered (syllabled) mantra — *Oṃ namo bhagavate Vāsudevāya; arṇa*— letter, syllable.
8. Astramantra: *astrāya huṃ phaṭ.*
9. *ārādhyā:* that which is fit to be used for doing worship.
10. *mantramayī:* filled with mantras or mantras are themselves god.
11. Viṣvaksena: one whose army is everywhere, he is the commander of the army of Viṣṇu. Flowers, fruits and food preparations, which are offered to god, become defective when they are offered to him. No one shall partake them after they are offered to him. Hence they are distributed to all people before offering them to him; vide:

    यतो भगवतोऽर्थेन व्यक्तं स्रक्चन्दनादिकम् ।
    पश्चादभोज्यतां याति विष्वक्सेनपरिग्रहात् ॥
    अत एव निवेद्यं तत्ततोऽर्वागेव सात्वतैः ।
    सेव्यते तेन तत्तेषामुत्कर्षस्य कारणम् ॥

    Yāmuna: *Āgamaprāmāṇya*, pp. 76-77.

    As he partakes them at the end, Viṣvaksena is called Śeṣāśana, eater of what remains of the offerings made to God. It may also be thrown into water; vide: *LT.* XL.82.

    It may be given to the cow; vide: *SA.* XLIII.108; *VK.* p. 280.
12. The three methods of cleaning is called *mārgatraya.* The three methods are using the hand, clump of grass (*kūrca*) and water.
13. Mūlamantra: Aṣṭākṣara and Dvādaśākṣara: Aṣṭākṣara '*Oṃ namo nārāyaṇāya*' is the only Mūlamantra in the system of Rāmānuja. The Vaiṣṇava Āgamas give special importance to Dvādaśākṣara. Yet Aṣṭākṣara enjoys a high status among the mantras of the Āgamas; vide: *SKS. Brahma.* IX.10b.

[चित्रबिम्बशुद्धिः]

चित्रस्थाद्भगवद्बिम्बाद्भुक्तपुष्पादिकं हि यत् ॥ १५ ॥
अपनीय तु तत्कुर्याद्वाससा रेणुमार्जनम् ।

[भद्रासनशोधने कालविकल्पः]

यद्वा प्राग्यागभवनप्रवेशानन्तरं द्विजाः ॥ १६ ॥
न्यस्य भद्रासनाद्यन्तमन्यदन्यत्समाचरेत् ।
यद्वा तदातने काले न्यस्य भद्रासनादिकम् ॥ १७ ॥
आद्यं मार्गत्रयं कृत्वा यथोक्तविधिना ततः ।
योगपीठार्चनारम्भे बिम्बोक्तं सर्वमारभेत् ॥ १८ ॥

[पात्रपरिकल्पनप्रकारः]

अथाऽर्घ्यादीनि पात्राणि प्रक्षाल्यास्त्रेण वारिणा ।
गालितेनाम्भसाऽऽपूर्य पात्राणि मुनिसत्तमाः ॥ १९ ॥
मुख्याऽमुख्यार्घ्यपात्रादिक्रमाद्द्रव्याणि निक्षिपेत् ।
एकस्मिंश्चन्दनादीनि दूर्वासिद्धार्थकानि च ॥ २० ॥
साक्षतानि कुशाग्राणि तण्डुलानि तिलांस्तु वै ।
सरत्नानुत्तमान्धातून् सफलान् विनिवेशयेत् ॥ २१ ॥

चित्रबिम्बविषयमाह- **चित्रस्थात्** इत्यादिना ।

भद्रपीठबिम्बशोधनयोः कालान्तरकर्तव्यत्वञ्चाह- **यद्वा** इति सार्धद्वाभ्याम् ।

अर्घ्यादिपात्रपरिकल्पनप्रकारमाह- **अथ** इति सार्धैरेकादशभिः । चन्दनादीनि अत्रादिशब्देन कर्पूरकुङ्कुमे ग्राह्ये । तत्र किं मानमिति चेदुच्यते एकस्मिंश्चन्दनादीनि इत्यादय एते श्लोकास्सात्वताष्टादशपरिच्छेदोक्ताः, तदनुसारेणैव पारमेश्वरेऽप्यर्घ्यादिद्रव्याणि कथयद्भिः शाण्डिल्यैरेव चन्दनादीनि इत्यत्रआदिपदमेवं विवृतम् । "चन्दनं शशिबाह्लीकौ" इति । एवमुत्तरत्रापि ज्ञेयम् । शशि कर्पूरम् । बाह्लीकः कुङ्कुमम् । सिद्धार्थकम् श्वेतसर्षपम् । साक्षतानि शोभनाक्षतसहितानि । पारमेश्वरव्याख्याने तु 'क्षतिरहितानि' इति कुशाग्रविशेषणं कृतम् । उत्तमान्धातून् स्वर्णरजतताम्रान् । तथा विवृतं पारमेश्वरे —

द्वितीये दधिमध्वाज्यक्षीरबिन्दुचतुष्टयम् ।
कुशाग्रेण सबाह्लीकं सपुष्पतिलतण्डुलम् ॥ २२ ॥
दूर्वाञ्च विष्णुक्रान्ताञ्च श्यामाकं शङ्खपुष्पकम् ।
पद्मकं कुन्दरेणुञ्च पाद्यपात्रे विनिक्षिपेत् ॥ २३ ॥

(Purification of the figure in the picture)[14]

15b-16a. Removing the flowers etc. which were used, from the figure of god in the picture, the dust (there) is to be wiped off with a cloth.

(Option regarding the timings for the purification of Bhadrāsana)

16b-18. Or, O brahmins! after entering first the sacrificial hall, all acts upto the placing of the Bhadrāsana could be attended to and any other work may be done. Or, placing Bhadrāsana etc. at that time, the first act of three ways[14a] could be done according to the rule. Then what all is stated for the idol may be begun when the worship of Bhadrāsana is taken up.

(Method of arranging the vessels)

19-30a. Then the vessels of *arghya* etc. shall be washed with water. O best sages! they are to be filled with distilled water. Substances (ingredients) are to be placed in the *arghya* vessels, in order of important and secondary.

In one of them shall be placed sandal- paste[15] etc. tender grass and white mustards, tips (blades) of *darbha* with *akṣata*,[16] rice, seasamum, best minerals[17] with gems and fruits.

In the second which is *pādya* vessel shall be placed four drops of curds, honey, ghee and milk, saffron[18] with the tips of *darbha*, rice with flowers and seasamum, tender grass, Viṣṇukrānta, Śyāmāka, Śaṅkhapuṣpa, Padmaka, Kunda (a kind of Jasmine), Reṇu(ka).

O eminent sages! pile of cardamom, clove and sandal paste with camphor shall be placed in the vessel called *ācamanīya*.

Kuṣṭha, Māṃsī, two kinds of turmeric,[19] Murā, bitumen (Śaileya), Campaka (flower), Kaccora and Mustā (root) are to be placed in the vessel of (intended for) bath.[20]

14. Worship of the deity in the picture is recommended in the Āgamas; vide: *JS.* XX.3-8; *SKS. Brahma.* VII.36b-41a.
14a. See under 12.
15. The commentator observes that camphor and saffron are included here.
16. Akṣata: unbroken rice mixed up with turmeric powder and a little ghee.
17. *uttamadhātu*: gold, silver.
18. Bāhlīka: saffron.
19. *Haridrādve*: the two kinds of turmeric are meant here; one grown in the village and the other in the forest.
20. The names of the ingredients that are mentioned here could not be rendered into English. They are called by different equivalents in the Indian regional languages. For a slightly different version of the ingredients mentioned here see *Pād. S. Caryā.* IX.88-98.

त्वगेलाद्यचयं सर्वं सकर्पूरञ्च चन्दनम् ।
न्यसेदाचमनीयाख्यपात्रे तु मुनिसत्तमाः ॥ २४ ॥
कुष्ठं मांसीं हरिद्रे द्वे मुराशैलेयचम्पकान् ।

"काञ्चनं रजतं ताम्रम्" इति । सबाह्लीकम् सकुङ्कुमम् । विष्णुक्रान्ता प्रसिद्धा । श्यामाकः मुनि-प्रियः। शामेयरिशि । श्यामाको नीलपुष्पस्स्यान्मायाकश्च मुनिप्रियः इति वैजयन्ती । शङ्खपुष्पं शङ्ककुप्पी। कर्णाटभाषायां विषप्रहरी । पद्मकम् इति वैद्यग्रन्थेऽश्वगन्धिचूर्णादिषु प्रसिद्धम् । पारमेश्वरव्याख्याने तु स्नपनाध्याये "पद्मकं नागकेशरम्" इत्युक्तम्, तदमूलकम् । पुनः द्राविडभाषायां चम्पकमिति तदेव विशदीकृतम्; तदप्यसम्बद्धम्; परस्परवैजात्यात् । कुन्दरेणुः कुन्देन सहिता रेणुका कुन्दरेणुः, ककारलो-पश्छान्दसः। कुन्दो नाम वालुक्याख्यतृणविशेषः। वालुकं चाथ वालुक्यं मुकुन्दः कुन्द—कुन्दरः इति। कर्णाट भाषायां 'कर्णिकेयहुल्लु' । रेणुका नाम तथैव प्रसिद्धो गन्धद्रव्यविशेषः "हरेणू रेणुका कौन्ती" इत्य-मरः । त्वगेलाद्यचयम् त्वक् लवङ्गः । "त्वक्पत्रमुत्कटं भृङ्गम्" (अमरकोषः २.४.१३४) इति । एला प्रसिद्धा । तदाद्यानां द्रव्याणां चयः समूहः। अत्रादिशब्देन तक्कोलजातीफले ग्राह्ये । तथोक्तं पारमेश्वरे — एला-लवङ्ग-तक्कोलैस्सह जातीफलानि च इति । कुष्ठम् चङ्गलकोष्ठम् । "व्याधिः कुष्ठं पारिभाव्यम्" (अमरकोषः २.४.१३४) इति। मांसी जटामांसी, तपस्विनी जटामांसी (अमरकोषः २.४.१३४) इति। द्वे हरिद्रे ग्राम्यारण्यभेदभिन्ने । मुरा मुरीकायि । "दैत्या गन्धकुटी मुरम्" (वैजयन्तीः ३.८.९८) "दैत्या गन्धकुटी मुरा" (अमरकोषः २.४.१३४) इति ।

वचाकच्चोरमुस्ताश्च स्नानीये तु विनिक्षिपेत् ॥ २५ ॥
हृन्मन्त्रेणैव सर्वत्र कुर्याद्वै द्रव्ययोजनम् ।
आधारोपरि पात्राणि स्वपूर्वनियमेन तु ॥ २६ ॥
वायव्यादिषु विन्यस्य तत्तत्कल्पनमन्त्रतः ।
ओमर्घ्यं कल्पयामीति उक्त्वा वायुपदे न्यसेत् ॥ २७ ॥
कलशं तद्वदैशान्यां न्यसेदाचमनार्थतः ।
स्नानार्थमग्निकोणे तु पाद्यार्थं नैर्ऋते तथा ॥ २८ ॥
अग्रतो वाऽपि तन्मध्ये न्यसेदर्घ्यं द्वितीयकम् ।
यद्वा प्रागेव पात्राणि न्यस्याधारोपरि द्विजाः ॥ २९ ॥
तत्तत्कल्पनमन्त्रैस्तु तानि हस्तेन संस्पृशेत् ।

[सुरभिमुद्रा]

दक्षिणोत्तरहस्ताभ्यां हृद्बीजेन विचिन्त्य च ॥ ३० ॥
सूर्यसोमौ ततः कुर्याद् द्रव्यदाहसमुद्भवौ ।

The materials are to be mixed up with (the utterance) the Hṛdayamantra itself in every case. The vessels are to be kept[21] on the support regulating them in the east for him (the priest). After placing them in the north-west etc. with the mantras of their arrangement, they must be placed in the west uttering the words "*Om* I am arranging for *arghya*". The pitcher is likewise to be placed in the north-east for *ācamana*, for bath in the south-east and for *pādya* in south-west. A second *arghya* vessel is to be placed either in front or amidst them. Or, O brahmins! the vessels could be placed before hand on the support, with the various mantras of their arrangement. They are to be touched with the hand.

(*Surabhimudrā*)[22]

30b-32. The priest shall think, uttering the *bīja* of the Hṛdayamantra and from the Kāmadhenumudrā[23] with the right and left hands. He shall think of sun and moon as produced by the burning of substances and producing them. The Kāmadhenumudrā is to be thought of as having the flow (of nectar) associated with the mantras (that are uttered); to be of the form of cow having the complexion of the Himālayas, stationed in a supportless place.[24] He shall make the collection of the materials, as they are, turned into nectar using it (*mudrā*).

21. For a similar but brief treatment see *LT.* XXXVII.27-28. For a different version see *Pād. S. Caryā.* III.88b-89a.

22. Surabhimudrā: for different methods of forming this see *JS.* VIII.113-115a; *LT.* XXXIV.80-89; *Pād. S. Caryā.* XXII.40.

23. Kāmadhenumudrā: same as Surabhimudrā.

24. *nirādhārapade sthitā*: resting or remaining in a supportless place; *nirādhāra*: having no support, that is, not depending upon anything. This means that it has an independent footing. Perhaps the word *sarvecchāparipūraṇī* (*JS.* VIII.115a) fulfilling all desires may justify this independent position.

बध्वा कामदुघां मुद्रां स्रवन्तीं मन्त्रसंयुताम् ॥ ३१ ॥
गोरूपां हिमशैलाभां निराधारपदे स्थिताम् ।
तया तदमृतीकुर्याद् द्रव्यजालं यथास्थितम् ॥ ३२ ॥

[सुरभिमन्त्रोद्धारक्रमः]

वर्गेऽष्टमे तृतीयार्णं वकारोपरि संस्थितम् ।
ईकारानुस्वारयुक्तं नमः प्रणवमध्यगम् ॥ ३३ ॥

शैलेयं कल्लुप्पु । "कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥ शैलेयम्" (अमर २.४.१२२-२३) इति। वचा वशम्बु । "वचोग्रगन्धा षड्ग्रन्था" (अमर २.४.१०२) इति । कचोरम् प्रसिद्धम् । "कर्चूरको द्राविडकः" (अमर २.४.१३५) इति। मुस्ता कोरैक्किळङ्गु । अर्घ्यादीनां दहनाप्यायनामृतीकरणान्याह दक्षिणोत्तर इति सार्धद्वाभ्याम् । सुरभिमन्त्रोद्धारमाह **वर्ग** इति सार्धेन । अष्टमे वर्गे शकारादिक्षकारान्तवर्णपञ्चकात्मकवर्गे तृतीयार्णं सकारः, अनुस्वारो बिन्दुः । एवञ्च ओं स्वीं सुरभ्यै नमः इति मन्त्रो भवति ।

सौरभीयो ह्ययं मन्त्रः स्ववाणी[3]संयुतो द्विजाः ।

[सर्वेषामेव भोगानां शुद्धिपत्रम्]

एवं वाणीद्वयेनैव अग्नीषोमात्मकेन तु ॥ ३४ ॥
योग्यतां पदवीं नीत्वा प्रेषयेद्यद्यदाहृतम् ।

[उपकरणादीनां प्रोक्षणरूपविशेषशुद्धिः]

तोयमादाय पात्रेऽथ तत्र हृन्मन्त्रतं क्षिपेत् ॥ ३५ ॥
पुष्पगन्धसमोपेतं सुसितं शालितण्डुलम् ।
मन्त्रयेत्प्रणवाद्येन बहुशो हृदयेन तु ॥ ३६ ॥
तदुद्धृतेनाम्भसा वै अस्त्रमन्त्रं समुच्चरन् ।
प्रोक्षयेत्स्वासनं स्थानं यागोपकरणं तथा ॥ ३७ ॥

[अर्घ्यादिपात्राणामभिमन्त्रणं तथार्चनञ्च]

सास्त्रेण मूलमन्त्रेण अर्घ्यादीनभिमन्त्र्य तु ।
सषडङ्गेन तेनैव कुर्यात्पुष्पादिनार्चनम् ॥ ३८ ॥
धूपपात्रञ्च घण्टाञ्च समभ्यर्च्य यथाविधि ।
घण्टाचालनपूर्वन्तु धूपेनार्घ्यादिकान्यजेत् ॥ ३९ ॥

३. संज्ञा - D, E

(Method of composing the Surabhimantra)

33-34a. Take the third letter in the eighth group which is above the letter *v* and join it with the letter *ī* and *anusvāra* placing it between *namaḥ* and *Praṇava.*[25] O brahmins! this is the mantra of Surabhi associated with its name.

(Purification of all articles (which are for the enjoyment of god))

34b-35a. Making them there, fit for worship with the two designations[26] in the form of fire and moon, whatever has been brought there, shall be kept aside.

(Special purification for the materials for use by sprinkling)

35b-37. Water is to be taken then in a vessel. They (the materials thus kept aside) shall be sanctified with that water uttering the Hṛdayamantra and thrown (placed) there (into that vessel) which shall contain flowers, fragrant substances and very white Śāli rice. It is to be sanctified many a time with Hṛdayamantra uttered with *Praṇava.* One's seat, site and the materials of worship shall be sprinkled with the water taken from that vessel uttering the Astramantra.

(Consecration of arghya and other vessels and worship)

38-39. After consecrating *arghya* and others with the Mūlamantra with Astramantra, they are to be worshipped with the six-limbed mantra[27] using flowers and others. Arghya and other (vessels) are to be adored with incense with the movement (ringing) of the bell, after duly worshipping the vessel of incense and the bell.

25. Letters *śa, ṣa, sa, ha* and *kṣa* from the eighth group of letters. The other groups are vowels, *ka, ca, ṭa, ta, pa* and *ya, ra, la, va* is the third letter in the eighth group; *s+v+i* = *svi + m (anusvāra); sviṃ praṇava + sviṃ + surabhyai* (name of the mantra in the dative case) + *namaḥ.* The full mantra: *oṃ sviṃ surabhyai namaḥ,* cf. *LT.* XXXIII. 103-104a.

26. All the materials that have been procured are to be purified by this mantra which has two roles to play. One is that of burning them and thus get rid of impurities. This is the function of fire (Agni). The second is that what has been purified should be nourished. This is done by the moon. Thus they become fit for use.

27. The six limbs are: heart (*hṛdaya*), head (*śiras*), tuft (*śikhā*), armour (*kavaca*), eye (*netra*) and weapon *(astra).*

[धूपपात्रपूजा, लक्षणञ्च]

धूपपात्रस्य घण्टायाः पूजनं चोच्यतेऽधुना ।

एवमेवोक्तं लक्ष्मीतन्त्रेऽपि -

''सोमं वरुणमीकारं व्यापिना पिण्डयेत्क्रमात् ।
सुरभ्यै नम इत्येवं तारपूर्वमनुस्त्वयम् ॥
सुरभ्याः कथितस्सर्वभोगसम्पूरणार्थक'' । इति ।

एवं दहनाप्यायनादिकं समस्तयागोपकरणानामपि कार्यमित्याह- **एवम्** इत्यादिना । उपकरण-प्रोक्षणप्रकारमाह- **तोयम्** इति सार्धद्वाभ्याम् । अर्घ्याद्यभिमन्त्रणमर्चनञ्चाह- **सास्त्रेण** इति द्वाभ्याम् । सषडङ्गेन तेन अङ्गमन्त्रसहित-मूलमन्त्रेण, एतेन साङ्गमूलमन्त्रप्रतिपाद्यो भगवानेवार्घ्यादीनामधिदेवतेति बोध्यम् । धूपपात्रं घण्टाञ्च यथाविधि समभ्यर्चयेदित्युक्तम्, तत्र कोऽसौ विधिरित्याकाङ्क्षायां तद्विधिरुच्यत इत्याह- **धूपपात्रस्य** इत्यर्धेन ।

पद्मचक्राङ्कितं दिव्यमाधारकजरूपिणम् ॥ ४० ॥
एकनालञ्च कर्तव्यं शेषं सप्तफणं विभुम् ।
बद्धाञ्जलिपुटं नित्यं ध्यायन्तं कारणं परम् ॥ ४१ ॥
चक्रलाङ्गलहस्तञ्च पद्मासनगतं विभुम् ।
कर्तव्यं धूपधर्तारं किङ्किणीजालशोभितम् ॥ ४२ ॥

[धूपपात्रे भावनाक्रमः]

चक्रं तच्चक्रहृदयं पद्मं हृत्कोटरं विदुः ।
चक्रे या या अराख्यास्ता नाड्यो वै द्वादश स्मृताः ॥ ४३ ॥
किङ्किण्यो यास्स्थिता विप्राः ज्ञेयास्तास्सूक्ष्मनाडयः ।
यासां वै मध्यमाशक्तिर्भुजङ्गकुटिलोपमा ॥ ४४ ॥
धूमधूसरवर्णाभा अण्डं भित्वा विनिर्गता ।
कालाग्निहृदयोत्था सा सत्यान्ते तु लयं गता ॥ ४५ ॥

धूपपात्रलक्षणमाह- **पद्मचक्राङ्कितम्** इति सार्धद्वाभ्याम् । एवंलक्षणो धूपाधारः कर्तव्यः, सन् यथोक्तलक्षणः सद्धूपपात्रधर्ता शेषश्च कर्तव्यः सन्तं जानीयादिति शेषः ।

धूपपात्रस्य चक्राद्यवयवैर्मूर्तत्वमाह- **चक्रम्** इति सार्धेन ।

धूपधूमाश्रितशब्दशक्तिस्वरूपमाह **यासाम्**- इति सार्धेन । मध्यमा शक्तिः ।

''वैखरी शब्दनिष्पत्तिर्मध्यमा बुद्धिसंयुता ।
द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥''

(Worship of the vessel of incense and (their) marks)

40-42. Worship of the container of incense and bell is now stated. The container (bearer) of incense is to be made to have the marks of lotus and discus. It must be divine (splendid) and have a form of a lotus[28] for its support, possess a single tubular vein (handle) and be of the form of all-pervasive Ādiśeṣa with seven hoods, ever meditating upon the supreme cause with folded palms, holding discus, ploughshare in the hands, remaining in the lotus-seat (or in the Padmāsana[29] posture), a powerful Lord and beautified by a multitude of small bells.

(Method of meditation upon the vessel of incense)[30]

43-45. The wheel (of the vessel) is the heart of that wheel and the lotus is the cavity of the heart. Those spokes of the wheel are held to be the twelve veins.[31] O brahmins! the small bells (there) are to be understood as the subtle veins[32] the central power[33] of which is comparable to the curved serpent with grey colour like that of smoke[34] and has rent the cosmic egg and gone beyond it. Rising from the heart of the destructive fire, it merges in the proximity of *Satya*.

28. *kaja: ka:* water, *ja:* born; produced in water, lotus.
29. Padmāsana: for a description of this see *Ahs.* XXXI.34.
30. The description of the container of incense is twofold. One is that it has a definite shape. The other is that it possesses the form of a living being ever meditating upon god. The support of the container is to be conceived as Ādiśeṣa, serpent.
31. The veins are also listed as fourteen; vide: *Ahs.* XXXII.18b-20a; perhaps the twelve mentioned here are the twelve in the list *(Ahs.)* leaving *iḍā* and *piṅgalā*; but the veins mentioned here refer to those around the circle of the navel and they are enumerated as twelve which are meant here; vide: *Ahs.* XXXII.13a-17.
32. They are seventy-two thousand in number; vide: *Ahs.* XXXII. 20.
33. Sound emanates when the bell is rung. Sound is considered to pass through the subtle, middle and manifested stages (see commentary).
34. The small bells, which stand for subtle veins, represent the middle stage which is made evident by the smoke rising from the vessel. The smoke moves across the sky in a zig-zag manner presenting the appearance of a moving snake. It moves higher and higher and reaches the region of god called Paramapada and also as Satya, cf. *Ch. Up.* VIII.3-5. This is the way in which the container of smoke is to be treated.

इत्युक्तशक्तित्रये मध्यमा शक्तिः । एवं वक्ष्यति च —
''मध्यमेन स्वरूपेण अव्युच्छिन्नं महामते ।
धूपमाश्रितं विद्धि'' इति ।

भुजङ्गकुटिलोपमा कुटिलभुजङ्गसदृशी, धूमाश्रितत्वाद्वक्रगतिरिति भावः । पारमेश्वरव्याख्याने तु - ''सा भुजङ्गकुटिलाकारधूपपात्रनालत्वेन चिन्तनीयेत्यर्थः'' इत्युक्तम्, तद्विचारणीयं मनीषिभिः । सत्यान्ते सत्यशब्दवाच्यस्य परमाकाशस्थितस्य भगवतस्समीपे, तस्य सत्यशब्दवाच्यत्वन्तु, सतीयमिति तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ

[तस्याः प्रयोजनम्]

तया सञ्चोदितो ह्यात्मा मन्त्रमूर्तीश्वरः प्रभुः ।
सन्निधौ भवति क्षिप्रमव्युच्छिन्नं दहेत्तथा ॥ ४६ ॥

[धूपपात्रमन्त्रोद्धारक्रमः]

मन्त्रेणानेन विप्रर्षे तन्मन्त्रमवधारय ।
ओङ्कारं पूर्वमुद्धृत्य परमात्मा ततः पुनः ॥ ४७ ॥
व्योमानन्देन संयुक्तमनन्ताय पदं ततः ।
कालाग्निरूपाय पदं जगद्धूमपदं तथा ॥ ४८ ॥
सुगन्धिने पदं कुर्यात्सर्वगन्धवहाय च ।
नमस्स्वाहासमायुक्तमेकत्रिंशाक्षरं पदम् ॥ ४९ ॥
मन्त्रं द्विजसमाख्यातं धूपपात्रस्य नारद ।
मुद्राध्यानसमायुक्तं सर्वसिद्धिकरं परम् ॥ ५० ॥
मन्त्रेणानेन सम्पूज्य धूपपात्रमनन्तरम् ।

यद्यं तेनोभे यच्छति'' (छां. उ. ८-३-४, ५) इति छान्दोग्यदहरविद्यागतनिर्वचनात् ।

तस्याः प्रयोजनमाह- **तया** इत्यादिना । प्रभुर्यथा सन्निधौ भवति सन्निहितो भवितव्यः, तथाऽव्युच्छिन्नं यथा भवति तथा नैरन्तर्येण दहेत्, धूपद्रव्यमिति शेषः ।

धूपपात्रार्चनमन्त्रोद्धारमाह- **मन्त्रेण** इति सार्धैश्चतुर्भिः । अत्र 'विप्रर्षे' इति नारदसम्बोधनम् । एतेषां श्लोकानां जयाख्यान्तर्गतत्वात् । एवमुत्तरत्रापि ज्ञेयम् । परमात्मा हकारः, ''सूर्यो हकारः प्राणस्तु परमात्मा प्रकीर्तित'' इति तत्रैव । आनन्दः आकारः । ''आदिदेवस्तथाऽऽकारो आनन्दो गोपनस्मृतः'' इति तत्रैवोक्तत्वात् । व्योमानन्देन व्योमान्तिमानन्देन संयुक्तं परमात्मानम्, हामिति वर्णमुद्धृत्येत्यर्थः । तथा च ''ओं हामनन्ताय कालाग्निरूपाय जगद्धूमसुगन्धिने सर्वगन्धवहाय नमः स्वाहा'' इति मन्त्रो भवति ।

(Its (bell's) purpose)

46. The powerful soul who is god will be present (on the spot), with his body made of mantras prompted by it (power). It will burn (incense) quickly without interruption.

(Composition of the mantra of the container of the incense)

47-51a. O priestly sage![35] know the mantra (of the container) from this mantra. Take the syllable *Oṃ* at first then the word then the word *anantāya* joined with *vyomānanda*, then the word *kālāgni-paramātman*, *rūpāya* and then the word *jagaddhūma*, then (join with) the words *sugandhine* and *sarvagandhavahāya* and the words *namaḥ* and *svāhā*.[36] The word (thus) formed has thirty-one syllables. O Nārada![37] this is the mantra called Dvija of the container of incense. This is supreme and provides all (kinds) of accomplishments (when) associated with *mudrā*[37a] or (and) *dhyāna*. Adoring the container of incense with this mantra.

35. *viprarṣe*: priestly sage, that is, the sage who is spiritually great.
36. *ha* represents Paramātman; vide: *JS.* VI.56b; *vyoma*; dot, *Praṇava*; vide: *ibid* VI.39b, *ānanda:* a; vide: *ibid* VI.33a. The mantra is *Oṃ haṃ ānāntāya kālāgnirūpāya jagaddhūmasugandhine sarvagandhavahāya namaḥ svāhā.*
37. Nārada is the term of address, since these passages (47-50) are taken from *JS.* XVI.192-195 where they are addressed to Nārada.

37a. Dhūpamudrā is thus defined:

संहताङ्गुलीनां तु कृत्वा व्यतिकराङ्गुली: ।
सहैवोर्ध्वीकृताङ्गुष्ठौ कराभ्यां धूपमुद्रिका ॥

Pād. S. Caryā. XXII.66

This is mostly identical with the definition in *SKS.*; vide: *Ṛsi.* II.6.

[घण्टामन्त्रोद्धारक्रमः]

घण्टासम्पूजनं कुर्यात्तद्विधानमिहोच्यते ॥ ५१ ॥
आदाय प्रणवं पूर्वमनन्तेशमतः परम् ।
तञ्चानलेन सम्भिन्नमूर्ध्वाधो मुनिसत्तम ॥ ५२ ॥
त्रैलोक्यैश्वर्यदेनाथ लाञ्छयेत्पञ्चबिन्दुना ।
दद्यादस्यावसाने तु जगद्ध्वनिपदं ततः ॥ ५३ ॥
मन्त्रमात्रे पदं चान्यत्स्वाहाक्षरसमन्वितम् ।
तदन्ते परमात्मानं प्रज्ञाधारोपरिस्थितम् ॥ ५४ ॥
भूधरेण युतं मूर्ध्ना भूधरोपरि विन्यसेत् ।
विश्वाप्यायकरान्तस्थत्रैलोक्यैश्वर्यदो मुने ॥ ५५ ॥
त्रयोदशाक्षरो मन्त्रो घण्टाख्यस्सर्वसिद्धिकृत् ।
विन्यासकाले यस्या वै प्लुतमुच्चारयेत्ततः ॥ ५६ ॥

[घण्टाधिदेवताध्यानम्]

ध्यानयुक्तं द्विजश्रेष्ठ तद्ध्यानमवधारय ।
अधोमुखन्तु ब्रह्माण्डं ध्यायेज्जनरवाकुलम् ॥ ५७ ॥
सनालञ्च तदूर्ध्वे तु पद्ममष्टदलं स्मरेत् ।
प्रकीर्णपत्रं सुसितं केसरालिसुकर्णिकम् ॥ ५८ ॥
तन्मध्ये चिन्तयेद्देवीं वर्गाष्टकभुजान्विताम् ।
मुख्ये हस्तचतुष्के तु लाञ्छनं कमलादिकम् ॥ ५९ ॥

अथ घण्टासम्पूजनार्थं तन्मन्त्रोद्धारमाह- **घण्टासम्पूजनम्** इति सार्धैः पञ्चभिः । अनन्तेशम् क्षकारम्, अनलेन रेफेण, त्रैलोक्यैश्वर्यदेन अनुस्वारेण, पञ्चबिन्दुना इकारेण, परमात्मानम् हकारम्, प्रज्ञाधारोपरि ऊकारोपरि, भूधरेणा औकारेण, विश्वाप्यायकरः टकारः, त्रैलोक्यैश्वर्यदेः अनुस्वारः, एवञ्च ओं क्ष्रीं जगद्ध्वनिमन्त्रमात्रे स्वाहा हौंट् इति मन्त्रो भवति ।

घण्टाधिदेवताध्यानमाह- **ध्यानयुक्तम्** इति सार्धैरष्टभिः । अधोमुखम् घण्टाया अधोभागम् । जनरवाकुलं ब्रह्माण्डं सन्तं भावयेदिति योजना । वर्गाष्टकभुजान्विताम्

स्फाटिकं चाक्षसूत्रञ्च तथा विज्ञानपुस्तकम् ।
अभयं वरदं चैव हस्तद्विद्वितये परे ॥ ६० ॥

(Composition of the mantra of the bell)

51b-56. The bell must be worshipped. The mantra for that is stated here. After taking *Praṇava* at first[38] the word Ananteśa next to it, O eminent sage! connect it with *anala* above and below it. Mark it with *pañcabindu* which offers the riches of the three worlds. Add the word *jagaddhvani* at its end. The word *mantramātre* with the syllables *svāhā* and the word *paramātman* at the end (are to be joined) above the word *prajñādhāra* with *bhūdhara* and *murdhan* is to be placed above *bhūdhara*. O sage! the mantra, which grants prosperity to the three worlds, has the letter which nourishes the universe at the end and contains thirteen syllables. It is called Ghaṇṭā and provides for all accomplishments. This is to be uttered with *pluta*[39] duration when the *nyāsa* is done, along with meditation.

(Meditation upon the presiding deity of the bell)

57-65a. O eminent brahmin! understand (ascertain) that meditation. It (bell) shall be meditated upon as the mundane egg turned upside down filled with the noise (outcry) made by the people. It shall have a handle. An eight-petalled lotus should be thought of existing above it, with its petals (strewn) spread on all sides, very bright and having a good (charming) pericarp filled with the lines of filaments. The goddess (Ghaṇṭā) is to be in its centre possessing eight arms of groups.[40] Lotus and others are the marks in the prominent (frontal) four hands; rosary garland made of crystal, book of knowledge, (hand offering) freedom from fear and (hand offering) grant of the boon, in the other four hands. She is seated in the Padmāsana posture, having eyes long like lotus petals, resembling the calyces of the lotus adorned with the marks of the lotus, decorated with white (bright) ornaments, bedecked (dressed) in yellow garments, uttering a good number of mantras, endowed with the splendour of the radiant mantras, extolled by gods, Brahmā and other reciters of the Vedas and bowed to by sages, saints

38. Ananteśa: *Kṣa, anala; r; trailokyaiśvaryada; anusvāra; pañcabindu; i; paramātmā; ha; prajñādhārau; bhūdhara au; viśvāpyāyakara; ṭ;* the mantra is *Oṃ Kṣtrīṃ jagaddhvanimantramātre svāhā hauṃṭ*. This description is taken from *JS*. XIII.215-220 (except e. 218.a).

39. *pluta*: prolonged to three *mātrās*.

40. . *varga:* group, for the eight groups, see under note 25.

पद्मासनेनोपविष्टां पद्मपत्रायतेक्षणाम् ।
पद्मगर्भप्रतीकाशां पद्मलाञ्छनभूषिताम् ॥ ६१ ॥
सिताभरणसञ्छन्नां पीतवस्त्रविमण्डिताम् ।
मन्त्रौघमुद्गिरन्तीञ्च मन्त्रज्वालाप्रभान्विताम् ॥ ६२ ॥
देवैस्सुस्तूयमानाञ्च ब्रह्माद्यैर्ब्रह्मवादिभिः ।
ऋषिभिर्मुनिभिस्सिद्धैर्लोकानुग्रहकारिभिः ॥ ६३ ॥
नम्यमानां स्मरेत्सम्यक्पूजाकाले सदैव हि ।
योऽनया पूजयेन्मन्त्री तस्य सिद्धिर्न दूरतः ॥ ६४ ॥
एवं ध्यात्वार्चयेत्सम्यगर्घ्याद्यैस्तु ततस्स्मरेत् ।

[शब्दब्रह्मस्वरूपम्]

शब्दब्रह्ममहो यद्यद्धृदब्जाकाशमध्यगम् ॥ ६५ ॥
नित्योदितमनौपम्यमनभ्यासादगोचरम् ।
उपदेष्टुमतोऽन्येषामभक्तानां न युज्यते ॥ ६६ ॥
परस्वरूपं मन्त्राणामेतल्लक्षणमब्जज ।

अ-क-च-ट-त-प-य-श संज्ञावर्गाष्टकरूपाष्टभुजान्विताम् । कमलादिकं लाञ्छनम् पद्मगदाचक्रशङ्खान्, मुख्ये हस्तचतुष्के पुरस्ताद्धस्तचतुष्टये, परे हस्तद्विद्वितये पश्चाद्धस्तचतुष्टये ।

घण्टाशब्दे मन्त्रसंस्थितिं वक्तुकामः प्रसङ्गात्पूर्वं स्वहृदयस्थशब्दब्रह्मस्वरूपमाह **शब्दब्रह्म** इति त्रिभिः । यच्छब्दब्रह्ममहः शब्दब्रह्माख्यं तेजः, हृदब्जाकाशमध्यगम् ''शब्दव्यक्तिस्तदूर्ध्वे तु स्थितार्केन्द्वग्निलक्षणाम्'' इत्युक्तप्रकारेण हृदयकमलस्थितं तन्नित्योदितत्वादिगुणविशिष्टम् । अतोऽभक्तानामुपदेष्टुं न युज्यते न युक्तम् । मन्त्राणां परस्वरूपमेतल्लक्षणम् ईदृग्विधम् । अत्र 'अब्जज' इति सम्बोधनं पौष्करोक्तत्वात् । एवं सर्वत्र ज्ञेयम् ।

दशप्रकारे यच्छब्दे विसर्गान्तेऽक्षरादिके ।
नानामन्त्रस्वरूपेण वर्तते वर्णविग्रहे ॥ ६७ ॥

[बिम्बादिपञ्चस्थानेषु शब्दब्रह्मात्मकमन्त्रस्य संस्थितिः]

भोगमोक्षप्रदो मन्त्रो य आप्तस्सद्गुरोर्मुखात् ।
पञ्चस्थानगतो ज्ञेयो भक्तैर्दिव्यक्रियापरैः ॥ ६८ ॥
बहिःस्थप्रतिमादौ तु जिह्वाग्रे हृत्कुशेशये ।
धूपधूमशिखायाञ्च घण्टाशब्दे सुलक्षणे ॥ ६९ ॥

and *siddhas*[41] who are inclined to show favour to the world. One shall always think correctly during the time of worship. Aspirations are fulfilled in the near future for him who is skilled in the use of mantras and worships her with the bell. After meditating thus, he (priest) shall worship her (bell) properly with *arghya* and others and then think of her.

(The nature of Śabdabrahman)

65b-67. The splendour of Śabdabrahman is in the middle of the space of the lotus-like heart, ever-rising,[42] incomparable and is not the object of knowledge (to those) due to the absence of practice (on their part). Therefore it is not proper to instruct it to others (who) are not devoted to it. O Lotus-born![43] this is the supreme form of the mantras. This is its mark. It (Śabdabrahman) stays in the body made of letters, in the form of various mantras of ten kinds[44] beginning with the syllables and ending with *visarga*.

(Place for the mantras in the form of Śabdabrahman in the five places beginning with the idol)

68-71. The mantra, which is acquired from the (mouth of the) good preceptor, awards (to the aspirant) pleasurables (results) and final release. It must be understood by the devout and those who are inclined to do the

41. *siddhas*: semi-divine beings possessing supernatural powers. They are 88000 in number; vide: *VP.* II.8.91-92.

42. Activities of power (*śakti*) are of four kinds in the Pāñcarātrāgama. They are with reference to Brahman. The four kinds are: inaction (*śānta*), active (*udita*), spasmodically active (*śāntodita*) and constantly active (*nityodita*). The bell, which is identified with Brahman, is ever filled with sound and is ever active and so the word *nityodita* is used here.

43. *abjaja*: 'O Lotus-born!' this address is to Brahmā. The passages 65a-71, forming part of *Pauṣ. S.* CL. III.58b-65a are addressed to Brahmā. These are reproduced here and so, Brahmā is addressed as *abjaja*.

44. The ten kinds are: *akṣara, svara, varṇa, ghoṣa, ārāva, svara, dhvani, kūṭa, sphoṭa* and *visarga*; vide: *Pauṣ. S.* XXXIV.120b-122a.

Akṣara means syllables; *svara*: vowel; *varṇa*: sound; *ghoṣa*: voiced sound; *ārāva*: cry, crashing sound; *svara*: vowel (accented sound); *dhvani*: noise; *kūṭa*: the latter *kṣa*; *sphoṭa*: eternal and indivisible sound; *visarga*; vide: *Ahs* XVI.84b-85a, where *kṣa* is *kūṭa*; it is said here *(Ahs)* that this identification is on the strength of the *Sāttvata* instructions.

The list that is given above does not appear to be an enumeration of any particular group of sounds. The word *prakāra* in *daśaprakāra* must mean the modes in which the syllables beginning with *a* and ending with *kṣa* could be classified.

स्वरूपज्योतिरेवान्तर्भावयन् संस्थितं हृदि ।
मध्यमेन स्वरूपेण अव्युच्छिन्नं महामते ॥ ७० ॥
धूपधूमाश्रितं विद्धि वैखरीविग्रहं पुनः ।
घण्टायां चाल्यमानायामच्छिन्नमनुभूयते ॥ ७१ ॥

अक्षरादिके विसर्गान्ते दशप्रकारे शब्दे -

"स्वरव्यञ्जनरूपाश्च सर्वेषां मूर्तिवाचकाः । सर्ववस्त्वविशेषाश्च दशलक्षणलक्षिताः ॥ अक्षरस्स्वर-वर्णाख्यघोषो रावस्स्वरात्मकाः । ध्वनिकूटस्तथा स्फोटो विसर्गान्ता महामते ॥" इति पौष्करोक्तक्रमे वर्णविग्रहे यच्छब्दब्रह्म नानामन्त्रस्वरूपेण वर्तत इति योजना ।

शब्दब्रह्मात्मकमन्त्रस्य बिम्बादिपञ्चस्थानेषु संस्थितिमाह- **भोग** इति द्वाभ्याम् । मन्त्रो हृदयादिषु कीदृशरूपेण वर्तत इत्याकाङ्क्षायामाह- **स्वरूपज्योतिः** इति द्वाभ्याम् । हृदि संस्थितम् । मन्त्रमिति शेषः । अन्तस्स्वरूपज्योतिरेव आन्तस्स्थितज्योतिस्स्वरूपमेव, पश्यन्तीरूपमेव भावयेदिति यावत् । धूपधूमाश्रितमन्त्रं तु "मध्यमेन स्वरूपेण मध्यमा बुद्धिसंयुता" इत्युक्तरूपेण स्थितं विद्धि इत्यर्थः । घण्टायां चाल्यमानायाम् घण्टाशब्द इति भावः । संस्थितम् मन्त्रात्मकं शब्दब्रह्मम् वैखरीविग्रहम् वैखरीशब्दनिष्पत्तिरित्युक्तवैखरीरूप-मनुभूयते ज्ञायत इत्यर्थः ।

[घण्टाचालनप्रकारः]

एवं स्मृत्वा ततस्तान्तु स्वमन्त्रन्यस्तविग्रहाम् ।
अर्चितां ध्यानसंयुक्तामर्घ्याद्यैर्धूपसंयुतैः ॥ ७२ ॥
सञ्चालयेत्ततस्सम्यक् सुशब्दां मन्त्रबोधिनीम् ।
त्रैलोक्यद्राविणीं घण्टां सर्वदुष्टनिबर्हिणीम् ॥ ७३ ॥

[घण्टानादवैभवम्]

एषा दृतिर्हि मन्त्राणां सुप्तानाञ्च प्रबोधिनी ।
वारिणी सर्वविघ्नानां सर्वमन्त्रप्रसादिनी ॥ ७४ ॥
प्रणवान्तेऽध्वनिर्घोषा शब्दशक्तौ लयं गता ।
वर्णदेहाः स्मृता मन्त्रा मन्त्रदेहाश्च देवताः ॥ ७५ ॥
घण्टास्तनितमूलास्ते प्रबुद्धाः कर्मसिद्धिदाः ।
परशब्दोत्थिता शक्तिर्घण्टास्तनितरूपिणी ॥ ७६ ॥

divine acts as present in five places. At first, it is in the idol which is externally present, then at the top of the tongue, in the lotus-like heart, in the flame of the smoke of incense and in the sound of the bell of good marks. O Wise man! know that the brilliance of its form, keeps within itself, the mantra which is present without a break in the heart with its middle form. It rests in the smoke of incense with its body in the *vaikharī*[45] stage, which is experienced without a break when the bell is moved (rung).

(Method of moving (ringing) the bell)

72-73. Reflecting thus, that (bell), whose body lies in its own mantra, worshipped with *arghya*, incense and others with meditation, shall be moved (to and fro) properly. It was a charming sound, conveying the mantra, alleviates the three worlds and crushes all the cruel beings.

(Glory of the sound of the bell)

74-78. This (bell) is verily the bellow[46] for the mantras awakening them when they are asleep, wards off all the obstacles, and delights all the mantras. It ceases[47] to exist in the *adhvani* of *Praṇava* merging into the power of sound. The mantras are considered to have the letters for their bodies. The gods have the mantras for their bodies.[48] They are based (spring from) upon the loud sound[49] of the bell and grant the fruits for the deeds (done by people)

45. *Vaikharī* is the fourth stage in which sound produced within the body reaches when it is experienced audibly.
46. Just as air is expelled through the bellows, the mantras issue out of the bell in the form of its sounds. *Dūtī* meaning messenger is the reading in *JS.* XIII. 198.a.
47. It merges in śabdabrahman wherefrom it arose. *Śabdaśakti* is the source for sound, *adhvani, varnadhvani.*
48. mantras become audible and therefore they are said to possess bodies in the form of letters.
49. *stanita*: loud, thundering sound which awakens the mantras.

वर्णत्वं समनुप्राप्ता तैर्वर्णैर्मुनिसत्तम ।
मन्त्राणां कल्पिता देहा नानाकारास्सहस्रशः ॥ ७७ ॥
स्वेच्छया त्वनया शक्त्या सामर्थ्यात्स्वात्मनस्स्वयम् ।
अनुग्रहार्थमिह हि भक्तानां भावितात्मनाम् ॥ ७८ ॥

एवं स्मृत्वार्चितां घण्टां चालयेदित्याह- **एवम्** इति द्वाभ्याम् ।

घण्टावैभवमाह- **एषा** इत्यादिना । एषा घण्टा मन्त्राणां दृतिः भस्त्रिका, मन्त्रजननीति भावः । दृतिद्वारा वायवो यथा बहिर्निर्गच्छन्ति तद्वद् घण्टायाश्शब्द-रूपेण मन्त्रा बहिर्निर्गच्छन्तीति बोध्यम् । दृतिशब्दस्य भस्त्रिकार्थकत्वं श्रीभागवतश्रुतिगीतिव्याख्याने स्पष्टम् । सुप्तानां मन्त्राणां प्रबोधिनी च, जनितेऽपि मन्त्रे सुप्ते सति तत्प्रबोधञ्च करोतीति भावः । सर्वविघ्नानां वारिणी प्रबुद्धेऽपि मन्त्रे विघ्नान्तरिते सति तद्विघ्नानपि निवारयतीत्यर्थः । सर्वमन्त्रप्रसादिनी विघ्नरहितेऽपि मन्त्रेऽप्रसन्ने सति तत्प्रसादमपि जनयतीति भावः । एवं मन्त्रजननादिकं कृत्वा घण्टाशब्दः कुत्र विरमतीत्यत्राह- **प्रणवान्ते** इति । अध्वनिः वर्णाध्वनिः, शब्दशक्तौ परस्मिन् शब्दब्रह्मणि यत्र समुत्पन्नं तत्रैव लयं प्राप्नोतीति भावः । मन्त्राणां घण्टाशब्दजन्यत्वं पुनस्स्पष्टमाह- **वर्णदेहाः** इत्यादिना । घण्टास्तनितमूला घण्टाशब्दजनितास्ते मन्त्राः, प्रबुद्धाः कर्मसिद्धिदाश्च भवन्ति । इममेवार्थं

[मन्त्रपदनिर्वचनम्]

मननान्मुनिशार्दूल त्राणं कुर्वन्ति वै यतः ।
ददते पदमात्मीयं तस्मान्मन्त्राः प्रकीर्तिताः ॥ ७९ ॥

[घण्टाया मन्त्रमातृत्वं सरस्वतीस्वरूपत्वम्, प्रथमं चालनीयत्वञ्च]

अनभिव्यक्तशब्दास्ते निराकारास्तथैव च ।
घण्टायां चाल्यमानायां निर्यान्ति च सहस्रशः ॥ ८० ॥
अत एव मुनिश्रेष्ठ मन्त्रमाता प्रकीर्तिता ।
एषा घण्टाभिधा शक्तिर्वागीशा च सरस्वती ॥ ८१ ॥
वाचि मन्त्रास्स्थिताः सर्वे[४] वाच्यं मन्त्रे प्रतिष्ठितम् ।
मन्त्ररूमात्मकं विश्वं सबाह्याभ्यन्तरं ततः ॥ ८२ ॥
घण्टाशब्दगतं सर्वं तस्मात्तां चालयेत्पुरा ।

[घण्टाचालनकालाः]

आवाहनार्घ्ये धूपे च दीपे नैवेद्यजोषणे ॥ ८३ ॥

४. मन्त्रस्स्थिताः इति पाठ एव साधुः । जयाख्ये चायमेव पाठो दृश्यते. १३.२०६.

when awakened. The power, which arises from the supreme sound, takes the form of the loud sound of the bell and assumes the state of letters. O best sage! bodies of various shapes are formed in thousands of these letters for the mantras. This (formation) is done by this power at its own will with its own skill to show favour to the holy devotees.

(Etymology[50] of the word mantra)

79. O best sage! mantras are so called as they offer protection when they are thought of and offer (to the aspirants) their own position.

(Ghaṇṭā as the mother of mantras, form of Sarasvatī and is to be sounded at first)

80-83a. Those sounds, which issue out (of the bell) in thousands, when the bell is moved to and fro, are unmanifest and are formless. O eminent sage! therefore it (bell) is called mother of mantras. This (bell) is primary denotative power, mistress of speech and Sarasvatī. All the mantras are stationed in speech. What is to be denoted is firmly placed in the mantra. The universe is the form of mantra (both) within and without. Therefore everything rest in the sound of the bell. Therefore it (bell) must be moved (to and fro) at the beginning.

(Occasions of moving (ringing) the bell)

83b-87a. It (bell) must be used, during invocation, offering of *arghya*, incense, light, partaking the food;[51] at the conclusion of *japa* and eulogies, when worship of the fire is begun; while offering *pūrṇāhuti*[52], send-off for the mantras, worship of Viṣvaksena commencement[53] of his (Viṣvaksena's)

50. This definition is identical with *JS.* XIII.203.
51. *joṣaṇa*: partaking of the food.
52. *pūrṇāhuti*: complete offering in the fire. Any ritualistic act gets concluded with this offering which consists in throwing into the fire all the ingredients which are to be used and kept there.
53. *pratipādana*: commencement according to the commentator. The sense of doing is preferable.

जपस्तुत्यवसानाभ्यां प्रवृत्ते चाग्नितर्पणे ।
पूर्णाहुतिप्रदाने च मन्त्राणान्तु विसर्जने ॥ ८४ ॥
विष्वक्सेनार्चने चैव तत्पूजाप्रतिपादने ।
बलिप्रदानकाले तु देवतानां विशेषतः ॥ ८५ ॥

पुनः सुस्पष्टं विशदयति- **परशब्द** इति सार्धद्वाभ्याम् । प्रसङ्गान्मन्त्रशब्दार्थञ्चाह- **मननात्** इत्यादिना । एवञ्च घण्टाया मन्त्रमातृत्वं द्रढयति- **अनभिव्यक्त** इति सार्धेन । **अनभिव्यक्तशब्दाः** वैखर्यवस्थामापन्नेत्यर्थः । घण्टाशब्दस्य विश्वात्मकत्वं प्रतिपाद्य, तस्मात्तच्चालनं प्रथमतः कार्यमित्याह- **एषा** इति द्वाभ्याम् । घण्टाचालनस्य कालानाह- **आवाहन** इति चतुर्भिः । नैवेद्यजोषणे नैवेद्यभोजने, जपस्तुत्यवसानाभ्याम् तदवसानयोरित्यर्थः विभक्तिविनिमयश्छान्दसः । तत्पूजाप्रतिपादने पूजारम्भे इति भावः ।

नित्यमेव प्रयुञ्जीत सम्यङ्मन्त्रार्थसिद्धये ।
पूजाकालं विनान्यत्र हितं नास्याः प्रचालनम् ॥ ८६ ॥
नानया तु विना कार्यं पूजनं सिद्धिमिच्छता ।

[धूपदानस्य मुख्यगौणकालविभागः]

धूपं दत्त्वाथ पात्राणां घण्टाशब्दसमन्वितम् ॥ ८७ ॥
धूपं दद्याद्यथाकाले यद्वार्घ्यादौ सकृत्सकृत् ।
अनुकल्पे तु हृन्मन्त्रं कुर्यादावर्तनं बुधः ॥ ८८ ॥

[मुख्यद्वितीयार्घ्यपाद्याचमनस्नानीयानां विनियोगकालः]

आवाहने सन्निधाने सन्निरोधे तथार्चने ।
विसर्जनेऽर्घ्यदानन्तु प्राक्पात्रान्नित्यमारभेत् ॥ ८९ ॥
तदम्भसा चाऽर्हणन्तु तथैव परिषेचनम् ।
कुर्यात्प्रणयनादानं प्रीणनं प्रीतिकर्मणि ॥ ९० ॥

धूपदानकालमाह- **धूपम्** इति ।

यथाकालम् उक्तकालाननतिक्रम्योक्तकालेषु सर्वेष्वपि धूपदानाशक्तावनुकल्पमाह- **यद्वार्घ्यादौ सकृत्सकृत्** इति । अर्घ्यादौ अर्घ्यादिसमर्पणकाले । पारमेश्वरव्याख्यातृभिस्तु यद्वेति वैभवोक्तिरित्युक्तम् । तदनभिज्ञोक्तिः । तथा ह्युक्तकालापेक्षया विशेषकालेषु धूपदानमुक्तं चेद्वैभवोक्तिरिति वक्तुमुचितम्; नान्यथा । अत्रार्घ्यादिसमर्पणकाले धूपदानस्य सर्वत्रोक्तत्वात्तत्कालेऽपि यथाकालमित्यत्रैवान्तर्भवतीति ज्ञेयम् ।

अर्घ्यादिसमर्पणकालेऽपि धूपदानाशक्तावनुकल्पमाह- **अनुकल्पे** इत्यर्धेन ।

अथ प्रधानार्घ्यस्य वक्ष्यमाणकर्मसु विनियोगमाह- आवाहने इति । प्रणयनादानम् प्रणयनं पात्रान्तरे सेचनम्, तत्पूर्वकमादानं ग्रहणम् । तच्च 'तर्पणं सम्प्रतिष्ठाप्य वासितञ्चार्घ्यवारिणा' इत्यादिषु ज्ञेयम् । प्रीतिकर्मणि प्रीत्यावहजपादिकर्मणि, प्रीणनं तोषणम् । तच्च - 'इत्युक्त्वा सोदकं पश्चात्पुष्पं दक्षिणपाणिगम्' इत्यादिषु ज्ञेयम् ।

worship and at the time of offering *bali*, particularly to the deities, for the effective success in (acquiring) the sense of the mantras. Moving (ringing) it on occasions other than worship does not bring any benefit. Worship shall not be done without it by him who desires success (in his undertakings).

(Division of time as primary and secondary for offering incense)

87b-88. After offering incense to the vessels accompanied by the sound of the bell, incense shall be offered at the right time or once for each of *arghya* etc. In alternative[54] cases, the wise man (priest) shall repeat the *Hṛdayamantra.*

(Time for making use of the main and second arghya, pādya, ācamana and snāna)

89-98a. *Arghya* is to be given always from the main vessel, while invocation (is done), (request is made for) presence and staying (of god) and worship, and send-off (for god). Sipping of water[55] and *pariṣecana*[56] shall be done with that water. Pouring the water into another vessel,[57] acts of pleasing god and acts that would delight god (are also done with the same *arghya*). The water from the other (second) vessel is to be used when all the things are to be sprinkled, while all acts are begun and concluded, while mitigating the effects (of deeds), done short of and in excess (of what is enjoined) and to control (the effects arising from acts done with) the reversal of knowledge.[58]

54. *anukalpa*: alternative or better, secondary.

55. *arhaṇa*: may mean any special worship. In the context it means sipping the water (*āpośana*).

56. *pariṣecana*: sprinkling water around food preparations or fire-pit (*kuṇḍa*).

57. *praṇayanādāna: praṇayana + ādāna, praṇayana*: pouring or sprinkling water into some other vessel; *ādāna*: taking that water.

58. *jñānavyatyaya*: reversal of knowledge that is, it is not only incorrect knowledge but also the opposite of the correct knowledge.

प्रोक्षणं सर्ववस्तूनामन्यस्मादुदकेन तु ।
आरम्भे सर्वकार्याणां तत्समाप्तौ सदैव हि ॥ ९१ ॥
न्यूनाधिकानां शान्त्यै तु ज्ञानव्यत्ययशान्तये ।
कार्यं तदर्घ्यदानञ्च नित्यं मन्त्रात्मनो विभोः ॥ ९२ ॥
कुम्भोपकुम्भकुण्डानां मन्त्रास्त्रकलशार्चने ।
सम्पूजने च भूतानां गुर्वादीनां महामते ॥ ९३ ॥
दक्षशिष्यात्मपूजार्थं द्वास्स्थानामर्चनं प्रति ।
प्रासादासनदेवानां गुरूणां सन्ततेस्तथा ॥ ९४ ॥

द्वितीयार्घ्यविनियोगमाह- **अन्यस्मात्** इत्यारभ्य **क्षालनं तथा** इत्यन्तम् । न्यूनाधिकानां कर्मणामिति शेषः । एवञ्च सर्वकार्येष्वपि समाहितस्यापि कर्मज्ञानवैपरीत्याद्दोषस्सम्भवत्येव, तच्छान्त्यर्थं सर्वकार्याणामारम्भेऽवसाने च भगवते सकृत्सकृदर्घ्यं समर्पणीयमिति भावः । कुम्भोपकुम्भकुण्डानाम्, कुम्भस्य महाकुम्भस्य ये उपकुम्भाः तेषां, कुण्डस्य चेत्यर्थः । मन्त्रास्त्रकलशार्चने मन्त्राणामुपकुम्भकुण्ड-स्थवासुदेवादिमन्त्राणामस्त्रकलशस्य चार्चन इत्यर्थः । महाकुम्भस्थायार्घ्यदानं प्रधानार्घ्यजलेनैवोक्तमिति भावः । ननु चतुस्स्थानार्चनप्रकरणे प्रधानार्घ्यजलेनार्चनं बिम्बविषयः, कुम्भाद्यर्चनन्तु द्वितीयार्घ्यजलेन कार्यमित्यर्थस्स्वरस इति चेन्न; एवमर्घ्यादिविनियोगस्सात्वते दीक्षापरिच्छेदे प्रदर्शितः । तत्र कुम्भमण्डलाग्नीनामेवार्चनमुक्तम्, अतः प्रधानार्घ्येणार्चनं महाकुम्भस्थस्यैव, उपकुम्भाद्यर्चनं द्वितीयार्घ्येणेति ज्ञेयम् । किञ्च चतुस्स्थानार्चनप्रकरणेऽपि प्रत्येकं प्रधानार्घ्यादिकल्पनमेवोक्तम् । 'भूतानां सम्प्रपूजने' कुमुदाद्यर्चने इत्यर्थः । ''सम्पूजने च भोगानामि''ति पाठान्तरमुक्तं पारमेश्वरे । तथैव विवृतं व्याख्याकारैरपि।

लाञ्छनाङ्गपरीवारशक्तिभूषणरूपिणाम् ।
मण्डलावरणस्थानां देवानां चार्चने तथा ॥ ९५ ॥
मुद्राबन्धे कराभ्युक्षं तदर्चाक्षालनं तथा ।
पाद्यदानं तृतीयात्तु नित्यं पात्रात्समाचरेत् ॥ ९६ ॥
चतुर्थात्तु यथाकालं दद्यादाचमनं ततः ।
हस्तप्रक्षालनञ्चैव गण्डूषं मुखधावनम् ॥ ९७ ॥
स्नानीयाच्चाचरेत्स्नानं प्रयोजकविधिस्त्वयम् ।

[स्वशरीरविन्यस्तानां मन्त्राणामर्चनम्]

अर्घ्यपात्राद्द्वितीयात्तु किञ्चिदुद्धृत्य वै जलम् ॥ ९८ ॥
तेन स्वविग्रहन्यस्तान्मन्त्रानिष्ट्वा यथाक्रमम् ।
गन्धपुष्पप्रधूपैश्च पृथगेव प्रकल्पितैः ॥ ९९ ॥

Arghya must always be given (from this second vessel) to the lord who is in the form of mantras. Similarly, O wise man! this shall be done while adoring the pitcher, subsidiary pitchers, fire-pits, mantras and pitcher containing the *astra*, worshipping the spirits,[59] preceptors and others; worship done to himself (preceptor) by the skilled disciples, to those (deities) at the entrance, and deities (presiding over) in the palaces and seats, to the descendents of the preceptors and while worshipping the deities who are in the form of marks, limbs (parts of wholes), subsidiary deities, power, ornaments and are in the *maṇḍalas* and enclosures after sprinkling the hands when the *mudrās* are to be formed and the idols are to be washed. *Pādya* is always to be given from the third vessel. *Ācamana* is to be given from the fourth vessel at the appropriate time, washing the hands, rinsing the mouth and washing the face. Bath is to be given from the vessel intended for bath. This is the procedure for use.

(Worship of the mantras placed in one's body)

98b-99. Taking little water from the second *arghya* vessel, worship shall be done in due order using it to the mantras placed on his own body, with sandal paste, flowers and incense which are kept ready separately.

59. *bhūtānām:* may mean evil spirits or living beings. Kumuda and others, see commentary.

गुर्वादीनाम् इत्यत्र दक्षशिष्यात्मपूजार्थम् इत्यत्र च तत्तद्विग्रहविन्यस्तमन्त्रार्चनविषयमिति मन्तव्यम् । कराभ्युक्षम् गन्धलेपनार्थमभ्युक्षणम् । तदर्चा करयोरर्चनम्, तच्च अर्घ्येण च परस्परम् इति मुद्राबन्धप्रकरणे वक्ष्यमाणम्, तत्क्षालनम् तदपि तत्प्रकरण एव प्रक्षाल्य गन्धतोयेन् इति वक्ष्यमाणम् ।

पाद्यपात्रविनियोगमाह- **पाद्यदानम्** इत्यर्धेन ।

आचमनपात्रविनियोगमाह- **चतुर्थात्** इत्यादिना ।

स्नानपात्रविनियोगमाह- **स्नानीयाच्च** इत्यर्धेन । अत्र चकारेण पञ्चविंशतिकलशस्नपनाद्यनुष्ठाने "स्नानार्थं कल्पितेनैव ह्युदकेन विमिश्रितम्" इत्युक्तत्वात् स्नानीयेनापि स्नानं सिध्यतीत्यर्थस्सूचितो भवति । चकारस्य स्नानमित्यत्रान्वये स्नानान्तरनीराजनकुम्भपूरणादिकं सूच्यते ।

अथ स्वशरीरविन्यस्तमन्त्रार्चनमाह- **अर्घ्यपात्रम्** इति सार्धेन । अत्र गन्धपुष्पादिषु रागविषयत्वात् पृथक्कल्पनमुक्तम् । अयमेवार्थः पारमेश्वरे- "मत्पूजार्थम्" इत्यादिभगवद्वचनैः स्पष्टीकृतः ।

[गर्भद्वारविमानदेवतार्चनम्]

अथार्घ्यादीन् समादाय द्वास्स्थान् देवान् समर्चयेत् ।
निर्गत्य द्वारबाह्ये तु स्थितो वासीन एव वा ॥ १०० ॥
वास्तुक्षेत्रेशगरुडद्वाश्श्रीचण्डप्रचण्डकान् ।
अभ्यर्च्याऽर्घ्यादिभिर्देवान् प्रासादस्थांश्च पूजयेत् ॥ १०१ ॥

[विमानावयवेषु तत्तल्लोकदेवतानां संस्थितिः]

अनेकभेदभिन्नेषु प्रासादेषु महामते ।
विस्तरेण समस्तेषु वृत्तायतपुरस्सरम् ॥ १०२ ॥
वक्ष्ये लोकाध्व[5]तत्त्वानां देवतानाञ्च संस्थितिम् ।
सन्निरुध्य च भूर्लोकं पादक्षितितलेऽखिलम् ॥ १०३ ॥
एवं प्रासादपीठेषु भुवर्लोकं यथास्थितम् ।
स्मरेज्जङ्घावधिर्यावत् स्वर्लोकं तत्तदूर्ध्वगम् ॥ १०४ ॥
आरभ्य प्रस्तरोद्देशान्महच्छिखरभूमिगम् ।
जनो लोकं च तद्वेद्यां तपस्संज्ञं गलान्तगम्[6] ॥ १०५ ॥

गर्भद्वारविमानदेवतार्चनमाह- **अथार्घ्यादीन्** इति द्वाभ्याम् ।

तदर्थं विमाभावयवेषु तत्तद्देवतासंस्थितिमाह-**अनेक** इत्यारभ्य **यजेद्देवं सुदर्शनम्** इत्यन्तैः । अनेकभेदभिन्नेषु समस्तेष्वपि प्रासादेषु वृत्ताकारपुरस्सरं यथा तथा, वर्तुलाकारविमानं पुरस्कृत्येत्यर्थः । 'लोकाध्वतत्त्वानां देवतानाञ्च संस्थितिं वक्ष्ये' इति योजना । पारमेश्वरव्याख्याने तु प्रकारान्तरेण योजना कृता । प्रथमं लोकव्याप्तिरुच्यते-प्रासादस्य पादक्षितितले भूर्लोकः, प्रासादपीठे भुवर्लोकः, तदुपरि जङ्घायां

५. लोकोर्ध्व - A
६. तदण्डकम् पारमेश्वरे (१०.६) इति पाठः । तदण्डगमिति पाठेन भाव्यम् ।

(Worship of the deities at the entrance to the sanctum sanctorum and vimāna)

100-101. The deities at the entrance (of the sanctum sanctorum) are to be worshipped using *arghya* etc. Coming out (of that place), standing or sitting outside the entrance, the lords[60] of Vāstu and site, Garuḍa, Goddess at the entrance, Caṇḍa and Pracaṇḍa shall be worshipped with *arghya* and others. The deities stationed in the temple are then to be adored.

(Position of the deities of various worlds in the parts of the vimāna)

102-106. O wise man! I shall tell in detail the position of the worlds, *adhvans* and *tattvas* and deities in all the temples of different kinds,[61] beginning with the circular and rectangular. Confining[62] the entire world at the ground of the foot, Bhūrloka, as it is, is to be thought of at the feet (foundations) of the temple, Svarloka, which is above it upon the region of the pillar, Maharloka from the region of the ceiling (extending) upto the region of the big roof, Janaloka at the supporting platform, the region called

60. Vāstu must mean the lord or deity of the plot where the temple is built.
    kṣetra: a place where God's presence is noticed.
    kṣetreśa: deity protecting or presiding over that place also called *kṣetrapāla*.
    Caṇḍa: one of the guardians of the gate.
    Pracaṇḍaka: name of another similar to *Caṇḍa*. For particulars about *Caṇḍa* and *Pracaṇḍa* and their positions see *Pauṣ. S.* XI.18-21a.
61. The temple are of four kinds: *vṛtta* — circular; *caturaśra* — quadrangular; *āyata* — oblong; and *vṛttāyata* — oblong and circular; vide: *SKS. Brahma*, VIII.18b-19a; *JS.* XX.100.
62. The *Vimāna* in the temple is considered to represent the form of god. God is all-pervading, pervading every thing in the world. There are three matters to be noted here. The universe has seven worlds (upper), courses (*adhvans*) and objects (*tattvas*). God pervades all these and as such these things should be known to pervade the temple.

    In the case of the pervasion of the seven worlds, the parts of the *vimāna*, which are pervaded, are from below to the top are:- 1. *Pāda*: base, which *Bhūrloka* pervades; 2. *Prāsādapīṭha*: foundation for the temple, *Bhuvarloka*; 3. *Jaṅghā*: pillar from *prāsādapīṭha* upto the height of the pillar, *Svarloka*; 4. From *prastara* to *śikhara*, from entablature (plinth) to spire, *Maharloka*; 5. *vedī* supporting platform *Janahloka*; 6. *Galā* (neck), *Tapahloka*; 7. *Śikhā*, spire *Satyaloka*; cf. *Pauṣ. S.* LCIII.96-103, *Pāram. S.* X.4-7.

सत्यसंज्ञं च यल्लोकं तच्छिखायान्तु संस्मरेत् ।
भावयेच्च पुरा व्याप्तिमेवं वै साप्तलौकिकीम् ॥ १०६ ॥

[अध्वषट्कन्यासः]

ततश्चाध्वमयीं[७] व्याप्तिं भावयेत्तु यथाक्रमम् ।
कुम्भाधारोपलान्तःस्थमध्वषट्कं स्मरन् न्यसेत् ॥ १०७ ॥

७. ततश्चोर्ध्वमयीम् - B

Tapas reaching the neck and Satyaloka (to be thought of) in its peak. At first, he (priest) shall think thus of the pervasion of the seven worlds.

(Nyāsa of the six adhvans)[63]

107-111. Then he shall consider in due order the pervasion of the

63. *adhvan*: course. They are six: *varṇa, kalā, tattva, mantra, pāda* and *bhuvana*. Course means the path (way) through which the world passes during the periods of development. Among them, *varṇa* is letter (or syllable) which passes from the stage of *parā*, through *paśyantī* and *madhyamā* and culminates in the *vaikharī* stage in which sound becomes audible. *Kalā* means part and this means Viṣṇu's six qualities called by the collective name *ṣāḍguṇya*, consisting of *jñāna* (knowledge), *aiśvarya* (lordship), *Śakti* (power or potency), *bala* (strength), *vīrya* (virility) and *tejas* (splendour, might); vide: *LT.* XXI.7a. The third course is *tattva* (Reality) which is identical with *vyūha*, divisions or classifications which Vāsudeva (*Para*) assumes. The modifications:- 1. Vāsudeva (*Vyūha*); 2. Saṃkarṣaṇa; 3. Pradyumna and 4. Aniruddha; vide: *LT.* XXI.8a. The fourth course is mantra which is based on syllables or letters. This is intended to lift up the souls from bondage; vide: *LT.* XXII.17-18. The fifth course is *pada* which is marked by four stages called *jāgrat* (wakefulness), *svapna* (dream), *suṣupti* (deep sleep) and *turīya* (transcendental); vide: *LT.* XXII.23. The sixth course is *Bhuvana*, the world consisting of sentient and nonsentient beings; vide: *LT.* XXII.28. These six bear the body of Viṣṇu; vide: ibid XXX.57, that is they are located in His body. These are treated in further detail in *LT.* Ch. XIV, XX, XXI, XXII, XXX and XXXVI.

Among these, *varṇa* and mantra are interrelated and could be taken to represent the sonic creation. *Kalā* and *tattva* represent god directly. *Pada* refers to the meditative aspect of man's approach to attain god. *Bhuvanādhvan* is the material world.

Here, the source of the six *adhvans* is said to lie as a seed lying within the stony part which bears, below the basement, the nine pitchers. *Bhuvanādhvan* marks the portion in the Vimāna from this stony part upto the base of the temple; *Padādhvan* from there upto the height of the sanctum sanctorum; *Mantrādhvan* from there to Śukanāsa; *Tattvādhan* from there to *Vedikā*; *Kalādhvan* from there to the neck (*galā*) and *Varṇādhvan* above it.

The treatment given in *ślokas* 108-111 agree with the treatment contained in *SS.* XXIV.355-7. For a different concept and treatment see *Ajitāgama* Ch.102.

Here we find much difference between the *Lakṣmītantra* and *Sātvatasaṁhitā* which is followed by *Īśvarasaṁhitā* in the very concept of *adhvan*. It is however possible to treat the account given in the *Lakṣmītantra* as intended to help the aspirant (*sādhaka*) in using them for god-realisation, while *SS.* tries to apply the principle to prove that these have relevance to treat the *Vimāna* as god and its parts as representing the *adhvans*. Yet, it is hard to understand the exact significance of the names of some of these *adhvans* as they are held to have pervasion with the parts of the *Vimāna* as mentioned here. e.g., *Padādhvan, Mantrādhvan* and *Kalādhvan*. Or, we have to justify the treatment given here as progressing from *Bhuvanādhvan* representing the world, passing through high and higher stages giving finally, the highest place to *varṇa* which can be identified with *śabdabrahman*. Cf. *Pauṣ. S.* XL. III.105-107; *Parām. S.* X.8-12.

बीजभूतं तदन्तःस्थमध्वव्याप्तिमनुस्मरेत् ।
बीजतश्चाङ्कुरीभूता परस्ताद्व्यक्तिमेति सा ॥ १०८ ॥
प्रासादपीठपर्यन्तं कुम्भाधारोपलात्तु वै ।
भुवनाध्वा यथावस्थो भावनीयस्तु सर्वतः ॥ १०९ ॥
गर्भोच्छ्रयावधिर्यावत्पदाध्वानं विलोकयेत् ।
मन्त्राध्वा शुकनासान्तं तत्त्वाध्वा वेदिकावधि ॥ ११० ॥
कलाध्वा तु गलान्तञ्च वर्णाध्वा तु तदूर्ध्वतः ।
एवं कृत्वाध्वगां व्याप्तिं ततस्तत्त्वानि विन्यसेत् ॥ १११ ॥

[पञ्चविंशतितत्त्वन्यासः]

संयोज्य पार्थिवं तत्त्वं पादक्षितितले द्विजाः ।
तोयतत्त्वं न्यसेत्पीठे जङ्घायां तैजसं स्मरेत् ॥ ११२ ॥

स्वर्लोकः, प्रस्तरे महर्लोकः, वेद्यां जनो लोकः, कण्ठस्थाने तपोलोकः, शिखायां सत्यलोकः । अथाध्व-व्याप्तिः । कुम्भाधारोपलान्तः कुम्भाः प्रासादनिर्माणात्पूर्वं तत्खातदेशे स्थापिता नवसंख्याकाः । स्वयं व्यक्तप्रासादे तु तेऽपि स्वयमेव स्थिताः । तेषामाधारभूतो य उपलः शिला । तदन्तर्बीजभूतमध्वषट्कम्, तस्माद्भुवनाध्वादयोऽङ्कुरिता भवन्तीति ज्ञेयम् । कुम्भाधारोपलादारभ्य प्रासादपीठान्तं भुवनाध्वा, गर्भोच्छ्रयान्तं पदाध्वा, शुकनासिकान्तं मन्त्राध्वा, वेदिकान्तं तत्त्वाधा, गलान्तं कलाध्वा, तदूर्ध्वं वर्णाध्वा । अथ तत्त्वव्याप्तिः पादतले पृथिवीतत्त्वम्, पीठे तोयतत्त्वम्, जङ्घायां

ग्रीवोद्देशावधिर्यावद्वायुतत्त्वं तदूर्ध्वतः ।
आकाशं शिखरस्थं स्यात्तदुद्देशात्क्रमेण तु ॥ ११३ ॥
न्यसेच्छब्दादितन्मात्रां यावत्पादतलान्तिमम् ।
पार्श्वतो नासिके श्रोत्रे त्वक्सुधा समुदाहृता ॥ ११४ ॥
गवाक्षौ चक्षुषी स्यातां जिह्वा भद्राख्यवेदिका ।
घ्राणं तु शुकनासा स्यादास्यं द्वारमुदाहृतम् ॥ ११५ ॥
विज्ञेयाः पाणयस्स्तम्भाः पादाः पादशिलाघटाः ।
पायुभ्यां जलनिर्याणमुपस्थन्तु तदन्तरम् ॥ ११६ ॥
मनोऽन्तर्व्योम विज्ञेयं गर्वो ब्रह्मशिलागतः ।
बुद्धिस्तु पिण्डिका ज्ञेया प्रकृतिस्स्यात्तदन्तरे ॥ ११७ ॥
पञ्चविंशतमो ज्ञेयः प्रतिमापुरुषः परः ।

adhvans. The six *adhvans*[64] shall be remembered as lying within the stony support of the pitchers. He shall think of pervasion of *adhvans* as the seed lying there within. That,(pervasion of *adhvans*) which becomes the sprout of the seed, becomes manifested later. *Bhuvanādhvan*, as it is, shall be thought as existing everywhere from the stony support of the pitchers upto the foot (foundation) of the temple. *Padādhvan* must be noticed (from there) upto the height of the sanctum sanctorum, *Mantrādhvan* upto the region of *Śukanāsa*, *Tattvādhvan* upto the supporting platform, *Kalādhvan* upto the neck, and *Varṇādhvan* above it (that area). After doing (thinking) the pervasion of *adhvans*, the priest shall think of the *Tattvavyāpti*.

(Nyāsa of the twenty-five tattvas)[65]

112-118a. O brahmins! the earthly *tattvas* shall be brought together and placed on the ground of the feet (foundation of the temple); *tattva* of water at the feet, that of fire at the pillar, that of air upto the region of the neck, and that of *ākāśa* above it resting in the peak, in the order of their enumeration. The subtle element[66] of sound and others shall be placed in the region of the foot, nose and ears on the sides. The skin is said to be plaster. The two eyes shall be the two windows, tongue the platform called *Bhadra*, and nose shall be *Śukanāsa*. Mouth is stated to be the entrance. The hands are to be known as pillars, feet as pitchers on the stony feet (base), anus the outlet for water and the organ of generation within it. The mind is

64. For the enumeration of the six *adhvans*,

    see: वार्ण: कलामयश्चैव तात्त्विको मान्त्रिकस्तथा ।
    पादिको भौवनश्चैव षडध्वान: प्रकीर्तिता: ॥ *LT*. XXII.10, 11.

65. While the *nyāsa* of the *tattva-s* is to be done, pervasion of them is stated to proceed through *pāda, pīṭha, grīvā, vāyu* and *śikhara* for the pervasion of the elements earth, water, fire, air and *ākāśa* in the ascending order following the reverse process of their production as stated in the *T. UP.* II.1.

66. The subtle elements are stated to be at the foot of the *Vimāna*. The parts of the human body beginning with the nostrils upto the organ of generation are said to represent the parts of the *Vimāna*, rather, a human body from the sides to the drain in a house. Mind, ego, intellect and matter pervade the space within the body, *Brahmaśilā*, pedestal and space between that. The twenty-fifth *tattva* is the soul in the form of (concrete form). He is *Ananta* beneath the stony support.

    For a detailed description of *Tattvanyāsa* see the commentary.

[देवतान्यासः]

एवं न्यस्तेषु तत्त्वेषु न्यस्तव्या देवताः क्रमात् ॥ ११८ ॥
घटाधारोपलस्याधस्त्वनन्तो नाम नागराट् ।
सहस्रसंख्यातफणामण्डलेन सुमण्डितः ॥ ११९ ॥

तेजस्तत्त्वम्, ग्रीवायां वायुतत्त्वम्, शिखरे आकाशतत्त्वम्, आकाशे शब्दतन्मात्रा, वायौ स्पर्शतन्मात्रा, तेजसि रूपतन्मात्रा, अप्सु रसतन्मात्रा, पृथिव्यां गन्धतन्मात्रा, पार्श्वनासिकयोश्श्रोत्रे, सुधायां त्वक्, गवाक्षयोश्चक्षुषी, भद्रवेदिकायां जिह्वा, शुकनासिकायां घ्राणम्, द्वारे वागिन्द्रियम्, स्तम्भेषु पाणीन्द्रियम्, पादशिलाघटेषु पादेन्द्रियम्, जलनिर्याणे पाय्विन्द्रियम्, तदन्तरे उपस्थेन्द्रियम्, अन्तर्व्योम्नि मनः, ब्रह्मशिलायामहङ्कारः, पिण्डिकायां बुद्धिः, तदन्तरे प्रकृतिः, प्रतिमायां पुरुषः, घटाधारशिलाया अधः सहस्रफणोपशोभितोऽनन्तः, तदूर्ध्वे सहस्रार -

तदूर्ध्वे संस्थितश्चक्रं सहस्रारोपशोभितम् ।
या शिला कलशाधारसंज्ञा तां विद्धि सर्वगाम् ॥ १२० ॥
सा मध्यशक्तिस्सामान्या निष्कला पारमेश्वरी ।
तदूर्ध्वसंस्थितायाः कुम्भा नवसंख्यास्तु ये द्विजाः! ॥ १२१ ॥
तेषां मध्यमकुम्भे तु साङ्गं सपरिवारकम् ।
मन्त्रनाथं समभ्यर्च्य मूलमन्त्रेण देशिकः ॥ १२२ ॥

[दिग्देवतान्यासः]

ततः प्रागादिदिक्स्थेषु वासुदेवादिकान्यजेत् ।
विदिक्स्थेष्वनिरुद्धादीन्यजेदप्यययोगतः ॥ १२३ ॥

शोभितं चक्रम्, कलशाधारशिलायां सामर्थ्यशक्तिः, तदूर्ध्वे मध्यकुम्भे साङ्गसपरिवारः श्रीमन्नारायणः । प्रागादिदिक्स्थितकुम्भचतुष्टये प्रभवक्रमेण वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाः । ऐशान्यादिविदिक्स्थितकुम्भचतुष्टयेऽप्ययक्रमेणानिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः । मध्यमघटपिधाने ज्ञानाभासशक्तिः, प्राग्घटपिधाने निवसतीशक्तिः, आग्नेयघटपिधाने आनन्दबलाशक्तिः, दक्षिणघटपिधाने प्रभाशक्तिः, नैरृतघटपिधाने सर्वगाशक्तिः, पश्चिमघटपिधाने ब्रह्मवदनाशक्तिः, वायव्यघटपिधाने द्योतकीशक्तिः, उत्तरघटपिधाने सत्यविक्रमाशक्तिः, ईशघटपिधाने सम्पूर्णाशक्तिरर्चनीया । पारमेश्वरे तु पौष्करोक्तरीत्या "तेषां विदिक्स्थितानाञ्च" इत्यादिभिः विदिक्स्थितकुम्भचतुष्के स्वमन्त्रेण लक्ष्मीं, पूर्वादिक्स्थितकुम्भचतुष्के स्वमन्त्रेण कौस्तुभं, मध्यकुम्भे षडक्षरेण निष्कलं शब्दविग्रहं शक्त्यात्मानं भगवन्तं न्यसेदित्युक्तम् । तत्र मध्यमकुम्भस्येत्यादिभिः मध्यकुम्भपिधाने पराशक्तिः प्रभाशक्तिश्च । दिक्षुस्थितकुम्भपिधानचतुष्के ज्ञानशक्तिः,

to be understood as *ākāśa* within, ego as *Brahmaśilā*[67] and *buddhi* is to be known as the pedestal (*piṇḍikā*). Matter shall be within it. The twenty-fifth is to be understood as the soul in the idol.

(Nyāsa of the deities)[68]

118b-137a. The deities are to be placed in the order when the *nyāsa* is done for the *tattvas.* There is the king of serpents called Ananta beneath the stony support for the pitchers, ornamented by the circle of hoods numbering a thousand. Above it, is stationed the discus shining with thousand spokes. Know the slab which is called *Kalaśādhāra* as extending in all places to be the middle power, of a general kind, partless and belonging to the supreme lord. O brahmins! those pitchers, nine in number are stationed over it. The lord of the mantras shall be worshipped by the priest with Mūlamantra in the middle pitcher among them, in all its parts, with the secondary deities. No mention of the heading *digdevatānyāsaḥ* (*nyāsa* of the deities of the quarters). Then Vāsudeva and others are to be worshipped in (the pitchers kept) the east and other quarters. Aniruddha and others are to be worshipped in (the pitchers kept) the intermediate directions with the method of merging.

67. *Brahmaśilā*: stone in the form of power supporting the pedestal; vide: *LT.* CLIX.104-105; cf. *JS.* XX.296-306.

68. See the commentary for a detailed account as to how the *nyāsa* is to be done in the case of nine pitchers. The *nyāsa* must be done on the lids (*pidhāna*) of the pitchers.

तेषां पिधाननवके त्वामध्यादीशगोचरम् ।
स्मर्तव्यास्सर्वतो व्याप्ताः क्रमेण द्विजपुङ्गवाः ॥ १२४ ॥
ज्ञानाभासा निवसती तथाऽऽनन्दबला प्रभा ।
सर्वगा ब्रह्मवदना द्योतकी सत्यविक्रमा ॥ १२५ ॥
सम्पूर्णा चेति कथिताश्शक्तयो विश्वधारिकाः ।
शिलाष्टके दिग्विदिक्षु तद्बहिस्स्थापिते न्यसेत् ॥ १२६ ॥
धर्माद्यं चाग्निकोणात्तु यावदीशपदं पुनः ।
प्रागादावुत्तरान्तञ्च अधर्माद्यं चतुष्टयम् ॥ १२७ ॥

विदिक्कुम्भपिधानचतुष्टये क्रियाशक्तिर्न्यस्तव्येति चोक्तम् । पुनः सात्वतोक्तरीत्या 'पिधाननवके' इत्यादिभिः नवशक्तिन्यासपक्षोऽप्युक्तः । पारमेश्वरव्याख्यातृभिस्तु मध्यकुम्भस्य पिधाने मध्यतो निष्कलश्शब्दविग्रहः षडक्षर इत्युक्तम्, तदज्ञानमूलकम् । 'षडक्षरेण मन्त्रेण निष्कलं शब्दविग्रहम्' इति वाक्यस्य पूर्ववाक्य एव योजनीयत्वात् । एवमुत्तरत्र योजिते विरोधबाहुल्याच्च । पारमेश्वरमूलभूतपौष्करसंहितायां द्विचत्वारिंशेऽध्याये षडक्षरेणेति वाक्यानन्तरं सार्धश्लोकषट्कमतिलङ्घ्यैव 'शक्तिर्वा या परादेवी' इत्यादिक-मुक्तम् । तद्बुध्वा पारमेश्वरसंहितादर्शनमात्रेणैव सर्वज्ञम्मन्य- मानैर्व्याख्यातृभिरेवमुक्तम् । किञ्च मध्यम-कुम्भपिधानस्य चतुर्दिक्षु विश्वसन्धारणक्षमा ज्ञानशक्तिः, तद्विदिक्ष्वानन्दलक्षणा क्रियाशक्तिरित्युक्तम् । अत्र पराशक्तिः प्रभाशक्तिश्च ज्ञानक्रियाशक्त्योरिवात्मनोऽपि यथोक्तस्थानव्यत्यासस्सम्भवेदिति भिया व्याख्यातृदृष्टिगोचरतामेव प्रापतुः । अत्र चतुश्शक्त्यर्चनं पौष्करे कण्ठरवेणोक्तम् - ''पिधाननवकं दद्यात्ताम्रं वा शैलजं समम् । सुवृत्तं चतुरश्रं वा सुघनं द्वादशाङ्गुलम् ॥ चतुश्शक्तिनिरुद्धञ्च इति । शक्तिचतुष्टयमपि तत्रैव विवृतम् ।

शिलानामन्तरे भूमौ षट्कं षट्कं क्रमेण तु ।
न्यस्तव्यं पूर्ववर्णाच्च वर्णानां सावसानकम् ॥ १२८ ॥
ततः प्राङ्गणभित्त्यर्थं विन्यस्ते च शिलाष्टके ।
दिग्विदिक्षु न्यसेत्प्राग्वत् प्रागुक्तांश्च दिगीश्वरान् ॥ १२९ ॥
चक्रं तदन्तभूमीनां भ्रमद्वह्निस्फुलिङ्गवत् ।
क्षार्णेन चिन्तयेद्व्याप्तिं भूभागं चाङ्गणीयकम् ॥ १३० ॥

'शक्तिर्जाया परादेवी' इत्यादिभिः । प्रागादिपिधानचतुष्टये ज्ञानशक्तिः, आग्नेयादिपिधानचतुष्टये क्रियाशक्तिरित्यर्थोऽपि पारमेश्वरे ''विदिग्व्यक्तिसमूहे तु'' इत्यत्र व्यक्तिपदेनैव ज्ञायते । तदपि स्पष्टमुक्तं पौष्करे ''विदिग्घटसमूहे तु'' इति । अत्र घटशब्दस्य तत्पिधाने लक्षणा । अपि च 'पिधाननवकेत्वस्मिन्' इत्याद्युक्तज्ञानाभासादिशक्तिन्यासस्य पक्षान्तरत्वमपि न ज्ञातम् । ननु तत्र यद्वाथवेत्यादिपक्षान्तरत्वगतगमक-

O brahmins! the powers, which pervade everywhere are to be thought of in their order, *jñānābhāsā, nivasatī, ānandabalā, prabhā, sarvagā, brahmavadanā, dyotakī, satyavikramā* and *sampūrṇā*. These are said to lend support to the universe. These are to be placed in the directions and intermediate directions, on the eight slabs kept outside them. *Dharma* and others are to be placed from the south-east corner to the north-east, and the four beginning from *adharma* from the east to the north.

The letters,[69] six by six, are to be placed in due order from the beginning to the end on the ground in between the slabs. When eight slabs are placed for (building) the wall in the front courtyard in the order of the quarters stated before, the lords of the quarters, who are stated before, are to be placed as before in the directions and intermediate quarters. The discus, which rotates in those regions like a spark of fire, is to be thought of as

69. Letters *a* to *i* to be placed in the region between east and south-east; *ṛ* to *ai* between south-east and south; *o* to *kha* south and south-east; *ga* to *ja* south-west and west; *jha* to *ḍha* west and north-west; *ṇa* to *n* north-west and north; *pa-ya* north and north-east and *ra* to *sa* between north-west and east.

शब्दो न दृश्यते । ज्ञानक्रियाशक्त्योः प्रागादिपिधानाष्टके न्यासाङ्गीकारे 'पिधाने मध्यतो न्यसेद्' इत्यत्र मध्यमशब्दस्य वैयर्थ्यञ्च स्यादिति चेत्; ब्रूमः, पक्षान्तरत्वगमकशब्दाभावेऽप्यर्थपर्यालोचनया तस्य पक्षान्तरत्वं सिद्धमेव। मध्यमशब्दप्रयोजनन्तु 'मन्त्रराट् कर्णिकामध्ये' इत्यत्र यथाङ्गीक्रियते, तथैवात्रापि बोध्यमायुष्मता। किञ्च पारमेश्वरव्याख्यातृभिरत्र नवकुम्भवत्वं वृत्तायतविमानभेदविषय इत्युक्तम् । 'यत्र प्रासादभेदेष्विति वक्ष्यमाणत्वात्' इत्युक्तम् । तदतीव मन्दम्; प्रासादनिर्माणार्थं खातदेशे नवकुम्भस्थापनं सर्वविमानसाधारणम् । अनेकभेदभिन्नेषु प्रासादेषु महामते इत्यारभ्य लोकव्याप्त्यादीनां सर्वसाधारण्येनोक्तत्वात् । सात्वतपौष्करादिष्वपि

बहिः प्राङ्गणभित्तीनां सास्त्रं सपरिवारकम् ।
प्रागादावीशकोणान्तमिन्द्राद्यं चाष्टकं न्यसेत् ॥ १३१ ॥
तथाविधेषूपलेषु अन्तर्भूमिगतेषु च ।
सर्वाधारमयं चक्रं शाखामूलं समाश्रितम् ॥ १३२ ॥
ज्ञानक्रियात्मके तत्त्वे शाखयोर्युगले स्थिते ।
पारमेश्वर आद्यस्तु द्वारस्योर्ध्व उदुम्बर ॥ १३३ ॥
संस्थितस्सर्वतो व्याप्तस्तत्पृष्ठे मध्यदेशतः ।
चतुष्पात्सकलो धर्मः स्थितस्सत्ववतां वरः ॥ १३४ ॥

विमाननिर्माणप्रकरणे एतन्नवकुम्भस्थापनस्य सर्वविमानसाधारणत्वेनोक्तत्वाच्च। पारमेश्वरव्याख्यातृभिरेतन्नवकुम्भेषु शिखाकुम्भत्वभ्रान्त्या व्याख्यानमेवं कृतमिति मन्यामहे। तद्बहिस्स्थापितशिलाष्टके आग्नेयादिकोणेषु धर्मज्ञानवैराग्यैश्वर्याणि, प्रागादिष्वधर्माज्ञानावैराग्यानैश्वर्याणि । ऐन्द्राग्नेयशिलयोरन्तरेऽकारादिवर्णषट्कम् । ओं अं नमः पराय, ओं आं नमः पराय, इत्याद्याकारमन्त्रैरर्चयेत् । आग्नेयदक्षिणशिलयोरन्तरे ऋकारादिवर्णषट्कम्। दक्षिणनैर्ऋतशिलयोरन्तरे ओकारादिवर्णषट्कम् । नैर्ऋतवारुणशिलयोरन्तरे गकारदिषट्कम्। वारुणवायव्यशिलयोरन्तरे झकारादिषट्कम्। वायव्योत्तरशिलयोरन्तरे णकारादिषट्कम् । उत्तरैशान्यशिलयोरन्तरे पकारादिषट्कम् । ऐशान्यप्राक्शिलयोरन्तरे रेफादिसकारान्तवर्णषट्कम्, पूर्वोक्ताकारमन्त्रैरर्चयेत् । ततः प्राङ्गणभित्यर्थं विन्यस्तशिलाष्टके प्रागादिषु पूर्ववद्वासुदेवादयः, ऐशान्यादिष्वनिरुद्धादयः । तद्बहिः परितो भ्रमद्बह्निस्फुलिङ्गवत् क्षकारः, प्राङ्गणभित्तेर्बहिर्विन्यस्तशिलाष्टके प्रागाद्यीशानान्तं सास्त्रं सपरिवारमिन्द्रादि

यद्वा कवाटौ द्वारस्य कल्पितौ द्विजसत्तमाः ।
कालवैश्वानरो देवो ह्यपां पतिरुभाविमौ ॥ १३५ ॥
दक्षिणोत्तरयोगेन कवाटोपरि संस्थितौ ।
तद्वारपार्श्वयोर्वा श्रीमण्डपद्वारपार्श्वयोः ॥ १३६ ॥
निधीशौ शङ्खपद्माख्यौ पूजनीयौ क्रमेण तु ।

pervaded by the letter *kṣa* and the portion of the ground with the courtyard also (must be considered so).

The eight (deities), beginning with Indra, must be placed outside the walls of the frontal courtyard with Astra and subsidiary deities (in the directions) beginning with the eastern corner and ending with the north-east, in such slabs resting within the ground. The discus, which is the support for all, rests on the door-post. The two *tattvas*, knowledge and action are on the pair of door-posts. The supreme lord, who remains on the pair of door-posts, pervades all places. In its hind part and central portion, the entire *dharma* of four feet, the best among the strong remains stationed.

Or, eminent brahmins! two doors are (fixed) at the entrance, lord Kālavaiśvānara and the Lord of waters are stationed on the doors in the south and north. Śaṅkha and Padma, the lords of treasures[70] are to be worshipped on the two sides of the door or on the two sides of the lustrous pavilion respectively.

70. *Nidhi:* treasure; they are nine: Śaṅkha, Mahāpadma, Padma, Makara, Kacchapa, Mukunda, Kunda, Nīla and Kharva. Bhānuji's com. on *Amarakośa* I.1.71.

[भवोपकरणदेवताः]

ततो जङ्घासमूहे तु तथैवान्तरभूमिषु ॥ १३७ ॥
भवोपकरणीयानां देवानामर्चनं क्रमात् ।
कालो वियन्नियन्ता च शास्त्रं नानाङ्गलक्षणम् ॥ १३८ ॥
विद्याधिपतयश्चैव सरुद्रस्सगणश्शिवः ।
प्रजापतिसमूहस्तु इन्द्रस्सपरिवारकः ॥ १३९ ॥
मुनयस्सप्तपूर्वेऽन्ये ग्रहास्तारादिकैर्वृताः ।
जीमूतश्चाखिला नागास्त्वप्सरोगण उत्तमः ॥ १४० ॥
ओषध्यश्चैव पशवो यज्ञास्साङ्गाखिलास्तु ये ।
विद्या चैवापरा विद्या पावकश्चैव मारुतः ॥ १४१ ॥
चन्द्रार्कौ वारिवसुधे इत्येते देवतागणाः ।
चतुर्विंशतिसंख्याताः भवोपकरणामराः ॥ १४२ ॥

लोकपालाष्टकम्, द्वारशाखामूले सर्वाधारमयं चक्रम् । दक्षिणशाखायां ज्ञानात्मतत्त्वम्, उत्तरशाखायां क्रियात्मतत्त्वम्, द्वारस्योर्ध्वोदुम्बरे आद्यः परमेश्वरः, ऊर्ध्वोदुम्बरपृष्ठे चतुष्पात्सकलधर्मः । दक्षिणकवाटे कालवैश्वानरः, उत्तरकवाटेऽपां पतिः, तद्वारपार्श्वयोरग्रमण्डपद्वारपार्श्वयोर्वा शङ्खपद्मनिधी, जङ्घासमूहे तदन्तरभूमिषु च कालादिवसुधान्ताश्चतुर्विंशतिभवोपकरणदेवताः । जङ्घाग्रेषु केशवादिद्वादशमूर्तयः ।

मूर्तयः केशवाद्यास्तु जङ्घाग्रोपरि संस्थिताः ।
ततस्तु प्रस्तरोद्देशे एते स्थाप्याः क्रमेण तु ॥ १४३ ॥
चक्रशङ्खौ गदापद्मे लाङ्गलं मुसलं शराः ।
शार्ङ्गञ्च खड्गखेटौ तु दण्डः परशुरीतिहा ॥ १४४ ॥
पाशाङ्कुशौ मुद्गरञ्च वज्रं शक्तिसमन्वितम् ।

[प्रासादान्तरविषये]

प्रासादे चतुरश्रे तु चतुरश्रायतेऽपि च ॥ १४५ ॥

ततः प्रस्तरोद्देशे चक्रादिशक्त्यन्तसप्तदशायुधानि । पारमेश्वरव्याख्याने तु "तदूर्ध्वं प्रस्तरोद्देश-कपोततलसंस्थितनासिकानवके तदन्तरभूमिषु च चक्रादिशक्त्यन्ताष्टादशन्यास" इत्युक्तम् । तद्भ्रान्तिमूलकम् 'दण्डः परशुरीतिहा' इत्यत्र "ईतिं हन्तीति ईतिहा" इति परशुविशेषणम् । तस्मिन्विशेषणपदे प्रत्येकायुधभ्रान्त्या-ऽष्टादशायुधानीत्युक्तम् । पारमेश्वरे –

(Deities who are of help in worldly life)

137b-145a. The deities, who are of help in worldly life, are to be duly adored at the group of pillars and in the interior regions. The immortals, forming group of gods who are of help in worldly life, are twenty-four in number. They are— Time, Sky, Controller, Śāstra with various parts, the lords of *vidyās*,[71] Śiva with Rudras[72] and hosts, groups of progenitors,[73] Indra with his retinue, seven sages[74] and also others (as well), planets surrounded by stars etc., all clouds, snakes, the good group of Apsarās,[75] medicinal herbs, animals, all sacrifices with their limbs, Vidyā,[76] Aparavidyā,[77] fire, wind, moon and sun, water and earth.

Forms (of god) beginning with Keśava are stationed on the pillars. Then these discus, conch, club, lotus, ploughshare, pestle, arrows, bow, sword, shield, staff, axe, which destroy, distress, noose, goad and hammer, thunderbolt with spear are to be stationed, in their order, on the region of the ceiling.

(Matter relating to the interior of the temple)

145b-157a. In the temples of rectangular and oblong kinds, Garuḍa is to be placed above the ceiling (entablature) at the four corners; the lordly sages above that on the supporting platform. *Ekaśṛṅgatanu*, lord in Vāmana's body, the all-pervasive Trivikrama, Nara, Nārāyaṇa, Hari,[78] Kṛṣṇa, Rāma holding the blazing axe, the other Rāma holding the bow, Vedavid, Lord

71. Śiva, Sarasvatī and Hayagrīva are taken generally as deities presiding over *vidyās*, but *SKS*. Indra.VI mentions Viṣṇu, Rudra, the lords of the months, the twelve sons of Kāśyapa and Aditi as Vidyeśvaras.
72. Rudras are eleven in number: Manyu, Manu, Mahinasa, Mahān, Śiva, Ṛtadhvaja, Ugraretas, Bhava, Kāla, Vāmadeva and Dhṛtavrata; *BP*. III.12-12.

    Another version (Paurāṇic) gives the names as Ajaikapād, Ahirbudhnya, Hara, Nirṭa, Īśvara, Bhuvana, Aṅgāraka, Ardhaketu, Mṛtyu, Sarpa, Kapālin.
73. Prajāpati: Marīci, Atri, Aṅgrias, Pulastya, Pulaha, Kratu, Vasiṣṭha, Dakṣa, Bhṛgu and Nārada; MS. I.34.
74. The seven sages Marīci, Atri, Aṅgiras, Pulaha, Kratu, Pulastya and Vasiṣṭha; VP.I.7-5.
75. Apsarās: celestial nymphs; some of them are Urvaśī, Rambhā, Menakā, Ghṛtācī and Tilottamā.
76. *vidyās*: *trayī* (the three Vedas), Ānvikṣikī, Daṇḍanīti and Vārtta. MS. adds Ātmavidyā.
77. Aparavidyā: *vidyā* two kinds: 1. *parā*, 2. *aparā*. The former is *Ātmavidyā*. The latter all others which include Śāstras, Upavedas and others.
78. Hari, Kṛṣṇa, Nara and Nārāyaṇa represent an earlier *Vyūha* deities.

''नासिका नवकं यच्च यास्तदन्तरभूमयः । तस्मिंस्तासु च सर्वासु ह्येते स्थाप्याः क्रमेण तु ॥''

इत्युक्तम् । अत्र नासिकानवकं तदनन्तरभूमयोऽष्टावाहत्य सप्तदशस्थानानि । तत्संख्याकायुधन्यासार्थमुक्तानीति स्तनन्धयोऽपि जानीते । व्याख्यातृभिस्तु तन्न ज्ञातम् । किञ्चात्रत्यभ्रान्तिकल्पितस्य दृढीकरणार्थमुत्तरत्रापि सहस्रकलशाभिषेकप्रकरणे – ''चक्रादिवज्रपर्यन्तमस्त्रषोडशकं यजेत् । कोणस्थेषु चतुष्केषु न्यसेच्छक्तिं ततः परम् ॥'' इति श्लोकव्याख्यावसरे 'तद्बहिष्षट्कषोडशके चक्रादिवज्रपर्यन्तम्, अत्रातद्गुणसंविज्ञानो बहुव्रीहिरिति' लिखितम् । तत्र तादृशबहुव्रीह्यङ्गीकारे वज्रस्य का गतिरिति नालोचितं व्याख्यातृभिः । चक्रशङ्खौ इत्यादिसार्धश्लोकस्सात्वतनवमपरिच्छेदोक्तः। तत्र त्रयोदशपरिच्छेदे चक्रादिक्रमेण सप्तदशायुधानामेव ध्यानान्यप्युक्तानि। एतत्सर्वमबुध्वैव व्याख्यातृभिः पाण्डित्यं प्रदर्शितम् ।

गरुडं प्रस्तरस्योर्ध्वे न्यसेत्कोणचतुष्टये ।
तदूर्ध्वं वेदिकायान्तु भावनीया मुनीश्वराः! ॥ १४६ ॥
एते पूर्वादिके योगेनैकशृङ्गतनुस्ततः ।
देवो वामनदेहस्तु सर्वव्यापी त्रिविक्रमः ॥ १४७ ॥
नरो नारायणश्चैव हरिः कृष्णस्तथैव च ।
ज्वलत्परशुधृग्रामो रामश्चान्यो धनुर्धरः ॥ १४८ ॥
वेदविद्भगवान् कल्की पातालशयनः प्रभुः ।
ततो ग्रीवातले ध्येयः कूर्मः पातालधारकः ॥ १४९ ॥
वराहो नारसिंहश्चाप्यमृताहरणस्तु वै ।
श्रीपतिर्दिव्यदेहोऽथ कान्तात्माऽमृतधारकः ॥ १५० ॥
राहुजित्कालनेमिघ्नः पारिजातहरो महान् ।
लोकनाथस्तु शान्तात्मा दत्तात्रेयो महाप्रभुः ॥ १५१ ॥
न्यग्रोधशायी भगवानित्येते द्विजसत्तमाः !।
ततस्तु शिखरोद्देशं त्रिधाकृत्य यथासमम् ॥ १५२ ॥

प्रसङ्गात् प्रासादान्तरविषयमाह **प्रासादे** इत्यादिना । तदूर्ध्वं वेदिकायां पूर्वादियोगेनैकशृङ्गतन्वादिपातालशयनान्तं द्वादशमूर्तयः । ततो ग्रीवातले कूर्मादिन्यग्रोधशाय्यन्तं द्वादशमूर्तयः । एवमेवोक्तं पारमेश्वरेऽपि; तद्व्याख्यातृभिस्त्वेकश्शृङ्गादिपातालशयनान्तमेकादश मूर्तयः, कूर्मादिन्यग्रोधशाय्यन्तमेकादशमूर्तय इत्युक्तम्;

Kalkin, the Lord Pātālaśayana-these are in the east and other directions. O brahmins! In the neck are to be meditated, these Kūrma bearing Pātāla, Varāha, Nārasiṃha, Amṛtāharaṇa, Śrīpati with a divine body, Kāntātmā, Amṛtadhāraka, Rāhujit, Kālanemighna, the great Pārijātahara, Lokanātha, Śāntātman, the great Lord Dattātreya and Lord Nyagrodhaśāyin.

Then the roof is to be divided equally into three parts, O brahmins! upto the ceiling which bears the pitchers. Beneath it, the remaining gods who are

तत्पामरोक्तिः । एवं व्याख्याने बुद्धिप्रसरणस्य बीजं किं वा (इति) आलोचनीयं मनीषिभिः । वयन्तु पूर्वमायुधन्यासे आधिक्यं वर्णितमिति तत्परिहारार्थमिह देवतासंकोचः कृत इति मन्यामहे । तत्प्रासादशिखरभागं शिखाकुम्भाधारवेदिकापर्यन्तं

यावत्तु कलशाधारवेदिकाद्द्विजसत्तमाः ।
अधोभागे क्रमाद्ध्येयाः शिष्टा देवास्तु वैभवाः ॥ १५३ ॥
अनन्तो भगवान् देवः शक्त्यात्मा मधुसूदनः ।
विद्याधिदेवः कपिलो विश्वरूपो विहङ्गमः ॥ १५४ ॥
क्रोडात्मा बडवावक्त्रो धर्मो वागीश्वरस्तथा ।
देव एकार्णवशय इत्येते द्वादशः स्मृताः ॥ १५५ ॥
ध्रुवस्तु सर्वतो व्यापी तदूर्ध्वपदसंस्थितः ।
पद्मनाभस्तदूर्ध्वे तु व्यापकः परितिष्ठति ॥ १५६ ॥
शुकनासामुखे पूज्यो वासुदेवस्सनातनः ।

[शुकनासारहितविषये]

यत्र प्रासाददेशे तु शुकनासा न कल्पिता ॥ १५७ ॥
तत्राग्रतो नासिकाया वासुदेवं तु संस्मरेत् ।
शिष्टनासात्रये पूज्याः क्रमात्संकर्षणादयः ॥ १५८ ॥
अथवा पुरुषस्सत्यो ह्यच्युतोऽनन्त एव च ।
चतुर्दिक्षु क्रमेणैव पूज्या यद्वा क्रमेण तु ॥ १५९ ॥
वराहो नारसिंहश्च श्रीधरश्च हयाननः ।
यद्वा नराद्याश्चत्वारो धर्ममूर्त्यादयोऽपि वा ॥ १६० ॥

त्रेधा विभज्याधोभागेऽनन्ताद्येकार्णवशाय्यन्तं द्वादशमूर्तयः । तदूर्ध्वभागे ध्रुवः । तदूर्ध्वे पद्मनाभश्चार्चनीयः । पारमेश्वरव्याख्याने तु - "ततः कलशाधारमारभ्य शिखापर्यन्तं त्रिधा कृत्वा" इत्युक्तम् । तद्विचारणीयम् । शुकनासामुखे वासुदेवः पूज्यः ।

शुकनासारहितविषयमाह- **यत्र** इत्यादिना । शिष्टनासिकात्रितये सङ्कर्षणप्रद्युम्नानिरुद्धाः । यद्वा नासिकाचतुष्टये पुरुषसत्याच्युतानन्ताः । अथवा वराहनारसिंहश्रीधरहयग्रीवाः। यद्वा नरनारायणहरिकृष्णाः ।

यद्वा परशुरामाद्याः स्मर्तव्याः क्रमयोगतः ।
एते तु शक्तिभिस्सर्वे युक्ता वा केवलास्तु वा ॥ १६१ ॥

divinely decended and who are twelve in number are to be meditated upon in their order:- Bhagavān Ananta, Lord Śaktyātman, Madhusūdana, Vidyādhideva, Kapila, Viśvarūpa, Vihaṅgama, Kroḍātman, Baḍabāvaktra, Dharma, Vāgīśvara, Lord Ekārṇavaśaya. At the beginning portion of Śukanāsa the following are to be adored, all pervasive Dhruva above that region, Padmanābha, above that stands pervading (the region).

(Matter relating to the place without Śukanāsa)

157b-164. Vāsudeva is to be remembered at the front of *nāsikā* where in the region of the temple, no arrangement is made to Śukanāsa. Saṃkarṣaṇa and others are to be adored in their order in the three Śukanāsas; or Puruṣa,[79] Satya, Acyuta and Ananta are to be adored in the four directions in (this) the order. Or Varāha, Nārasiṃha, Śrīdhara and Hayānana in their order, or the four beginning with Nara or those beginning with (the form of) *dharma* and others.

Or Paraśurāma and others are to be considered in their order. These are to be in association with the powers or alone. The six-spoked discus is to be

79. Puruṣa, Satya, Acyuta and Ananta are the Vyūha deities; vide: JS. IV.2-7. The deities of the *Vyūha*, Vāsudeva, Saṃkarṣaṇa, Pradyumna and Aniruddha are unknown to JS.

It is of interest to note that four deities are enumerated differently under six groups:- 1. Vāsudeva, Saṃkarṣaṇa, Pradyumna and Aniruddha; 2. Puruṣa, Satya, Acyuta and Ananta; 3. Varāha, Nārasiṃha, Śrīdhara and Hayagrīva; 4. Nara, Nārāyana, Hari and Kṛṣṇa; 5. Dharma, Vāgīśa, Ekārṇavaśāyin and Kūrma; 6. Paraśurāma, Dāśarathirāma, Vedavit and Kalkin.

It is yet to be found out whether all the five except the first were treated as *Vyūha* deities.

द्रुमैः पत्रलतायुक्तैर्भूषितैर्वेदिकातले ।
विन्यसेत् षडरं चक्रं ततस्सामलसारके ॥ १६२ ॥
भगवाञ्जगदाधारो वासुदेवः परः पुमान् ।
लोकानध्वगणं नित्यं तत्त्वाद्यमपि देवताः ॥ १६३ ॥
प्रासादोपरि विन्यस्ताः समाक्रम्य च संस्थिताः ।
तदग्रदेशे हेतीशं यजेद्देवं सुदर्शनम् ॥ १६४ ॥

[न्यूनाधिकावयवप्रासादविषये]

प्रासादाङ्गेषु विप्रेन्द्राः क्रमान्निगदितेषु च ।
देवताधारभूतेषु यद्यदङ्गं न कल्पितम् ॥ १६५ ॥
यत्र वा तत्तदधिकं तत्रापि च समाचरेत् ।
तत्तत्स्थाने तु बुद्ध्या तु देवतान्यासमूहतः ॥ १६६ ॥
यद्वा ह्यनवक्लृप्ताङ्गे देवतेष्टिन्तु वर्जयेत् ।

[पूर्वोक्तानां देवतानां केषाञ्चिन्निराकारत्वम्]

लोकास्सप्त तथाऽध्वानस्तत्त्वसङ्घश्च देवताः ॥ १६७ ॥
ध्यातव्यास्तु निराकारास्साधकैर्द्विजसत्तमाः ।

अथवा धर्मवागीशैकार्णवशयकूर्माः, आहोस्वित् परशुरामदाशरथिरामवेदवित्कल्किनः पूजनीयाः । एते वासुदेवाद्या लक्ष्म्यादिस्वस्वशक्तिभिर्युक्ताः, केवला वा स्युः । ततश्शिखाकुम्भाधारवेदिकातले षडरं चक्रमर्चनीयम् । सामलसारे आमलसाराख्यविमानावयवसहिते शिखाकुम्भेत्यर्थः । तत्र परवासुदेवस्तदग्रदेशे हेतीशश्चार्यनीयः ।

न्यूनाधिकावयवप्रासादविषयमाह- **प्रासादाङ्गेषु** इति सार्धद्वाभ्याम् ।

पूर्वोक्तानां देवानां केषाञ्चिन्निराकारतामाह- **लोकाः** इत्यादिना ।

[सैद्धादिविमानेऽपि देवतान्यासादिकम्]

विमानेऽपि तथा सैद्धे विबुधैश्च प्रतिष्ठिते ॥ १६८ ॥

[लक्षणलाञ्छनावयवेष्वनभिव्यक्तेषु कर्तव्यम्]

किन्तु तत्र विमानाङ्गमूर्तीनां लाञ्छनादिकम् ।
तासां स्थानानि विप्रेन्द्राः कल्पितानि यथाविधि ॥ १६९ ॥

placed in the region of the supporting platform, trees with leaves and creepers adorning it. Then the supreme Lord Vāsudeva, Bhagavān, the support of the world (is to be placed) in the Sāmalasāraka.[80] The worlds, the group of *adhvans*, *tattvas* and others, and deities are always to be placed on the temple. They occupy and remain there. The lord of weapons (Sudarśana) is to be worshipped in front (of them).

(In the matter relating to the temple having less or more of the limbs)

165-167a. O best brahmins! whichever limb is not provided in the parts of the temple mentioned in the order and which are the support of deities, or where more is (provided), there also this *nyāsa* must be done (with) deliberation of the deities in the respective places. Or, worship of the deity must be avoided where the (particular) limb is not provided.

(Formlessness of some of the deities mentioned before)

167b-168a. Seven worlds, *adhvans*, group of *tattvas* and deities, O eminent brahmins! are to be meditated upon by the priests (*sādhakas*) as having no form.

(Devatānyāsa and others in the Vimānas installed by the siddhas)

168b. Likewise, *nyāsa* is to be done even in the *Vimānas* installed by the *siddhas* and scholars.

(Procedure for doing (nyāsa) in the indistinct limbs, features, marks)

169-178a. However, O eminent brahmins! the marks etc. in the forms (found) in the part of the Vimāna, their positions arranged according to rule, are to be properly noticed making an effort. They are to be worshipped

80. *Sāmalasāraka*: The commentator observes that this is the name of a part of the *Vimana*. There are four pitchers placed on the *śikhara* (spire) according to the *Aparājitapṛcchā* (PP. 183-4) which mentions *Amarasāra*, *candrikā* and *kalaśa* as adorning the tops of the spire. It is also called Amalasāra; vide: *JS*. XX.118-124.

विमानावयवांश्चापि सन्निरीक्ष्यैव यत्नतः ।
पूजयेत्सावधानेन चेतसा ध्यानपूर्वकम् ॥ १७० ॥
लाञ्छनाद्येषु मूर्तीनां प्रासादावयवेष्वपि ।
अनभिव्यक्तिरूपेण लक्षणाद्यपरीक्षणात् ॥ १७१ ॥
स्वप्नादेश्चापि विप्रेन्द्रदेशिकेन्द्रोपदेशतः ।
यथावत्सम्परीक्षेत प्रयत्नेन द्विजोत्तमाः ॥ १७२ ॥
लक्षणादिषु हीनेषु विपर्यस्तेष्वपि द्विजाः ।
न लक्षणादिकं कुर्यादन्यथा मुनिपुङ्गवाः ॥ १७३ ॥
लक्षणं न परीक्षेत ह्यन्यथाकरणेच्छया ।
अन्यथाकरणार्थन्तु लक्षणाद्ये परीक्षिते ॥ १७४ ॥

सैद्धादिविमानेऽपि पूर्ववदेव देवतान्यासादिकमित्याह- **विमानेऽपि** इत्यर्धेन ।

तथापि सैद्धविमानादौ लाञ्छनादिकं निरीक्ष्य तत्तन्मूर्तिनिर्णयं कृत्वा तदर्चनं कार्यमित्याह- **किन्तु** इति द्वाभ्याम् ।

लाञ्छनादिकेष्वव्यक्तेषु कथमित्यत्राह- **लाञ्छनाद्येषु** इति द्वाभ्याम् ।

स्वयं व्यक्तविमानादिषु लक्षणादिराहित्ये तद्वैपरीत्ये वा लक्षणादिकं न कुर्यादित्याह- **लक्षणादिषु** इत्यादिना ।

तत्रान्यथाकरणेच्छया लक्षणपरीक्षायामायुःक्षयम्, अन्यथाकरणे नरकप्राप्तिश्चाह- **लक्षणम्** इति सार्धेन ।

क्षयत्यायुः कृते तस्मिन् लक्षणैर्नरकं व्रजेत् ।
तस्मात्सर्वप्रयत्नेन स्वयं व्यक्तादिकेऽपि च ॥ १७५ ॥
विमाने संस्थितानान्तु मूर्तीनां लक्षणादिकम् ।
स्थानान्यपि च तासां वै विमानावयवानपि ॥ १७६ ॥
यथास्थितं परीक्ष्यैव कृत्वा मूर्तिविनिर्णयम् ।
स्वेन स्वेन विशेषेण लाञ्छनाद्येन वै स्फुटम् ॥ १७७ ॥
स्वेन स्वेन तु मन्त्रेण पूजनञ्च समाचरेत् ।

[स्वयं व्यक्तविमानस्य सर्वोत्कृष्टत्वम्]

प्रासादेषु स्वयं व्यक्तं श्रेष्ठं सर्वेषु च द्विजाः ॥ १७८ ॥
तद्रूपी भगवान्देवस्स्वयमेवावतिष्ठते ।
तत्र सन्निहितस्साक्षाद्भगवान् भक्तवत्सलः ॥ १७९ ॥

with an attentive mind, after meditation (on them). The marks etc. of the forms even in the parts of the temple may be unmanifested, as the features are not scrutinised. O best brahmins! they are to be examined as they are making an effort on the strength of dreams etc. and also instructions from eminent brahmins and eminent priests. O brahmins!, O eminent sages! features etc. are not to be made otherwise (changed) when the features etc. are lost and even changed. The features should not be scrutinised with a desire to change them. When the features are examined with a view to alter them, life becomes decreased. When that is done, with reference to the features, the doer will go to hell. Therefore, the form (of the deity) must be determined[81] only after examining them with all efforts even in the self-manifested temples, in the features and others in the case of forms stationed in the *Vimāna*, their positions and also the parts of the *Vimāna*, as they are clearly (found) with individual specialities. Worship is to be done (to them) with the respective mantras.

(The Vimāna that is self-manifested is the best among all)

178b-186a. O brahmins! the self-manifested (*Vimāna*) is the best among all temples. Bhagavān occupies (stands) it himself in that form. Bhagavān who is dear to the devotees is actually present there. The great powers of mantras does not ever leave their respective places when the defects like decay (occur), though they are within the temples, as they are in the self-manifested places. The external form of the lord must be properly studied according to the rules stated before. Those powers (or forms) which are clear in their forms in the three worlds through (their) weapons, mantras and flags, bear the group of their marks in the shanks, forehead, shoulder blades, back, the surface of the two palms, collection of hairs on the body, head for the understanding of the mortals (who do the acts). The group of

81. The marks may be in the form of subtle lines and so are to be diligently scrutinised. *Astra* mentioned here is discus. Mantra is that which is taught by the Ācārya. *Dhvaja*: golden palm tree.

जाते जीर्णादिदोषे तु न त्यजन्ति कदाचन ।
स्वं स्वं प्रदेशमेतास्तु मन्त्राणां शक्तयः पराः ॥ १८० ॥
प्रासादान्तस्स्थिताश्चापि स्वयंव्यक्तपुरस्सराः ।
आकारस्तु विभोस्सम्यग्ज्ञेयः पूर्वोक्तयोगतः ॥ १८१ ॥

अत एव स्वयंव्यक्तादिके मूर्तिनिर्णयार्थमेव लक्षणादिकं परीक्ष्यार्चनादिकं कार्यमित्याह- **तस्मात्** इति त्रिभिः ।

स्वयंव्यक्तविमानस्य सर्वोत्कृष्टतामाह- **प्रासादेषु** इति सार्धेन । अतस्स्वयंव्यक्तं जीर्णादिदुष्टमपि मन्त्रशक्तयो न त्यजन्तीत्याह- **जाते** इत्यादिना । एतेन विमानान्तस्स्थितस्वयंव्यक्तादिभगवन्मूर्तिविषयोऽपि व्याख्यात इत्याह- **प्रासादान्तस्स्थिताः** इत्यादिना । पूर्वोक्तयोगतः किन्तु तत्रेत्याद्युक्तक्रमत इत्यर्थः । स्वयंव्यक्तादिविमानस्थितानां तदन्तस्स्थितानां वा देवतानां तत्तन्मूर्तित्वमस्त्रादिभिर्ज्ञेयम्; तेषां स्वातन्त्र्यात् । हस्तेष्वेवास्त्रधारणनियमोऽपि नास्ति, अङ्घ्रिललाटाद्यवयवेष्वन्यतमेऽपि सूक्ष्मरेखारूपेण लाञ्छनं धारयन्ति ।

अस्त्रैर्मन्त्रै[१]र्ध्वजैर्येषां व्यक्तिर्व्यक्ता जगत्त्रये ।
तेऽपि लाञ्छनबृन्दन्तु धारयन्त्यङ्घ्रिगोचरे ॥ १८२ ॥
ललाटे चांसपट्टे तु पृष्ठे पाणितलद्वये ।
तनूरुहचये मूर्ध्नि कर्मिणां प्रतिपत्तये ॥ १८३ ॥
तत्तल्लाञ्छनबृन्दन्तु परीक्ष्यैवं विशेषतः ।
तत्तदाकारनियतैर्वाचकैस्सम्प्रपूजयेत् ॥ १८४ ॥

अतस्सावधानं परीक्ष्य तत्तन्मूर्तीर्निश्चित्य तत्तदर्चनं कार्यमित्याह- **अस्त्रैः** इति त्रिभिः। अस्त्रैश्चक्रादिभिः, मन्त्रैराचार्योपदिष्टतत्तन्मूर्तिमन्त्रैः, ध्वजैस्सुपर्णतालादिभिः, 'अस्त्रैर्वस्त्रैर्ध्वजैर्येषाम्' इति पाठे, वस्त्रैः पीतनीलादिवस्त्रैः, चित्रबिम्बेषु पीतादिवस्त्रैर्मूर्तिभेदो ज्ञायत एव । 'नास्त्रैर्वस्त्रैर्ध्वजैः' इति पाठे एषां बिम्बानामस्त्रवस्त्रध्वजैर्व्यक्तिर्न ज्ञायते। तेऽप्यङ्घ्र्यादिष्वन्यतमे लाञ्छनं धारयन्ति, तत्सावधानं परीक्षितव्यमित्यर्थस्सरसः । अत्र यद्यपि पारमेश्वरव्याख्याने - "अङ्घ्रिगोचरे स्थित्यासनादिना, ललाटे नेत्रत्रयादिना, अंसपट्टे भुजभेदेन, पृष्ठे शिरश्चक्रादिना" इत्यादिक्रमेण व्याख्यातम् तथाप्यङ्घ्रौ लाञ्छनत्वेनाङ्गीकृतस्य स्थित्यासनाद्यवस्थाभेदस्य, असंपट्टे लाञ्छनत्वेनाङ्गीकृतस्य भुजस्य च 'एषां लाञ्छनबृन्दन्तु न व्यक्तं चरणादिषु' इत्युक्तप्रकारेण व्यक्तत्वासिद्धेः ; तादृशलाञ्छनस्य तत्तन्मूर्तिनिर्णयसाधनत्वासिद्धेः । लाञ्छनशब्दस्य चक्रादिपरत्वेनैव सर्वत्रोक्तत्वाच्च; तथा व्याख्यानं न हृदयङ्गमम् । किञ्च सात्वते द्वादशपरिच्छेदे "नास्त्रैर्वस्त्रैर्ध्वजैर्येषाम्" इत्यादिश्लोकद्वयानन्तरम् -

१. नास्त्रैर्वस्त्रैः - पा

the respective marks are to be particularly examined. They (powers or deities) are to be worshipped with expressions which are restricted to those external appearances (forms). O eminent sages! those, in whom the host of marks are not clear in their feet and other places, are to be worshipped (with

''अपि संसारिणो जन्तोस्स्वभावाद्वैष्णवस्य च । न जहात्यच्युतं लिङ्गं किं पुनर्विभवाकृतेः ॥
'' इत्युक्तम् ।

येषां लाञ्छनबृन्दन्तु न व्यक्तं चरणादिषु ।
तानर्चयेद्विषट्कार्णपुरोगेण[१०] मुनीश्वराः ॥ १८५ ॥
व्यापकानान्तु मन्त्राणामेकेनाभिमतेन तु ।

[उक्तप्रकारपूजाया आवश्यकता]

इति ज्ञात्वा यथावच्च यः पूजयति मन्त्रवित् ॥ १८६ ॥
स पूजाफलमाप्नोति ह्यन्यथा विपरीतभाक् ।
एतान्युक्तानि सर्वाणि लोकादीनि क्रमेण तु ॥ १८७ ॥
समाराधनकालेषु देवस्यामिततेजसः ।
द्वास्स्थदेवार्चनं कृत्वा पूजयेत्तदनन्तरम् ॥ १८८ ॥
नमस्कारपदान्तेन स्वनाम्ना प्रणवादिना ।
अर्घ्यालभनमाल्यैश्च धूपेन द्विजसत्तमाः ॥ १८९ ॥
अग्रतो देवदेवस्य द्वारदेशस्य बाह्यतः ।
अन्तर्मण्डलदेशे तु गत्वा वा पूजयेत्क्रमात् ॥ १९० ॥

अत्र जन्तोरिति कर्मणि षष्ठी, विभवाकृतेरित्यपि तथैव । अच्युतं लिङ्गञ्चक्रादिभगवल्लाञ्छनम्; न तु स्थित्यासनादिरूपलाञ्छनं तस्य सर्वजन्तुसाधारणत्वादित्यपि बोध्यम् ।

अङ्घ्र्यादिष्वपि चक्रादिलाञ्छनव्यक्ततया मूर्तिनिर्णयाभावे तदर्चनोपायमाह- **येषाम्** इति सार्धेन । व्यापकमन्त्रत्रयस्य सर्वमूर्तिसाधारणत्वात्, तत्रान्यतममन्त्रेणार्चनं सर्वमूर्तिसम्मतमिति भावः ।

एवं ज्ञात्वाऽर्चने पूजाफले प्राप्तिमन्यथा वैपरीत्यञ्चाह- **इति** इत्यादिना ।

एतेषामर्चनसमयमाह- **एतानि** इति सार्धेन ।

मन्त्रमाह- **नमस्कार** इत्यर्धेन । अर्चनद्रव्यमाह- **अर्घ्या** इत्यर्धेन ।

अर्चनप्रदेशमाह- **अग्रतः** इत्यादिना ।

१०. पुरोगाणाम् - A

mantras) beginning with the twelve (2 x 6) syllabled mantra (and) with any desired (*mantra*) among the Vyāpakamantras.[82]

(Necessity to do worship in the abvove-mentioned way)

186b-190. He, who knows the mantra and worships exactly knowing (what has been dealt with before), gets the fruit of worship. Otherwise, he gets perverse results. All these worlds etc. are stated in their order. He (priest) must worship, after adoring the deities stationed at the entrance on occasions of worship of the lord of the unlimited lustre; with His name, *Praṇava* at the beginning and the word *namaskāra* at the end using *Arghya*, sandal paste, garlands and incense, O best brahmins! or worship is to be duly done in front of god of gods outside the area of entrance or going into the region within the *maṇḍala*.

82. Vyāpakamantras: They apply to all cases without any restriction. These mantras are: *Praṇava*, Six-lettered (*Saḍakṣara*), Eight-lettered (*Aṣṭākṣara*) and Twelve-lettered (*Dvādaśākṣara*).

[एवं विमानार्चने भगवतस्सदासान्निध्यम्]

एवं प्रासादभेदे तु यस्मिन्साधकसत्तमैः ।
एककालं द्विकालं वा त्रिकालं वार्चनं द्विजाः ॥ १९१ ॥
नित्यशः क्रियते तत्र सदा सन्निहितो विभुः ।
अत एव द्विजश्रेष्ठाः तदर्चनपुरस्सरम् ॥ १९२ ॥
कुर्यादाराधनं विष्णोस्साधकस्सिद्धिलालसः ।

[अर्चनायाः फलम्]

य एवं कुरुते भक्त्या ह्यनन्यपरया सदा ॥ १९३ ॥
सोऽचिराल्लभते कामानिह लोके परत्र च ।
मोक्षार्थी कुरुते यस्तु स याति परमं पदम् ॥ १९४ ॥

एवं विमानार्चने भगवतस्सदा सान्निध्यमाह- **एवम्** इति सार्धद्वाभ्याम् ।

पूजकफलमाह- **यः** इति सार्धेन।

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य
श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां
सात्वतार्थप्रकाशिकाख्यायामीश्वरतन्त्रव्याख्यायां
तृतीयोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां विमानदेवतार्चनविधिर्नाम तृतीयोऽध्यायः ॥

(Permanent presence of God when the Vimāna is worshipped)

191-193a. O brahmins! the lord is ever present there (where) worship is always done by the best priests in a (particular) kind of temple once, twice or thrice. O best brahmins! that is why the aspirant (priest) who desires to accomplish his desires should offer worship to god, after adoring that (*Vimāna*).

(Result of worship)

193b-194. He, who always does thus with undistracted devotion, will get, in a short time, his desires fulfilled in this world and there after. He, who seeks *mokṣa*, will get the supreme place.

Thus ends the third chapter called *Vimānadevatārcanavidhi* in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra*.

चतुर्थोऽध्यायः

नीराजनान्तविधिः

[प्रथमं द्वारावरणदेवतार्चनम्]

नारदः -

प्रासादे संस्थितान् देवानेवमभ्यर्च्य वै द्विजाः ।

द्वारावरणदेवानां पूजनं च यथाक्रमम् ॥ १ ॥

विष्वक्सेनावसानं च कारयेन्मुनिपुङ्गवाः ।

[परिवारदेवतार्चनस्यान्यैः कर्तव्यत्वम्]

यदङ्गभावमभ्येति द्वाःस्थाद्यं देवतागणम् ॥ २ ॥

विष्वक्सेनावसानं च नराणामल्पमेधसाम् ।

जन्तोरेकान्तिनस्तद्वै चित्तखेदकृदर्चनम् ॥ ३ ॥

अथ चतुर्थोऽध्यायो व्याख्यास्यते ।

पूर्वोक्तरीत्या विमानदेवतानभ्यर्च्य द्वाःस्थादिविष्वक्सेनान्तपरिवारार्चनं कारयेदित्याह- **प्रासादे** इति सार्धेन ।

आचार्येणैव परिवारार्चने कृते दुर्बुद्धिजनानां चित्तक्षोभो भवतीत्याह- **यत्** इति सार्धेन । द्वाःस्थाद्यं विष्वक्सेनान्तं यो देवतागणः, अङ्गभावमभ्येति भगवत्परिवारतां प्राप्नोति, तद्देवतागणमुद्दिश्येति शेषः । एकान्तिनो जन्तोरर्चनम् परमैकान्तिगुरुकर्तृकार्चनम् । अल्पमेधसां नराणाम् भागवतप्रतिपत्तिरहितानां, चित्तखेदकृद्भवतीति शेषः । यद्वैकान्तिनो जन्तोरिति ल्यब्लोपे पञ्चमी, परमैकान्तिजनं विहायान्येषामल्पमेधसां भगवत्परिवारार्चनमेव चित्तक्षोभकरमित्यर्थः ।

तेषां चित्तक्षोभभिया शिष्यैरपि परिवारार्चनाकरणे प्रत्यवायं चाह-

[अनर्चने दोषः]

विघ्नकृत्प्रकृतस्यापि शिष्याणां तदनर्चनम् ।

[साधकाभावे स्वेनैव वा कर्तव्यत्वम्]

अतस्तदनुकम्पार्थं देवभृत्यधियार्चनम् ॥ ४ ॥

भक्तिश्रद्धोज्झितं चैव विहितं त्वेवमेव हि ।

[यथाकथञ्चित् कृतेनाप्यर्चनेन परिवारदेवानां तृप्तिः]

ते तत्पाणिच्युतं प्रह्वा दत्तमप्यवहेलया ॥ ५ ॥

CHAPTER IV

Procedure for Nīrājanānta[1]

(First worship of the deities in the enclosures[2] adjoining the gate)

1-2a. Nārada: O twice-born ones! After worshipping the deities stationed in the temple, he (priest) shall have the worship done to the deities in the enclosures at the entrance in due order — worship ending with that for Viṣvaksena, O eminent sages!

(Worship of the secondary deities is to be done by others)

2b-3. Worship, that is offered by a devout being[3] to the host of deities beginning with those at the gate and ending with Viṣvaksena who form the retinue of god, causes affliction to the mind of those men who are of little wisdom (understanding).

(Harm in the absence of (that) worship)

4a. Not doing worship to them (secondary deities), through the disciples would cause obstacles to the work that is taken up (worship) of god.

(Or, it (worship for the subordinate deities) must be done by himself (priest) in the absence of persons (assistants) to do it)

4b-5a. Therefore worship, that is taken up with the feeling that he (priest) is dependent on god to get sympathy from them (those deities), is ordained (to be done) in this manner, though (it is done) without devotion.

(Satisfaction for subordinate deities by worship done by any means whatsoever)

5b-6. They (deities) receive, mentally what falls (is dropped) from their (priests or their assistants) hands, with modesty, even when it is given with

1. *Nīrājana*: this consists in waving lights before the deity at various stages of worship like bath, end of worship and so on.
2. *āvaraṇa:* enclosure.
3. *Ekāntin:* one who is devoted exclusively to Viṣṇu.

गृह्णन्ति मनसा श्रेयः परं ध्यात्वा धिया हृदि ।
यतः सर्वेऽच्युतमयास्तच्चित्तार्पितमानसाः ॥ ६ ॥

[शिष्यादिमुखेनार्चने कारितेऽपि गुरोर्विघ्ननिरासः]

एतावदर्चनात्तेषां गुरोरेकान्तिनस्तु वै ।
स्याद्विरोधनिरासस्तु यतो भृत्यास्तु ते हरेः ॥ ७ ॥

विघ्नकृत् इत्यर्धेन। शिष्याणामपि तदनर्चनं शिष्यकर्तृकपरिवारार्चनस्याप्यभावः। प्रकृतस्य भगवदर्चनादेः तत्फलस्य वा विघ्नकृद्भवति।

अतः परिवारार्चनमवश्यमनुष्ठेयमित्याह- **अतः** इत्यादिना ।

अभक्तिरचितमप्यर्चनं तेऽङ्गीकुर्वन्तीत्याह- **ते** इति सार्धेन । तच्चित्तार्पितमानसाः भगवद्ध्यानासक्त-चित्ताः।

एवं शिष्यादिमुखेनार्चने कारितेऽपि गुरोर्विघ्ननिरासो भवतीत्याह- **एतावत्** इत्यादिना । तेषाम् परिवाराणामित्यर्थः। पारमेश्वरव्याखाने त्वतः द्वाःस्थादिविष्वक्सेनान्तदेवतागणयजनमेकान्तिनो भगवदेकनिष्ठस्याप्यल्पमेधसां च चित्तक्षोभकरणमिति स्वयमेवाक्षिप्य तेषामर्चनेऽपि विघ्नावकाशः; अतो भक्तिश्रद्धाविरहितेनाप्यर्चनेन ते तुष्यन्तीति समाधत्ते ।

[विघ्नोच्चाटनविधिः]

कृत्वैवं द्वारयागं तु ततः पुष्पं च सम्मुखम् ।
गृहीत्वाऽङ्गुष्ठपूर्वेण स्वाङ्गुलित्रितयेन तु ॥ ८ ॥
अभिमन्त्र्य तदस्त्रेण चक्रं तदुपरि स्मरेत् ॥
निशितारं ज्वलद्रूपं वर्षन्तमनलाशनिम् ॥ ९ ॥
क्षयकृद्विघ्नजालानां क्षिपेद्यागगृहान्तरे ।
दक्षिणां तर्जनीं विप्रः कुर्यादूर्ध्वमुखीं ततः ॥ १० ॥
शिखामन्त्रेण संयुक्तां विद्युद्विलसितप्रभाम् ।
स्मृत्वा भ्रामयमाणां तां[१] संविशेद्यागमन्दिरम् ॥ ११ ॥

[स्वासनस्य प्रोक्षणादि]

स्वासनं च ततः प्रोक्ष्य अर्घ्यपाद्योदकेन च ।
उपविश्यासने यागमारभेत समाहितः ॥ १२ ॥

[निरीक्षणाख्यशुद्धिः]

समये वात्र कुर्वीत सर्वभोगनिरीक्षणम् ।

१. भ्रामयमाणस्ताम् - A

disrespect, considering this (in their heart) with devotion, that as a supreme fortune, since all are filled with Acyuta and have offered their minds to his mind (will).

(The obstacles of the preceptor (which he has to face) are set aside, even if worship is done through his (priests) pupils)

7. Obstacles (which rise to their work) would be set aside by this worship of them (secondary deities) by the preceptor and Ekāntins (doing it), since they are the dependents (servants) of Hari.

(Method of driving away the obstacles)

8-11. After doing this ritual at the entrance, the priest shall take the flower so as to face him and consecrate it with Astramantra using his three fingers beginning with the thumb. He shall think the discus as present on it—the discus having sharp spokes, dazzling form, emitting thunder-bolt like fire and causing destruction to the multitude of obstacles. He shall then throw it into the multitude of obstacles. He shall then make the right forefinger turned upwards and think it to be associated with the Śikhāmantra and as having a brilliance like that of a flash of lightning. He shall make it turn round (above his head) and enter the hall of worship.

(Sprinkling upon one's seat and other acts)

12. He shall then sprinkle his seat with the water of *arghya* and *pādya* and occupy his seat. He shall then commence the sacrifice (adoration) with composure (within himself).

(Purification called looking at)[4]

13a. On this occasion, he shall look at all enjoyables (articles procured for doing worship).

4. See under note 2 of chapter III.

[भद्रपीठशोधनप्रकारः]

न्यस्य भद्रासनं मूलात् प्रोक्षणार्घ्यप्लुतेन तु ॥ १३ ॥
पाणिनाप्यथ कूर्चेन तज्जलेन तु मार्जयेत् ।
तत्तावदस्त्रपुष्पेण कुर्याद्विघ्नगणोज्झितम् ॥ १४ ॥

यदङ्गभावम् इति सार्धैः पञ्चभिरित्यवतारिका कृता; सा न विद्वज्जनमनोहरा; यतो न कदाचिदपि भगवत्परिवारार्चनं परमैकान्तिचित्तक्षोभकरम्, न च परमैकान्तिनमुद्दिश्यैव श्रीमद्भाष्यकारादिभिर्विरचितनित्य-ग्रन्थादिषु भगवत्परिवारोल्लङ्घनं कृतम् ।

विघ्नोच्चाटनविधिमाह- **कृत्वैवम्** इति चतुर्भिः । विघ्ननिर्गमनप्रकारः पारमेश्वरे स्पष्टमुक्तः ।

पुनः प्रोक्षणपूर्वकं स्वासनोपवेशनमाह- **स्वासनम्** इत्यादिना ।

[भद्रासनान्तर्लीनचक्रराजार्चनम्]

सर्वलोकमयं तत्र सर्वदेवसमाश्रयम् ।
सर्वाधारमयं ध्यायेदन्तर्लीनं तु चक्रराट् ॥ १५ ॥
प्रणवेन स्वनाम्नाऽथ नमोऽन्तेनार्चयेच्च तम् ।
अर्घ्यालभनधूपैस्तु माल्यैर्नानास्रगुद्भवैः ॥ १६ ॥

[योगपीठार्चनम्]

योगपीठार्चनं कुर्यादनुसन्धानपूर्वकम् ।
स्वनाम्ना प्रणवाद्येन नमोऽन्तेन यथाक्रमम् ॥ १७ ॥
ततस्तु सर्वमन्त्राणां विन्यासं तत्र चेतसा ।
समाचरेद्यथायोगं पुष्पदानपुरःसरम् ॥ १८ ॥
बिम्बेन सहितं पीठं योगपीठमुदाहृतम् ।
अनुसन्धानयोगे तु योगपीठं प्रकल्पयेत् ॥ १९ ॥

निरीक्षणाख्यशुद्धिमस्मिन्नवसरे वा कुर्यादित्याह- **समये** इत्यर्धेन ।

भद्रपीठशोधनमाह- **न्यस्य** इति सार्धेन। भद्रपीठान्तर्लीनचक्रराजार्चनमाह- **सर्वलोकमयम्** इति द्वाभ्याम् । चक्रराट् चक्रराजः । आलभनम् गन्धः । नानास्रगुद्भवैः नानापुष्पजनितैः । अत्र स्रक्च्छब्दस्य केवलपुष्पमर्थः। एवमुत्तरत्राप्यग्निकार्यप्रकरणे स्रग्धूपमधुपर्कं च इत्यत्र स्रक्च्छब्दस्य पुष्पमात्रपरत्वमङ्गीकार्यम्। माल्यैः मालिकाभिः । पारमेश्वरव्याख्याने तु "नानास्रगुद्भवैः माल्यैः" नानाविधस्रजामुद्भवहेतुभूतैः पुष्पैः । माल्यं पुष्पे च दामनि इति वैजयन्तीति लिखितम्, तदस्वरसम् । यतस्तथार्थवर्णने विशेषणस्य न किमपि प्रयोजनम् । मालिकाभिः पीठार्चने प्रत्यवायोऽपि न दृश्यते ।

अथ योगपीठार्चक्रममाह- **योगपीठार्चनम्** इति सप्तभिः ।

(Method of cleaning the auspicious throne)

13b-14. He shall then wipe the auspicious seat which is kept there from the bottom with the hand dripping[5] with the *arghya* water used for sprinkling and *kūrca*. He shall then make it bereft of the host of obstacles with a flower uttering the Astramantra.

(Worship of the discus lying within the auspicious seat)

15-16. He shall then meditate upon the grand discus which rests within there (seat), is of the form of all worlds, a resort to all gods, and a support for all. He shall then worship it with its name, *Praṇava* (at the beginning) and *namaḥ* (at the end) (using) *arghya*, incense and garlands strung with various kinds of flowers.[6]

(Worship of Yogapīṭha)[7]

17-24a. Yogapīṭha shall then be adored uttering (the mantra) the name (of god) with *Praṇava* (at the beginning) and *namaḥ* at the end in due order. The *nyāsa* of all the mantras is to be done mentally according to the order

5. *pluta:* dripping with water.

6. *mālyairnānāsragudbhavaiḥ; srak* must mean flower and *mālya* garland. See commentary.

7. For description see notes on p. 33.

तन्मन्त्रासनमित्युक्तं मन्त्रन्यासं तु सर्वतः ।
कुर्यात्तत्स्थस्य देवस्य पीठस्याधो मुनीश्वराः ॥ २० ॥
आधारशक्तिं तस्योर्ध्वे कूर्मं कालाग्निसंज्ञकम् ।
अनन्तेशं स्मरेन्मध्ये सर्वाधारमयं प्रभुम् ॥ २१ ॥
आग्नेयादौ तु धर्माद्यमैशान्यन्तं चतुष्टयम् ।
प्रागादौ त्वप्यधर्माद्यमुत्तरान्तं न्यसेत्परम् ॥ २२ ॥
तदूर्ध्वे कमलं ध्यायेत् स्वनाम्नाथ तथोपरि ।
स्मरेत् पत्राश्रितं सूर्यं शशाङ्कं केसरावनौ ॥ २३ ॥
कर्णिकास्थं हुतभुजं ततो गन्धादिना यजेत् ।

[स्थिरपीठे सदा मन्त्रसन्निरोधः]

सुस्थिरे सन्निरोधश्च मन्त्राणां विहितः सदा ॥ २४ ॥
यत्र यत्रानुरूपं तु तत्र तन्न्यासमाचरेत् ।

[चलपीठे मन्त्रसन्निरोधः तात्कालिकः]

चलबिम्बस्य पीठेऽपि ह्येवमेवार्चयेत्क्रमात् ॥ २५ ॥
किन्तु तात्कालिकं तत्र मन्त्राणां सन्निरोधनम् ।

[देवप्राच्यां धर्माद्यर्चनम्]

आहूतोपविशेद्यत्र मन्त्रनाथो हि सम्मुखः ॥ २६ ॥
तत्प्रागपेक्षया कुर्याद्धर्मादीनां निवेशनम् ।
साम्मुख्यं भजते यस्मात् साधकं परमेश्वरः ॥ २७ ॥

स्थिरपीठे सदा मन्त्रसन्निरोधमाह- **सुस्थिरे** इत्यादिना ।
चलपीठे यावदर्चनं मन्त्रसन्निरोधमाह- **चलबिम्बस्य** इत्यादिना ।
देवप्राच्यां धर्माद्यर्चनमाह- **आहूत** इत्यादिना ।
आसनमाहात्म्यमाह- **साम्मुख्यम्** इत्यादिना । यस्मात् आसनादित्यर्थः ।

तदासनं हि चिद्रूपं सिद्धमेतस्य वाहनात् ।

[शयनपीठ-यानारूढ-लक्ष्म्यादिपीठविषयः]

एवं चास्याचले पीठे शयानस्य विभोस्त्वधः ॥ २८ ॥
वह्न्यन्तं क्रमशोऽभ्यर्च्य ततोऽनन्तं समर्चयेत् ।
यानारूढे त्वनन्तस्य स्थाने तार्क्ष्यं समर्चयेत् ॥ २९ ॥

of their formation after offering flowers. The Yogapīṭha is the pedestal along with (occupied by) the idol. The Yogapīṭha is to be arranged while uttering the mantra. That is Mantrāsana when the *nyāsa* of the mantras is done on all sides, O eminent sages! beneath the seat of God who is there (Yogapīṭha). He shall (then) think of Ādhāraśakti above it (seat), Kūrma called Kālāgni and lord Ananta, who is of the form of support for all amidst it. Then the four (deities) Dharma[8] and others are to be placed from the south-east upto north-east and the four Adharma[9] and others from the east upto north. He shall then meditate upon a lotus above it with its name. The sun is to be thought of as resting above on its petals and the moon (hare-marked)[10] on the region of the filaments. Fire[11] (sacred) is to be thought of as resting on the pericarp. Worship is then to be done with sandal paste and others.

(Retention of the mantras in the stable seat for all times)

24b-25a. Retention is enjoined (to be done) always in a steady (seat). The *nyāsas* are to be done for them (mantras) as they suit them.

(Temporary retention of the mantras in the movable seat)

25b-26a. Worship is to be done in this way and in this order in the seat of the idol which is movable (Calabimba) but the retention of the mantras there is only for the time being.

(Worship of Dharma and others to be done in the eastern direction of god)

26b-28a. Dharma and others are to be placed to the east of the lord of mantras who is invoked and placed in a favourable position, so that the supreme lord becomes favourable (to the priest). The seat certainly assumes a sentient form by bearing him.

(Matters relating to the seats for lying down, and for mounting (in a vehicle) and about Lakṣmī and others)

28b-31a. Worship is to be done in due order upto the fire, below the lord lying thus in the stable seat and Ananta is then to be worshipped. Garuḍa is

8. Dharma, Jñāna, Vairāgya and Aiśvarya.
9. Adharma, Ajñāna, Avairāgya and Anaiśvarya.
10. Śaśāṅka : The dark patch in the moon is imagined to resemble the form of hare. Hence, the moon is called hare-marked.
11. *hutabhujam:* that which takes in the oblations. Hence, the sacred fire is meant here.

लक्ष्म्यादीनां तु देवीनां पीठस्याधः फणीश्वरम् ।
तत्कोणेषु च धर्मादींस्तदूर्ध्वे व्यक्तपङ्कजम् ॥ ३० ॥
धामत्रयं ततस्तस्मिन् विन्यसेत् पूर्ववर्त्मना ।

[गुरुपङ्क्त्यर्चनक्रमः]

गणेशाद्यर्चनं कुर्यादथ पीठसमीपतः ॥ ३१ ॥
आत्मनः प्राग्वशाद्वायुकोणादारभ्य पूजयेत् ।
विन्यस्य विष्टरान् दर्भान् कुसुमस्तबकानिव ॥ ३२ ॥
विष्वक्सेनं गणाधीशं गुरूंश्च तदनन्तरम् ।
गुरून् परमसंज्ञांश्च यजेत्सर्वगुरूंस्तथा ॥ ३३ ॥
आदिसिद्धसमूहं तु भगवद्ध्यानतत्परम् ।
नित्याधिकारिणश्चाप्तान् भगवत्तत्त्ववेदिनः ॥ ३४ ॥

एतस्य भगवतः वाहनाद्धारणाच्छयनपीठे विशेषमाह- **एवम्** इत्यादिना ।

यानारूढपीठविषयमाह- **यान** इत्यर्धेन ।

लक्ष्म्यादिपीठार्चनमाह- **लक्ष्म्यादीनाम्** इति सार्धेन ।

गुरुपङ्क्त्यर्चनक्रममाह- **गणेशाद्यर्चनम्** इति सार्धैश्चतुर्भिः । अत्र श्रीसात्वतानुसारेण विष्वक्सेनाख्य-गणनाथाद्यर्चनमुक्तम् । पारमेश्वरे तु जयाख्यानुसारेण गजाननार्चनमुक्तम् । ननु श्रीसात्वते सप्तदशपरिच्छेदे- "गणेशाद्यर्चनं कृत्वा प्रथमं गुरुसन्ततौ" (सा सं १७.५७) इति केवलगणेशशब्दप्रयोगः कृतः, न तु विष्वक्सेनाख्य इति चेत्;

चत्वारो मनवश्चान्ये ऋषयः सप्त पूर्वकाः ।
अर्घ्यादिना यजेदेतान् तत्तन्नाम्ना यथाक्रमम् ॥ ३५ ॥

सत्यम् । तत्र सामान्यशब्दप्रयोगेऽपि तस्मिन्नेव परिच्छेदे भगवदर्चननिरूपणानन्तरम् -

"अथ शिष्टैस्तु नैवेद्यैर्यजेद् गणपतिं प्रभुम् । विष्वक्सेनाभिदानं चाप्यादावेवार्चितो हि यः ॥" (सा सं १७.१४२-१४३) इति

विशेषशब्देन स्पष्टीकृतः । गुरून् स्वस्य पञ्चसंस्कारप्रदमाचार्यम्, बहुवचनेन सब्रह्मचारिणो भागवतांश्च। परमगुरून् गुरोर्गुरुम्, तद्ब्रह्मचारिणश्च । सर्वगुरून् परमगुरूनारभ्य शठकोपान्तानाचार्यान्, शाण्डिल्यान्तान् दीक्षाचार्यांश्च । आदिसिद्धसमूहम् उपेन्द्रतेजोधरादि वक्ष्यमाणसिद्धसमूहम् । चत्वारो मनवः स्वारोचिषादयः

"स्वारोचिषश्चोत्तमश्च तापसो रैवतस्तथा । प्रियव्रतान्वया ह्येते चत्वारो मनवस्स्मृता ॥"

इति विष्णुपुराणोक्तत्वात् । पारमेश्वरव्याख्याने तु - चत्वारो मनवः सावर्णिदक्षसावर्णिब्रह्मसावर्णिधर्म-सावर्ण्यादयः । सावर्णेर्भगवत्तत्त्वाधिकारित्वं प्रतिपादितं भागवते । भगवदनुभवोपवर्णनं सावर्णेरुपदेक्ष्यमाण

to be adored in the place of Ananta when the lord is mounted on the vehicle. The lord of serpents is to be worshipped beneath the seat of Lakṣmī and other goddess; Dharma and others in the corners and full-blown lotus above them. Then the three luminaries[12] are to be placed there (lotus) in the above manner.

(Method of adoring the line of preceptors)

31b-35. Worship is then to be done to Gaṇeśa[13] and others near the seat.

12. The word *dhāma* means bright luminary. The word *dhāmatrayasya* refers to the three luminaries sun, moon and fire. This is supported by the use of the word *dhāmatrayasya* in *JS*;
    vide: धामत्रयस्य तु मुद्रैषा हंसाख्यां तु निबोध मे । VIII.78a.
    The editor of *JS* gives the caption before this passage in the words सूर्येन्द्वग्निलक्षणधाममुद्रा।
    cf. *LT.* XXXIV.54.
13. The commentary contains a detailed discussion on the interpretation of the word Gaṇeśa. *SS.* XVII.132b-133a enjoins the worship of the hosts (Gaṇanātha) giving him the name as Viṣvaksena;
    vide: अथ शिष्टैस्तु नैवेद्यैर्यजेद्गणपतिं प्रभुम् ।
    विष्वक्सेनाभिधानं चार्घ्याद्यैरर्चितो हि यः ॥
    cf. तत्रादौ तु स्वमन्त्रेण गणेशं पूजयेत् द्विजः ॥ *JS.* XIII.97b.
    Pāram. S. (VIII. 151.164) enjoins Gaṇeśa's worship.
    Gaṇeśa is stated to have sprung from Aniruddha when he was angry;
    vide: प्रद्युम्नस्तैरिति प्रोक्तः क्रुद्धस्संरक्तलोचनः ।
    कोपात्तस्य समुद्भूतं सम्यक् स्तम्बेरमाननः ॥
    संजातं बद्धाञ्जलिपुटं कुर्वाणं तः पुरःस्थितम् ।
    तं दृष्ट्वा गजवक्त्रं प्रोवाचेदं वचस्तदा ॥ *Pād. S. Caryā* XXXI.5b-7a.
    Gaṇeśa is one of the four assistants of Viṣvaksena;
    vide: गजाननो जयत्सेनो हरिवक्त्रो महाबलः ।
    कालप्रकृतिसंज्ञश्च चतुर्थः कमलोद्भव ॥
    एतेषामर्चनं कुर्यात् स्वनाम्ना प्रणवादिना ।
    नमोन्तेनाब्जसंभूतः नानासिद्धिफलाप्तये ॥ *Pauṣ. S.* XX
    cf. *Pāram. S.* VII.151-164 for an identical description.
    These four are not stated as warding off the obstacles. The word *vighneśvarapravaraḥ* (*Pauṣ. S.* XX.41a) may be taken to their function of removing the obstacles.
    Gaṇeśa's *mudrā* is however stated as destroying all the obstacles; vide: *JS.* VIII.93a. However, the Pāñcarātra texts do not mention anywhere Gaṇeśa as the son of Pārvatī and Śiva.
    Perhaps in the development of Vaiṣṇavism revealing exclusive tenencies in the mode of worship, Viṣvaksena took the place of Gaṇeśa. Again, it is the Pāñcarātra Āgama texts that mention the worship of Gaṇeśa.
    Besides, the word *ādi* in the word *Gaṇeśādi* in *ĪS.* IV.31a includes other deities as well but who they are is hard to find out.
    It must also be noted that Viṣvaksena, Gaṇādhīśa and Gurus are mentioned for worship in *ĪS.* IV.33a, where *ca* shows that Viṣvaksena and Gaṇādhīśa are kept as different from each other.

इति भगवदनुभव उपवर्ण्यते, येन पञ्चरात्रेणेति व्याख्यातमित्युक्तम्, तन्न युक्तियुक्तम् । सावर्ण्यादीनामेव ग्रहणे विनिगमनाविरहात् । ननु भगवच्छास्त्राधिकारित्वमेव विनिगमक इति चेत्, न; तच्च सावर्णेरुपदेक्ष्यमाण इति सावर्ण्यमात्रस्योक्तम्, न तु दक्षसावर्ण्यादीनाम् । न च सावर्णिशब्दस्य सर्वसाधारणत्वाज्जात्येकवचनमङ्गीकृत्य निर्वाहः क्रियत इति वाच्यम्; केवलसावर्णिशब्दस्य दक्षसावर्ण्यादिषु प्रयोगाप्रसिद्धेः । तथा निर्वाहेऽपि सावर्ण्यादीनां भविष्यन्मनुत्वात्, इदानीं प्रकृतभूतमनूल्लङ्घनमनुचितम् । किञ्च सावर्णेरुपदेक्ष्यमाण इति भविष्यदर्थकशब्दप्रयोगात् सावर्णेर्मनुसिद्ध्यनन्तरमेव भगवच्छास्त्राधिकारत्वमिति सूच्यते । अतो भगवच्छास्त्रे लब्धाधिकारान्विहाय भविष्यदधिकारिणामर्चनं कथमुचितम् । ननु स्वारोचिषादीनां भगवच्छास्त्रे लब्धाधिकारत्वं कुत्र प्रसिद्धमिति चेत्, उच्यते; अत्रैव दशमेऽध्याये मनुः स्वायम्भुवश्चापि इत्यादिना तस्यैकायनाधिकारित्वप्रसिद्धेः; तद्वंशजानां स्वारोचिषादीनामपि तदधिकारित्वं सिद्धमेव । ननु किमेतावता श्रमेण स्वायम्भुवादय एव चत्वारो मनवः प्रपूज्यन्तामिति चेत्; ब्रूमः, अत्र चत्वारो मनव इत्युक्तत्वादन्यत्र पुराणादिषु चतुःसंख्यापरिगणितानामेव ग्रहणं सरसम् । नित्याधिकारिण इत्यादिपदत्रयमपि चतुर्मनुविशेषणम् । नित्याधिकारिणः नित्यस्थित्यधिकारिण इत्यर्थः । तथोक्तं विष्णुपुराणे —

"मनवो मनुपुत्राश्च भूपा वीर्यधराश्च ये । सन्मार्गाभिरताः शूरास्ते नित्यस्थितिकारिणः ॥" (विष्णुपु० १.७.३८) इति ।

केषुचित् पारमेश्वरप्रयोगेषु "नित्याधिकारिभ्यो नम" इति लिखितम् । किञ्च तदर्चनार्थं "अष्टौ कुसुमस्तबकानि विन्यस्य" इति चोक्तम्, तदधिकोक्तिः । तथाहि पारमेश्वरे गणेशाद्यर्चनं जयाख्यानुसारेणोक्तम् । जयाख्ये गणेशादयः सप्तैवोक्ताः, तथैव लक्ष्मीतन्त्रेऽपि सप्तत्रिंशेऽध्याये -

"कृतादियुगपर्यन्ते वायोरीशावधि क्रमात् । विभज्य सप्तधा क्षेत्रमादौ गणपतिं यजेत् ॥"

इत्यादिभिः सप्तानामेवार्चनमुक्तम् । अतः पारमेश्वरेऽपि तत्सङ्ख्याकानामेवार्चनमुचितम् । किन्तु जयाख्यलक्ष्मीतन्त्रयोर्गणेशादीनां सप्तानां मध्ये परमेष्ठिगुरुपितृगणावुक्तौ । पारमेश्वरे तु तत्स्थाने चतुर्मनवः सप्तर्षयश्चोक्ताः, इयानेव भेदः । अत एव पारमेश्वरव्याख्यानेऽपि चतुर्मनूनां सप्तर्षीणामेव विवरणं कृतम्; न तु नित्याधिकारिणाम्, अन्ये सप्तर्षयः, अत्र 'अन्य' शब्देन चतुर्मनुसहपाठादुपस्थिततत्तन्मन्वन्तरोक्तसप्तर्षीणां व्यावृत्तिः सूच्यते । सप्तर्षयः —

[अनन्तादीनां ध्यानम्]

सर्वेषां क्रमशो ध्यानं शृणुध्वं मुनिपुङ्गवाः ।
अनन्तशशिसङ्काशमनन्तमथ संस्मरेत् ॥ ३६ ॥
सहस्रफणमालाढ्यं सहस्रभुजभूषितम् ।
स्वपाणिसम्पुटेनैव शोभयन् स्वाङ्गभूतलम् ॥ ३७ ॥

This is to be done from the western quarter, the priest facing the east. The *darbhas* are to be placed for seat, as if they are bunches of flowers. (Adoration is to be done to) Viṣvaksena, lord of the hosts. The preceptors[14] after (them) preceptors, superior (*parama*) preceptors and all preceptors are then to be worshipped. Similarly the hosts of the Ādisiddhas[15] who are devoted to meditate on Bhagavān,[16] those who are always qualified (for doing worship),[17] persons of credulence[18] and those who know the (real) nature of Bhagavān are to be adored. Four Manus,[19] seven sages[20] and others are all (mentioned above) to be, duly in their order, worshipped with *arghya* and others using their names.

(Meditation upon Ananta and others)

36-47a. O eminent sages! Listen to the (method of) meditation upon all (these) in their order. Then he (priest) shall think of Ananta, who resembles countless (endless) moons, richly endowed with thousand hoods in a series, adorned with thousand arms, beautifying his limbs with the folding of his palms; having in his hands, white lotus, conch, rosary garland and discus, offering freedom from fear with the words 'do not be afraid' to those who apprehend downfall and whose minds are terrified and from Brahmā to the world, whose splendour is like that of snow, crystal, clear pearls and moon. The four Dharma, Jñāna and others with their shoulders and faces resembling those of the lord of beasts (lion), shining like ruby, coral, fire, and good

14. According to the commentator, Guru refers to him who gives to the pupil the five sacraments (Pañcasaṃskāra). The use of this word in the plural must be taken to include the classmates of Guru and also the devotees of god. *Paramagurūn* refers to the preceptor of the preceptor and also his classmates. *Sarvagurūn* refers to the preceptors from Paramaguru upto Śaṭhakopa well-known as Nammāḷvār, Śāṇḍilya and others who do the initiation may also be included.
15. Ādisiddhas are Upendra, Tejodhara and others.
16. Bhagavān refers to Vāsudeva who has six qualities; vide: *VP* VI.5-79; cf. *ibid.*, VI.5-78.
17. *nityādhikariṇaḥ*: ever qualified for worship of Viṣṇu.
18. *āpta*: reliable person.

    cf. आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा ।

    Nyāyabhāṣya on *NS.* 1.1.7. For Pāñcarātra concept see *JS.* XX.28-34b.
19. Four Manus are Svārociṣa, Uttama, Raivata and Priyavrata. The words *āpta* and *bhagavattattvavedinaḥ* qualify the word Manus according to the commentator.
20. Seven sages, see *ĪS.* I.29b-30.

सितारविन्दशङ्खाक्षसूत्रचक्रकरान्वितम् ।
पतनाशङ्किबुद्धेर्वै वित्रस्तमनसस्तु च ॥ ३८ ॥
मा भैरित्यभयं यच्छन्नाब्रह्मभवनस्य च ।
तुहिनाच्छोपलस्वच्छमुक्ताफलशशिप्रभः ॥ ३९ ॥
मृगेन्द्रस्कन्धवदनाः धर्मज्ञानादयश्चतुः ।
पद्मरागप्रवालाग्निसुदाडिमफलोज्ज्वलाः ॥ ४० ॥
अन्तर्दयोपयुक्ताश्च राजराजेश्वरोपमाः ।
द्विरष्टवर्षवद्दिद्धि चत्वारोऽधर्मपूर्वकाः ॥ ४१ ॥
सर्वे सद्वस्त्रसत्पुष्पसदलङ्करणान्विताः ।
शङ्खपद्मधराः सर्वे वराभयकरास्तु वै ॥ ४२ ॥
आधेयपद्मविन्यस्तमस्तकाः स्वात्मसिद्धये ।
समर्पितान्तःकरणाः परस्मिन् मन्त्रकारणे ॥ ४३ ॥
चिन्त्यमव्यक्तपद्मं च हिमहेमाग्निभास्वरम् ।
शान्तमष्टभुजं सौम्यं संस्थितं स्वस्तिकेन तु ॥ ४४ ॥

"सनः सनत्सुजाताश्च सनकश्च सनन्दनः। सनत्कुमारः कपिलस्सप्तमश्च सनातनः॥ एत एकान्तिधर्मस्य आचार्याश्च प्रवर्तकाः।"

इति प्रथमाध्यायोक्ताः।

अनन्तादीनां ध्यानान्याह- **सर्वेषाम्** इत्यारभ्य **जटामण्डलभूषिताः** इत्यन्तैः।

धामत्रयं तदूर्ध्वे तु संस्मरेत् किरणोज्ज्वलम् ।
संस्मरेद्गणनाथं तु वक्ष्यमाणप्रकारतः ॥ ४५ ॥
गणनाथं विना चान्ये सुस्थिताः शान्तविग्रहाः ।
गणित्राभयहस्ताश्च सर्वानुग्रहकारकाः ॥ ४६ ॥
सर्वे पद्मासना वाऽथ जटामण्डलभूषिताः ।

[तेभ्य आराधनानुज्ञाप्रार्थना]

एवं ध्यात्वा समभ्यर्च्य मुद्राः संस्पृश्य तत्क्रमात् ॥ ४७ ॥
अनुज्ञां प्रार्थयेत्तेभ्यो यथाऽनुक्रममेव च ।
गृहीत्वा शिरसा तां च तत आवाहयेत्प्रभुम् ॥ ४८ ॥

pomegranate fruit; filled with sympathy (within themselves for others), comparable to Kubera (are to be meditated upon). The four (deities) beginning with Adharma are to be understood to be of sixteen years in age, all with good dresses, good flowers and good ornaments, bearing Śaṅkha and Padma, with hands offering boons and security (freedom from fear) their heads resting upon the supporting lotus and offered their minds to the supreme being, the cause of mantras in order to get their own accomplishments are to be meditated upon unblossomed lotus, shining like snow, gold and fire which is calm gentle, having eight hands and remaining (standing) in the Svastika[22] posture is to be thought of.

The three luminaries, refulgent with their rays are to be recalled to mind as present above it. The lord of the hosts is to be thought of in the manner mentioned below. Except the lord of hosts, others who are well-stationed and have a restful body, holding the rosary garland[23] and display of security in their hands, showing favour to all, seated in the lotus and adorned with a mass of matted hair (are to be thought of).

(Request to be made to them for performing worship)

47b-48. After meditating in this way, adoring them, showing[24] mudrās in their order, they are to be requested for permission. Receiving it with the head bent down in their order, the lord must be invoked.

21. Śaṅkha and Padma: names of two treasures.
22. Svastika: a posture; see *Pad. S.* Yoga I.12.
23. *gaṇitra:* rosary garland, the beads in which are used for counting the number of repeated mantras.
24. *saṃspṛśya:* lit, touching, that is, forming, displaying.

[आवाहनक्रमः]

ततः सर्वगतं देवं मन्त्रमूर्तित्वमागतम् ।
समाहूय सुमन्त्रेण त्वागच्छान्तपदेन तु ॥ ४९ ॥

एतानभ्यर्च्यैतदनुज्ञया भगवदावाहनं कार्यमित्याह- **एवम्** इति सार्धेन ।

आवाहनमाह- **ततः** इत्यादिना । अत्र 'आगच्छान्त' पदस्य मूलमन्त्रस्य चतुरुच्चारणं कार्यम् । तदुक्तं पाद्मे -"चतुरुच्चारयेन्मन्त्रमागच्छपद-संयुतम्" इति । एवमागच्छपदमन्त्रेणावाहनं श्रीसात्वते षष्ठे, सप्तदशे परिच्छेदे चोक्तम् । जयाख्ये तु "ॐ ॐ परमधामावस्थितमदनुग्रहकाम्ययोद्यतावतारेहाभिमतसिद्धिद-मन्त्रशरीरोत्रमो नम" इत्यावाहनमन्त्र उक्तः । अत्राप्येतन्मन्त्रं सुदर्शनार्चनप्रकरणे निरूप्यैतस्य सर्वसाधारणत्वमपि वक्ष्यति । अत एतन्मन्त्रयोरन्यतरेणावाहनं कार्यम् । देवमाहूय आवाह्य संस्मरेदिति शेषः ।

सर्वव्यापिनो भगवतः किन्नामावाहनमित्याशङ्कां दृष्टान्तेन परिहरति- **यथा** इत्यादिना ।

[सर्वव्यापिनो भगवतः किन्नामावाहनमित्याशङ्का]

यथा सर्वगतो वायुर्व्यजनेन महामते ।
वृत्तिमभ्येति भगवानाहूतस्तद्वदेव हि ॥ ५० ॥

[आहूतदेवस्य बिम्बादिषु सन्निरोधः]

भावदर्पणसङ्क्रान्तं कृत्वा हृत्कमलात्तु वै ।
सन्निरुध्य बहिर्वेद्यां मन्त्रोच्चारावसानतः ॥ ५१ ॥

[पीठकुम्भादिष्वावाहने विशेषः]

मन्त्रमागच्छमानं तु निर्गतं तु स्वकात्पदात् ।
कालं पाद्यार्घ्यदानान्तमुत्थितं भावयेत् सदा ॥ ५२ ॥
अथोपचर्यमाणन्तं भोगैः कालानुकूलतः ।
नानालभनवस्त्रस्रग्दानालङ्करणे तथा ॥ ५३ ॥
अन्यत्र भोगपूजायां स्मरेत् पद्मासनादिना ।
पुनस्तमेवोपविष्टं सानुकम्पं च सम्मुखम् ॥ ५४ ॥
बिम्बं विनान्यत्राधारे भवत्येव महामते ।
बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते ॥ ५५ ॥
करोत्यमूर्तामखिलां भोगशक्तिं तु चात्मसात् ।

(Method of invocation)

49. Then god, who is everywhere, who has taken the form of mantras must be called with good mantra with the word 'please come' at (its) end.[25]

(A doubt as to the invocation for the all-pervading Bhagavān)

50. O great minded person! Just as air, which is everywhere takes to its function by the fan so does Bhagavān who is invoked.

(Retention of god who is invoked in the idol and others)

51. He must be made to occupy the mirror of *bhāva*[26] from the lotus of (his) heart and retained in the external platform till the end of uttering the mantras.[27]

(Speciality while invocation is done in the seat, pitcher and others)

52-56a. The priest must always consider the time to have come for offering *pādya* and *arghya*, when the lord has arrived at the mantra from his seat. Him who is attended with enjoyables consistent with that time through various kinds of perfumes (sandal-paste), apparels, offerings of flowers and embellishments, he should think of him outside Bhogapūjā by offering a lotus-seat. He must think of him as seated favourably there with compassion. O great minded person! He thus becomes in seat other than the idol. He comes and remains himself in the form of the idol and makes all incorporeal powers of enjoyment as his own.

25. This is to be uttered four times; vide: *Pād. S. Kriyā* III.121a.

26. *bhāvadarpaṇa:* mirror of feeling, *bhāva:* feeling, emotion, *bhakti; saṁkrāntam:* occupied from another place.

27. vide: commentary for the mantra.

आहूतस्य देवस्य बिम्बादिषु सन्निरोधक्रममाह- **भाव** इत्यादिना । अत्र 'वेद्याम्', इति पदं बिम्बादिलक्षणम्। 'मन्त्रोच्चारावसानत:' इत्यत्र लक्ष्मीतन्त्रोक्तो मन्त्रो ग्राह्य: । ''आवहयामि लक्ष्मीशं परमात्मानमव्ययम् । आतिष्ठतामिमां मूर्तिं मदनुग्रहकाम्यया ॥ श्रिया सार्धं जगन्नाथो देवो नारायण: प्रभु: ।'' इति ।

केवलवेदिकुम्भादिष्वावाहितस्य भगवत: तत्तदुपचारानुसारेणावस्थानभावनामाह- **मन्त्रम्** इति सार्धै-स्त्रिभि:।

बिम्बे तादृशभावनाश्रम एव नास्तीत्याह- **बिम्बम्** इत्यादिना । एवमेवोक्तं लक्ष्मीतन्त्रेऽपि -

[मानुषप्रतिष्ठितस्यापि मूलबिम्बस्यावाहननिषेध:]

स्थितमायतने वाथ साकारं परमेश्वरम् ॥ ५६ ॥
शङ्खचक्रधरं विष्णुं सुरसिद्धावतारितम् ।
ऋषिभिर्मनुजैर्वाऽथ भक्तियुक्तै: प्रतिष्ठितम् ॥ ५७ ॥
तन्मूर्तौ च स्वमन्त्रेण यजेदावाहनं विना ।

''क्लृप्ते तु विग्रहे पूर्वं तथा रूपोऽवतिष्ठते ।'' इति । यद्यपि पाद्मे बिम्बार्चनप्रकरणेऽपि -

''अर्घ्यवस्त्राम्बराकल्पपुष्पगन्धानुलेपनै: । प्रत्यर्चितं स्थितं ध्यायेत्पाद्याचमनयो: पुन: ॥ आसीनं स्नानकाले च पद्मासनसुखासने । नैवेद्यधूपदीपादावासीनं स्वस्तिकासने ॥ उपचारेषु चान्यत्र तत्तत्कर्मानुसा-रत: । स्थितमासीनमथवा देवं ध्यायेत पूजक: ॥'' इत्युक्तम् ।

तथापि तत्कुम्भार्चनादिपरमेव । यद्वा सबिम्बस्य भगवतो ध्यानपरम्; न हि कुम्भादिष्विव तदन्त: — स्थितभगवन्मात्रध्यानपरमिति बोध्यम् ।

मानुषेऽपि मूलबिम्बे आवाहनं न कार्यमित्याह- **स्थितम्** इति द्वाभ्याम्। इदं श्लोकद्वयं जयाख्योक्तम्। एवमेवोक्तं पाद्मेऽपि - ''नावाहयेदेकबेरे सुरसिद्धावतारिते । ऋषिभिर्मनुजैर्वापि स्थापिते निश्चले हरौ ॥ सुस्थितेऽभिमुखीभावस्त-देवावाहनं हरे: । यथाग्निमाहितं कुण्डे यथा वा पुरुषं स्थितिम् ॥ काले प्रबोधयेद्देवमर्चने बोधयेद्धरिम् ॥'' इति ।

अत्र केवलमेकबेरविधाने मूलबिम्बे नावाहनम् । बहुबेरविधौ मूलबिम्बेऽप्यावाहनं कार्यमिति क्रियाकैरवचन्द्रिकाकारस्याशय:, न तथा तत्संहिताभिप्राय: ।

(Invocation is forbidden in the Mūlabera though it is installed by human beings)

56b-58a. Or, Viṣṇu, bearing the conch and discus, the supreme lord, stationed in a temple or brought down by the gods and siddhas or installed by sages, or men filled with devotion, shall be worshipped with his mantra, in that form without invocation.

[मूलबिम्बे आवाहनाभावात्तत्र केवलप्रबोधक्रमः]

तदा[२] प्रबोधयेत्तं तु कृत्वा हस्तौ सुगन्धिनौ ॥ ५८ ॥
गन्धार्घ्यपुष्पैः सम्पूर्य मूलमन्त्रं समुच्चरन् ।
पीठोपरि हरेरग्रे मूर्ध्नि पुष्पाञ्जलिं क्षिपेत् ॥ ५९ ॥
स्वप्रत्यभिमुखं शान्तं सुप्रबुद्धं स्मरेच्च तम् ।

[मूलबिम्बस्य मन्त्रन्यासादिकम्]

करन्यासं विना तत्र सृष्टिन्यासादितस्त्रयम् ॥ ६० ॥
मूलमन्त्रादिताक्ष्र्यान्तमन्त्राणां न्यासमेव च ।
कृत्वाथ तत्तन्मुद्राश्च तत्तन्मन्त्रैः प्रदर्शयेत् ॥ ६१ ॥

तर्हि कथमिति चेदुच्यते । तत्र बहुबेरमूलबिम्बात् कर्मार्चायामावाहनमुक्तमेव एकबेरे कर्मार्चाविरहेण मूलबिम्बे एवाराधनपौष्कल्यात्; तत्राराधनप्रथमाङ्गमावाहनं कार्यं वा न वेति सन्देहावकाशः । अतो नावाहयेदेकबेरे इत्युक्तम् । तत्रैवावाहनाकरणे सिद्धे बहुबेरे किमुतेति भावः । मूलबिम्बे आवाहनाभावात्तत्र केवलप्रबोधक्रममाह **तदा** इति द्वाभ्याम् । एवं पुष्पाञ्जलिसमर्पणपूर्वकः प्रबोधनक्रमः पारमेश्वरेऽप्युक्तः । तद्व्याख्याने तु तत्रत्यपुष्पाञ्जलिसमर्पणस्य कर्मबिम्बावाहनाङ्गपुष्पाञ्जलिपरत्वेनावतारिका कृता । ''तत्रावाहनक्रममाह तस्मिन्निति सार्धेनेति'' साशुद्धा, मूलबिम्बप्रबोधने पुष्पाञ्जल्यभावप्रसक्तेः । पुष्पाञ्जलिपूर्वकं कर्मबिम्बावाहनस्य वक्ष्यमाणत्वाच्च ।

मूलबिम्बस्य मन्त्रन्यासादिकमाह **करन्यासम्** इति सार्धेन । मूलबिम्बात् कर्मबिम्बेष्वावाहनक्रममाह-

[मूलबिम्बात् कर्मबिम्बेष्वावाहनक्रमः]

दीपयेद्बिम्बतोऽन्यत्र तस्मिन् पुष्पाञ्जलिं हरौ ।
आगच्छ पदमन्त्रेण मूलमन्त्रेण हृत्कजात् ॥ ६२ ॥
प्रत्यहं कर्मबिम्बानां मूलबिम्बहृदब्जगात् ।
किञ्चिदावाहनं कार्यं तत्र त्वेवं क्रमो द्विजाः! ॥ ६३ ॥
मूलबेरे तु यत्तेजः षड्भागैकं तु चोत्सवे ।
षट्त्रिंशदेकभागस्तु बलिकर्मार्चनादिषु ॥ ६४ ॥
एवं तेजोमयं देवं नाडीदक्षिणमार्गतः ।
तन्नासाग्रेण चावाह्य पीठकुम्भादिषु क्षिपेत् ॥ ६५ ॥

२. तथा - A

(More awakening is to be done in the Mūlabera as there is no invocation)

58b-60a. Then he must be awakened filling the two hands with sandal paste, *arghya* and flowers, after making them (hands) smell fragrantly uttering the Mūlamantra. He shall throw the palmful of flowers on the head of Hari, who is in the front of the seat. He shall then think of Him as facing him (priest), calm and well-awakened.

(Mantranyāsa and others on the Mūlabera)

60b-61. He must then do the three Sṛṣṭinyāsas and others and the *nyāsa* of mantras beginning with Mūlamantra and ending with Garuḍamantra[28] except Karanyāsa. He shall then show the various *mudrās* with their (individual) mantras.

(Invocation (or drawing the power) from Mūlabera to Karmabimba)

62-67a. Transmission[29] (or illumination) must be done in the palmful of flowers from the idol and then in the idol (Hari) uttering the Padamantra[30] 'please come' and the Mūlamantra from the lotus-like heart. Slight transmission is to be done every day to the Karma idols from the lotus-like heart of the Mūlabera. O brahmins! This is the method for it. One sixth part of the lustre which is in the Mūlabera is to be (transmitted) into the Utsavabera. One thirty-sixth part from there to the idols of Bali, Karma and Arcana and

28. Garuḍamantra; vide: *JS.* VI.174b-208; *LT.* XXXVI.81.
29. *dīpayet:* illumine, *bimbataḥ* from the Mūlabera; *dīpayet* make it shine; mantra must be transmitted and it shines there; vide: *Pad. S. Caryā.* III.120b.
30. Padamantra: a mantra has four parts, *bīja, piṇḍa, saṃjñā* and *pada*; vide: *LT.* XXIX. 52b-55.

तत्कदम्बप्रसूनाभे तस्मिन्मन्त्रात्मगोलके ।
स्थानभेदं विनाङ्गानि न्यस्याभ्यर्च्येह देहतः ॥ ६६ ॥
सकलीकृत्य देवेशं ध्यायेत्तद्व्यक्ततां गतम् ।

[कर्मबिम्बेषु मन्त्रन्यासः, सान्निध्यादित्रयम्, मुद्रादर्शनम्, अभिवादनं च]

मूलमन्त्रादिताक्ष्यान्तमन्त्रांस्तत्र च विन्यसेत् ॥ ६७ ॥

दीपयेत् इति त्रिभिः। बिम्बतः - मूलबिम्बस्य, तसिलः सार्वविभक्तिकत्वात्। हृत्कजात् हृत्कमलात्। हरिं षड्भागेषु षट्त्रिंशद्भागेषु वा, एकभागात्मकतेजोरूपं भगवन्तं पूर्वं पुष्पाञ्जलौ दीपयेत्ततोऽन्यत्र तस्मिन् बिम्बे दीपयेदिति योजना। अत्र दीपयेदित्यनेन "मूलबिम्बाद्यथादीपं दीपादविकृतं तथा" इति पाद्मवचनं स्मारितं भवति ।

कर्मबिम्बेषु मन्त्रन्यासं सान्निध्यादित्रयं मुद्रादर्शनमभिवादनं चाह- **मूलमन्त्रादि** इति सार्धैस्त्रिभिः। अत्रापेक्षितमुद्रालक्षणान्युत्तरत्र वक्ष्यति । अत्र मुद्रादर्शनप्रकरणेऽपि

एवमाहूय देवेशं दत्वार्घ्यं सन्निधित्सया ।
भूयोऽप्यर्घ्यं प्रदायास्मै हृदा मुद्रापुरःसरम् ॥ ६८ ॥

सन्निधाप्यार्घ्यदानेन मुद्रापूर्वं च वर्मणा ।
सन्निरोध्य तु मूलेन तन्मुद्रासहितेन तम् ॥ ६९ ॥

सम्मुखीकृत्य मूलादिमन्त्रांस्तत्र समुच्चरन् ।
प्रदर्शयंस्तथा मुद्रास्त्वष्टाङ्गेनाभिवादयेत् ॥ ७० ॥

others. Drawing thus the lustrous god through the right vein and tip of the (its) nose shall be placed in the seat, pitcher and others. Aṅganyāsa shall be done there in that globe of mantras of the hue like that of the Kadamba flowers without any difference to the places and worship must be done. Classification shall be done to his body and he is to be meditated upon, as he is (fully) manifested.

(Mantranyāsa in the Karma idols, presence and others which are three, show of mudrās and obeisance)

67b-70. Nyāsa of mantras beginning from the Mūlamantra and ending with Garuḍamantra is to be done there, Invoking, thus the lord of gods, request shall again be made for his presence after giving him *arghya, arghya* is to be offered again. He shall be stationed near with the Hṛdayamantra showing the *mudrā.*[31] He shall be retained there by offering *arghya* again with the Kavacamantra, showing the *mudrā.*[32] Making him face him with the Mūlamantra with its *mudrā,* he shall utter there Mūla and other mantras. After showing the *mudrās*, he shall do obeisance (prostrate) with his eight limbs.[33]

31. *mudrā* of Hṛdayamantra; vide: *JS.* VI.107b-111a, *ibid,* 12b-13; *LT.* XXXIV.19; *Pad. S. Caryā* XXII.5b-6a.

32. Kavacamantra and Kavacamudrā; vide: *JS.* VI.121-125a, *ibid,* VIII.17b-19; *LT.* XXXIV.23; *Pād. S. Caryā* 8b-9.

33. The eight-limbed *namaskāra* is described thus:

1. उरसा शिरसा वाचा मनसा च कपोलत: ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ cited in *PR. P.* 132

2. ललाटोदरजान्वङ्घ्रियुगाग्रानूर्ध्वगौ करौ ।
भूमौ सन्धाय मनसा वासुदेवमनुस्मरन् ॥ cited in *PR. P.* 132 stated to have been taken from *Saṁkarṣaṇasaṁhitā*

3. मनोबुद्ध्यभिमानेन सहन्यस्य धरातले ।
कूर्मवच्चतुर: पादान् शिरस्तत्रैव पञ्चमम् ॥
प्रदक्षिणसमेतेन त्वेवंरूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रत: प्रभो: ॥ *SS.* VI.187b-189a

The Vaikhānasa text *Vimānārcanakalpa* mentions varieties of prostrations like Masṭiṣka, Prahvāṅga, Pañcāṅga and Daṇḍa — P. 268.

[लययागविधिः]

लययागोक्तविधिना पूजयेत् प्रथमं ततः ।
आमूलात्सर्वमन्त्राणां व्यक्तिस्थानां समर्चनम् ॥ ७१ ॥
अर्घ्यपुष्पादिना कुर्यात् स्वेन स्वेन स्वके पदे ।

[भोगयागविधिः]

ततो भगवतो विष्णोर्भासा भास्वरविग्रहान् ॥ ७२ ॥
हृदादीन् निःसृतान् ध्यायेत् स्फुलिङ्गनिचयो यथा ।
भोगस्थाने यथायोगमेकैकं विन्यसेत्ततः ॥ ७३ ॥
सकलीकृत्य चार्घ्याद्यैरर्चयेत्तत्र तु क्रमः ।
अष्टपत्राम्बुजे पीठे हृदयाद्यं चतुष्टयम् ॥ ७४ ॥
न्यसेत्कमलपत्राणामापूर्वादुत्तरान्तिमम् ।
अग्नीशरक्षोवायव्यदलेष्वस्त्रं यथाक्रमम् ॥ ७५ ॥
नेत्रं केसरजालस्थं विन्यसेत्तदनन्तरम् ।
पीठोपरि दलाद्बाह्ये देवस्येशानकोणके ॥ ७६ ॥

गन्धदिग्धौ करौ कृत्वाऽर्घ्येणार्च्य परस्परम् इति वक्ष्यमाणवाक्यार्थोऽनुष्ठेयः ।
अथ मूलबिम्बादिषु लययागविधिमाह- **लतेति** सार्धेन । भोगयागक्रममाह- **ततः** इत्यष्टभिः । सकलीकृत्य सविग्रहीकृत्य, साकारं ध्यात्वेति यावत् । न्यसेत्पद्मं च तत्र वै इत्यत्र कौस्तुभवनमालयोर्मध्ये

श्रीवत्सकं किरीटं च विन्यस्याग्नेयकोणके ।
कौस्तुभं वनमालां च न्यसेत् पद्मं च तत्र वै ॥ ७७ ॥
ईशकोणे गदां न्यस्य नैर्ऋते चक्रमुज्ज्वलम् ।
वायव्ये पाञ्चजन्यं च विन्यसेच्च यथाक्रमम् ॥ ७८ ॥
देवस्य कर्णिकायां तु श्रियं पुष्टिं ततोऽपरे ।
अग्रतः पीठतो बाह्ये न्यसेच्चारात्पतत्त्रिपम् ॥ ७९ ॥
एवं नत्वा ततो ध्यायेन्मन्त्रव्यूहं यथास्थितम् ।

(Method of doing Layayāga)[34]

71-72a. Then worship is to be done at first according to the procedure of Layayāga. Adoration shall be done to all mantras from Mūlamantra which have manifested their positions with *arghya*, flowers and others in the respective places.

(Method of doing Bhogayāga)[35]

72b-80a. He (priest) shall then meditate upon Hṛdaya and other mantras which have issued out like the pile of the sparks of fire possessing bodies shining with the brilliance of Bhagavān Viṣṇu. Then they shall be placed each one according to their formation in the place of enjoyment. They shall be adored after classifying them with *arghya* and others. This is the method of doing it. The four (mantras) beginning with Hṛdaya are to be placed on the seat in the form of eight-petalled lotus in the lotus-petals from the east to the north, and Astramantra in the petals in the south-east, north-east, south-west and north-west quarters in due order. Netramantra shall be in the group of filaments and after that in the north-west corner of the lord on the seat outside the petals, shall be placed the crown and Śrīvatsa, and Kaustubha, Vanamālā and lotus in the south-east corner, Gadā in the north-east and the dazzling discus in the south-west, Pāñcajanya (Viṣṇu's conch) in the north-west, all in due order; Śrī and Puṣṭi[36] in the pericarp and Garuḍa[37] in front

34. Layayāga: cf. *LT.* XXXVIII.14-21; *Pāram S.* VI.24b-50. Also *ĪS.* II.100-103a.
35. Bhogayāga: vide: *Param. S.* VI.243. See also *ĪS.* II.103b-104a.
36. Puṣṭi and Śrī are the two spouses of Viṣṇu. Her position is to the left of Viṣṇu; vide: SS. XXI. 166b. She and Śrī are ever with Viṣṇu;

vide: लक्ष्मीपुष्ट्यो: स्वरूपेच नित्ये भगवता सह । cf. *Pad. S.* I.2.46;

cf. सर्वसम्प्रदा लक्ष्मी: पुष्टि: परमसिद्धिदा । *Pauṣ. S.* XXI.2a. Lakṣmī is of the complexion of red lotus and Puṣṭi is yellowish white like gold vide: *SS.* XIII.36.

SS. XIII describes Puṣṭi differently — पुष्टि: कनकगौरा च ।

It is interesting to note that Lakṣmī is stated in the earlier Āgama texts to be ever associated with Viṣṇu;

vide: देव्या लक्ष्म्या समासीनं पूर्णषाड्गुण्यदेहया । *Ahs.* IX.31a

LT. refers to Puṣṭi as one of the eight forms of Śrī occupying; Vide: *LT.* VIII.25.

SS. mentions Lakṣmī as the partner of Viṣṇu for enjoyment and Puṣṭi as having agency vide: *SS.* XIII.49b.

Pauṣ. S. XXI.1a gives a different account: सर्वसम्पत्प्रदा लक्ष्मी: पुष्टि: परमसिद्धिदा ।

Thus Śrī and Puṣṭi alone were the two consorts of Viṣṇu; cf. *SS.* XII.207a; *Ahs.* XXIV all deities etc. In all probability, Bhū occupied the position of Puṣṭi after she was rescued by Viṣṇu from the waters of deluge; *LT.* XXXVII.54.
37. *patatripa: patatri* — bird; *pa* — protector, ruler, king of birds: Garuḍa.

[श्रीमन्नारायणध्यानम्]

अभ्यन्तरे विमानस्य गर्भभूमौ तु मध्यतः ॥ ८० ॥
सरसीरुहमास्थाय संस्थितं पुरुषोत्तमम् ।
प्रावृड्जलदसन्दोहविलसद्दिव्यविग्रहम् ॥ ८१ ॥
सर्वदेवमयं देवं सर्वेषां तेजसां निधिम् ।
सर्वलक्षणसम्पूर्णं सर्वज्ञादिगुणैर्युतम् ॥ ८२ ॥
वपुषा सुन्दरेणैव दिव्येनाविष्कृतेन च ।
मुञ्चन्तमनिशं देहादालोकं ज्ञानलक्षणम् ॥ ८३ ॥
प्रयत्नेन विनाज्ञाननाशकृद्ध्यायिनां महत् ।

पद्मं न्यस्तव्यम् । ईशकोणे गदां न्यसेत् इत्यत्रापि किरीटश्रीवत्सयोर्मध्ये गदा न्यस्तव्या । तथोक्तं पारमेश्वरे— "गदायां च समीपतः" । "किरीटं दक्षिणे पार्श्वे वामे श्रीवत्समेव च । कौस्तुभं पद्मसामीप्ये वनमालां च दक्षिणे ॥" इति ।

प्रथमं मूलमन्त्रप्रतिपाद्यश्रीमन्नारायणध्यानमाह- **अभ्यन्तरे** इत्यारभ्य **ध्यायेन्नारायणं प्रभुम्** इत्यन्तैः ।

"मुञ्चन्तमनिशं देहादालोकं ज्ञानलक्षणम् । प्रयत्नेन विनाज्ञाननाशकृद्ध्यायिनां महत् ॥"

घनकुञ्चितनीलालिदलिताञ्जनसन्निभैः ॥ ८४ ॥
कर्पूरधूसरैर्दिव्यैः पुष्पसंवलितान्तरैः ।
किरीटमकुटाक्रान्तैः शोभितं स्वशिरोरुहैः ॥ ८५ ॥
बालचन्द्रप्रतीकाशफालोद्यत्तिलकोज्ज्वलम् ।
सुभ्रुवं सुनसं शान्तं सविलासस्मिताधरम् ॥ ८६ ॥
किञ्चिदारक्तगोक्षीरशुद्धनीलाब्जलोचनम् ।
शीतलैर्दृष्टिपातैस्तु जगदाप्यायकारिणम् ॥ ८७ ॥
विलसद्गण्डफलकं श्रवणोज्ज्वलकुण्डलम् ।
मुखसौन्दर्यनिष्यन्दचुबुकस्थलशोभितम् ॥ ८८ ॥
विकलङ्कशरच्चन्द्रविलसन्मुखमण्डलम् ।
कम्बुग्रीवं पीवरांसं दीर्घबाहुं महोरसम् ॥ ८९ ॥

of the lord and near him outside the seat. Having paid obeisance in this way, meditation is to be done on the divisions of the mantras as they are stationed.

(Meditation upon Śrīman Nārāyaṇa)

80b-100a. He (priest) shall meditate upon lord Nārāyaṇa, the very lord of Lakṣmī, the best among Puruṣas stationed occupying the lotus in the midst of the sanctum sanctorum within (inside) the *vimāna*; whose divine body shines like the multitude of autumnal clouds, the lord who is the embodiment of all gods; the store-house of all lustres, complete with all (auspicious) marks; possessing omniscience and other qualities; who releases always a light of knowledge from his body, beautiful, divine and manifested; who destroys the ignorance of those who meditate (upon him) without any effort on their part; who is adorned with the hairs on the head resembling the cloud, Kuñcita,[38] blue bee cut portion of (thick) collyrium[39] with camphor, divine (splendid), intertwined with flowers overspreading the crown and crest; resplendent with the ornamental mark rising (appearing prominently) in the forehead resembling the young moon; with fine eyebrows; fine nose calm with the lower lip (displaying) a graceful smile; the eyes resembling blue lotus, clean (pure) like slightly red milk of the cow; giving nourishment to the world with the cool glances; shining and broad cheeks;[40] dazzling ear-ornaments in the ears; with the region of the chins having the flow[41] of the loveliness of the face; countenance shining like the

38. Kuñcita: a plant, dark in colour; it may also mean curved but this does not add any special sense to the following word *nīlāli* (indigo bee).
39. Any stone or thick substance of any colour possess a deeper colour in its portion where it is cut than the colour in any part that is not cut. Collyrium is black. A mass of it may have to be cut for use. When it is done so, that part emits a more intense deep colour.
40. *gaṇḍa:* cheek; *phalaka:* plank; *gaṇḍa-phalaka:* cheek resembling a plank i.e. broad cheek.
41. *mukhasaundaryaniṣyandacibukasthalaśobhitam: cibuka*—chin; *sthala*—region; *niṣyanda*—flow; *mukhasaundarya*—beauty of the face. Here *saundarya* means the beauty of a part while that of the whole is *lāvaṇya.*

    vide: सौन्दर्यमवयवशोभा । लावण्यं समुदायशोभा Vedāntadeśika's *Tātparyacandrikā*-Introduction on Rāmānuja's *Bhagavadgītā-bhāṣya.*

    The face is handsome and the chin also is handsome. When the two are viewed together, it is hard to account for the beauty of the chin. Here it is imagined that loveliness of the face flows down to the chin and makes it also lovely. Thus loveliness of both is noticed.

चतुर्भुजमुदाराङ्गं विलसत्पाणिपङ्कजम् ।
पीतकौशेयवसनं निम्ननाभिं तनूदरम् ॥ ९० ॥
चारूरुयुगलं चारुजङ्घाद्वितयमुज्ज्वलैः ।
मणिनूपुरभूषाद्यैर्विलसत्पादपङ्कजम् ॥ ९१ ॥
दिव्यगन्धानुलिप्ताङ्गं दिव्याम्बरधरं तथा ।
दिव्यस्रग्वेष्टनोपेतं दिव्यालङ्कारमण्डितम् ॥ ९२ ॥
अनेकरत्नखचितकिरीटमकुटोज्ज्वलम् ।
कौस्तुभेनोरसिस्थेन श्रीवत्सेनाप्यलङ्कृतम् ॥ ९३ ॥

इत्यत्र अज्ञाननाशकृत् महत् इति पदद्वयमप्यालोकविशेषणम् । आलोकशब्दस्य नपुंसकत्वं छान्दसम्। पारमेश्वरव्याख्याने "अज्ञाननाशकृन्नाशकारिणमिति" भगवत एव विशेषणं कृतम् । अत्र मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् इत्युक्तावपि लाञ्छनन्यासप्रकरणे पद्मस्याप्युक्तत्वात्, तस्मिन् हस्ते सूक्ष्मरेखारूपेण पद्ममस्तीत्यवगम्यते ।

रत्नकाञ्चनसन्मुक्तायुक्तया वनमालया ।
सब्रह्मसूत्रया चैव शोभितं परमेश्वरम् ॥ ९४ ॥
मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् ।
श्रोणीतटनिविष्टेन वामहस्तेन लीलया ॥ ९५ ॥
ध्रियमाणं गदां गुर्वीं निषण्णां धरणीतले ।
पश्चाद्दक्षिणहस्तेन चक्रं कालानलद्युतिम् ॥ ९६ ॥
प्रणवध्वनिगर्भं तु हिमाद्रिशतशोभितम् ।
शङ्खं वामकरेणापि दधानमतुलप्रभम् ॥ ९७ ॥
स्वदेहतेजःसम्भूतज्वालामण्डलमध्यगम् ।
करुणापूर्णहृदयं जगदुद्धरणोद्यतम् ॥ ९८ ॥
अभिन्नपूर्णषाड्गुण्यविभवेनोपबृंहितम् ।
योगिध्येयमजं नित्यं जगज्जन्मादिकारणम् ॥ ९९ ॥
साक्षाल्लक्ष्मीपतिं देवं ध्यायेन्नारायणं प्रभुम् ।

[शयनाद्यनेकमूर्तीनां ध्यानम्]

एवं शयानमासीनं यानारूढमथापि वा ॥ १०० ॥
परं व्यूहं वैभवं वा द्विभुजं वा चतुर्भुजम् ।

spotless autumnal moon; the neck resembling the conch; plumpy shoulders, long arms; broad chest, having four arms; energetic limbs; lovely lotus-like hands; dress made of yellow silk; deep navelled with slim abdomen; lovely pair of thighs; charming pair of shanks; with the lotus-like feet shining with splendid gemset anklets, ornaments and others; with the limbs smeared with fine sandal-paste; wearing a lovely cloth; with the divine garlands round[42] the body; bedecked with splendid decorations; shining with the crest having the crown studded with many gems; ornamented with the *kaustubha* resting in the chest and *śrīvatsa*; beautified with the *vanamālā*[43] fastened with gems, gold and good pearls and the sacred thread;[44] the supreme lord; offering security (freedom from fear to those who are frightened with the prominent (frontal)) right hand; holding the heavy mace resting on the ground, gracefully with the left hand resting on the hip; bearing the discus of the radiance of the fire of deluge with the hind right hand; holding with the (hind) left hand, the conch filled with the sound of *Praṇava*; possessing the beauty of hundreds of the mountains of snow and unequalled brilliance who is in the centre of the globe of brilliance produced from His bodily lustre; his heart filled with compassion; bent upon lifting up the earth; strengthened by the might of undivided and full *ṣāḍguṇuya*; object of meditation for the *yogins*; unborn; everpresent; the first cause for beginning (maintenance and dissolution) of the world.

(Meditation on several forms such as reclining and others)

100b-102. One must contemplate, with devotion, on the form of the Bhagavān lying, seated or mounted on a vehicle; transcendent, classified

42. *veṣṭana:* act of surrounding or encircling; a band, or belt, having a band to lie the garland and keep it intact.

43. *vanamālā:* it reaches the feet of the wearer. It is thus defined: आपादपद्मं या माला वनमालेति सा मता ।

44. *brahmasūtra:* sacred thread, also called *yajñopavīta.* While the former may be taken to devote eand also connote the purpose of wearing it, that is, for the study of the Vedas also called Brahman, the latter word is of frequent use. The very word *yajña* (in this word) indicates the use of the *sūtra* as a qualification for performing a vedic ritual. The use of the word in an Āgama text like this adds to its significance that wearing it qualifies the wearer to do worship (*yāga*) to god. But, this is beside the point, since the women and Śūdras who do not have it also get qualification to perform this *yāga.* In the case of Viṣṇu, it has significance, as Viṣṇu is *vedamaya.*

अष्टाबाह्वादिकं वापि नानाभूषणसंयुतम् ॥ १०१ ॥
नानास्त्रगणसंयुक्तं रूपं भगवतस्तदा ।
लक्ष्म्यादिशक्तिजालं च ध्यायेद्भक्तिसमन्वितः ॥ १०२ ॥

शयनाद्यनेकभेदभिन्नं भगवद्रूपमपि एवमेव तत्तदर्चनप्रकरणे ध्यायेदित्याह- **एवम्** इति सार्धद्वाभ्याम् । लक्ष्म्यादिशक्तिजालम् लक्ष्म्यादिशक्तिजालं यस्य तदिति भगवद्रूपविशेषणम् ।

[हृदादिषडङ्गमन्त्राणां ध्यानम्]

एवमेव हि हृन्मन्त्रं ध्यायेत् कुमुदपाण्डरम् ।
पद्मरागाचलाकारमारक्तं च शिरः स्मरेत् ॥ १०३ ॥
अञ्जनाद्रिप्रतीकाशं शिखामन्त्रं तथाकृतिम् ।
परितः सूर्यसन्तप्तं यथा कनकपर्वतम् ॥ १०४ ॥
तथा कवचमन्त्रं च ध्यानकाले विचिन्त्य च ।
वृतं ज्वालासहस्रैस्तु अयस्कान्तसमद्युति ॥ १०५ ॥
सर्वास्त्रशक्तिसम्पूर्णमस्त्रमन्त्रं प्रकीर्तितम् ।
निर्धूमाङ्गारसदृशं भावयेन्नेत्रमन्त्रराट् ॥ १०६ ॥
ध्येयाः स्वरुचिसंयुक्ता द्विभुजाः पुरुषोत्तमाः ।
वीक्षमाणान् विभोर्वक्त्रं ध्यायेदेतान् मुनीश्वराः ॥ १०७ ॥
स्थितानामादिमूर्तीनां स्थितान् ध्यायेत्सदैव हि ।
आसीनानामथासीनान् वाहनस्थे सवाहनान् ॥ १०८ ॥
शयितानामथासीनानुत्थितान् वा स्मरेद्धिया ।

(*vyūha*) divinely descended with two or four or eight and more arms;[46] bedecked with various kinds of ornaments; endowed with a group of various kinds of weapons; having multitude of Lakṣmī and other powers.

(Meditation upon hṛdaya and other mantras of the eight limbs)

103-109a. The *hṛdayamantra*, white like lily, must be meditated in this way, the *śiromantra* must be thought of as having the form of hill of rubies and slightly red; the *śikhāmantra* resembling the hill of collyrium and of a form (like that of that hill) and glowing all-round with the sun (sunshine) like a hill of gold; and think likewise of the *kavacamantra* at the time of meditation. *Astramantra* is glorified as surrounded by thousands (multitude) of flames, having a splendour similar to that of the load stone[47] and as filled with the powers of all weapons. The great *netramantra* shall be considered to be like a smokeless (heated) charcoal. O eminent sages! these eminent (best)

45. While describing the hands of god, it is said the frontal called *mukhya* hands have *abhaya* pose and mace in the right and left hands and the hind hands have the discus and conch in the right and left hands respectively. It is also held that the concept of *abhayahasta* is of later origin and originally it was lotus that was held in this hand; vide: *VS.* IV.55b; *Param. S.* I.23; & III.16a.

    The frontal right hand has discus and left has mace; the hind right hand has *abhaya* posture and left conch. *Pauṣ. S.* XXXVI.140-142a; *SS.* V.10b-12a and *LT.* X.28-30 agree with *ĪS.* (stated above).

    According to the *Mayamata*, the hind right and left hands have *varahasta* and *abhayahasta* and the frontal right and left have conch and discus, XXXVI. 8-10a.

    The original concept must have been that the right arm (frontal) has lotus. Even in the idols, there are subtle marks which resemble the form of lotus, though that hand holds an *abhaya* pose. Perhaps the *abhaya* pose is of later significance;

    vide: दक्षिणे मुख्यहस्तेऽब्जं तदपरं तु वै ॥ *Pauṣ. S.* XXXVI.146b.

    Padma is mentioned frequently in this text, while describing the hands of other descents of Viṣṇu. For a similar reference see *JS.* XVII.7a.

46. Vāsudeva (Para) in the transcendental form has two hands; *Viṣṇutilaka* II. 10. *VS.* mentions that Viṣṇu has a form with eight hands (IV.52); *ĪS.* XXIV.212 *SS.* XII.20b.

    It is worth noting here that there is a *stotra aṣṭabhujāṣṭaka* on Viṣṇu in a shrine in Kāñcīpuram, the author being Vedāntadeśika. *ĪS.* XIV refers to god having six, ten, fourteen and sixteen hands.

    Lord Kṛṣṇa is referred to as having one hundred hands.

    उद्धृतासि वराहेण कृष्णेन शतबाहुना । *Mahānārāyaṇīya Upaniṣat.* I.8.

47. *ayaskānta:* loadstone.

[भूषणायुधलक्ष्म्यादिशक्तीनां ध्यानम्]

अथ ध्यानं भूषणास्त्रशक्तीनामुच्यते क्रमात् ॥ १०९ ॥

अथ सात्वतसप्तदशपरिच्छेदोक्तरीत्या हृदादिषडङ्गमन्त्राणां ध्यानान्याह- **एवमेव हि हृन्मन्त्रम्** इत्यारभ्य **उत्थितान्वा स्मरेद्धिया** इत्यन्तैः। अत्र एवमेवेत्यनेन पूर्वोक्तभगवदाकारवत्वं हृन्मन्त्रादीनामप्युक्तं भवति। इममर्थं स्पष्टं वक्ष्यति सुदर्शनार्चनप्रकरणे -

"ध्येयान्याकारवर्तीनि भोगस्थानेषु मूलवत् । वर्णभूषणवस्त्रास्त्रभुजसंस्थानचेष्टितैः ॥" इति ।

अथ श्रीसात्वतत्रयोदशपरिच्छेदोक्तरीत्या किरीटादिभूषण-पद्माद्यायुध-लक्ष्म्यादिशक्तीनां ध्यानान्याह- **अथ ध्यानं भूषणास्त्र** इत्यारभ्य **शक्तिद्वितयमव्ययम्** इत्यन्तैः ।

किरीटस्सौम्यवदनः काञ्चनाभो महातनुः ।
भाभिराकृतियुक्ताभिर्नानारूपाभिरावृतः ॥ ११० ॥
स्थितो वैद्याधरीयेन स्थानगेनान्तरिक्षगः ।
स्फटिकाद्रिप्रतीकाशं श्रीवत्समथ भावयेत् ॥ १११ ॥
बद्धपद्मासनासीनं हस्तन्यस्तं स्वपार्श्वयोः ।
वहन्तं कूर्ममुद्रां च मुख्यहस्तद्वयेन च ॥ ११२ ॥
पद्मरागाचलाकारं कौस्तुभं रत्ननायकम् ।
दिशो दश द्योतयन्तं संलग्नाङ्घ्रिस्थितं स्मरेत् ॥ ११३ ॥
वहन्तं वक्षसो मध्ये स्वहस्तकृतसंपुटम् ।
सन्धारयन्तमपरं तथा वै शिरसोपरि ॥ ११४ ॥
ध्येया भगवती माला चित्ररूपा मनोहरा
सर्वगन्धान्विता सौम्या ईषद्विकसिता नवा ॥ ११५ ॥
कुन्दावदातं कमलं सौम्यमीषत्स्मिताननम् ।
रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ॥ ११६ ॥
गदां हेमाद्रिसङ्काशां तन्वीं कुवलयेक्षणाम् ।
द्विरष्टवर्षवत्कान्तां कुमारीं नवयौवनाम् ॥ ११७ ॥
स्वोत्थेन रश्मिजालेन भासयन्तीं नभस्स्थलम् ।
स्वरश्मिमण्डलान्तःस्थं वल्गन्तं हेतिपं स्मरेत् ॥ ११८ ॥

persons are to be contemplated upon as having two arms and having their (own) lustre. These shall be meditated upon as looking at the face of the Lord. One shall always meditate as standing (representing) the primary forms in the standing posture, as seated for those in the sitting postures, as mounted upon the vehicle for them (him) in the vehicle, or think with the knowledge of them, as seated or rising up, for those who are lying.

(Meditation of the powers of ornaments, weapons, Lakṣmī and others)

109b-127a. Then is stated the (method of) meditation upon ornaments, weapons and power in due (their) order. The crown has a pleasant countenance, complexion of gold, big frame, encircled by splendour of various forms and possessing bodies (external features), stands with the Vidyādhara posture[48] in the sky. One must consider Śrīvatsa which resembles the hill of crystals, seated in Padmāsana placing the hands on both sides; bearing Kūrmamudrā[49] with the two prominent (frontal) hands. One shall recall to the mind Kaustubha, having a form of the hill of rubies who is the lord of gems; illumining the ten quarters and standing on the shanks closely joined (with each other) having the casket as it were, formed with its (his) (one) hand in the centre of his chest and the other on the head. The garland of Bhagavān, of various colours and captivating the mind must be meditated upon as possessing all (sweet) odours (fragrance), pleasing and new, slightly blossomed. (Meditation should be undertaken) upon the lotus white like Kunda flowers, pleasant, with a slightly smiling faces humming sweetly[50] providing delight to the sense of hearing. (One shall meditate upon) Mace

48. *vaidyādhariyena sthānagena*: a posture assumed by Vidyādharas who are semi-divine beings. They assume a posture which could not be disturbed. The crown is in a fixed position.

49. *Kūrmamudrā*: this is not a description, mention is also made in Pauṣ. S. XXIV. 22-23.

50. The lotus is stated to be humming sweetly. This must refer to the humming of the bee in the lotus. This also suggests that the lotus must be freshly plucked from lotus tank and so dripping with honey. Hence, the bee is attracted to it.

विभोराज्ञां प्रतीक्षन्तं ह्रस्वाङ्गं रक्तलोचनम् ।
तुहिनाचलसंकाशं शङ्खं कमललोचनम्[3] ॥ ११९ ॥

अत्र श्रीवत्सकौस्तुभयोश्चतुर्भुजत्वम् । 'उद्गिरन्तं स्वकैर्मुखैः' इत्यनेन शङ्खस्य चतुर्मुखत्वं चोक्तमपि, तथा ध्यानं तत्तदायुधभूषणानां स्वतन्त्रार्चनविषयः । प्रकृते तु

सदागमादिसामान्तमुद्गिरन्तं स्वकैर्मुखैः ।
ध्येयाः स्वरुचिसंयुक्ता द्विभुजाः पुरुषोपमाः ॥ १२० ॥
सास्त्राः किरीटपूर्वा ये गदामालाङ्गनाकृतीः ।
एतेऽस्त्रनायकाः सर्वे विभोराज्ञाप्रतीक्षकाः ॥ १२१ ॥
प्रोत्थिता विचलन्तश्च सुसमैः स्थानकैः स्थिताः ।
श्रोणीतटार्पितकराश्चामरव्यजनोद्यताः ॥ १२२ ॥
सपद्मं तु किरीटाद्यं वर्जयित्वा चतुष्टयम् ।
तर्जयन्तं च दुष्टौघमन्येषां दक्षिणं करम् ॥ १२३ ॥
स्मरेद्वै ध्यानकाले च सर्वेषामथ मस्तके ।
ध्येयं स्वकं स्वकं चिह्नं सुप्रबुद्धं निराकृति ॥ १२४ ॥
नलिनीतालहस्ता च लक्ष्मी रक्ताम्बुजप्रभा ।
पुष्टा कनकगौरा चामृतकुम्भधरा स्मृता ॥ १२५ ॥
भोक्तृशक्तिः स्मृता लक्ष्मीः पुष्टिर्वै कर्तृसंज्ञिता ।
भोगार्थमवतीर्णस्य लोकानुग्रहकाम्यया ॥ १२६ ॥
उदितं सह तेनैव शक्तिद्वितयमव्ययम् ।

द्विभुजत्वेनैकमुखत्वेनैव ध्यानं कार्यम् । अत्रैवोत्तरत्र — "ध्येयाः स्वरुचिसंयुक्ता द्विभुजाः पुरुषोपमाः । सास्त्राः किरीटपूर्वा ये गदामालाङ्गनाकृतीः ॥" इति किरीटादीनामस्त्राणां च द्विभुजत्वोक्तेः । नन्वत्र द्विभुजत्वमेवोक्तम्; न त्वेकमुखत्वमिति चेत्, उच्यते । तदप्युक्तं श्रीसात्वते त्रयोदश-परिच्छेदे -

"यागेऽस्मिंस्त्वेकपीठे वै सर्वसामान्यलक्षणे । ध्येया विशेषरूपेण किरीटाद्यखिलास्तु वै ॥"

३. लाञ्छनम् - पा

resembling a golden hill, slender, having lily-like eyes, attractive like a sixteen year old maiden of fresh youthfulness, illumining the region of the sky with the cluster of rays (brilliance) sprung from its body. The Lord (protector) of the weapons Sudarśana shall be thought of as being in the midst of its own rays (glow) and leaping; (one must meditate upon the) conch as having short limbs, anticipating the command of the Lord, of red eyes resembling the hill of snow, having eyes similar to the lotus and uttering, with its mouths (the holy texts) beginning with good Āgama and ending with the Sāmaveda. These who are comparable to human beings, having two hands and possessing their own lusture are to be meditated upon, as having weapons comprising crowns, mace, garland and feminine forms. All these Lords of weapons anticipate the command of the Lord. They get up and move about and stand in the same postures. They are resting their hands on the hips, lifting up the fans made of chowries, with the exception of the four, crown and lotus, one must think of others as threatening the host of the wicked, their right hand placed on their (own) heads. One must meditate upon the mark of each (or individual mark) as well awakened and formless. Lakṣmī is considered to have a fan made of lotus, having the splendour of the red lotus, Puṣṭi, having yellowish gold complexion is held to hold a pitcher filled with nectar. Lakṣmī is considered to be the power of the enjoyer and Puṣṭi as having the name of the doer. These two imperishable powers appear along with Him who comes down for enjoyment and with a view to show favour to the world.

[गरुडध्यानम्]

रक्ततुण्डं महाप्राणं भीमभ्रुकुटिलोचनम् ॥ १२७ ॥
दीव्यच्चामीकराकारं पद्ममण्डलमण्डितम् ।
संस्मरेद् गरुडं विप्राः गृध्रवक्त्रं पृथूदरम् ॥ १२८ ॥

"चतुर्भुजाश्चतुर्वक्त्रा वस्त्रस्रग्भूषणान्विताः । पुनर्विशेषयागानामर्चनावसरे पुनः ॥
एकाननं च सर्वेषां द्विभुजं विहितं सदा ॥" (सा सं० १३.१-२. १/२) इति ।

अत एव जयाख्यलक्ष्मीतन्त्रादिषु भोगयागप्रकरणे कौस्तुभादीनां द्विभुजत्वमेवोक्तम् । एते अस्त्रनायकाः इत्यत्रैते किरीटादय अस्त्रनायकाश्चक्रादयश्च । सर्वे श्रोणीतटार्पितकराः श्रोणीतटन्यस्तवामहस्ताः । चामरव्यजनोद्यताः सचामरव्यजनदक्षिणहस्ता इत्यर्थः । आयुधानां भूषणानां च किञ्चित्तारतम्यमुक्तं सपद्मम् इत्यादिना । सपद्मम् पद्मसहितम् । **किरीटाद्यं** चतुष्टयं वर्जयित्वान्येषां चक्रादीनां दक्षिणं करं दुष्टौघं तर्जयन्तं च स्मरेदिति योजना । चक्रादीनां चामरव्यजनसमर्पणकैङ्कर्यमात्रोद्योगे, दुष्टानामसुरादीनां यथेच्छं दुष्कृत्येष्वेवावकाशो भवतीति भिया चामरादिसमर्पणसमयेऽपि दुष्टौघतर्जनमुक्तम् । यद्वा 'तर्जयन्तं च' इत्यत्र चकारो विकल्पार्थकः । चक्रादीनां दक्षिणकरः चामरव्यजनोद्यतः तर्जनीमुद्रान्वितो वा स्मरे-दित्यर्थः। कस्मिंश्चित् पारमेश्वरप्रयोगे चक्राद्यायुधानामेव चामरव्यजनोद्यतत्वं सपद्मस्य किरीटादिचतुष्टयस्य तर्जनीमुद्रान्वितत्वमुक्तम्, तदस्वरसम्; पाठक्रमेणार्थवर्णनभङ्गात्, आयुधानामेव दुष्टौघतर्जनसामर्थ्यात्, भूषणानां तदसम्भवाच्च । अत एव पद्मस्यायुधकोटिपरिगणितत्वेऽपि तस्य लीलाकमलत्वात् सौम्यत्वाच्च दुष्टौघतर्जनं न संभवतीत्यभिप्रायेण सपद्ममिति भूषणैः सह वर्णनं कृतम् । एवमेव पारमेश्वरेऽपि भूषणास्त्रशक्तिलक्षणान्युक्तानि । किन्तु तत्र

[यथाक्रमं ध्यानम्]

यथोक्तमूर्तियुक्ताश्च तथा ध्यायेद्यथाक्रमम् ।

[किरीटादीनामधिष्ठातृदेवतार्चनक्रमः]

किरीटो हुतभुग्वेद्यः कौस्तुभस्तु प्रभाकरः ॥ १२९ ॥
स्वयं शशाङ्कः श्रीवत्सो मालाः षण्माधवादयः ।
अपां पतिर्वै कमलं गदा देवी सरस्वती ॥ १३० ॥
कालश्चक्राधिपो ज्ञेयः खं शङ्खः कथितो द्विजाः ।
प्राणं पतत्रिराड्विद्धि एवं तत्त्वेषु संस्थितान् ॥ १३१ ॥
अधिष्ठातृन् क्रमाच्चैतानर्चयेदर्घ्यपुष्पकैः ।

(Meditation on Garuḍa)

127b-128. O brahmins! He (priest) shall think upon Garuḍa as having a red beak, enormous stamina, bright eyebrows and eyes, a form like a burnished gold, bedecked with a circle of lotuses (garland) and having the face of the vulture and huge paunch.

(Meditation (on other deities) in due order)

129-132a. Meditation is to be done in due order as they (other deities) have the forms as mentioned (in the Āgama texts).

(Method of worshipping the deities presiding over the crown)

The crown is to be understood as fire; Kaustubha the sun; Śrīvatsa itself the moon; the garlands the six (seasons) spring and others; Lotus the Lord of waters; Gadā; Goddess Sarasvatī; Lord Cakra time; conch is stated to be the sky. O brahmins! The king of birds (Garuḍa) the vital airs. Know these as stationed in the *tattva*-s controlling (superintending) them in due order. These shall be worshipping with *arghya* flowers.

[भगवतः आसनाद्युपचारसमर्पणक्रमः]

यजेत्तदनु देवेशं भोगैरर्घ्यादिभिः क्रमात् ॥ १३२ ॥
विनिवेद्यासनवरं समाहूतस्य वै विभोः ।
पादपीठं तु सामान्यं मृद्वास्तरणभूषितम् ॥ १३३ ॥

"रक्तपङ्कजवर्णाभा लक्ष्मीर्नीलाम्बुजेक्षणा ।
दुग्धौघधवलापुष्टिरानन्दाकुलितेक्षणा ॥"

इति श्लोकः केवलं पौष्करोक्तः । अन्यत्सर्वं सात्वतोक्तमेव ।

अथ जयाख्यानुसारेण गरुडध्यानमाह- **रक्ततुण्डम्** इति सार्धेन ।

पूर्वोक्तानां यथाक्रमं ध्यानं कार्यमित्याह- **यथोक्त** इत्यर्धेन । अथ किरीटादीनामधिष्ठातृदेवतार्चनक्रममाह- **किरीटः** इति त्रिभिः । माधवादयः वसन्तादयः षड्तवः । एवमेवोक्तं पारमेश्वरेऽपि । किन्तु तत्र चक्रशङ्खयोरधिष्ठातारौ शब्दान्तराभ्यामुक्तौ । "चक्रं लोकप्रतिष्ठा वै शब्दब्रह्म तु शङ्खराट्" इति तत्र लोकप्रतिष्ठाकालः सर्वाधारः काल इति प्रसिद्धेः । तथा सात्वतोक्तत्वाच्च। पारमेश्वरव्याख्याने तु "लोकप्रतिष्ठाभूमिः" इत्युक्तं तद्विचारणीयम् ।

अथ भगवत आसनाद्युपचारसमर्पणक्रममाह- **यजेत्तदनु देवेशम्** इत्युपक्रम्य

घण्टाशब्दसमोपेतं दत्त्वार्घ्यं मन्त्रमूर्धनि ।
पाद्यप्रतिग्रहं हैमं विभोर्दद्यात् सुरत्नकम् ॥ १३४ ॥
पाद्यं पादोदकाकर्षं शाटकं चानुलेपनम् ।
सप्रतिग्रहमाचामं सानुलेपं च मालिकाम् ॥ १३५ ॥
घृतादिकैर्महादीपैरच्छिन्नैरर्चयेद्धरिम् ।
सुगन्धैर्मधुरैर्धूपैः प्रभूतैरर्चयेद्विभुम् ॥ १३६ ॥
अर्हणं मधुपर्कं च तर्पणं तदनन्तरम् ।
निष्पुंसनं सपात्रं च आचामं गन्धमेव च ॥ १३७ ॥
अथ चूर्णितकर्पूरं घृष्टं श्रीगन्धभावितम् ।
सपूगफलमुत्कृष्टं ताम्बूलं विनिवेद्य च ॥ १३८ ॥
सपुत्रदारमात्मानमष्टाङ्गपतनेन च ।
चेतसा भक्तियुक्तेन निवेद्य तदनन्तरम् ॥ १३९ ॥

(Method of offering and other services to Bhagavān)

132b-139. Then the lord of gods is to be adored with *arghya* and other enjoyables in due order. The best seat shall be offered to the Lord who is invoked. A foot-stool of a general kind decorated with a soft covering is to be offered. *Arghya* shall be offered on the head of the mantras accompanied by the sound of the bell. A vessel for *pādya* together with gems shall be given to the Lord; a small cloth for drying up the water in the feet and unguents shall then be offered (as also); *ācamana* with a vessel (to receive it) and a garland with sandal paste. Hari is to be worshipped with huge lights, uncovered, with ghee and others. *Arhaṇa, Madhuparka,*[51] water to drink (to please Him),[52] then *Niṣpuṃsana*[53] wth the vessel, *ācamana*, sandal paste, then powdered

51. *Madhuparka:* a mixture of honey or curds, honey and clarified butter, offered to a guest or to the bridegroom by the bride's father on the occasion of marriage.
52. *tarpaṇa:* drink, generally, water to refresh oneself by a person who receives *madhuparka*.
53. *niṣpuṃsana:* powder to cleanse the hands.

निवेद्य तदनन्तरम् इत्यन्तैः । अत्रादौ भगवन्मूर्ध्न्यर्घ्यदानं पुष्पादिना कार्यम् । तथोक्तं लक्ष्मीतन्त्रे - "अर्घ्यं तृतीयया देयं मूर्ध्न्यापः कुसुमोद्धृताः" इत्यर्घ्यजलेन भगवतो हस्तप्रक्षालनं प्रसिद्धमित्यत्र तन्त्रोक्तम्। पाद्यदानमप्यत्र द्विवारं कार्यम् । तथोक्तमनिरुद्धसंहितायां - "पाद्यदाने तु विप्रेन्द्र द्विर्दद्यात्तु पदाम्बुजे" इति। आचमनं तु त्रिवारं समर्पणीयम् । तथोक्तं तत्रैव "आचामं च त्रिधा दद्याद् विमृज्य च सकृत् स्पृशेत्" इति अत्र पाद्मे विशेष उक्तः - "ध्यायेदाचमनीयस्य ध्यानकाले जगद्गुरुम् । आचमन्तमिवाम्भोभिः साक्षादम्भप्रतिग्रहः ॥" इति । सप्रतिग्रहम् प्रतिग्रहपात्रसहितम् । अर्हणम् मधुपर्काङ्गमापोशनरूपं प्रधानार्घ्योदकम् । तर्पणं मधुपर्कनिवेदनानन्तरं तृप्त्यर्थं पानीयम् । निष्पुंसनम् हस्तोद्वर्तनचूर्णम् । अत्र आसनाद्युपचारेषु सर्वत्र मन्त्रत्रयं ज्ञेयम्, तदुक्तं लक्ष्मीतन्त्रे- "संकल्पश्च प्रदानंञ्च प्रीतिश्चेति त्रयं त्रयम् । कुर्यात् सर्वेषु भोगेषु देशकालाद्यपेक्षया ॥" इति । सङ्कल्पमन्त्रश्च तत्रैवोक्तः - "समाहितोऽञ्जलिं कृत्वा तत ॐ भगवन्निति । आसनेनार्चयिष्यामीत्युक्त्वा दद्यादथासनम् ॥" इति ।

एवमुक्तं पाद्मेऽपि - "अर्घ्यादिषूपचारेषु कर्तव्येषु यथा तथा । मन्त्रपूर्वेषु सर्वेषु वाचमेनामुदीरयेत्॥ दिव्येनार्घ्योपचारेण यथाशक्ति यथाविधि । अर्चयिष्यामि समये भगवन्तं जनार्दनम् ॥ इत्यादिकामवितथां पूजकः सुसमाहितः ॥" इति । प्रदानमन्त्रं तु तत्रैव सुदर्शनार्चनप्रकरणे वक्ष्यति - "प्रदाने सर्वभोगानां मन्त्रोऽयं सम्प्रकाशते ।" इत्यादिना । अयं मन्त्रः पारमेश्वरेऽपि चतुर्विंशेऽध्याये निरूपितः । तथापि तद्व्याख्यातृभिः तन्मन्त्रशरीरे प्रणवत्रयं लिखितम्, तदसङ्गतम् । ननु "प्रणवं पूर्वमुच्चार्य सर्वभोगैककारणम्। नेम्यन्तं बिन्दुसंयुक्तं त्रिधेदं पदमप्यथ ॥" इत्यत्र प्रणवं, नेम्यन्तं हकारम्, इदं पदं च त्रयमपि त्रेधा समुच्चार्येत्यर्थः सङ्गत एवेति चेन्न, "प्रणवान्ते त्रिधा योज्य प्राणं व्योमविभूषितम् । इदमिदमिदं पश्चात् पदं पद्यात् षडक्षरम् । गृहाण च ततः स्वाहा मन्त्रः पञ्चदशाक्षरः ॥" इति जयाख्ये स्पष्टमुक्तम् । तन्मूलमनुसृत्यैवात्र पारमेश्वरे लक्ष्मीतन्त्रे चायं मन्त्रः प्रतिपादितः । अतो मूलाविरोधेनार्थस्य वर्णनीयत्वात्, 'प्रणवं पूर्वमुच्चार्य' इत्यत्र प्रणवस्य सकृदुच्चारणमेवेति बोध्यमायुष्मता ।

[स्नानासनोपचाराः]

भगवानथ विज्ञाप्य कृत्वा तत्पादगौ करौ ।
स्पुटीकृतं मया देव त्विदं स्नानवरं त्वयि ॥ १४० ॥
सपादपीठमपरं शुभं स्नानासनं महत् ।
आसादयाशु स्नानार्थं मदनुग्रहकाम्यया ॥ १४१ ॥

camphor, pounded and treated as superior sandal, *tāmbūla* of the best kind with areca nut are to be offered. Then he shall offer himself with sons and wife by prostrating with eight limbs, with a devoted mind.

(Attendance in Snānāsana)

140-158. Bhagavān is to be requested placing the two hands at His feet (with the words): "O God! This best bath is extensively prepared by me for you. Here is another big and good seat for bath with a foot-stool. Please occupy it quickly to take bath with a desire to do favour to me". After thus making a request, three ways[54] are to be adopted. Two seats, as Snānāsana, are to be offered to God who has come there for bath and then the foot-stool.

54. The three ways; see note III.12.

विज्ञाप्यैवं मज्जनार्थं कृत्वा मार्गत्रयं ततः ।
स्नानासनं निवेद्याथ देवस्य द्वितयं तु वै ॥ १४२ ॥
स्नानार्थमवतीर्णस्य पादपीठमनन्तरम् ।
भक्तिनम्रेण शिरसा दद्यादर्घ्यं तु मूर्धनि ॥ १४३ ॥
विनिवेद्य ततो हैमं सुरत्नं च प्रतिग्रहम् ।
तद्याद्वै पाद्यकलशात् पाद्यं पादाम्बुजद्वये ॥ १४४ ॥
शुभे च पादुके चाथ तदन्ते स्नानशाटकम् ।
सुगन्धशालिसंपूर्णं मात्रार्थं पात्रमुत्तमम् ॥ १४५ ॥
दर्पणं पूर्णचन्द्राभं गन्धतोयमनन्तरम् ।
पाणीनां क्षालनार्थं तु पादपीठं ततः शुभम् ॥ १४६ ॥
दन्तकाष्ठं च तदनु मुखशुद्धिप्रतिग्रहम् ।
जिह्वानिर्लेखनं चैव मुखप्रक्षालनं तु वै ॥ १४७ ॥

प्रीतिमन्त्रस्तु श्रीसात्वत एव द्वितीयपरिच्छेदे उक्तः ।'प्रणवद्वितयं चोक्त्वा प्रीयतां मे परः प्रभुः' इति। तथैवोक्तं लक्ष्मीतन्त्रेऽपि - ''ॐ ॐ प्रीयतां भगवान् वासुदेव इति ब्रुवन्'' इति । अत्र सङ्कल्पादिमन्त्रेषु तत्तदुपचारशब्दानां तत्तल्लिङ्गानुसारेण प्रयोगः कार्यः । तथोक्तं लक्ष्मीतन्त्रे -

''आभिरर्घ्याद्भिरित्येवमाभिः पाद्याद्भिरित्यपि । * आभिराचमनीयाद्भिः स्नानीयाद्भिरीतीदृशम् ॥

पुनराचमनं चैव अभ्यङ्गार्थमनन्तरम् ।
तैलं बहुसुगन्धं च चूर्णं गोधूमशालिजम् ॥ १४८ ॥
रजनीचूर्णसम्मिश्रमीषत्पद्मकभावितम् ।
देयमुद्वर्तनार्थं तु चमर्षीं तदनन्तरम् ॥ १४९ ॥
स्नानार्थं स्वषसंयुक्तं तोयमुष्णमनन्तरम् ।
चन्दनं मुखलेपार्थं घृष्टं कर्पूरभावितम् ॥ १५० ॥
पञ्चविंशतिभिः कुम्भैः ततः संस्नापयेद्विभुम् ।
गव्यं प्रभूतं स्नानार्थं क्षीरं दधि घृतं मधु ॥ १५१ ॥

* मुद्रितकोषे - ''आभिराचमनीयाभिः अर्हणीयाभिरित्यपि ।
तर्पणीयाभिरद्भिश्च स्नानीयाभिरितीदृशम् ॥'' इति दृश्यते ।

Arghya is to be offered on His head being bent with devotion. A vessel made of gold with good gems must then be offered. *Pādya* is to be given at the two lotus-like feet from the pitcher of (intended for) *pādya*. Splendid sandals are to be offered and then a cloth for bath is to be given. A good vessel is to be given for *mātrā*,[55] filled with fragrant *śāli* rice, then a mirror shining like the full-moon and then water mixed up with sandal paste, for washing the hands. Splendid foot-stool, then a small piece of wood[56] for cleaning the teeth with a vessel (to contain) the water used to clean the face and a twig for scratching[57] the tongue (so as to remove the dirt) and a vessel (with water) for washing the face.

Ācamana (water) is to be given after this for oil[58] bath and (the following to be given) very fragrant oil, powder of wheat and *śāli* rice mixed up with turmeric powder[59] and a little *Padmaka, Camaṣī*[60] for kneading the body, then hot water with *svaṣa*[61] for bath and sandal paste for smearing the face, with pounded camphor. Bath must be given (with water) with twenty-five

55. *mātrā*: cooked rice mixed with curds.
56. *dantakāṣṭha:* a small piece of twig. This may be from the mango tree, but shall be only from a tree which does not exude milk.

    For a brief account of this see *Param. S.* II.61b-62a.
57. *nirlekhana:* to rub for getting rid off any greasy substance there.
58. *abhyaṅga:* rubbing with any unctuous substance, like oil.
59. *rajanīcūrṇa:* turmeric powder.
60. *Camaṣī*: a substance with good odour. The reading *Masi* in *Param. S*, VI.135 does not make sense.
61. *Svaṣa:* this reading gives no sense. The readings *khaḷi* in *SS.* VI.34b and *khali* in Paus. VI.316 mean sediment of oil. This may be admitted.

ऐक्षवं तु रसं हृद्यमभावे शर्करोदकम् ।
धात्रीफलोदकं चैव लोध्रतोयमनन्तरम् ॥ १५२ ॥

प्रतिसंङ्कल्पयोर्वाच्य इमा अर्घ्या इतीदृशम् । वाच्यं प्रदानवेलायां यथालिङ्गमिति क्रमः ॥'' इति ।

एवं मन्त्रासनोपचारानुक्त्वा स्नानासनोपचारानाह- **भगवानथ विज्ञाप्य** इत्यारभ्य **कुर्याद्देवस्य मूर्धजम्** इत्यन्तैः। 'कृत्वा तत्पादगौ करौ' इत्यत्र पारमेश्वरे विशेष उक्तः -

''कृत्वाभ्यर्च्यादिदेवस्य पाणिना दक्षिणं पदम् । दक्षिणेनाथ वामेन वामं सङ्गृह्य मन्त्रतः ॥'' इति ।

मार्गत्रयम् स्नानासनस्य शुद्धित्रयं पूर्वोक्तम् । दन्तकाष्ठम् इत्यत्र पारमेश्वरे ''दन्तकाष्ठं च तदनु कर्मण्यक्षीरवृक्षजम्'' इत्युक्तम् । कपिञ्जलेऽपि - ''चूतदण्डेन देवस्य दन्तधावनमाचरेत्'' इति । तच्च हेमादिमयमपि ग्राह्यम् । तदुक्तं पारमेश्वर एव द्वितीयेऽध्याये -

''षोडशाङ्गुलिदीर्घैस्तु वक्रग्रन्थिविवर्जितैः । हेमादिनिर्मितैर्वापि कुशदर्भादिभिस्तथा ॥'' इति ।

रक्तचन्दनतोयं च रजनीनीरमुत्तमम् ।
ग्रन्थिपल्लववार्येव ततस्तु तगरोदकम् ॥ १५३ ॥
प्रियङ्गुवारि तदनु मांसीजलमतः परम् ।
सिद्धार्थकोदकं चाथ सर्वौषधिजलं ततः ॥ १५४ ॥
पत्रपुष्पोदके चैव फलबीजोदके त्वथ ।
गन्धोदकं च तदनु हेमरत्नजलं ततः ॥ १५५ ॥
पुण्यतीर्थसरित्तोये केवलं तदनन्तरम् ।
स्नानार्थं कल्पितेनैव उदकेन विमिश्रितम् ॥ १५६ ॥
योक्तव्यं क्रमशो ह्येतदर्घ्यपुष्पसमन्वितम् ।
अन्तरान्तरयोगेन स्नानानां च महामते! ॥ १५७ ॥
क्षालनं चार्घ्यकलशादर्घ्यदानसमन्वितम् ।
यद्वा द्विषट्ककलशैर्नवभिर्वाऽभिषेचयेत् ॥ १५८ ॥

pitchers. Milk, curds and ghee all in large quantity obtained from cow, honey, sweet and dainty juice of sugar cane[62] and water mixed up with sugar, if it is not available, water separately mixed up with *dhātri* fruit, *Lodhra*, water red sandal, turmeric (powder),[63] sprouts of *granthi*,[64] then *Tagara*,[65] *Priyaṅgu* (seeds), *māṃsī*, white mustards, water containing all medicinal herbs, leaves and fruits, fruits and seeds, sandal paste, gold and gems placed there, brought from the rivers flowing in holy places, mere water, (all) mixed up with the water kept for bath, in due order, O good minded person! mixed up at intervals with *arghya* and flowers, washing, accompanied by the offering *arghya* from the pitcher of *arghya* or bath (to be given with water in twelve or nine pitchers).

62. *aikṣava*: produced from sugarcane.
63. *rajanī*: turmeric; *rajanīnīra*: water with turmeric powder (dissolved).
64. *granthipallava:* sprouts of a tree having knots. The commentator gives *sthauṇeya* as the equivalent of *granthi*. The word *sthauṇeya* means the name of a perfume.
65. *Tagara:* a tree from which fragrant powders are prepared. Here the powder is meant.

[स्नानानन्तरनीराजनक्रमः]

ततः स्नानीयशेषेण हेमादिद्रव्यनिर्मितम् ।
सम्पूर्णमम्भसा कुम्भं हरिद्राशालितण्डुलैः ॥ १५९ ॥
सुपिष्टैरुपरिष्टाच्च लिप्तं युक्तं स्रगादिना ।
पाणौ कृत्वा तमेकस्मिन्नपरस्मिंस्तु मल्लकम् ॥ १६० ॥
धूमायमानं सिद्धार्थैर्भ्राम्य मूर्ध्नि बहिः क्षिपेत् ।

[वस्त्रसमर्पणक्रमः]

सुधौतमहतं चाथ शाटकं विनिवेद्य च ॥ १६१ ॥
कचोदकापकर्षार्थमपरं देहवारिधृत् ।
अधरोत्तरवस्त्रे द्वे गन्धधूपादिवासिते ॥ १६२ ॥

'तैलं बहु सुगन्धं च' इत्यत्र तैलसमर्पणकारः पारमेश्वरे विस्तरेणोक्तो द्रष्टव्यः । रजनीचूर्णम् हरिद्राचूर्णम् । पद्मकम् तथैव प्रसिद्धं वैद्यग्रन्थे । चमषी सुगन्धद्रव्यविशेषः । खली मलनिर्हरणसाधनद्रव्यम्। धात्रीफलम् आमलकम् । लोध्रम् श्वेतलोध्रम् । "गालवः शाबरो लोध्र" इत्यमरः । कर्णाटकभाषायामपि" बिळि लोध्र" । ग्रन्थिपल्लवः स्थौणेयम् । स्कन्धप्लोतं निवेद्याथ सुसूक्ष्ममहतं सितम् ।

[केशशोषणप्रकारः]

शिरःश्यानं ततः कुर्याच्छशिधूपसमन्वितम् ॥ १६३ ॥
कर्पूरचूर्णसम्मिश्रं कुर्याद्देवस्य मूर्धजम् ।

[चित्रादिबिम्बानां स्नपनक्रमः]

एवं हि चित्रपूर्वाणामन्येषां कमलासन ॥ १६४ ॥
सद्रत्नब्रह्मपाषाणवर्जितानां समाचरेत् ।
स्नानार्थं कर्मबिम्बे तु तत्समीपेऽथ दर्पणे ॥ १६५ ॥
स्नानविज्ञापनं कृत्वा कर्मार्चां तस्य सन्निधौ ।
स्नानासने समारोप्य तस्यां सर्वं समाचरेत् ॥ १६६ ॥
तदभावे दर्पणे तु स्नानभोगान् समर्पयेत् ।
चित्रस्थ एवं दद्याच्च भोगानन्यान् यथाक्रमम् ॥ १६७ ॥

(Method of doing Nīrājana after bath)

159-161a. A pitcher made of gold and others (metals) is then to be filled with water that remains after bath and smeared on the top with well-pounded turmeric and *śāli* rice and tied with garlands (on the top). The priest shall hold it in one hand and a vessel made of coconut shell[66] with smoke rising from white mustard in the other (hand), revolve them around the head (of God) and throw them out (away).

(Offering of dress)

161b-163a. A newly washed cloth (garment) is to be given, and another for drying water from the hairs[67] and to hold[68] (dry) the water from the body. Then two cloths are to be given (to be worn) in upper and lower (parts of the body) scented with fragrant incense and an unwashed cloth of fine texture for (use in) the shoulder.

(Way of drying up the hair on the head)

163b-164a. The drying up of the head and the hair must be done with camphor[69] and incense mixed up with the powdered camphor.

(Giving bath to the figures in pictures etc.)

164b-169a. O lotus-seated one! One should attend to this work in this way to other (deities) in portrait (picture) and others except those made of good gems and Brahmaśilā.[70] Request for bath shall be made to Karmabimba or in a mirror which is near by. The Karmabera shall be placed on Snānāsana and attened to all (the items) to that (Karmārcā). In its (Karmārcā) absence,

66. *Mallaka:* a vessel made of coconut shall.
67. *Kaca:* hair on the head.
68. *śyāna:* drying up.
69. *śaśi:* camphor.
70. brahmapāṣāṇa: Brahmaśilā.
For information on this see *LT.* XIXL.104; *JS.* XX.274b-276, 296-306, 319-323.

तदभावे च तान् सर्वान् पाणिनादाय चेतसा ।
निवेदयेन्मण्डलादिष्वेवं भोगनिवेदनम् ॥ १६८ ॥
प्रोक्षणं यावता कुर्यादर्घ्याद्यैरवशिष्टकैः ।

"ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्थौणेयकुक्कुरे" (२.४.१३२) इत्यमरः । तगरम् कर्णाटकभाषायां गन्धतगरु। प्रियङ्गुः फलिनी, कर्णाटकभाषायां नेलगुळ्ळ "प्रियङ्गुः फलिनी फली" (२.४.५५) इत्यमरः। ननु "स्त्रियौ कङ्गुप्रियङ्गू द्वे" इत्यप्यमरवाक्यमस्ति, विनिगमनाविरहात् कङ्गुरेव गृह्यतामिति चेन्न। अस्मिन् स्नपने बीजवारिणि कङ्गोः सत्वात्, अत्रत्य प्रियङ्गु शब्दस्य पूर्वोत्तरयोः गन्धद्रव्यसाहचर्याच्च फलिनीपरत्वमेवाङ्गीकार्यम् । सर्वौषधिजलपत्रोदकपुष्पोदकफलोदकबीजोदकगन्धोदकरत्नोदकानां द्रव्यविवरणं स्नपनाध्याये वक्ष्यमाणं ज्ञेयम् । अत्रापेक्षितकलशाधिवासादिकमपि तत्रैव वक्ष्यति । एतत्पञ्चविंशतिकलशाभषेचनमन्त्रास्तु दमनिकोत्सवप्रकरणे वक्ष्यमाणा ज्ञेयाः। अत्र नित्यस्नानत्वादङ्कुरादिकं न कार्यम् । तथोक्तं पाद्मे – "नित्ये च स्नपनेनापि कौतुकं नाङ्कुरार्पणम् । निशाचूर्णैर्न स्नपनमिष्यते मण्डपस्थलम् ॥" इति ।

[भद्रासनशोधनक्रमः]

प्रणालभागादपरं स्थानं भद्रासनात्तु वै ॥ १६९ ॥
भूरिनीरघटैः शुद्धं कृत्वा तत्रावतार्य च ।
सपीठं भगवद्बिम्बं तद्विना वार्चितं यदि ॥ १७० ॥
खस्थितं[४] भावयेद्देवं निःशेषं क्षालयेत्ततः ।

अपरस्मिंस्तु मल्लकम् इत्यत्र, **मल्लकम्** शरावः । शिरःश्यानम् केशशोषणम् । शशिधूपः कर्पूर-धूपः। चित्रादिबिम्बानां स्नपनप्रकारमाह- **एवम्** इति पञ्चभिः । भद्रासनशुद्धिमाह- **प्रणालभागात्** इति द्वाभ्याम्। प्रणालभागात् भद्रासनादपरं स्थानं भूरिनीरघटैः शुद्धं कृत्वा तत्र सपीठं भगवद्बिम्बमवतार्य निःशेषं क्षालयेत्; भद्रासनमपि क्षालयेदित्यर्थः । तद्विना बिम्बं विना । **अर्चितं यदि** केवलभद्रासनमेवार्चितं यदीत्यर्थः। तदा देवं खस्थितं भावयेत् देवमाकाशस्थितं ध्यात्वा निःशेषं क्षालयेत् इति योजना; भद्रासनोपरि भगवत्युपविष्ट एव तत्क्षालनानौचित्यादिति भावः । एवमेवोक्तं लक्ष्मीतन्त्रेऽपि –

"अन्तरीयोत्तरीये द्वे सुधौते वाससी शुभे । भाविते गन्धधूपेन दद्याद्भद्रासनं ततः॥ शोषयेत् पूर्णकुम्भैस्तु खस्थितं भावयेद्धरिम् ॥" इति ।

४. खप्लुतम् - A

the enjoyable bath shall be done to the mirror. Similarly, other enjoyable (services) are to be duly done to the figure in the picture. In its absence all these are to be taken in the hand and offer them mentally in the *maṇḍala* and others themselves. Offering the enjoyables and sprinkling are to be done with the remaining *arghya* etc.

(Method of cleaning the Bhadrāsana)

169b-171a. Clean a place different from the drain[71] (outlet for water) in the Bhadrāsana using the jars filled with profuse water. He (the priest) shall bring down the idol of Bhagavān with the pedestal there of if worship was done without it and think of (the Lord) as remaining in the sky. Then he should cleanse it fully.

(Arrangement again for arghya).

171b-173a. Arrangement must be made as before for four pitchers filled

71. *Praṇāla*: outlet for water, drain.

पारमेश्वरेऽपि "प्रणालभागात्" इत्यादिसात्वतोक्तश्लोकद्वयमेवोक्तम्। तद्व्याख्याने तु "तद्विना बिम्बं विना। कूर्चदर्पणादिष्वर्चितं यदि, पात्रस्थमन्त्राणामपि खस्थितमित्येष एव न्याय" इति लिखितं, तद्विचारणीयमर्थसङ्गतिज्ञैः।

[पुनरर्घ्यादिकल्पनम्]

भूयो गन्धोदकेनैव पूर्वं कुम्भचतुष्टयम् ॥ १७१ ॥
स्नानकुम्भं विनान्येषां प्राग्वत् कार्या हि कल्पना।
हृन्मन्त्रेण चतुर्णां तु कुर्याद्वै दिव्ययोजनम् ॥ १७२ ॥
सास्त्रेण मूलमन्त्रेण सर्वं तच्चाभिमन्त्र्य तु।

[अलङ्कारासनोपचाराः]

मार्गत्रयं क्रमात् कृत्वा विनिवेद्यासनं ततः ॥ १७३ ॥
तृतीयं रत्नखचितं तत्रस्थं परमेश्वरम्।
विभाव्यालङ्कृतं भक्त्या भोगैः स्रक्चन्दनादिभिः ॥ १७४ ॥
समभ्यर्च्यार्घ्यपाद्येन पादुकाभ्यामनन्तरम्।
देयमाचमनं भूयः पादपीठं तथैव च ॥ १७५ ॥
समालभ्य सुगन्धेन भक्तितश्चन्दनादिना।
संवीज्य चन्दनेनैव मायूरेण ततेन च ॥ १७६ ॥

पुनरर्घ्यादिकल्पनमाह- **भूयः** इति द्वाभ्याम्।

अथालङ्कारासनोपचारानाह- **मार्गत्रयम्** इत्यारभ्य **स्तोत्रमन्त्रैर्नमस्कारैः प्रणामैश्च प्रदक्षिणैः** इत्यन्तैः। अत्र स्तोत्रमन्त्राः जितन्तादयो ज्ञेयाः। तथोक्तं पारमेश्वरे -

"स्तोत्रमन्त्रजपं कुर्याज्जितन्ताद्यं महामते!। व्यस्तं चैव समस्तं च वाक्ययुक्तं विशेषत ॥" इति। प्रदक्षिणस्य समसङ्ख्याकत्वं तत्काले पुष्पाञ्जलिप्रक्षेपणं चोक्तं तत्रैव - "ततः प्रदक्षिणं कुर्यात् चत्वारि द्विजसत्तम। कुसुमक्षेपसंयुक्तं चतुर्दिक्षु समं तु वै ॥" इति।

केशप्रसादकृत्कूर्चं पुष्पताम्बूलकर्तरीम्।
निवेद्य देवदेवाय दुकूलवसने सिते ॥ १७७ ॥

उपवीतं सोत्तरीयं मकुटाद्यमनन्तरम्।
पादनूपुरपर्यन्तमलङ्करणमुत्तमम् ॥ १७८ ॥

with scented water except the pitcher for bath. The articles should be mixed up in the four (pitchers) using the Hṛdayamantra. All this must be consecrated with the Mūlamantra together with the Astramantra.

(Services in the Alaṅkārāsana)

173b-191a. The three ways[72] are to be adopted and then He is to be offered a third seat inlaid with gems. Thinking the Supreme Lord to be there, He shall be decorated with devotion using the enjoyables like garland, sandal paste and others. Adoring (Him) with valuable *arghya* and *pādya*, the sandals are to be given and again *ācamana* and foot-stool. Smearing (the idol) devotedly with very fragrant sandal paste and others, He should be fanned with well-spread out (fan made with) peacock's plume scented with sandal paste. He (God of gods) should be offered a bunch of *darbha* for cleaning the hairs, flowers, *tāmbūla* and scissors, two white silken garments, sacred thread, upper cloth, crown and then best ornament extending up to the anklets for the feet, attractive garland for the head together with a band (to keep it intact), with threads in the garland extending from the ears up to the feet and splendid bracelet. He shall be given a wrist band[73] made of white thread varieagated with minerals, flowers and others woven and filled in between with soft cotton, collyrium with the needle, scented *tāmbūla*,

72. Three ways

73. *Pratisara:* thread tied round the wrist on specific occasions like marriage, *upanayana* and others and also in conducting special festivals in temples.

विचित्रं हि शिरोमाल्यं वेष्टनेन समन्वितम् ।
स्रग्दामसूत्रसम्बद्धमाकर्णाच्चरणावधि ॥ १७९ ॥
रुचिरं कङ्कणं चाथ दद्यात्प्रतिसरं ततः ।
धातुभिः कुङ्कुमाद्यैर्वा विचित्रं सितसूत्रजम् ॥ १८० ॥
पूरितं मृदुतूलेन ग्रथितं चान्तरान्तरा ।
अञ्जनं सशलाकं च ताम्बूलं गन्धभावितम् ॥ १८१ ॥
ललाटतिलकं हैमं मुखवासं सरोचनम् ।
कर्णावतंसके पुष्पे मण्डनं दर्पणं महत् ॥ १८२ ॥
प्रकरं चित्रकुसुमैर्दीप्तरत्नप्रभोज्ज्वलैः ।
प्रभूतैस्तु महाज्वालैस्तिलतैलाज्यपूरितैः ॥ १८३ ॥
अभुक्ताहतसुश्वेतरचितैर्वर्तिवेष्टितैः ।
ग्रन्थीकृतत्वगेलाऽद्यैः पूजयेत्तदनन्तरम् ॥ १८४ ॥
कर्पूरचूर्णसम्मिश्रं सुगन्धि मधुरं बहु ।
घृष्टधूपसमायुक्तं गुग्गुलं धूपयेच्छुभम् ॥ १८५ ॥
सह घण्टारवै रम्यैश्चाल्यमानेन बाहुना ।
उपानहौ सितं छत्रं शिबिकां च रथादि यत् ॥ १८६ ॥

पुष्पमालिकासमर्पणानन्तरमपि पुष्पाञ्जलिसमर्पणमुक्तं लक्ष्मीतन्त्रे - "मकुटाद्यालङ्काराः प्रदेयाः परमात्मनः[५] ।

स्रजो नानाविधाकाराः सात्विकैः कुसुमैश्चिताः ॥ पुष्पाञ्जलिः पदद्वन्द्वे प्रकारः सुमनश्चयैः ।" इति ।

वाहनं गजपर्यन्तं सपताकं खगध्वजम् ।
सितासितौ चामरौ तु मात्रावित्तमनन्तरम् ॥ १८७ ॥
जानुनी भूगतौ कृत्वा शिरसावनतेन तु ।
आदायोत्तानपाणिभ्यां विनिवेद्य जगत्प्रभोः ॥ १८८ ॥
औपचारिकभोगानामेतेषां पूरणाय च ।
भेरीमृदङ्गशङ्खाद्यैर्जयशब्दसमन्वितैः ॥ १८९ ॥

५. परमाद्भुताः - इति मुद्रितपुस्तके ।

ornamental mark made of gold for the forehead; *mukhāvāsa*[74] with *gorocana,*[75] flowers to adorn the ears, big decorated mirror, and expanse[76] with varieagated flowers radiant with the splendour of refulgent gems, lamps huge with high flames filled with seasamum oil and ghee, twined with wicks unused, unsoiled and very white. He shall then be worshipped with clove and cardamom tied together. The splendid profuse *guggulu* shall be fumigated mixed up with the powder of camphor, very fragrant, sweet together with pounded incense—all with pleasant sound of the bell moved to and fro with the hand. He must be offered two sandals, white umbrella, palanquin, chariot and others, vehicles upto (including) elephant, Garuḍa[77] flag with the banner white and black chowries and celebrated (best) *mātrā,*[78] are to be offered to the Lord of the world touching the ground with the two knees, head best and taking them with upturned palms. In order to complete these enjoyments of services,[79] adoration shall be undertaken using kettle-drum, mṛdaṅga, conch and others together with uttering the words 'hail', music, various kinds of dances along with the stringed musical instruments, flutes,

74. *mukhavāsa:* powder for the mouth to scent the breath.
75. *gorocana:* bright yellow aspiment prepared from the bile of the cow.
76. *Prakara:* expause: an area where something is spread out and here flowers are strewn in a particular spot. When it is said that *prakara* of flowers is stated to be offered to God, what is meant is a patch containing flowers strung together or nosegay is to be offered to God.
77. *khagadhvaja:* flag containing the emblem of a bird (*kha*—sky; *ga*—going through). The bird must be Garuḍa here.
78. *mātrā:* see under 55
79. *Aupacārika bhoga:* enjoyable services intended to honour.

गीतकैर्विविधैर्नृत्तैस्तन्त्रीवाद्यसमन्वितैः ।
वंशैः शृङ्गैस्तथा हास्यैरन्यैश्श्राव्यैश्च पूजयेत् ॥ १९० ॥
स्तोत्रमन्त्रैर्नमस्कारैः प्रणामैश्च प्रदक्षिणैः ।

[स्थलसङ्कोचे मानसिकप्रणामः]

सङ्कटे सति भूभागे भगवत्यग्रतः स्थिते ॥ १९१ ॥
धिया नमस्कृतिं कुर्याद्बध्वा तु करसम्पुटम् ।
हृद्देशे मूर्धकम्पैस्तु स्मरन् सर्वेश्वरं हरिम् ॥ १९२ ॥

एवं मालिकासमर्पणानन्तरं पुष्पसमर्पणं पारमेश्वरेऽप्युक्तम् – "मुक्तपुष्पं ततो दद्याद्यथाकाल-समुद्भवम् ।" इति । एवं प्रदक्षिणान्तमलङ्कारासनोपचारानन्तरमलङ्कृतप्रश्न उक्तः पारमेश्वरे —

"एवं प्रदक्षिणी कृत्वा क्षिप्त्वा पुष्पाञ्जलिं ततः । सुस्नातादित्रयं पृच्छेद्भगवन्तं तदापि च ॥" इति ।

सुस्नातादिप्रश्नः – 'सुस्नादितोऽसि, स्वलङ्कृतोऽसि, सुभुक्तोऽसीति' तत्तत्कर्मान्तैः भगवन्तं पृच्छे-दित्यर्थः ।

स्थलसङ्कोचे केवलाञ्जलिं बध्वा मानसिकप्रणामं कुर्यादित्याह– **सङ्कटे** इति सार्धेन ।

[गर्भगेहे प्रदक्षिणनिषेधः]

अन्तर्गर्भगृहे विष्णोर्गर्भद्वारार्धमण्डपे ।
प्रणिपातगणं कुर्यात् प्रदक्षिणगणं विना ॥ १९३ ॥

[गर्भगृहाद्बहिरुत्सवबिम्बादिस्थापनम्]

सङ्कटे सति तद्देशे बाह्ये तु मुखमण्डपे ।
स्थापयेच्चलबिम्बानि तत्रापि सति सङ्कटे ॥ १९४ ॥
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
स्थानं सुविस्तृतं कृत्वा प्रासादाग्रं च वर्ज्य दिक् ॥ १९५ ॥
दिक्त्रयेऽभिमते कुर्याद्विदिक्ष्वभिमतेषु च ।
खलूरिकाप्रदेशे वा सुदेशे सुपरीक्षिते ॥ १९६ ॥
स्थापयेद्विधिना यात्राबिम्बं देवीसमन्वितम् ।
अन्यानि सर्वबिम्बानि न बहिः स्थापयेत् क्वचित् ॥ १९७ ॥
मूलबिम्बं समभ्यर्च्य पुरा नीराजनान्तिमम् ।
पश्चाद्बहिः स्थितान् बिम्बान् पूजयेत्तु यथाविधि ॥ १९८ ॥

śṛṅgas, comic acts and other sweet (for the ear) eulogistic mantras, obeisance, prostrations and circumambulations.

(Mental obeisance in a place that is limited)

191b-192. When the region (ground) is crowded (contracted), obeisance must be done in front of Bhagavān, mentally, (through intellect), forming the folding of the palms in the region of the heart, recollecting Hari, the Lord of all and shaking the head.

(Circumambulation if forbidden in the sanctum sanctorum)

193. Number of prostrations shall be done, without circumambulation within the sanctum sanctorum and Ardhamaṇḍapa[80] at its entrance.

(Utsavabera and others are to be installed outside the sanctum sanctorum)

194-198. When that place is crowded (contracted) the movable idols are to be installed outside in the Mukhamaṇḍapa.[81] If that is also crowded, the processional idol is to be duly installed with the goddess in the first or second enclosure providing the place extended, avoiding the direction in front of the temple, in the other quarters as desired, and in the intermediate quarters as desired, or in the region of annexure,[82] or a good place that is well scrutinised. All other idols should not be placed anywhere outside (the area). The Mūlabera must be worshipped at first ending with *Nīrājana*. The idols that are outside (that place) are to be worshipped afterwards according to rule.

80. Ardhamaṇḍapa: half-pavlion next to the main shrine.

81. Mukhamaṇḍapa: pavilion in front of *garbhagṛha*.

82. *khalūrikā*: annexe, partour.

[नीराजनविधिः]

एवं प्रदक्षिणान्तं च देवमभ्यर्च्य वै ततः ।
नीराजयेद्देवदेवं तद्विधानमिहोच्यते ॥ १९९ ॥

[सात्त्विकादिभेदेन नीराजनस्य त्रैविध्यम्]

नीराजनं तु त्रिविधं सात्त्विकादिविभेदतः ।
स्नानान्ते भोगयज्ञान्ते द्वितयं सात्त्विकं भवेत् ॥ २०० ॥
सायङ्काले प्रतिदिनं कुर्याद्राजससंज्ञितम् ।
पूजायां दीपदानाग्रे नैवेद्यान्तेऽपि तामसम् ॥ २०१ ॥

गर्भगेहे प्रदक्षिणनिषेधमाह- **अन्तः** इत्यादिना ।

स्थलसङ्कोचप्रसङ्गाद्गर्भगेहाद्बहिरुत्सवबिम्बादिस्थापनं तदर्चनं समयं चाह- **सङ्कटे सति** इति पञ्चभिः।

एवं प्रासङ्गिकं परिसमाप्य प्रकृतनीराजनविधिमाह-

॥ एवम् इत्यारभ्य यावदध्यायपरिसमाप्तिः ॥

[एकस्मिन्प्रासादे एकस्यैव कर्तव्यत्वं, प्रासादभेदेन सात्त्विकादिव्यवस्था च]

कुर्यात् प्रासाद एकस्मिंस्तेषामेकं न तु त्रयम् ।
स्वयं व्यक्ते तथान्यैश्च[६] विबुधैश्च प्रतिष्ठिते ॥ २०२ ॥
प्रासादे मुनिमुख्यैश्च सात्त्विकाख्यं समाचरेत् ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः स्थापिते राजसं भवेत् ॥ २०३ ॥
शुद्रैस्तु स्थापिते स्त्रीभिः तामसाख्यं समाचरेत् ।

[सात्त्विकनीराजनस्य स्नानभोगान्ते कर्तव्यत्वप्रकारः]

सात्त्विकस्य विधानं तु शृणुध्वं मुनिपुङ्गवाः ॥ २०४ ॥
कर्तव्यं स्नानभोगान्ते यत्तदुक्तं पुरैव तु ।

[अलङ्कारासनान्ते कर्तव्यप्रकाराः]

अलङ्कारासनान्ते यत्कर्तव्यं तदिहोच्यते ॥ २०५ ॥
कृतं स्वर्णादिभिर्द्रव्यैः कुम्भमापूर्य वारिभिः ।
अर्घ्यपात्रोद्धृतैर्यद्वा केवलैर्गालितैः पुनः ॥ २०६ ॥
अन्तः सिद्धार्थकान् क्षिप्त्वा कण्ठे कुर्यादलङ्कृतिम् ।
अश्वत्थपल्लवैः स्रग्भिश्चन्दनेनाक्षतैरपि ॥ २०७ ॥

६. अन्यैस्तु - C

(Method of doing Nīrājana)

199. God must be thus worshipped upto circumambulation and then God of gods should have *Nīrājana.* Its process is now given.

(Three kinds of Nīrājana as Sāttvika and others)

200-201. *Nīrājana* is of three kinds as Sāttvika and other kinds: (Doing it) at the end of bath and of the enjoyable worship are the two kinds of the Sāttvika kind. That is called Rājasa which is done everyday in the evening.

Nīrājana done during worship before offering the light and at the end of food offering is Tāmasa.

(Only one (of them) is to be done in one (kind) of temple and determination of the Sāttvika and others according to the difference in the temples)

202-204a. One (kind) shall be done in one (kind) of temple and shall not (all) the three. The Sāttvika kind shall be done in the self-manifested temple, installed by others the learned and eminent sages; the Rājasa kind in that which is installed by the Brahmins, Kṣatriyas and Vaiśyas and the Tāmasa kind in that installed by Śūdras and women.

(Method of doing Nīrājana of the Sāttvika kind at the end of pleasurable bath)

204b-205a. O eminent sages! Listen to the way of (doing) the Sāttvika kind. What was mentioned before at the end of the enjoyable bath (is to be done).

(Acts to be done at the end of Alaṅkārāsana)

205b-209. Here is said what is to be done at the end of Alaṅkārāsana. The pitcher, which is made of substances like gold and others, is to be filled up with waters, taken from the *arghya* vessel or merely distilled. White mustards are to be thrown within it. The neck of that (pitcher) is to be decorated with the sprouts of the fig tree, garlands, sandal paste and *akṣata,* O Brahmins! the other parts (of the pitcher) are to be smeared with grounded turmeric on

अन्यत्र रजनीपिष्टैर्लेपयेत् सर्वतो द्विजाः ।
तदास्ये मल्लकं पुष्पं सम्पूर्णं तु नियोजयेत् ॥ २०८ ॥
संस्कृताग्निसमुद्भूतान् पुरा दीपान् प्रदीप्य तु ।
विभवेच्छानुरूपेण चतुर्विंशतिकान् द्विजाः ॥ २०९ ॥

[पाकस्थानाद्दीपानयनप्रकारः, तदनन्तरकृत्यानि]

पाकस्थानात्तु वै दीपादुच्छ्रिताच्चतुरङ्गुलैः ।
प्रदीपं मल्लके कृत्वा सकुम्भं विनिवेशयेत् ॥ २१० ॥
अग्रतो देवदेवस्य सदाधारोपरिस्थितम् ।
तमर्घ्यगन्धस्रग्धूपैर्हृन्मन्त्रेण तु पूजयेत् ॥ २११ ॥
केवलं सार्घ्यपुष्पेण साधकस्तदनन्तरम् ।
दद्यादाचमनान्तेऽर्घ्यं मन्त्रेशस्याथ वा द्विजाः ॥ २१२ ॥
अर्घ्यालभनमाल्यानि धूपं चाप्यर्घ्यमेव च ।
दीपकुम्भं तु पाणिभ्यामुद्धृतं परिचारिणा ॥ २१३ ॥
देवस्य दक्षिणं पादमारभ्येतरपश्चिमम् ।
भ्रामयेत्सर्वतोऽङ्गानिएकधा वा द्विधा त्रिधा ॥ २१४ ॥
जपन् वै नेत्रमन्त्रं तु हृन्मन्त्रं वा यथारुचि ।
एवं कुम्भं परिभ्राम्य द्विजेन परिचारिणा ॥ २१५ ॥
शुद्धया योषिता वापि द्वाराद्बाह्ये विसर्जयेत् ।
ततस्तु देवदेवस्य दद्यादर्घ्यं तु मूर्धनि ॥ २१६ ॥
पाकस्थानात्तदर्थं तु दीप आनीयते यदा ।
तदानीं तद्विधानं तु शृणुध्वं मुनिपुङ्गवाः ॥ २१७ ॥
दीक्षिताः सुविनीताश्च सुस्नाताः परिचारकाः ।
वदनं नासिकारन्ध्रे स्थापयित्वाम्बरेण तु ॥ २१८ ॥
सितोष्णीषधराः सर्वे सितचन्दनभूषिताः ।
सौवर्णानि च पात्राणि विततानि यथारुचि ॥ २१९ ॥
राजतान्यथ ताम्राणि आरकूटमयानि च ।
कांस्यानि वापि सम्पाद्य यथावित्तानुसारतः ॥ २२० ॥

all sides; coconut shell and flowers are to be fully kept at its mouth; kindling the lights produced before hand from the consecrated fire, O Brahmins! twenty-four of them according to the wealth (economic condition) and desire (shall be used).

(Method of bringing the light from the kitchen and the acts to be done thereafter)

210-229. A light is to be placed in the coconut shell from the light four inches long from the kitchen. That shall be placed with a pitcher. It shall be placed on a good support in front of God of gods and shall be worshipped with *arghya*, sandal paste, garland and incense using *Hṛdayamantra.*

O Brahmins! after that, the priest shall offer to the Lord of mantras *arghya* with the flowers of *arghya* at the end of *ācamana*, *arghya*, sandal paste and garlands incense and also *arghya*. The pitcher with the light (on it) shall be taken up by the assistant in his two hands; revolve it from the right foot upto the other at God, (illumining) the limbs all round once, twice or thrice, uttering (doing *japa*) the Netramantra or Hṛdayamantra as he likes. The pitcher is to be revolved by a Brahmin assistant, or pure (authorised) woman and kept outside the entrance. Then *arghya* is to be offered on the head of God of gods. When the light is brought from the kitchen for this purpose, what is to be done then, O eminent sages! listen. The initiated, well-disciplined, and assistants, who have taken their bath, shall cover their mouth and the two nostrils with a cloth. They shall wear white turbans, all adorned with white sandal paste. They shall get broad vessels made of gold as they like, or silver or copper or brass[83] or bell-metal according to their riches. They (lamps) shall be one, three, five or seven and never eleven, or may be two, six, sixteen or twenty-four in number. O wise man! one (he) shall

83. *ārakūṭa:* brass.

एकत्रिपञ्चसप्तापि न चैकादश वा तथा ।
द्विषट्षोडश वा यद्वा चतुर्विंशतिसंख्यया ॥ २२१ ॥
पाकालयं समासाद्य तत्राग्नेः संस्कृतात् पुरा ।
तेषां मध्ये वर्तिदीपान् पात्राणां तु महामते ॥ २२२ ॥
चतुरङ्गुलिकोत्सेधान् सघृतान् दीपयेत् पुनः ।
उद्धृत्य तानि पात्राणि करैस्तु परिचारकाः ॥ २२३ ॥
वहेयुः पङ्क्तिबन्धेन तदग्रे गणिकाजनाः ।
गच्छेयुर्भगवद्भक्ताः कुर्वन्तो नृत्तगीतके ॥ २२४ ॥
तदग्रे शङ्खभेर्यादिसमुद्घोषणतत्पराः ।
तदग्रे वेत्रिणेऽस्पृश्यजनोत्सारणतत्पराः ॥ २२५ ॥
गच्छेयुः परितस्तेषां दीपिकाधारिणो जनाः ।
एवं क्रमात् समासाद्य तिष्ठेयुर्देवसन्निधौ ॥ २२६ ॥
अथान्यो दीक्षितो विप्रः कुम्भमापाद्य पूर्ववत् ।
समल्लकं तदूर्ध्वे तु तेष्वेकस्मात् प्रदीप्य तु ॥ २२७ ॥
पाकस्थानादाहृतेषु प्रदीपं विनिवेश्य च ।
सदाधारस्थितं कुर्यात्ततः साधकसत्तमः ॥ २२८ ॥
कुम्भं प्राग्वत् समभ्यर्च्य देवेशं च ततः परम् ।
भ्रामयेत् पूर्ववत् कुम्भं तस्मिन् काले द्विजोत्तमः ॥ २२९ ॥

[**नीराजनकालकृत्यानि**]

ऋगाद्यध्ययनं कुर्युर्द्विजाः प्रागादिदिक्स्थिताः ।
सन्निधौ देवदेवस्य नृत्यं तु गणिकास्तदा ॥ २३० ॥
मङ्गलानि च गीतानि सर्वे गायन्तु गायकाः ।
स्वरेणोच्चतरेणैव स्तुवन्तु स्तोत्रपाठकाः ॥ २३१ ॥
भेरीमृदङ्गशङ्खादीन् घोषयेयुः समन्ततः ।
एवं सर्वत्र वै कुर्यादृगाद्यध्ययनादिकम् ॥ २३२ ॥

[**तदनन्तरकृत्ये द्वैविध्यम्**]

कुम्भमेवं परिभ्राम्य दत्त्वा तत्परिचारिणः ।
हस्तेऽथ दीपपात्राणि दर्शयेदितराणि च ॥ २३३ ॥

go to the kitchen, shall inflame from the midst of fire already got ready, the light in the wicks in the midst of the vessels the wicks four inches long containing ghee. The assistants shall lift those vessels with their hands and carry them. The courtesans shall go in front of them, in a row, the devotees of God shall sing and dance, those who play and sound the conches, kettle drum and others before them, those who wield the canes before them engaged in driving out the untouchables shall go in front. People holding small lamps shall go around them. They shall stand in the vicinity of God, reaching it in this order. Then another Brahmin, who is initiated, shall take a pitcher, as (stated) before, with the coconut shell and inflame the top of it from one of them (lights) brought from the kitchen, place it down. The eminent priest shall place it on a good support. After worshipping the pitcher as before and God after that, that eminent Brahmin shall revolve the pitcher, at that time, as before.

(The acts to be attended at the time of Nīrājana)

230-232. The twice born ones, shall be in the east and other directions and shall recite the ṛk and others (Veda-s). The courtesans shall dance then in the vicinity of God of gods. Let all singers sing auspicious songs. Let the bards (or those who recite the *stotra*-s) praise (God) in louder tones (or notes). Others shall create loud sounds through kettle drum, drums and conches. Thus the recitation of the Ṛgveda and others shall be done everywhere.

(Two kinds of acts that are to be done after this)

233-237. The priest shall revolve the pitchers thus and give them in the hand of the assistant. He shall then show to God the vessels containing lights. After seeing others properly, he shall give *arghya* on the head of God. The assistants, who carry the pitchers and other vessels, shall place them outside the entrance or outside the outer entrance by circumambulating as before

दृष्ट्वा सम्यक्ततो दद्यादर्घ्यं देवस्य मूर्धनि ।
कुम्भपूर्वाणि पात्राणि वहन्तः परिचारकाः ॥ २३४ ॥
प्रदक्षिणक्रमात् सार्धं पूर्ववद्गणिकादिभिः ।
क्षिपेयुर्द्वारबाह्ये वा बाह्यद्वारस्य बाह्यतः ॥ २३५ ॥
अथवा विनियुक्तानि तानि संगृह्य योषितः ।
सुस्नाता धौतवसना द्विजातिभावितात्मनः ॥ २३६ ॥
ललाटतिलकं दत्वा सर्वालङ्कारभूषिताः ।
क्षिपेयुरुदितेनैव वर्त्मना द्विजसत्तमाः ॥ २३७ ॥

[दीपानयने योषितामप्यधिकारः]

अथवा विनियोगात्तु पूर्वं पाकालयादपि ।
योषितो दीपपात्राणि गृहीत्वा प्रोक्तवर्त्मना ॥ २३८ ॥
आनयेयुर्विभोरग्रे कर्तुरिच्छानुरूपतः ।
एवं नीराजनं कुर्यादलङ्कारासनान्ततः ॥ २३९ ॥

[दीपभ्रमणे प्रकारान्तरेण पक्षद्वयकल्पनम्]

अथवा भ्रामयेत् कुम्भं दीपाष्टकसमन्वितम् ।
यद्वा तत्रापि वै कुम्भं साग्निमल्लकसंयुतम् ॥ २४० ॥
धूमायमानं सिद्धार्थैर्भ्रामयेद्दीपवर्जितम् ।

[नीराजने एकबेरबहुबेरविषये भेदः]

एवं नीराजनं प्रोक्तमेकमूर्तेर्द्विजोत्तमाः ॥ २४१ ॥
अनेकमूर्तिपूजायां मुख्यमूर्त्यादितः क्रमात् ।
सर्वासामपि मूर्तीनां दत्त्वाऽर्घ्याद्यं पृथक् पृथक् ॥ २४२ ॥
एकैकेन तु कुम्भेन प्रत्येकमथवा द्विजाः ।
सर्वासामपि कुम्भेन प्राग्वन्नीराजनं चरेत् ॥ २४३ ॥

with the courtesans and others. Or, the women who have well bathed, wearing washed clothes devoted to the twice-born, bearing the ornamental marks in their foreheads, bedecked in all ornaments and who are commanded (to do this), shall take them (pitchers), O Brahmins! and place them in the manner stated above.

(Women also are qualified to bring the lights)

238-239. Or, women shall bring (before hand) the vessels of light according to the way stated above from the kitchen under the direction (of the priest) before the Lord according to the desire of the priest. Thus *Nīrājana* is to be done at the end of (service in) the Alaṅkārāsana.

(Two alternatives are offered to revolve the light in a different way)

240-241a. Or, the pitcher having eight lights could be revolved. Or, the pitcher having fire and coconut shell, with smoke arising from white mustards, could be revolved without light.

(Difference in(doing) Nīrājana in the case of a single idol and many idols)

241b-243. O eminent brahmins! *Nīrājana* is stated (described) thus for a single idol. While doing worship for many idols, *arghya* and others shall be given separately to all the idols in the order beginning from the main idol. O brahmins! *Nīrājana* shall be done to each with pitchers one by one or to all of them with a pitcher as before.

84. *Yogapīṭha:* a pedestal prepared for meditating upon God. It is to be used both in mental worship and external worship.

1. Ādhāraśakti	2. Kūrmakālāgni
3. Ananta	4. Bhū (earth)
5. Milky ocean	6. Padma
7. Yogāsana	8. Kālacakra
9. Avyaktapadma	10. Jīva

The *pīṭha* is to be conceived from that which is at the bottom and others to be one above that in the numeral order mentioned here. *Dharma, jñāna, vairāgya, aiśvarya, adharma, ajñāna, avairāgya* and *anaiśvarya* are the eight deities in the directions beginning from south-east and ending with north-east. These are around the pedestal and deities are mentioned to be stationed in the various corners. For details see Pad. S. Caryā. III.106-118.

[एतत्सहायभूतस्य फलम्]

एवं नीराजनं प्रोक्तं[७] कृतं भगवतो विभोः ।
अनुतिष्ठन्ति साहाय्यं तस्मिन् कर्मणि ये जनाः ॥ २४४ ॥
रजस्तमो विनिर्मुक्ता भवेयुस्ते न संशयः ।

[निगमनम्]

एवं नीराजनं प्रोक्तं सात्त्विकं नाम नामतः ॥ २४५ ॥

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां सात्वतार्थप्रकाशिकाख्यायामीश्वरतन्त्रव्याख्यायां चतुर्थोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरहसंहितायां नीराजनान्तविधिर्नाम चतुर्थोऽध्यायः ॥

७. येन - B

(The fruit gained by him who assists in this)

244-245a. Thus *Nīrājana* has been stated (described) done for the Lord Bhagavān. Those people, who offer their assistance in this work become freed from Rajas and Tamas. There is no doubt (in this).

(Conclusion)

245b. *Nīrājana* called Sāttvika is thus stated (described).

Thus (ends) the fourth chapter called *Nīrājanāntavidhi* in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra.*

पञ्चमोऽध्यायः

भोज्यासनाग्निकार्यविधिः

[भोज्यासनम्]

नारदः -

ततो भोज्यासने देवो भोगैराभ्यवहारिकैः ।
पूज्यः सपादपीठं वै दद्याद्भोज्यासनं विभोः ॥ १ ॥
छन्नं दुकूलतूलोत्थमसूरकवरेण तु ।
आरोपयित्वा प्रागास्यं तत्रस्थे भोजनासने ॥ २ ॥
अर्घ्यं पाद्याचमे दद्यात् प्रतिग्रहसमन्विते ।

[मधुपर्कविधिः]

तर्पणं सम्प्रतिष्ठाप्य वासितं चार्घ्यवारिणा ॥ ३ ॥
अथार्हणजलं स्वच्छं सुगन्धं पात्रतः कृतम् ।
मधुपर्कं दधिमधुघृतयुक्तमनन्तरम् ॥ ४ ॥
समस्तमेवमेकाङ्गं दधि वापि निवेदयेत् ।
शीतलं तर्पणजलमथ चूर्णं पुरोदितम् ॥ ५ ॥
देयं निष्पुंसनार्थं तु पुनराचमनं विभोः ।

[मधुपर्कोत्तरकार्याणि]

स्वलङ्कृतां सुरूपां च स्रग्युक्तां विनिवेद्य गाम् ॥ ६ ॥
ओषधीः शालिपूर्णाश्च स्रक्फलाढ्यं वनस्पतिम् ।

अथ पञ्चमोऽध्यायो व्याख्यास्यते । भोज्यासनसमर्पणमर्घ्यादिकं चाह- **ततः** इति सार्धद्वाभ्याम् । मधुपर्कविधिमाह- **तर्पणम्** इति त्रिभिः । तर्पणार्हणे पूर्वमेव व्याख्याते । मधुपर्कोत्तराङ्गं गोदानादिकमाह **स्वलङ्कृताम्** इति सपादेन । अत्रत्यगोदानस्य मधुपर्काङ्गत्वं कण्ठरवेणोक्तं लक्ष्मीतन्त्रे - "देयमाचमनं पश्चान्मात्रा गौर्माधुपर्किकी" इति ।

नैवेद्यान्याह- **ततः** इति प्रक्रम्य **यजेत्तमजमव्ययम्** इत्यन्तैः । अष्टविधान्नानां विवरणं पञ्चविंशेऽध्याये वक्ष्यमाणं ज्ञेयम् । रसालाभिः हविःपाकप्रकरणे वक्ष्यमाणरसालैः ; यद्वा रसालाभिस्तक्रैः । रसालः स्यान्मार्जिता इति वैजयन्ती । भक्ष्यादीनि व्यक्तमुक्तानि पारमेश्वरे -

CHAPTER V

Procedure for Bhojyāsanāgnikārya

(Bhojyāsana)[1]

1-3a. Nārada: The lord is then to be worshipped in the Bhojyāsana[2] with the enjoyable eatables. Bhojyāsana shall be given to God along with a seat for the foot screened with a good curtain[3] made of bunches of white silk. Placing him to face the eastern direction in that seat, he shall be given *arghya, pādya* and *ācamana*, the latter two with a spittoon.

(Madhuparkavidhi)

3b-6a. After arranging for Tarpaṇa[4] scenting it with the water of *arghya*, the (priest) shall offer the water of *arhaṇa*[5] made clean and of sweet fragrance in the vessel and then Madhuparka[6] made of curds, honey and ghee or all these mixed up to form a single offering or a single one (among them) or curds only. Cool water shall be given for Tarpaṇa, then the powder[7] mentioned before for rubbing the two hands and again *ācamana*.

(Acts to be done after giving Madhuparka)

6b-7a. God shall be given a cow, well-decorated, of fine form and provided, with a garland, medicinal herbs (mixed) with śāli rice, a piece of wood[8] enriched with flowers and fruits.

1. *bhojya*: eatable; *āsana*: seat.
2. a seat for taking food.
3. Masūraka: curtain.
4. Tarpaṇa: see note under IV.52.
5. *arhaṇa*: see note under III.55.
6. Madhuparka: see note under IV.51.
7. Niṣpuṃsana: see note under IV.53.
8. Vanaspati: a fruit bearing tree very rarely having the flowers; *srakphalāḍhya*: rich with garland and fruits; *srak* must mean flower; here the tree could not have been meant but a small stick, a portion of the branch.

"भक्ष्याण्यपूपपूर्वाणि भोज्यानि च फलानि च । लेह्यानि मधुपूर्वाणि चोष्याण्याम्रादिकानपि ॥ पेयानि क्षीरपूर्वाणिअनुपानान्वितानि च ।" इति ।

[नैवेद्यानि]

मूर्तं निवेदयेत् पूर्वं ततः संस्थाप्य तर्पणम् ॥ ७ ॥
प्रच्छादनाम्बरं चैव प्रदद्यादर्हणोदकम् ।
षड्रसप्रभवैर्दिव्यैर्नैवेद्यैः पावनैः फलैः ॥ ८ ॥
गुल[1]खण्डाञ्चितैर्भक्ष्यैर्बहुभिर्घृतपाचितैः ।
गुल[2]मुद्गपयोमिश्रैर्निशाज्यतिलमिश्रितैः ॥ ९ ॥
दधिमिश्रैः सर्पिर्मिश्रैर्मधुस्वादुयुतैः फलैः ।
क्रमादन्नैरष्टविधैरपूपान् विनिवेदयेत् ॥ १० ॥
सरसाभी रसालाभिः पयसा सुश्रितेन च ।
पवित्रैः शीतलैः स्वादुरसगन्धैश्च पानकैः ॥ ११ ॥
भक्ष्यैर्भोज्यैस्तथा लेह्यैः पेयैरन्यैरनेकशः ।
श्रद्धापूतेन मनसा यजेत् तमजमव्ययम् ॥ १२ ॥

[निवेदनसंस्काराः]

एकैकस्मिंस्तु भोगेऽपि प्रोक्षयेदर्घ्यवारिणा ।
छोटिकां मन्त्रसंयुक्तां कृत्वा पाणिद्वयेन तु ॥ १३ ॥
अथ पाणिद्वयेनैव अग्नीषोमात्मकेन तु ।
योग्यतापदवीं नीत्वा मुद्रां कामदुघां ततः ॥ १४ ॥
बध्वा तदमृतीकुर्याद्भोगजालं यथास्थितम् ।
दत्त्वार्घ्यं पुष्पमुपरि संस्पृशेद्विष्णुपाणिना ॥ १५ ॥

तेषां संस्कारमाह– **एकैकस्मिंस्तु** इति त्रिभिः । छोटिका नाम मध्यमाङ्गुष्ठजः शब्दः । मन्त्रसंयुक्ताम् अस्त्रमन्त्रसंयुक्ताम् । विष्णुपाणिर्नाम ज्ञानैश्वर्यशक्तिरूपविष्णुगुणत्रयमिव सुबलवीर्यतेजोरूपगुणत्रयं न्यस्तव्यमिति सिद्धत्वेन ध्यातस्वदक्षिणहस्तः । तथोक्तं पारमेश्वरे महाहविःप्रकरणे –

१. गुड – B
२. गुड – B

(Offerings)

7b-12. Substantial preparations are to be offered at first followed by Tarpaṇa, a garment for covering the body and water for *arhaṇa*; splendid offerings having six flavours[9] made tasty with pieces of jaggery, large quantity of sweets cooked in ghee mixed with jaggery, *mudga* and water mingled with turmeric (powder), ghee and seasamum; ghee mixed up with curds and sweet and dainty fruits. Offerings are to be made with eight kinds[10] of *anna*[11] and cakes of flour, juicy *rasāla*,[12] well-prepared milk, pure, cool, sweet, delicious and sweetly fragrant. Drinks, sweets, eatables and those which are to be licked are also to be offered. The unborn and undecaying lord shall be given drinks several times and shall be adored with a mind purified by faith.

(Dressing the food-offerings)

13-15. Each enjoyable (food-preparation) shall be sprinkled with the water of *arghya* using both the hands, snapping the thumb with the fore-finger uttering the mantra. The *mudrā* called Kāmadughā[13] shall be formed to make it useful using the two hands which are of the nature of fire and moon. The eatables shall then be made (imagined to have become) nectar and shall be touched with Viṣṇupāṇi[14] after offering *arghya* and flowers.

9. *ṣaḍrasaprabhava:* the six flavours are sweet (*madhura*), sour (*amla*), salt (*lavaṇa*), pungent (*kaṭuka*), bitter (*tikta*) and astringent (*kaṣāya*).
10. Eight kinds of *anna*;

    vide: पायसान्नं गुडान्नं च मुद्गान्नं केवलोदनम् ।
    दध्यन्नं च तिलान्नं च निशान्नं सर्वमिश्रितम् ॥
    इत्यष्टधा समुद्दिष्टं हविर्देवस्य सम्मतम् । *ĪS.* XXV.91b-92.

    Five kinds are mentioned in Kālidāsa's *Vikramorvaśīya*: पञ्चविधस्याभ्यवहारस्योपनतसंभारस्य Act II. The five are *bhakṣya, bhojya, lehya, coṣya* and *peya*.
11. *anna*: food which is eaten, from the sense of the root '*ad*' to eat but this sense has become restricted to mean only cooked rice.
12. *Rasāla:* a kind of mango fruit.
13. Kāmadughā mudrā: see note under III.22 & 23.
14. Viṣṇupāṇi: the priest must think that *jñāna, aiśvarya* and *śakti* as present in his right hand as having the qualities of Viṣṇu and *bala, vīrya* and *tejas* as fit to be touched. Flowers are to be imagined as constituting the three qualities, *bala, vīrya* and *tejas*; vide: *JS.* XVI.335a.

''ततः स्वदक्षिणे हस्ते विज्ञानैश्वर्यशक्तयः । स्मर्तव्याः स्वस्वमन्त्रेण भोजकाः करणात्मकाः ॥ तेनाथ विष्णुहस्तेन परमान्नपुरःसरम् । स्पृष्ट्वा स्पृष्ट्वा यथायोगं बद्धया ग्रासमुद्रया ॥ निवेदनीया वै विष्णोरन्नमूर्त्यन्तर-स्थिताः । रसरूपादिभेदोत्थास्तेजोरूपबलात्मकाः ॥'' इति ।

अत्र तेजोवीर्यबलानामन्नमूर्त्यन्तरस्थितत्वोक्त्या स्वदक्षिणहस्ते ज्ञानादिगुणत्रयमिव हविः सुबलवीर्यतेजोरूपगुणत्रयं न्यस्तव्यमिति सिद्धम् । तदप्युक्तं पारमेश्वर एव – ''बलं वीर्यं च तेजश्च त्वर्घ्यपुष्पं समुत्क्षिपेत् । कवचेन च सास्त्रेण नेत्रमन्त्रेण भावयेत् ॥'' इति ।

तत्रैव हविर्निवेदनानन्तरं हविषि विन्यस्तगुणत्रयस्योपसंहारक्रमोऽपि दर्शितः । ''विनिवेद्य च देवाय विन्यस्तान्योदनोपरि । बलवीर्यादिसन्मन्त्रान् रसवीर्यादिवर्जितान् । ओमित्युपाहरेन्मन्त्री ततः संहृति मुद्रया ॥'' इति ।

पारमेश्वरव्याख्याने तु 'विष्णुपाणिना' इत्यत्र ''विष्णुः षाड्गुण्यं पाणौ यस्मिन् सः विष्णुपाणिः तेन'' इति व्याख्यातं, तदशुद्धम् । तत्र बहुव्रीहेरनवकाशात् । हस्ते गुणत्रयस्यैव न्यस्तव्यत्वाच्च ।

[ग्रासमुद्रया निवेदनम्]

सव्येन पाणिनास्पृश्य प्रकोष्ठं दक्षिणस्य तु ।
तेन दक्षिणहस्तेन अग्रसङ्कुञ्चितेन तु ॥ १६ ॥
निवेदयेत् ततो विप्राः शिरसावनतेन तत् ।

[अङ्गभोगानामसन्निधाने तेषां मनसा निवेदनम्]

असन्निधेश्च यो भोगो ह्यङ्गभावमनुव्रजेत् ॥ १७ ॥
तत्तद् ध्यात्वा तु मनसा भक्त्या विष्णोर्निवेदयेत् ।

[तर्पणद्रव्याणि]

पावनैः पानकैः स्वच्छैः शीतलैर्मधुरादिकैः ॥ १८ ॥
त्वगेलाद्यन्वितैर्घृष्टधूपकर्पूरवासितैः ।
नालिकेरोदकोपेतैस्तर्पणीयमनन्तरम् ॥ १९ ॥

(Offering to be made with Grāsamudrā)[15]

16-17a. The right wrist to be touched with the left hand, O brahmins! offerings[16] are to be made with the head bent using that right hand with its tip contracted.

(Portions of the offerings which are not available could be offered mentally)

17b-18a. Those enjoyables, which should form part of the offerings but which are not available, could be mentally offered to Viṣṇu, with devotion.

(Things to be used in Tarpaṇa)[17]

18b-19. Delight is to be caused to god by offering splendid, pure, cool, sweet drink having powdered cloves and scented by powdered incense and camphor, along with coconut water.

15. Grāsamudrā is described in this text in *śloka* 16 below. For different definitions see *ślokas* II.17; *Pād. S. Caryā.* XXII.72-73a.
16. Offering is *nivedana.* It consists in placing the offering in the right hand of god, cf. *Pād. S. Caryā.* III.177b.
17. Tarpaṇa: See note under IV.52.

अथ ग्रासमुद्रया निवेदनमाह- **सव्येन** इति सार्धेन । अत्र निवेदनं नाम ग्रासमुद्रया हविरादिकस्य भगवद्दक्षिणहस्ते निर्वापणम् । तथोक्तं पाद्मे - "देवस्य दक्षिणे हस्ते निर्वपेत् साधकः स्वयम्" इति । तदपि विशेषितं पद्मोद्भवे -

"त्रिवारमेकवारं वा पञ्चवारमथापि वा । सप्तवारं हरेः पाणौ नैवेद्यं तत् समर्पयेत् ॥" इति ।

कदाचित् केषाञ्चिदङ्गभोगानामसन्निधाने तेषां मनसा निवेदनमाह- **असन्निधेः** इत्यादिना ।

दर्पणद्रव्याण्याह- **पावनैः** इति सार्धेन ।

[हस्तक्षालनद्रव्याणि]

मसूरमाषचूर्णेन रजनीशालिजेन च ।
समुद्वर्ति च संक्षाल्य शीतलैर्बहुवारिभिः ॥ २० ॥
नैवेद्याचमनार्थं तु गन्धोदकमनुत्तमम् ।
वाससा निर्मलं कृत्वा चन्दनेन सितेन च ॥ २१ ॥
समालभ्य सुघृष्टेन कर्पूरसहितेन च ।

[मात्रादानम्]

तिलान्यथ सुरत्नानि सौवर्णे वाथ राजते ॥ २२ ॥
पात्रे कृत्वाथ मात्रार्थं देवाय विनिवेदयेत् ।

[ताम्बूलसमर्पणम्]

लवङ्गतक्कोलैलात्वक्कर्पूरपरिभावितम् ॥ २३ ॥
जातीपूगफलोपेतं ससुगन्धच्छदं बहु ।
कर्पूरचूर्णसंमिश्रं मुक्ताचूर्णविमिश्रितम् ॥ २४ ॥
मातुलुङ्गफलोपेतं नालिकेरफलान्वितम् ।
प्रदद्यात् प्रणतश्चान्ते ताम्बूलं जगतः पतेः ॥ २५ ॥

[मुद्राबन्धक्रमः]

प्रक्षाल्य गन्धतोयेन अर्घ्यपात्रोद्धृतेन वै ।
पाणियुग्मं यथा वै स्यात् स्वच्छमत्यन्तनिर्मलम् ॥ २६ ॥
नैवेद्यधूपपात्राद्यैः पात्रैश्चानिर्मलीकृतम् ।
कृत्वा सद्गन्धदिग्धौ तावर्घ्येणाऽर्च्य परस्परम् ॥ २७ ॥

(Things for washing the hands)

20-22. The hands are to be washed with abundant cool water; increased in volume with the powder of *masūra*[18] and *māṣa*[19] and made of the powders of turmeric and rice. *Ācamana* (as part of the offerings of food) is to be arranged with excellent scented water, rid of the impurities (distilling with cloth), and having white sandal well-powdered with camphor.

(Offering of mātrā)[20]

22b-23a. Placing seasamum with good gem in a golden or silver vessel, must be offered to god and this is to be treated as *mātrā.*

(Offering of tāmbūla)[21]

23b-25. At the end of *naivedya*, god shall be offered, after making obeisance to Him, *tāmbūla* with the sprinkling of clove, *takkola*, cardamom, *tvak* and camphor having nutmeg, arecanut, plenty of scented leaves, mixed up with powdered camphor and *muktā*,[22] pomegranate fruit, and coconuts.

(Method of forming mudrā)

26-28. The two hands must be washed with scented water taken from the *arghya* vessel as they had become dirty (by using) with the vessels of food and incense. They must be cleaned, be rid of impurities and worshipped with smearing each other of the sandal paste with *arghya*. The *mudrā* of *mūlamantra*

18. *masūra*: a kind of pulse, Bengal gram.
19. *māṣa*: black gram.
20. *mātrā*: generally refers to cooked rice mixed up with rice, seasamum is also added.
21. *tāmbūla:* betel leaves with areca nuts.
22. *muktā*: a kind of plant called *rāsnā*, see M.M. Williams: Sanskrit English Dictionary P. 824.

    This is one of the nine names, the others being enumerated in the *Nāmaliṅgānuśāsana*, II.4.114b-115a curiously enough, the name *muktā* is not mentioned here. M.M. Williams alone is the authority for this interpretation.

    Perhaps, *rāsnā* is the leaf of cardamom mean here; vide: एलापर्णी तु सुवहा रास्ना युक्तारसा च सा । *ibid.* II.4.140a.

हस्तक्षालनपुनराचमनादिकमाह- **मसूर** इति सार्धद्वाभ्याम् । मसूरः चणकभेदः । "मङ्गल्यको मसूरोऽथ" (२.९.१७) इत्यमरः ।

मात्रादानमाह- **तिलानि** इत्यादिना ।

ताम्बूलसमर्पणमाह- **लवङ्ग** इति सार्धद्वाभ्याम् । लवङ्गं प्रसिद्धम् । "लवङ्गं देवकुसुमम्" (२.६.१२५) इत्यमरः । तक्कोलं तथैव प्रसिद्धम् । त्वक् लवङ्गतरुखण्डम् ।

मुद्रादर्शनमाह- **प्रक्षाल्य** इति त्रिभिः ।

मुद्रां मूलादिमन्त्राणां दर्शयित्वा यथाक्रमम् ।
भूयोऽर्घ्यगन्धपुष्पेण धूपान्तेन समर्च्य च ॥ २८ ॥

[अक्षमालाप्रतिष्ठापूर्वकं जपयज्ञः]

जपयज्ञविधानेन देवं सन्तर्पयेत् ततः ।
स्फाटिकेनाक्षसूत्रेण स्वकैर्वा करपर्वभिः ॥ २९ ॥
पात्रं संस्थापयेत् पश्चादर्घ्यपात्राच्च वारिणा ।
विलिप्य चन्दनाद्यैस्तु स्थापयेद्भाजने शुभे ॥ ३० ॥
सम्पूज्य पुष्पधूपाद्यैर्मन्त्रं तत्र च विन्यसेत् ।
साधारमासनं चैव शक्तिपूर्वैः समावृतम् ॥ ३१ ॥
चतुर्भुजं तु विरजो नारायणमिवापरम् ।
वरदाभयहस्तं च बद्धाञ्जलिधरं स्मरेत् ॥ ३२ ॥
ब्रह्मस्थानस्थितं तं च सूत्रं ध्यायेच्छिखोपमम् ।
सन्निधौ भव देवेश सन्निरुद्धो भवाच्युत ॥ ३३ ॥
सूत्राख्यमणिजालेऽस्मिन् यावच्चन्द्रार्कतारकाः ।
एवं मुने प्रतिष्ठाप्य सूत्रमन्त्रेऽक्षसंज्ञिके ॥ ३४ ॥
प्रतिष्ठितस्य वै पश्चान्मुद्रां स्वां च प्रदर्शयेत् ।
यथाशक्ति जपं कुर्याच्छतमष्टाधिकं तु वा ॥ ३५ ॥
तन्निवेद्य विभोः पश्चाद्वाक्कर्म मनसाऽन्वितम् ।
पुण्डरीकाक्ष विश्वात्मन् मन्त्रमूर्ते जनार्दन ॥ ३६ ॥
गृहाणास्मिन् जपं नाथ मम दीनस्य शाश्वतम् ।
इत्युक्त्वा सोदकं पश्चात् पुष्पं दक्षिणपाणिगम् ॥ ३७ ॥

जयाख्यानुसारेणाक्षमालाप्रतिष्ठापूर्वकं जपयज्ञविधिमाह- **जपयज्ञविधानेन** इति प्रक्रम्य **अन्यथा तज्जपं विना** इत्यन्तैः।

and others are to be displayed and worship is to be done again with *arghya*, sandal-paste and flowers till the offerings of incense are over.

(Japayajña[23] after consecrating the rosary garland)

29-41a. God must be pleased with *japayajña* done with a garland of rosaries made of crystals or one's own knots (*parva*) in the fingers of hands. A vessel is to be used (for counting) in which is to be placed with (rosary) garland besmeared with water of the *arghya* vessel and sandal paste. Mantra shall be placed (*nyāsa*) there, after worshipping it with flowers and incense. The priest shall then think of a seat with support, surrounded by powers, as if it were another Nārāyaṇa, free from impurities, having four arms offering boon and security and folded palms. The string (of the rosary garland) shall be meditated upon as stationed in the place of Brahman, comparable to the flame of fire with the words, "O lord of god! Be present, and O Acyuta remain here in the lustre of gems in this string till moon, sun and stars are there." O sage! after installing the mantra of the string called *akṣa*, its *mudrā* must be shown. *Japa* is to be done according to one's capacity or one hundred and eight times. After offering this to the lord, he shall do the verbal act associating with thoughts, "O lotus eyed! Soul of the world! Mantra-personified! Janārdana! O lord! Receive this *japa* for all times of (from) me, a miserable person." Having said this, he (priest) shall throw, O Nārada, in front of Viṣṇu, the flower which is in his right hand together with water, along with (uttering) the *mūlamantra*. He must consider then the effectively shining row of *tāraka*[24] to have entered the mouth of Bhagavān and then issuing out of it. O eminent brahmin! and going into his heart and issuing (again out in the order of *saṃhāra*).[25] He shall unite it with the

23. *japayajña*: *japa* to be treated as *yajña* sacrifice; *yajña* is worship according to the Āgama-s. In later years, this word came to be associated with *jñāna*; vide: *Bhagavadgītā* IX.15. Such usages see to indicate sacredness.
24. *tārakāvali: tāraka + avali, tāraka:* that which makes one cross over, that is, enables the suffering humanity cross the sea of worldly bondage. This word can mean any mantra, *Praṇava, mūlamantra* and others; *āvali* means *mantras* are meant here to have appeared in succession.
25. *saṃhārakrama: saṃhāra + karma, saṃhāra:* withdrawal, taking to its source; final release is the goal. Mantra must be taken from the heart and made to come into contact with *brahmarandhra*, so that it can reach *para*, the supreme being.

अग्रतो निक्षिपेद्विष्णोर्मूलमन्त्रेण नारद ।
भावयेच्च ततः सम्यक् स्फुरन्तीं तारकावलिम् ॥ ३८ ॥
प्रविष्टां भगवद्वक्त्रे वक्त्रात्तद्धृद्गतां पुनः ।
हृदयाद्विजशार्दूल संहाराख्यक्रमेण तु ॥ ३९ ॥
पूर्ववद्ब्रह्मरन्ध्रेण परेण सह योजयेत् ।
एकैकं हृदयादीनां सर्वेषां विहितं त्वथ ॥ ४० ॥
क्रियाऽङ्गत्वान्न दोषोऽस्ति अन्यथा तज्जपं विना ।

[विज्ञापनप्रकारः]

धूपं दत्त्वा प्रणम्याथ स्तुत्वा मन्त्रेश्वरं ततः ॥ ४१ ॥
अज्ञानात् ज्ञानतो वापि जातमूनाधिकं च यत् ।
दासस्य मम दीनस्य क्षन्तव्यं लोकलोचन ॥ ४२ ॥
इति विज्ञाप्य देवेशं भक्तितः साधकोत्तमः ।

अत्र स्वकैर्वा करपर्वभिः इत्यत्र पाञ्चरात्ररक्षायाम् विशेष उक्तः -

"कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण तु । अनामिकान्तं देवेश जपेत् कोटिसहस्रकम् ॥" इति ।

अत्र मधुपर्कादिजपयज्ञान्तं यवनिकान्तःपरिचारकजनाद्यलक्ष्यमेव कार्यम् । तथोक्तं लक्ष्मीतन्त्रे - "यष्टव्यमन्त्रयज्ञेन साङ्गेन मधुपर्कवत् । जपं समाचरेत् पश्चादलक्ष्यमितरैर्जनैः ॥" इति । एवमेव वक्ष्यत्यत्रापि महोत्सवप्रकरणे - "पूजाकाले तु सर्वत्र भूषामाल्यम्बरार्पणम् । विसर्जनं च तेषां वै तथा चाभ्यवहारिकैः ॥ भोगैरभ्यर्चनं चैव इतरालक्ष्यमाचरेत् । तत्सिद्ध्यै देवमभितः स्तरेद्यवनिकापटम् ॥" इति ।

अथ धूपसमर्पणप्रणामस्तोत्रपूर्वकं क्षमापनप्रार्थनां तदुत्तराङ्गार्घ्यादिचतुरुपचारांश्चाह- **धूपं दत्त्वा** इति । अत्र स्तोत्रं जितन्तादिभिः कार्यम् ।

[कारिप्रदानविधिः]

सम्पूज्य गन्धधूपैश्च ततस्तु भगवन्मयात् ॥ ४३ ॥

Supreme being through *brahmarandhra*[26] as before. Then each one is enjoined for all *hṛdaya*[27] and others (mantras), being part (his) work. There is nothing wrong in this, except when *japa* is not done.[28]

(Method of making request)

41b-43a. The lord shall be offered incense. Bowing to him and eulogising[29] him, the lord of mantras. He shall be requested by the eminent priest with devotion, "O eye of the world![30] What has been done, unknowingly or knowingly, less or more (than what should be done), by me, your miserable servant, forgive me (for that).

(Method of offering the servers)[31]

43b-45. The servers are to be worshipped with sandal paste and incense and adored in due order, as they are filled with (devotion to) Bhagavān. The

26. *brahmarandhra*: an aperture in the crown of the head through which the soul is said to make its exit from the body at the time of death.
27. *hṛdayādīnām* refers to the *aṅgamantras* which are *hṛdaya, śīrṣa, śikhā, kavaca, netra* and *astra*.
28. *japaṃ vinā:* this shall be done only after *japa* is done, otherwise, this becomes defective.
29. *jitanta stotra* and *drāviḍaprabandha* of Godā and Viṣṇucitta are to form part of *stotra* according to the commentator.
30. *jokalocana:* eye of the world; he is the eye in the sense that people (*loka*) should realise that they have to know about the world through him, as then only, a correct picture of the world would be available.
31. Here the persons who are to be offered a part of the offerings made to god are called *kāris*. They are brahmins, primarily qualified in the Pāñcarātra tenets; twelve or eight or four in number. They must have received initiation, thorough-training in the Vedic lores and of spotless conduct. After the worship is over, they must be given a share in the remnants of the offerings already made to god.

    The commentator undertakes an interesting discussion as to the propriety of offering this share to these respectable persons after the remaining food preparations are offered to Viṣvaksena. It must be borne in mind that after offerings are made to Viṣvaksena, others shall not partake them, but this is a case of exception. Only those who are named as *kāris* should take the offerings after they are offered to Viṣvaksena. It must be noted here that the name *kāri* which means server does not occur in this context of the text. It is learnt from the commentary that this name occurs in the *Nāradīyasaṁhitā*. They should be paid their share in the offerings before the utterance of the mantras concluded.

यथाक्रमं समभ्यर्च्य नैवेद्यं प्रतिपाद्य च ।
तेषां मन्त्रावसानं च अर्हणाद्यं निवेदयेत् ॥ ४४ ॥
यद्वैभ्यो देवयज्ञान्ते तन्मात्रान्तं प्रदाय तु ।
अस्मिन् कालेऽर्हणाद्यं तु ताम्बूलान्तं समर्पयेत् ॥ ४५ ॥

यद्वा सम्प्रदायादुपनिषदन्त्यभागैः, गोदास्तुत्यादिद्राविडप्रबन्धान्त्यभागैश्च स्तोत्रं कार्यम् ।

अथाराधनस्य पञ्चमाङ्गं कारिप्रदानविधिमाह- **ततः** इति सपादद्वाभ्याम् । औपचारिकसांस्पर्शिकभोगेषु सूक्ष्मस्थूलांशद्वयस्यापि बिम्बमुखेनैव भगवद्ग्रहणं सिद्ध्यति । आभ्यवहारिकेषु तथा ग्रहणं सूक्ष्मांशस्यैव । स्थूलांशस्य कारिमुखेनेति कारिप्रदानस्यात्रावश्यकत्वमुक्तम् । तथा च पारमेश्वरे महाहविःप्रकरणे -

''महाविभूतिर्देवेशः सर्वसङ्कल्पसिद्धिदः । यस्मात् प्रागात्मसात्कुर्याद्भोगशक्तिमनश्वरीम् ॥ व्यक्तां गुर्वादिवक्त्रेण भुनक्ति तदनन्तरम् ।'' इति । तथा चोक्तं नारदीयेऽपि - ''तच्च कारिमुखो भुङ्क्ते भगवान् भक्तवत्सलः । यथा चाग्निमुखादेवास्तथाकारिमुखो हरिः ॥'' इति । एवमेव स्पष्टमुक्तं सच्चरित्ररक्षायां वेदान्ताचार्यैः - ''कपित्थस्य फलं चैव यथा कुञ्जरभक्षितम् । तस्य सारं च गृह्णीयात् तथा हविरसं प्रभुः ॥''

इत्यादिभिर्निवेदनदशायामन्नस्य सूक्ष्मांशं गृहीत्वा, गुर्वादिमुखेन तस्यैव प्रत्यक्षयोग्यं स्थूलांशमपि भगवानेव गृह्णातीति च प्रतीयत इति । अत एव कारिभ्यः प्रदेशांशस्य देवांशत्वेन व्यवहारः । तथैवोक्तं नलकूबरसंहितायाम् - ''ततो देवांशमुद्धृत्य दद्यात् सद्गुरवे ततः'' इति । एवं सम्प्रदानं चतुरादिसमसंख्यकेभ्यः कारिभ्य इत्यपि बोध्यम् । तदुक्तं श्रीसात्वते चतुर्दशपरिच्छेदे - ''एवमुक्त्वा समभ्यर्च्य चतुरः पाञ्चरात्रिकान्'' (सा स. १४.३०) इति । एवमेव सप्रकारमुक्तं पारमेश्वरे -

''अर्घ्यालभनपुष्पैश्च धूपेनाभ्यर्च्य वै ततः । मुख्याधिकारिणो विप्रान् द्वादशाध्यात्मचिन्तकान् ॥ बलादिमन्त्रनिरतानष्टौ वा चतुरो द्विज! । दीक्षितान् गुरुपूर्वांश्च ह्यनुकल्पाधिकारिणः ॥ बीजपिण्डपदाद्येषु मन्त्रेषु निरतान् सदा । त्रयीधर्मरतान् वापि आमूलाद्भगवन्मयान् ॥ त्रय्यन्तज्ञानसम्पन्नान् यथोक्ताचारनिष्ठि-तान् । समाहूयार्घ्यगन्धाद्यैः समभ्यर्च्य यथाक्रमम् ॥ भगवच्छेषमादाय न्यस्तमाहृत्य मन्त्रपम् । प्राङ्निवेदनकाले तु चतुर्धा संविभज्य तम् ॥ प्रापणं मधुपर्काद्यमन्यच्चाभ्यवहारिकम् । तेभ्यो दद्यादेकभागमर्घ्योदकपुरः-सरम् ॥ मात्रां चतुर्विधां चापिआचार्याय प्रदाय च । स्वप्राशनार्थमेकांशं स्थापयित्वा निरीक्षितम् ॥ शेषाशनाभिधानस्य गणेशस्यार्चनाय वै । भागमेकं तु संस्थाप्य भोगेनान्येन तोषयेत् ॥ ब्राह्मणादीन् शुभाचारान् भक्तान् ग्रामाधिवासिनः ।'' इति ।

अत्र विष्वक्सेननिवेदनात् पूर्वं कारिप्रदानमुक्तं प्रत्यवायकरमिति न शङ्कनीयम्; विष्वक्सेनस्य शेषाशनत्वप्रसिद्धेः । कारिमुखेन स्थूलांशस्यापि भगवद्ग्रहणानन्तरमेव हविषः शेषत्वपूर्तेः । अत एव - ''नैवेद्यैर्मधुपर्काद्यैर्मुख्यमूर्तेर्निवेदितैः । द्विजप्रदानशिष्टैस्तु स्वयं प्राशनवर्जितैः ॥ ''

इति पौष्करे विष्वक्सेनार्चनप्रकरणे स्पष्टोक्तेः । स्तोत्ररत्नेऽपि ''त्वदीय भुक्तोज्झितशेषभोजिना'' (५.१२.९०) इत्युक्तत्वाच्च । ननु तर्हि कारिप्रदानं पूर्वमेव स्यात् । अत्र विष्वक्सेनार्चनायैकं भागं

food preparations shall be offered (after they have been offered to god) followed by giving them, *arhaṇa* till the utterance of the mantras is over. Or also after this, much is offered at the end of worship of gods, *arhaṇa* etc. ending with *tāmbūla* are to be offered to them.

संस्थाप्यान्येन भागेन ब्राह्मणादीन् तोषयेदित्युक्तरीत्या ब्राह्मणादीनामपि निवेदितविनियोगानन्तरं विष्वक्सेनाय हविर्निवेदनं प्रतीयते । अस्य का गतिरिति चेत्, सत्यम्; भवदुक्तरीत्यैव तद्वचनाभिप्रायः । अन्यथा दत्तस्य हविषस्त्याज्यत्वात् । तथोक्तं सच्चरित्ररक्षायामागम[३]प्रामाण्यवचनम् –

"यतो भगवदर्थेन त्यक्तं स्रक्चन्दनादिकम् । पश्चादभोग्यतां याति विष्वक्सेनपरिग्रहात् ॥ अत एव निवेद्यानि ततोऽर्वागेव सात्त्वतैः । सेव्यन्ते तेन तत्तेषामुत्कर्षस्यैव कारणम् ॥" इति ।

इदं च विष्वक्सेनभक्तव्यतिरिक्तब्राह्मणादिविषयम् । तद्भक्तानां तन्निवेदितस्वीकारस्य शास्त्रीयत्वात् । तथा चोक्तं पारमेश्वरे महाहविःप्रकरणे – "प्रक्षिपेज्जलमध्ये तु विष्वक्सेननिवेदितम् । जलजानां तीरजानां तन्तूनां तृप्तयेऽथवा ॥ जले किञ्चिद्विनिक्षिप्य शेषमन्नं तदग्रतः । तद्भक्तानां द्विजातीनां निरतानां स्वकर्मसु ॥" इति ।

अत एव यादवाद्र्यादिषु विष्वक्सेननिवेदनात् पूर्वं कारिप्रदाने कृतेऽपि कारिणामपि विष्वक्सेनशिष्यप्रशिष्यत्वात्, तन्निवेदनान्तरमेव तद्भुज्यते । वेङ्कटाद्र्यादिषु तु वैखानसैर्कारिभिः ।

[अग्निकार्यविधिः]

शय्यासनं ततो दद्यादग्नौ सन्तर्पयेत् ततः ।

[अग्न्यागारप्रवेशः]

न्यस्यास्त्रमासने यायादनलालयमर्घ्यभृत् ॥ ४६ ॥
पूर्ववद्द्वारयागं तु कृत्वा सम्प्रविशेत् ततः ।
तत्र पूर्वोक्तविधिना उपस्पृश्य समाहितः ॥ ४७ ॥

[कुण्डलक्षणम्]

प्रमाणपरिशुद्धं च विभवानुगुणं शुभम् ।
चतुरावरणं कुण्डं कृत्वा ह्योष्ठविभूषितम् ॥ ४८ ॥

३. टिः – आगमप्रामाण्ये विष्णुर्निर्माल्यादेः परमपावनत्वनिरूपणावसरे प्रतिपादितम् ।

(Process of agnikārya)

46a. The bed *(śayyāsana)* shall then be offered to God. Then worship in the fire is to be taken up.[32]

(Entrance into the hall of fire worship)

46b-47. Placing the *astra* (mantra) in the seat, the priest shall go to the hall of fire taking *arghya* with him. Worship is to be done at the entrance as before, prior to entering it. He should sip water according to the rule with a composed mind.

(Marks of the fire-pit)

48-54a. The fire-pit shall be just to the standard consistent[33] with the economic status of the priest and auspicious (suitable). It shall be made to have four circles[34] and adorned with foreparts.[35] Division (of it) is laid down as one third or half (the size) of the portion dug there.[36] It shall be of the

32. Worship in the fire is to be undertaken only after god is worshipped.
33. *pramāṇa:* authority, measurement, standard that is expected; *pariśuddha:* pure, just, consistent with, true to the measurement.
34. *āvaraṇa:* circles, inner linings along the walls.
35. Oṣṭha: the *mekhalā* which is innermost around the portion that is dug.
36. The fire-pit shall have two divisions within. One shall be the portion dug there for the fire to be ignited and making offerings there. The other will be just elevated and be of the measurement of one third or half the portion of the area dug there.

त्र्यंशेनार्धेन[४] वांशेन खाताद्व्यासो विधीयते ।
चक्रशङ्खाम्बुजाकारं वृत्तं वा चतुरश्रकम् ॥ ४९ ॥
गदाद्यैश्चक्रपर्यन्तैर्लाञ्छनैर्लाञ्छितं तु वा ।
अग्निकार्योपयोग्यानि यानि यानि महामते ॥ ५० ॥
स्रुक्स्रुवादीनि भाण्डानि त्वङ्कितव्यानि तैरपि ।
यद्वा किरीटश्रीवत्समालाकौस्तुभलक्षणम् ॥ ५१ ॥
शङ्खचक्रगदापद्मसमस्तव्यस्तलाञ्छितम् ।
भृङ्गारकरकाकारं कुण्डं कुर्याद्विचक्षणः ॥ ५२ ॥
कुण्डं चतुर्मेखलं वा त्रिमेखलमथापि वा ।
द्विमेखलं तथा चैकमेखलं वा प्रकल्पयेत् ॥ ५३ ॥
स्थिरं समेखलं कुर्याज्जङ्गमं तु विमेखलम् ।

यथाशास्त्रं विष्वक्सेननिवेदनात् पूर्वमेव भुज्यते । दिवार्चने शय्यासनानन्तरमेवाग्निसन्तर्पणं कार्यमित्याह- **शय्यासनम्** इत्यर्धेन । अग्न्यागारप्रवेशविधिमाह- **न्यस्य** इति सार्धेन । कुण्डलक्षणमाह- **प्रमाणपरिशुद्धम्** इति सार्धैः षड्भिः ।

[कुण्डाभावे स्थण्डिलादिषु होमस्य कर्तव्यत्वम्]

देशकालवशाच्चैव कुण्डं न घटते यदि ॥ ५४ ॥
तं विना हवनच्छेदो न कार्यः सिद्धिमिच्छता ।
शोधिते ह्युपलिप्ते च स्थलेऽचलमृदाऽन्विते ॥ ५५ ॥
होमस्तु विहितः सम्यङ्मन्त्रस्यामन्त्रितस्य च ।
पिण्डिका चतुरश्रा तु बहिः सर्वत्र शस्यते ॥ ५६ ॥
मध्ये पद्मं प्रकुर्वीत श्रीपदं पद्ममध्यगम् ।
एवं कृते शुचौ[५] कुण्डे अग्निकार्यं समाचरेत् ॥ ५७ ॥
चुल्ल्यां वा मल्लके वापि होमं कुर्याद्यथाविधि ।

४. नाऽर्धेन - B
५. शुभे - E

shape of discus, conch, lotus, circular or quadrangular (having four corners) or be marked by the emblems beginning from mace and, ending with the discus. O wise man! Whatever utensils like *sruk*,[37] *sruvā*,[38] and others that are fit for use for doing the ritual in the fire are also be marked with them. Or, it (fire-pit) must have the marks of the crown Śrīvatsa, garland (Vanamālā) and Kaustubha and be marked with conch, discus, mace, lotus, all or some among them. The wise man shall make the fire-pit to have the form of a vase or small pitcher. The fire-pit shall be made to have four or three or two even one ridge. The stationary (fire-pit) shall have the ridges and the movable pit have no ridge.

(Homa is to be made on the ground and other places, when the fire-pit is not available)

54b-58a. If the fire-pit could not be had in a place and at a particular time, then one, who desires to achieve an end, shall not give up *homa* (because it is) without it. *Homa* is enjoined on the ground that is purified or smeared (with cow-dung) and having rocky mud whether the mantras are used or not. A pedestal with four corners is approved (to be arranged) outside (the fire-pit). The figure of the lotus is to be drawn in the middle with the word *śrī* in the midst of the lotus. Worship (of work) in the fire is to be done in the fire-pit which is thus made pure. *Homa* shall be done according to the precepts in the hearth or shallow cup.

37. *sruk:* a wooden ladle of large size to pour ghee and other offerings into the fire.
38. *sruvā:* a wooden ladle smaller in size (compared to *sruk*) to take the offerings from the vessels containing them and pouring them into *sruk*.

[कुण्डसंस्कारः]

एतेष्वेकतमं कुण्डं सम्भवानुगुणं शुभम् ॥ ५८ ॥
सुधाद्यैर्वर्णकैः शुद्धैर्भूषयित्वोपलिप्य च ।
सुगन्धैश्चन्दनाद्यैश्च पञ्चगव्यपुरःसरैः ॥ ५९ ॥
कुण्डस्यारम्भकाले तु संस्कारा न कृता यदि ।
निष्पन्नस्य च ते सर्वे विधेयाश्च क्रमेण तु ॥ ६० ॥
ताडयेदस्त्रमन्त्रेण पुष्पैर्दक्षिणपाणिना ।
खननं तीक्ष्णशस्त्रेण देशिकश्चास्त्रविद्यया ॥ ६१ ॥
गृहीत्वा चैकदेशात् तु कुण्डमध्यात् तु मृत्कणम् ।
अङ्गुष्ठानामिकाभ्यां तु हृदयेन समुद्धरेत् ॥ ६२ ॥
अस्त्रेणैव समीकृत्य न स्यान्निम्नोन्नतं यथा ।
सेचयेत् कवचेनैव कुट्टयेत् तदनन्तरम् ॥ ६३ ॥
लेपयेद्गन्धतोयेन अस्त्रेण परिशोधयेत् ।
अस्त्रजप्तैः कुशाकाण्डैस्तीक्ष्णलाङ्गूलवर्जितैः ॥ ६४ ॥

कुण्डाभावे स्थण्डिलादिषु वा होमं कुर्यादित्याह **देशकालवशात्** इति चतुर्भिः । मल्लके शरावे ।

कुण्डसंस्कारानाह– **एतेषु** इति सार्धैः षड्भिः । पारमेश्वरव्याख्याने अस्त्र जप्तैः इत्यर्धमुत्तरत्र योजितम्; तद्विचारणीयम् ।

[उल्लेखनक्रमः]

अस्त्राभिमन्त्रितेनैव दर्भकाण्डद्वयेन तु ।
तन्मध्ये च कुशाग्रेण प्राग्भागमवलम्ब्य च ॥ ६५ ॥
आरभ्य दक्षिणाशायां लिखेल्लेखामुदग्गताम् ।
तस्यामुपरि संलिख्य लेखानां त्रितयं स्फुटम् ॥ ६६ ॥
प्रागग्रं दक्षिणाशादि ह्युदीच्यन्तं च सान्तरम् ।
तत्र प्रागग्ररेखासु मध्यैका पिङ्गलाभिधा ॥ ६७ ॥
दक्षिणोत्तरयोर्द्वे तु सुषुम्नेडाधिदैवते ।

[कुण्डमध्ये भद्रपीठवद्ध्यानम्]

चतुर्धा प्रणवेनाथ प्रोक्षयेदर्घ्यवारिणा ॥ ६८ ॥

(Consecration of the fire-pit)

58b-64. One fire-pit, among those, an auspicious one and according to the economic condition of the performer shall be decorated with the pure colouring of materials like mortar and others and smeared with very fragrant sandal-paste and others, using Pañcagavya[39] at first. If consecration had not been done to the fire-pit at the beginning, all these are to be done in due order to it when it is got ready. It must be struck with Astramantra, with flowers using the right hand. The priest shall deepen it with a sharp weapon (instrument) and take a particle of mud from a certain spot there using Astramantra and take it out using the thumb and ring finger (uttering) the Hṛdayamantra. It (surface) shall be levelled with Astramantra, so that there will be no uneveness (depressions and raised levels). It shall be sprinkled with the Kavacamantra and then pounded, smeared with sandal water and cleaned with the Astramantra using pins made of *darbha* bereft of their sharp ends which have been consecrated with the utterance of the Astramantra.

(Drawing of the lines)

64-68a. Lines are to be drawn beginning from the southern quarter upto the north, with two stems of *darbha* consecrated with Astramantra, in their (lines already drawn) midst using the tip of the *darbha* in the eastern portion. Three clear lines are to be drawn above them so as to leave intervals pointing to the east beginning with the southern direction and ending with the northern one. The middle line among them pointing to the east is called Piṅgalā and the two (lines) in the south and north have Suṣumnā and Iḍā as their presiding deities.

(Meditation upon the middle of the fire-pit as having Bhadrapīṭha)

68b-69. Sprinkling shall be done with the water of *arghya* using *Praṇava* upon the four lines (drawn) there.[40] These shall be adored with *arghya,*

39. Pañcagavya: see note under II.40.
40. *caturdhā*: sprinkling to be done for each of the four times.

तदभ्यर्च्यार्घ्यपुष्पाद्यैर्ध्यायेत् तद्भद्रपीठवत् ।
प्रणवैस्तु प्रतिष्ठानं प्राग्वदस्य समाचरेत् ॥ ६९ ॥

[पूर्णकुम्भाष्टकस्थापनम्]

चतुरश्रस्थले कुण्डे दिग्विदिगष्टके[६] बहिः ।
सम्पूर्णपात्रं कुम्भानामष्टकं विनिवेश्य च ॥ ७० ॥

उल्लेखनक्रममाह- **अस्त्राभिमन्त्रितेन** इति सार्धैस्त्रिभिः। अस्त्राभिमन्त्रितेन दर्भकाण्डद्वयेनोल्लेखनं जयाख्योक्तम्। कुशाग्रेणोल्लेखनं सात्वतोक्तम्, तत्पक्षद्वयस्याप्युक्तत्वात् वैकल्पिकत्वमङ्गीकार्यम् । कस्मिंश्चित् पारमेश्वरप्रयोगे कुशाग्रसहितदर्भकाण्डद्वयेनेति लिखितम्, तदनाघ्रातमूलतन्त्राणां वचनम् । कुण्डमध्ये प्रोक्षणार्चनपूर्वकं भद्रपीठवद्ध्यानमाह **चतुर्धा** इति सार्धेन । अत्र 'चतुर्धा' इत्यनेन प्रत्युल्लेखनं प्रोक्षणमिति ज्ञेयम् ।

कुण्डस्याष्टदिक्षु पूर्णकुम्भाष्टकस्थापनमाह- **चतुरश्रस्थले कुण्डे** इत्यादिना ।

[मेखलोपरि वासुदेवार्चनक्रमः]

ऊर्ध्वाधोमेखलानां च चतुर्णां दिक्चतुष्टये ।
कौशेयविष्टरस्थांश्च वासुदेवादिकान् यजेत् ॥ ७१ ॥
विदिक्ष्वप्यय[७]योगेन ह्यूर्ध्वान्तमधरात् तु वै ।
तद्वदेवार्घ्यपुष्पाद्यैः पूजनीयाः क्रमेण तु ॥ ७२ ॥

[शीघ्रप्रज्वलनहेतुद्रव्याणि]

मृदुदर्भसमूहं च नीरसं चाश्मकुट्टितम् ।
शुष्कगोमयचूर्णेन युक्तं गन्धाश्मना सह ॥ ७३ ॥
कुण्डे द्रोणांशमात्रं तु समारोप्य प्रसार्य च ।

[कुण्डरक्षा]

अच्छिन्नाग्रैस्ततो दर्भैरस्त्रमन्त्राभिमन्त्रितैः ॥ ७४ ॥
कुण्डभित्तिगणं सर्वं प्रोत्थितैः परिभूषयेत् ।

६. दिग्वष्टके - B
७. अप्यथ - D

flowers etc. and shall be meditated upon as having the Bhadrapīṭha.[41] Their consecration is to be done as before with *Praṇavas*.

(Placing the eight pitchers filled with water)

70. The eight pitchers filled with water shall be placed in the fire-pit on the quadrangular ground in the eight quarters and intermediate quarters.

(Method of worshipping Vāsudeva on the ridges)

71-72. Vāsudeva and others[42] are to be worshipped, stationed on the seats made of silk in the four directions of the four top and lower ridges. They are to be worshipped in due order from the bottom to the top using likewise *arghya*, flowers etc. in the intermedidte directions using the method of merging.[43]

(Substances which cause quick flaming)

73-74a. Clump of soft *darbha*, dried[44] up powdered stones,[45] dried up powdered cowdung with sulphur shall be placed in the fire-pit measuring a part of *droṇa*[46] and be scattered there.

(Protection of the fire-pit)

74b-75a. The group of the walls of the fire-pit shall be adorned with *darbha* with their edges not cut, consecrated by Astramantra and which are erect.

41. Bhadrapīṭha: see note under III.5.
42. Saṃkarṣaṇa, Pradyumna and Aniruddha are meant here by the word *ādi*.
43. Apyayoga: method of dissolution; the fire-pit with four ridges is meant here.
44. *nīrasa*: dried up, without juice, not wet.
45. *Aśma:* stone; *kuṭṭita:* powdered.
46. Droṇa: a measure containing the materials weighing 200 *pala*.

[**कुण्डवेष्टनम्**]

वर्मणा चाक्षवाटं तु सङ्कल्प्य तदनन्तरम् ॥ ७५ ॥

कुण्डस्याष्टदिक्ष्वपि मेखलोपरि वासुदेवार्चनक्रममाह- **ऊर्ध्वाध:** इति द्वाभ्याम् । एवमर्चनं चतुर्मेखलकुण्डमात्रविषय इति प्रतीयते ।

कुण्डे शीघ्रमग्निप्रज्वालनसाधनद्रव्यप्रक्षेपमाह- **मृदुदर्भ** इति सार्धेन। गन्धाश्मना गन्धकेन। "गन्धाश्मनि तु गन्धक:" (२.९.१०२) इत्यमर: ।

रक्षार्थं बहि: कुण्डभित्तिं परितोऽस्त्रदर्भावरणमाह- **अच्छिन्नाग्रै:** इत्यादिना ।

कवचमन्त्रेण कुण्डवेष्टनमाह- **वर्मणा** इत्यर्धेन । वर्मणा च कवचमन्त्रेण च । अक्षवाटं कुण्डस्य परितो दिग्बन्धनार्थमावरणम्। सङ्कल्प्य ध्यात्वेत्यर्थ:। पारमेश्वरव्याख्याने तु "अच्छिन्नाग्रै:" इत्यादिश्लोकद्वयस्यापि शीघ्रप्रज्वालनहेतुद्रव्यप्रक्षेपपरत्वमेवोक्तम् । अक्षवाटशब्दस्याग्न्याधारग्रहणपरत्वं चोक्तम् । तदनुसारेण कस्मिंश्चित् पारमेश्वरप्रयोगे -

[**कुण्डार्चनम्**]

समभ्यर्च्य च पुष्पाद्यैर्मध्यत: प्रणवेन तु ।
तेनैव विधिना नाभिं पूजयेच्चन्द्रसन्निभाम् ॥ ७६ ॥

"अच्छिन्नाग्रानस्त्रमन्त्रसञ्जप्तानूर्ध्वीकृताग्रान् दर्भान् कुण्डान्तर्भित्त्या सम्बन्धान् संस्थाप्यान्तरग्न्यागार-पार्श्वेऽप्येवं वर्मणा कृत्वा अग्निप्रतिष्ठां सङ्कल्प्य" इति लिखितम्, तत्सर्वमसङ्गतम्। यतोऽत्र विघ्ननिवारणार्थं बहि: कुण्डभित्तिं परितोऽस्त्रदर्भैरलङ्करणमुक्तम्; न तु कुण्डभित्त्यन्तरग्निप्रज्वलनार्थम् । तदर्थं पूर्वमेव सात्वतोक्तरीत्या अश्मकुट्टितदर्भचूर्णस्योक्तत्वात् । किञ्च जयाख्ये "अच्छिन्नाग्रै:" इति श्लोकानन्तरम् "कृत्वैवमक्षवाटं तु कुण्डसंस्कारमुत्तमम्" इति प्रतिपादितत्वात्, अक्षवाटशब्दस्य दर्भपरिभूषणरूपकुण्ड-संस्कारार्थकत्वमकामेनाप्यङ्गीकार्यम्, तथैव 'वर्मणा चाक्षवाटं तु सङ्कल्प्य' इत्यत्राप्यक्षवाटशब्दस्य कुण्डावरणमित्यर्थ: । अथ कुण्डार्चनमाह- **समभ्यर्च्य** इत्यादिना ।

[**कुण्डमध्ये आसनपूर्वकं लक्ष्म्यर्चनम्**]

तत: पवित्रकं दार्भं शिखामन्त्राभिमन्त्रितम् ।
प्राक्समालेपनोपेतं चतुष्पथपदे न्यसेत् ॥ ७७ ॥
हृन्मन्त्रेण ततस्तत्र योगपीठं प्रकल्पयेत् ।
तत्र नारायणाख्यां वै शक्तिं विद्योतलक्षणाम् ॥ ७८ ॥
लक्ष्म्याकृतिपदं प्राप्ताममृतामृतरूपिणीम् ।
सर्वातिशयरूपां च सर्वशक्तिसमन्विताम् ॥ ७९ ॥
सौकुमार्येण रूपेण सर्ववस्त्वन्तरस्थिताम् ।
शाश्वतीं सृष्टिमार्गेण अवतार्य हृदम्बुजे ॥ ८० ॥

(Encircling the fire-pit)

75b. The region of the Akṣavāṭa[47] is to be encircled with Varma (Kavaca) mantra.

(Worship of the fire-pit)

76. Worship is to be done from the middle portion with flowers using *Praṇava* for the nave which is like the moon, using the same method.

(Worship of Lakṣmī in the middle of the fire-pit by offering a seat)

77-82. The Pavitra, which is made of *darbha* consecrated with the Śikhāmantra and smeared (earlier) with sandal paste, shall be placed at the cross way (where four roads meet). Yogapīṭha[48] shall be arranged there with Hṛdayamantra. The priest shall adopt the method of creation and bring, into his lotus-like heart, the power called Nārāyaṇa marked by the brilliance of lightning whose place is taken up by Lakṣmī with the form of immortal nectar. Her form surpasses everything, possesses all powers and is stationed within every object with tenderness and permanence. She shall be placed following the previous method of meditation in the middle of the lotus - like heart of the fire-pit from his lotus - like heart adopting the method of recaka[49] using Hṛdayamantra with *Praṇava* and the word *namaḥ* along with

47. *Akṣavāṭa: vāṭa* — avenue; *akṣa* — this is the enclosure around the fire-pit and is meant for Digbandha.

 aṅgula: inches.

 The Āgamas follow the system of architecture in admitting the scheme measurement.

 Eight atoms are equal to the smallest particle of dust visible to the eye in the rays of the sun spreading into an apartment through the window. Eight *aṇus* make one tip of hair, eight tips of hair make one nil (*likṣā*); eight nils a louse; eight lice a grain of barley and eight barley grains make a digit (*aṅgula*) also (*yūkā*); called *mātrā*. Twelve digits make a span (*vitasti*. Two spans make a cubit (*hāsta*) also called *kiṣku*; vide: *Mayamata* V.3-6a: translation of the text by B. Dagens;

 vide: रविरश्मिप्रसरन्त: परमाणव: । *Param. S.* XXII.27-28.

 Pād. S. Kriyā. L2 XII.25-32a gives the various types of *aṅgula*, and also details. Cf. *Pauṣ. S.* IV.5-10; for a further treatment of this matter, see *SKS. Brahma*. 32b-51a. It is not therefore proper to take the word *aṅguli* as meaning inches. An *aṅgula* is 17368 times greater than an atom.

48. Yogapīṭha: See *Pād. S. Caryā*. III.106-142.
49. Recaka: expelling the breath out of one of the nostrils.

पुरा ध्यानक्रमेणैव हृन्मन्त्रेण हृदम्बुजात् ।
स्वनामपदयुक्तेन सनमः प्रणवादिना ॥ ८१ ॥
रेचकेन विनिक्षिप्य कुण्डहृत्पद्ममध्यतः ।
सम्पूज्य गन्धपुष्पाद्यैः पद्ममुद्रां प्रदर्श्य च ॥ ८२ ॥

[अग्निसंस्कारः]

ताम्रपात्रेऽथ वान्यस्मिन् समादाय हुताशनम् ।
आरण्यं लौकिकं वाथ मणिजं दर्पणोद्भवम् ॥ ८३ ॥
निधाय कुण्डस्यैशान्ये संस्कारार्थं च साम्प्रतम् ।
सन्ताड्य चास्त्रमन्त्रेण प्रोक्षयेच्छिखया च तम् ॥ ८४ ॥
हृदाभ्यर्च्यामृतं ध्यानं दत्त्वाच्छाद्याथ वर्मणा ।
मूलं स्मृत्वा समानीय पूरकेण हृदन्तरे ॥ ८५ ॥
मन्त्रानिलकराकृष्टं कृत्वा तस्माद्विनिर्गतम् ।
व्यस्तो गुणगणात् षष्ठस्तेजो नाम गुणो हि यः ॥ ८६ ॥

कुण्डमध्ये आसनपूर्वकं लक्ष्म्यर्चनमाह **ततः पवित्रकं दार्भम्** इत्यारभ्य **पद्ममुद्रां प्रदर्श्य च** इत्यन्तैः । अग्निसंस्कारमाह- **ताम्रपात्रे** इति पञ्चभिः ।

परस्य ब्रह्मणः सोऽयं सामान्यं सर्वतेजसाम् ।
विरेच्य विन्यसेत् तस्मिन् वह्निपात्रे पुरार्चिते ॥ ८७ ॥

[अग्निस्थापनप्रकारः]

ततोऽग्निपात्रमादाय निर्धूममतिदीप्तिमत् ।
दक्षिणेन करेणैव पाणिभ्यामथवा द्विजाः! ॥ ८८ ॥
भ्रामयित्वा चतुर्धा वै ततः कुण्डान्तरे क्षिपेत् ।
ध्यायेदेकत्वमापन्नं ततो मन्त्रार्चिषा सह ॥ ८९ ॥

[अग्नेः प्रज्वालनम्]

याज्ञियैरिन्धनैः शुष्कैः प्रज्वाल्याऽस्त्राभिमन्त्रितैः ।

[परिसमूहनम्]

हृदा दक्षिणहस्तेन कुर्यात् परिसमूहनम् ॥ ९० ॥
प्रदक्षिणक्रमेणैव ह्यार्द्रं पाणितलेन तु ।
तिर्यग्वाधोमुखस्थेन नखपृष्ठमदर्शयन् ॥ ९१ ॥

her name. She shall be worshipped with sandal paste and flowers showing her Padmamudrā.[50]

(Consecration of fire)

83-87. The fire, which is produced from wood in the forest or ordinary domestic or from a gem (loadstone) or mirror (lense), is to be taken in a copper or any other vessel and placed to the north-east of the fire-pit for consecration. It must be struck (touched) now with Astramantra sprinkled with Śikhāmantra, worshipped with Hṛdayamantra, meditated upon (treating it) as nectar and covered with Kavacamantra. Mūlamantra shall then be thought of. It (fire) shall be brought to his heart through Pūraka and be drawn out of it by the hand of the air of mantra[51] and imagined to have come out of it, (heart) separated from the multitude of qualities,[52] since it is the sixth quality *tejas*.[53] This belongs to Parabrahman and is common among all lustres. It must be expelled and placed in the vessel of fire which was worshipped before.

(Method of installing the fire)

88-89. O brahmins! The vessel of fire which is smokeless but very refulgent shall be taken with the right hand or both hands and be turned round and round. It shall be split into four parts and be let into another fire-pit. It must be then imagined to have become one.

(Inflaming of the fire)

90a. It must be inflamed, using dry sacrificial[54] faggots consecrated with Astramantra.

(Heaping)

90b-91. It must be heaped with the Hṛdayamantra using the right hand, made wet by circumambulating it, keeping the palm transversely or upside down without showing the surface of the nails.

50. Padmamudrā: see *JS.* VIIṢ36; *LT.* XXXIV.36 contains an identical definition where it is called Paṅkeruhamudrā, see *Pād. S. Caryā.* XXII. 46-47 for a slightly different version where it is called Kamalamudrā
51. *mantrānilakara:* mantra is imagined to act like air. This is fancied to be the hand to draw out fire.
52. *guṇagaṇa:* refers to the group of qualities called Ṣāḍguṇya. This fire is *tejas*, one among the six qualities but it has a place quite distinct from the other five.
53. The last quality among the six.
54. Yājñikaiḥ: belonging to the sacrifice that is fuel used during the performance of sacrifices. This may be *samit.*

[प्रोक्षणम्]

अस्त्राभिमन्त्रितेनैव प्रोक्षयेदर्घ्यवारिणा ।

[परिस्तरणविधिः]

ततस्त्वभग्नमूलाग्रैः समैर्दद्यात् कुशैः स्तरम् ॥ ९२ ॥
दिशि दिश्युत्तराशान्तं याम्याशादौ तु सान्तरम् ।
चतुर्गुणैश्चतुर्धा त्वप्यग्रच्छन्नैः परस्परम् ॥ ९३ ॥
प्राक्प्रान्तैः पूर्वभागाच्च यावदुत्तरगोचरम् ।

कुण्डेऽग्निस्थापनप्रकारमाह- **ततः** इति द्वाभ्याम् ।
प्रज्वालनमाह- **याज्ञियैः** इत्यर्धेन ।
परिसमूहनमाह- **हृदा** इति सार्धेन ।
प्रोक्षणमाह- **अस्त्राभिमन्त्रितेन** इत्यर्धेन ।
परिस्तरणमाह- **ततः** इति द्वाभ्याम् । अत्राभग्नमूलाग्रैः समैः कुशैः स्तरं परिस्तरणम् ।

[परिस्तरणोपरि द्रव्यसादनक्रमः]

होमोपकरणं सर्वं होमभाण्डपुरःसरम् ॥ ९४ ॥
अवतार्य तदूर्ध्वे तु दक्षिणस्यां तथात्मनः ।
द्वन्द्वद्वन्द्वप्रयोगेण द्रव्यस्थापनमाचरेत् ॥ ९५ ॥

दिशि दिशि प्रतिदिशम् । दद्यादिति सामान्यत उक्तम् । अथ याम्याशादावुत्तराशान्तदिक्त्रये चतुर्भिः कुशैः चतुर्धा । सान्तरमन्तरालसहितं स्तरं दद्यादिति विशेष उक्तः । अत्र याम्यादिदिक्त्रये चतुर्धा सान्तरालपरिस्तरणकथनं च द्वन्द्वद्वन्द्वप्रयोगेण करिष्यमाणपात्रसादनार्थमिति ज्ञेयम् । दक्षिणादिदिक्त्रय एव द्वन्द्व द्वन्द्वप्रयोगेण पात्रसादनस्य वक्ष्यमाणत्वात्, प्राग्दिशि पात्रसादनाभावात् निरन्तरालमेव षोडशदर्भैः परिस्तरणमिति बोध्यम् । अत्र 'प्राक्प्रान्तैः' इत्यनेन पूर्वपश्चिमपरिस्तरणानामुत्तरा-ग्रत्वमपि ऊहतः सिद्ध्यति । 'दिशि दिशि स्तरं दद्यात्' इति पूर्वं सामान्यत उक्तत्वात् । पुनः 'पूर्वभागाच्च यावदुत्तरगोचरम्' इति विशेषः प्रदर्शितः । अत्र पारमेश्वरव्याख्याने "याम्याशादौ तु वा" इति विकल्प इत्युक्तम् । कस्मिंश्चित् पारमेश्वरप्रयोगेऽपि तथैवोक्तम्, तद्बुद्धिमान्द्यकृतम् । यद्वाबद्धपुस्तकनिरीक्षणकृतम् ।

परिस्तरणोर्ध्वे होमोपकरणसन्निधापनमाह- **होमोपकरणम्** इति । होमभाण्डपुरःसरं स्रुक्स्रुवपुरःसरमित्यर्थः ।

प्रथमं दक्षिणपरिस्तरणे आसादनक्रममाह- **दक्षिणस्याम्** इति सपादस्त्रिभिः । मुक्तदर्भैः सहिता करण्डिका स्रुक्स्रुवरजोमार्जनशोधनोपयुक्तः कूर्चः । कौशेयं धूतकेशं, कुण्डशोधनोपयुक्तः कुशकूर्चः । विष्टरं प्रागादिकलशार्चनप्रणीतासंस्काराद्युपयुक्तं कूर्चसमूहम् ।

परिधींश्चेध्मनिचयं मुक्तदर्भैः करण्डिकाम् ।

(Sprinkling)

92a. It shall be sprinkled with the water of *arghya* that is consecrated with the Astramantra.

(Paristaraṇa)[55]

92b-94a. *Darbhas*, with unbroken ends and roats, even (in size) are to be strewn (as Paristaraṇa) in every direction upto the extremity of the northern quarter beginning from the south with intervals in between. They are to be fourfolded and divided into four with the edges concealed from each other and be strewn the edges facing the eastern areas from the east to the north.

(Arrangements of the materials on the Paristaraṇa)

94b-100a. All the materials for *homa* beginning with the vessel[56] are to be brought there and are to be placed two by two on it (Paristaraṇa) to the south (right) of himself (priest). The sticks which act like fence,[57] groups of lighting faggots,[58] ladle[59] with loose *darbhas sruk* and *sruva*, all these four are to be put together as also the garlands, incense, Madhuparka, seeds (grains), silken cloth rid of the soft tails, seat, ghee, oblations (rice or barley boiled with milk), four vessels of ghee, a pair of Praṇītā[60] vessels, small pitcher,

55. Paristaraṇa: a boundary is formed on all the four sides of the fire with four looped bundles of *darbha*.
    See commentary for details.
56. *bhāṇḍa* refers to *sruk, sruva* and others.
57. *paridhi:* three sticks are laid round a sacrificial fire to keep it together.
58. *idhma:* fuel used in sacrifices.
59. Karaṇḍikā: a small ladle. This word is of Tamil origin; this must have got into an Āgama text at a very late period when texts of this kind were frequently used in Tamil Nadu. This word is used in *SKS. Brahma.* VII.185.
60. Praṇītā: a vessel containing water used in some quantity.

स्रुक्स्रुवौ च चतुष्कं यदेकत्र विनिवेश्य च ॥ ९६ ॥
स्रग्धूपमधुपर्कं च बीजान्येकत्र वै ततः ।
कौशेयं धूतकेशं तु विष्टरं च घृतं चरुम् ॥ ९७ ॥
आज्यस्थालीचतुष्कं च निधाय तदनन्तरम् ।
प्रणीतापात्रयुगलं करकं चार्घ्यभाजनम् ॥ ९८ ॥
चतुष्कमेतदपरमग्रतो विनिवेश्य च ।
प्रादेशमात्राः समिधः प्रभूतं शुष्कमिन्धनम् ॥ ९९ ॥
पक्ष्मकस्वेदहृद्वस्त्रं वामभागे निदाय वै ।

[आसादितानां प्रोक्षणम्]

अर्घ्योदकेन सास्त्रेण कृत्स्नं पावनतां नयेत् ॥ १०० ॥

पश्चिमपरिस्तरणोपर्यासाद्य द्रव्याण्याह- **प्रणीता** इत्यादिना । उत्तरपरिस्तरणोपर्यासाद्य द्रव्याण्याह- **प्रादेशमात्राः** इत्यादिना । पक्ष्मकं पक्ष्यते अग्निप्रज्वालनार्थं परिगृह्यते इति पक्ष्मकं व्यजनम् । 'पक्ष परिग्रहे' (१५५१) इति धातोः । पारमेश्वरव्याखाने तु "पक्ष्मकं सूक्ष्मम्" इति स्वेदहृद्वस्त्रविशेषणं कृतम्; तदसङ्गतम् । द्वन्द्वद्वन्द्वं क्रमेणासादनासम्भवात् । क्वचित्प्रयोगे समस्तपदभ्रान्त्या पक्षस्थं कं बाष्पमित्यभिप्रायेण बाष्पस्वेदहृद्वस्त्रमिति लिखितम्, तदपि विरुद्धम् । दीक्षाऽध्याये – "प्रागुक्तं स्रुक्स्रुवाद्यं च होमोपकरणं च यत् । सर्वं पक्ष्मकपर्यन्तं बृहत्पात्रद्वयान्वितम् ॥" (सा सं. १८.४६-४७ १/२)

इति सात्वतोक्तरीत्या वक्ष्यमाणत्वात् । किञ्च पारमेश्वरव्याख्यायामासादनविषये "अत्रैवं विवेक" इति प्रक्रम्यासादनक्रमः स्वच्छन्दमुक्तः । स त्वविवेकोत्थापितः मूलाभिप्रायविरुद्धत्वात् । आसादितानां प्रोक्षणमाह- **अर्घ्योदकेन** इत्यर्धेन ।

[परिधिन्यासः]

ततस्तु मूलदेशस्था ब्रह्मवृक्षादिकोत्थिताः ।
सपर्णाः सत्वचः स्पष्टा अधो नेमेऽस्तु चाधिकाः ॥ १०१ ॥
प्राक्प्रत्यगुत्तराग्रौ च प्रागग्रौ दक्षिणोत्तरौ ।
चतस्रो वै परिधयः शिखामन्त्रेण पूजयेत् ॥ १०२ ॥

[दिक्कुम्भार्चनम्]

विष्टराणि ततो दद्यात् हृदा कुम्भाष्टके ततः ।
तेषु क्रमात् पूजयेच्च लोकपालान् स्वदिक्स्थितान् ॥ १०३ ॥

[प्रणीतासंस्कारः]

आदाय सोदकं चाथ प्रणीताख्यं च भाजनम् ।
पवित्रकं तु तन्मध्ये चतुर्दर्भकृतं न्यसेत् ॥ १०४ ॥

arghya vessel, all these four are to be placed in the front; the *samit* faggots measuring a span, large quantity of dried fuel, fan[61] and cloth to dry up sweat are to be placed to the left.[62]

(Sprinkling of the procured materials)

100b. All the materials are to be made pure with *arghya* water with Astramantra.

(Placing the faggots on fence)

101-102. Worship is then to be done using the Śikhāmantra to four faggots which are from the root portion (of the trees) sprung from Brahmavṛkṣa[63] and other trees having leaves and barks, distinctly visible, huge in circumference below, two facing east and west with their tips and two facing south and north with their edges.

(Worship of the pitchers kept in the directions)

103. Then shall be placed handfuls of *darbha* in the eight pitchers uttering Hṛdayamantra. The guardians of the regions remaining in their quarters shall be worshipped in due order.

(Consecration of the Praṇītā vessel)

104-109. Taking the vessel called Praṇītā with water, a Pavitra made of four *darbhas* shall be placed amidst it. Taking water (from it) again and again, it must be poured there itself. The priest shall then do *japa* of Aṣṭākṣara. Everything there shall be sprinkled with the bunch of grass and that water. The remaining water shall be allowed to flow in all directions on

61. *pakṣamaka:* fan.
62. See the commentary for a detailed account.
63. Brahmavṛkṣa: divine tree. They are counted as four in number: (1) Palāśa, (2) Aśvattha (fig), (3) Nyagrodha (banyan), and (4) Udumbara.

उद्धृत्योद्धृत्य हस्तेन जलं तत्रैव निक्षिपेत् ।
ततस्त्वष्टाक्षरं मन्त्रं जपमानो हि साधकः ॥ १०५ ॥
भूयस्तदम्भसा सर्वं प्रोक्षयेद्विष्टरेण तु ।
शेषस्य स्रावणं कुर्यात् सर्वदिक्षु स्तरोपरि ॥ १०६ ॥
पुनरेवाम्भसापूर्य तन्मध्ये परमेश्वरम् ।
ध्यात्वार्चयित्वा संस्थाप्य त्वग्रतस्तदनन्तरम् ॥ १०७ ॥
प्रणीते चापरस्मिन् वै पात्रे चाग्रे कृते सति ।
सपवित्रं तु तत्रार्घ्यं दत्त्वा चक्रं तु विन्यसेत् ॥ १०८ ॥
मन्त्रनाथं तदूर्ध्वे तु ध्यात्वाभ्यर्च्य यथाक्रमम् ।
तत्पात्रमुत्तरस्यां च कृत्वा सम्पूज्य वै पुनः ॥ १०९ ॥

परिधिन्यासमाह- **ततः** इति द्वाभ्याम् ।
दिक्कुम्भार्चनमाह- **विष्टराणि** इत्यादिना ।
प्रणीतासंस्कारमाह- **आदाय** इति चतुर्भिः ।
अन्यप्रणीतासंस्कारमाह- **प्रणीते** इति द्वाभ्याम् ।

[आज्यस्य दशसंस्काराः]

अथाज्यं दशसंस्कारैः संस्कुर्यात् साधकोत्तमः ।
अधिश्रयणमत्रादावुपाधिश्रयणं तथा ॥ ११० ॥
प्रसादीकरणं चैव हृन्मन्त्रेण समाचरेत् ।
सम्प्लवोत्प्लवने कुर्यात् प्रणवेन तु साधकः ॥ १११ ॥
हृदा पवित्रीकरणं दृशा नीराजनं तथा ।
ततः कवचमन्त्रेण कुर्यात् तदवगुण्ठनम् ॥ ११२ ॥
अवलोकामृतीकारौ क्रमान्नेत्रेण वर्मणा ।
भाण्डस्थस्य यदाज्यस्य दर्भैः प्रज्वलितैः पुरा ॥ ११३ ॥
स्पर्शनं विद्धि संस्कारमधिश्रयणसंज्ञकम् ।
उपाधिश्रयणं नाम यत्तद्द्रावणमुच्यते ॥ ११४ ॥
आज्यस्थालीमथादाय त्वाज्यं यत्प्राग्द्रवीकृतम् ।
तत्तत्र निक्षिपेदाज्यभाण्डाद्दोषापनुत्तये ॥ ११५ ॥
प्रसादी[८]करणं ह्येतदुच्चस्थेन करेण तु ।
पुनरादाय कृत्वाग्रे आधारोपरि यत्ततः ॥ ११६ ॥

८. प्रवादी - A

the layer (of *darbhas*). That (vessel) shall again be filled with water. The supreme lord shall be thought (meditated upon) of (to be) in its midst. He shall be worshipped and placed in front. Thereafter, another Praṇītā vessel shall be kept in front. *Arghya* shall be poured there with Pavitra. The discus shall be placed there. The lord of mantras shall be meditated upon (as) above it and duly adored. That vessel shall be placed in the northern direction and be worshipped again.

(Ten consecrations for the ghee)

110-126. The eminent priest shall then do consecration to ghee with ten sacramental rites. They are: (1) Adhiśrayaṇa, (2) Upādhiśrayaṇa, (3) Prasādīkaraṇa— to be done with Hṛdayamantra, (4) Samplavana, (5) Utplavana with Praṇava, (6) Pavitrīkaraṇa with Hṛdayamantra, (7) Nīrājana with Netramantra, (8) Avaguṇṭhana with Kavacamantra, (9) Avaloka, (10) Amṛtīkaraṇa with Netra and Kavacamantras. Adhiśrayaṇa is to be understood as touching the ghee kept in the vessel with the already glowing *darbhas*. Upādhiśrayaṇa is melting (it). Pouring the ghee already liquefied into the Ājya vessel in order to remove the defect in (dirt) sticking to the vessel of the ghee taking the vessel with raised hand. This is Prasādīkaraṇa. The vessel shall be taken up again and placed on the support. Four *darbha* sticks measuring ten *aṅgulis*[64] are to be held horizontally with the two palms facing upwards allowing interval between them. The ring and thumb fingers should be kept together so that the middle finger would be bent (or depressed). The priest shall take, with them (fingers), ghee four times and throw them in the middle of the fire-pit uttering *Praṇava* as already stated, so as to pour them (four things) himself and fire (facing it). Having done Samplava and Utplava thus, the, Pavitra made of *darbha* shall be placed amidst it (ghee). That is Pavitrīkaraṇa. O brahmin! Rotating once the

64. *aṅguli*. See P. 27a.

दर्भकाण्डचतुष्कं तु द्वादशाङ्गुलसम्मितम् ।
तिर्यगुत्तानपाणिभ्यामवष्टभ्य च सान्तरम् ॥ ११७ ॥
अनामाङ्गुष्ठयुग्मेन यथा मध्यं नतं भवेत् ।
तैराज्यं चतुरो वारानानयेच्चतुरो नयेत् ॥ ११८ ॥
अन्तरान्तरयोगेन ह्यात्मनोऽग्नेस्तु सम्मुखम् ।
प्रणवेनोक्तसंख्येन कुण्डमध्येऽथ निक्षिपेत् ॥ ११९ ॥
सम्प्लवोत्प्लवने त्वेवं कृत्वा दार्भं पवित्रकम् ।
विनिक्षिपेच्च तन्मध्ये पवित्रीकरणं च तत् ॥ १२० ॥

आज्यसंस्कारानाह- **अथाज्यं दशसंस्कारैः** इति प्रक्रम्य **इदं ते सम्प्रकाशितम्** इत्यन्तैः ।

कुण्डादुल्मुकमादाय ज्वलन्तं धूमवर्जितम् ।
तेनावर्तं सकृद्विप्र तद्वै नीराजनं स्मृतम् ॥ १२१ ॥
नीराजीकृत्य तत्पश्चात् कवचोदरगं स्मरेत् ।
अवगुण्ठनमेतद्धि तर्जन्या यत्प्रदक्षिणम् ॥ १२२ ॥
तेजसा हृदयस्थेन दृग्गतेनावलोकनम् ।
निरीक्षणमिदं विप्र ततस्तत्रोपरि स्मरेत् ॥ १२३ ॥
चन्द्रमण्डलमध्यस्थं धेनुमुद्रासमन्वितम् ।
मन्त्रं वै सौरभेयं च स्फुरदिन्दुशतप्रभम् ॥ १२४ ॥
तदन्तरस्थं मन्त्रेशं हिमाचलनिभं स्मरेत् ।
तत्स्रुतैरमृतौघैश्च शशिजैर्धेनुजैरपि ॥ १२५ ॥
सर्वसंस्कारसंयुक्तं स्मरेदाज्यं च भावितम् ।
अमृतीकरणं नाम इदं ते सम्प्रकाशितम् ॥ १२६ ॥

[स्रुक्स्रुवसंस्कारः]

स्रुक्स्रुवावथ चादाय दर्भपुञ्जलिकेन तु ।
रजोऽपनयनं कुर्यात् प्रक्षाल्योष्णेन वारिणा ॥ १२७ ॥
निर्मलीकृत्य कूर्चेन ज्वालाभिः सम्प्रतप्य च ।
प्रोक्षयित्वार्घ्यतोयेन ताडयेद्गन्धपुष्पकैः ॥ १२८ ॥
तदाप्रमेयं तु स्रुचो ज्ञातव्यं कर्मसिद्धये ।
शतपत्रात्मनानन्तो मुष्टिस्थोऽनन्तवक्त्रधृक् ॥ १२९ ॥

smokeless and glowing spark of fire taking it from the fire-pit is considered to be Nīrājana. After doing Nīrājana, the priest shall think of it as gone into Kavacamantra. This is *Avaguṇṭhana* which consists in circumambulating (the vessel) with the fore-finger. Nirīkṣaṇa consists in looking at it (vessel) with the Astra in the heart coming to the eye. O brahmin! Then the thought shall be Surabhimantra[65] associated with the Dhenumudrā[66] as present amidst the moon's orb having a brilliance of one hundred lustrous moons and the lord of the mantra resembling Himālayas as present within it. The ghee shall be imagined to have become associated with all consecrations through the quick flow of nectar from there, from the moon and also from the cow (Kāmadhenu). This is called Amṛtīkaraṇa made clear to you.

(Consecration for Sruk and Sruva)

127-138. *Sruk* and *sruva* are to be taken with a bunch of *darbhas*, the dirt (there) getting removed and washed with hot water, cleaning them with the *kūrca*, warming with flames and sprinkling with the water of *arghya*. They shall be struck (touched) with fragrant flowers. The *sruk* must be imagined to be unknowable[68] for accomplishing one's actions, Ananta as existing in the form of lotus (present) in the fist[69] holding the *darbhas* as having many mouths; as seed (lying within) and standing with the face turned upwards; as the big wind, the life of all the living beings with its seven layers[70] and concerning the self (*adhyātman*)[71] which has gone to the serpent in the

65. Surabhimantra: ओं स्वीं सुरभ्यै नमः ।
66. Dhenumudrā: see note under III.22.
67. This treatment is identical with that in *JS*. XV.III.124.
68. *aprameya:* immeasurable, since it is to be considered as having deities present there.
69. *muṣṭistha:* that bunch of *darbha* held with the fist.
70. Wind is referred to have seven *skandhas*.

    skandha: region, layer one above the other, their names are —

    आवहो विवहश्चैव उद्वहः संवहस्तथा ।

    प्रवहः परिवहश्च तथैव च परावहः ॥ *SKS. Ṛṣi.* VI.172b-173a.

    For details on the function of these see Rāghavabhṭṭa's commentary on *Abhijñānaśākuntala* VII.6.
71. Adhyātman refers to Prāṇa, Apāna, Vyāna, Udāna and Samāna and also eyes, ears, mind, *vāk* and *tvak*.

अन्तर्बीजात्मभावेन स्थित्वा चोर्ध्वमुखः पुनः ।
सप्तस्कन्धं यदध्यात्मं भूतप्राणमरुन्महत् ॥ १३० ॥

स्रुक्स्रुवसंस्कारमाह- **स्रुक्स्रुवौ** इति द्वाभ्याम् ।
स्रुक्स्रुवयोरधिदेवतानाह- **तदाप्रमेयम्** इत्यारभ्य **न्यस्तमन्त्रगणं ततः** इत्यन्तैः ।

प्रेरितं ब्रह्मरन्ध्रेण तत्तदिच्छावशात् पुनः ।
सप्तपातालनागं च अगमत्क्ष्माम्बुजात्मना ॥ १३१ ॥
यदाश्रयत्यध्ववाहे त्वमृतात्मा जलं स्थितः ।
सचक्ररचनाजाले स्थितस्तेजस्त्रिमूर्तिधृक् ॥ १३२ ॥
शङ्खविग्रहधृग्वायुराज्यकोशं च खं ततः ।
निर्बीजमजमक्षोभ्यमाद्यं यस्याधिदैवतम् ॥ १३३ ॥
अपरस्मिन् स्रुवे ज्ञेयं यथा जायेत तच्छृणु ।
साक्षादमृतमूर्तिर्वै वरुणः कलशात्मना ॥ १३४ ॥
नालात्मना तदस्त्रं च संस्थितं विघ्नभीतिहृत् ।
जगदाप्यायकृच्चन्द्रः पद्मत्वेनाग्रदेशतः ॥ १३५ ॥
आनन्दाख्यं हि सामर्थ्यं ज्ञेयं तत्पारमेश्वरम् ।
सत्यभूतममेयं च प्रमेयमिदमुच्यते ॥ १३६ ॥
संस्कारकाले त्वारोप्य नित्यं सन्मन्त्रतर्पणे ।
स्वसंज्ञाप्रणवोपेता नमस्कारपदान्विताः ॥ १३७ ॥
सर्वेषामर्चने विप्राः आराध्य हृदयेन वा ।
पूजयित्वार्घ्यगन्धाद्यैर्न्यस्तमन्त्रगणं ततः ॥ १३८ ॥

seventh Pātāla[72] prompted by Brahmarandhra according to their (winds) respective wishes; taking the form of earth as lotus; where water (in its form) which is of the nature of nectar remains there with the wind upon it remaining and blowing there; where it remains taking the refulgent shape in a cluster arranged with the form of wheel (discus) it is as air taking the form of conch, and as Ākāśa (in the form) a receptacle of ghee and whose presiding deity is seedless and unborn imperturbable and primeval. Listen how this happens in the other (namely) *sruva.* Varuṇa is evidently of the form of nectar. He is in the form of jar, its Astra is in the form of handle removing the fear (rising) from obstacles; moon, which nourishes the world is to be thought as a lotus (stationed) in the front; that efficiency called Ānanda is to be taken as belonging to the Supreme Lord, real, immeasurable and knowable. O brahmins! They are always to be placed at the time of consecration, when the good mantras are to be pleased with their names and *Praṇava* and used with the word *namaskāra.* O brahmins! Or while worshipping all of them, they shall be adored with Hṛdayamantra. The host of the mantras is to be placed after adoring them with *arghya,* sandal-paste and others.[73]

72. Seven underworlds are: -

    अतलं वितलं चैव नितलं च गभस्तिमत् ।

    महाख्यं सुतलं चाग्रयं पातालं चापि सप्तमम् ॥ *Pād. S. Jñāna* XI.2-3; VP. I.2.2.

    Atala, Vitala, Sutala, Rasātala, Tālatala, Mahātala and *Pātāla* are stated; vide: M.M. Williams: Sanskrit English Dictionary, P. 906.

    Here the word *sapta* means seven and not seventh, but the name Pātāla is given to the seventh nether world. Hence *sapta* can be taken to all nether worlds including Pātāla. Great serpents are said to dwell in all these seven worlds;

    vide: तेषु दानवदैतेयजातयश्शतशस्तथा ।

    निवसन्ति महानागजातयश्च महामते ॥ *VP.* IIb.2-4.

73. The two ladles *sruk* and *sruva,* longer and smaller in size are here to be conceived as having deities presiding over them. *Sruva,* the smaller ladle is to be used for taking the oblations. The container, ladle and the lotus-like portion at the top are stated to have Varuṇa and moon as the deities, justly because both the deities are in charge of sweet, nectar-like liquid (water) along with solid preparations. *Sruva* is to be used for pouring its contents into the bigger ladle *sruk*; the ladle with cavity, space for ghee; ornamentations are there above the cavity like discus, conch and others. These are presided over by Ananta, earth, water, fire, wind and Ākāśa. This description is apt, since the offerings are to be made as if the five elements and Ananta have a hold in supplying and preparing these offerings.

[वामहस्ते वलयपवित्रधारणम्, दक्षिणानामिकायां पवित्रधारणं च]

बहुशाखैरभग्नाग्रैः समूलैः सुसमैः कुशैः ।
चतुर्भिर्वामहस्तेन त्वादायाथ पवित्रकम् ॥ १३९ ॥
दक्षिणानामिकायां तु चतुष्काण्डविनिर्मितम् ।
अङ्गुलीयकरूपं च कृत्वा वै तदनन्तरम् ॥ १४० ॥

अथ वामहस्ते वलयपवित्रधारणं दक्षिणानामिकायां पवित्रधारणं चाह- **बहुशाखैः** इति द्वाभ्याम् ।

[समिदादिषु संस्कृताज्यसेचनम्]

संस्कृताज्यस्य विप्लुड्भिः संस्पृशेदिन्धनादिकम् ।

[अग्निशुद्ध्यर्थं होमः]

निःशेषदोषशान्त्यर्थमथाग्नेराहृतस्य च ॥ १४१ ॥
शतं शतार्धं पादं वा त्वाहुतीनां स्वशक्तितः ।
तिलानां घृतसिक्तानां[१] शुद्धेन हविषा सह ॥ १४२ ॥
होतव्यं कर्मसिद्ध्यर्थं यथावदवधारय ।
आहुत्यामुद्धृतायां च मूलमन्त्रावसानतः ॥ १४३ ॥
प्रणवान्तं पदं ब्रूयादग्निं शोधय शोधय ।
यथावस्थितरूपेण ततस्तेनैव बुद्धिमान् ॥ १४४ ॥
दद्यात् पूर्णाहुतिं पश्चाद्धृतेन च चतुष्फलीम् ।

[अग्नेः गर्भाधानादिसंस्काराः]

अग्नेर्होमोऽथ कर्तव्यः सर्वसंस्कारसिद्धये ॥ १४५ ॥
हृदानलं पुटीकृत्य कर्मनाम समुच्चरेत् ।
सम्पादयामि स्वाहान्तं सर्वकर्मस्वयं क्रमः ॥ १४६ ॥
आज्येन सिक्तैः कुसुमैः सर्पिषा वा धिया द्विज ।
गर्भाधानादिसंस्कारान् कुर्याद्द्वारावसानकान् ॥ १४७ ॥
श्रीकुक्षिकुहरे यद्वै बहिष्ठस्य प्रवेशनम् ।
गर्भाधानं तु तद्विद्धि संस्कारं प्रथमं मुने ॥ १४८ ॥

१. सक्तानाम् - B

(Wearing the circular Pavitra in the left hand and Pavitra in the right fourth (ring) finger)

139-140. Wearing in the left hand Pavitra[74] made of four *darbhas* with many twigs, unbroken edges, and roots and of identical measurements, and Pavitraka[75] in the form of a ring in the fourth finger in the right hand made of firm slacks (*darbhas*).

(Sprinkling the faggots and others with the consecrated ghee)

141a. Fuel and others are to be touched with drops of consecrated ghee.

(Homa for purifying the fire)

141b-144a. *Homa* must be done, for the complete removal of defects in the fire brought there, with seasamum sprinkled with ghee along with pure oblation,[76] one hundred offerings or half or quarter of it, according to one's capacity. Understand (it) for accomplishing the act (undertaken). Agni is to be addressed (or uttered) with the words "cleanse, cleanse" with *Praṇava* at the end after the Mūlamantra is uttered, while the offering is taken up (to be let down in the fire). The wise man (priest) shall offer Pūrṇāhuti with that itself kept in the same form as it is and later with the offerings with four fruits.

(Impregnation and other consecrations for fire)

145b-158. Then *homa* is to be done for fire in order that all consecrations get accomplished. The letter *r* is to be made into a casket[77] with the Hṛdayamantra and the name of the act (to be undertaken) shall be mentioned (in the words) "I shall procure" till the *homa* is concluded. This method applies to all (religious) undertakings. O brahmin! One shall do impregnation and other consecratory acts upto taking the wife (marriage) with ghee sprinkled with flowers or ghee or intellect.[78] Understand impregnation as the entry of what is outside into the cavity of the holy abdomen (where Śrī is there as *śakti*).[79] O sage! This is the first act of consecration. That

74. Pavitra called Valayapavitra.
75. Pavitraka resembling the ring with the *darbha* round and round. For a description of these two Pavitras see P.V. Kane: History of Dharmaśāstra, Vol. II part I, P. 657.
76. Pure oblation: prepared with butter, milk, Soma and grains or any one left out of these.
77. *puṭīkṛtya:* making it to form a funnel shaped vessel, so as to make it resemble a casket, that is *r* is to be in the middle with the Hṛdayamantra surrounding it, so as to give the impression that *r* is within the casket made with the Hṛdayamantra. Besides *r* means fire.
78. *dhiyā:* mentally formed.
79. The mantra is — ओं रं जानाय हृदयाय नमः, गर्भाधानं सम्पादयामि स्वाहा ।

प्राणयोगाच्च या शक्तिर्वह्निश्रीजठरे स्थिता ।
जडरूपा च या सूक्ष्मा तस्याश्चित्प्रसरो हि यः ॥ १४९ ॥

समिदादिषु संस्कृताज्यसेचनमाह- **संस्कृताज्यस्य** इत्यर्धेन । विप्लुड्भिः बिन्दुभिः ।

अथाग्निशुद्ध्यर्थं होममाह- **निःशेष** इति चतुर्भिः ।

अग्नेर्गर्भाधानादिसंस्कारमन्त्रद्रव्यप्रकारानाह- **अग्नेर्होमोऽथ कर्तव्यः** इत्यारभ्य **समावर्तविवाहकौ** इत्यन्तैः ।

भगवच्छक्तिचैतन्यासामर्थ्याच्च शनैः शनैः ।
स्मृत्वैवं जुहुयादाज्यं तन्मन्त्रेणोदितेन च ॥ १५० ॥
भवेत् पुंसवनं चाग्नेश्चिच्छक्तिनयनात् तु वै ।
सीमन्ताख्यं तु संस्कारमग्नौ[10] कुर्यादनन्तरम् ॥ १५१ ॥
अव्यक्ताश्च तदन्तःस्थाः शिरःपाण्यादयोऽखिलाः ।
स्वां स्वां वै कर्मसीमानं प्रबुद्धाः संश्रयन्ति ये ॥ १५२ ॥
विभागकलनात्[11] तेषां सीमन्तं तदुदाहृतम् ।
अग्नेर्वै जातकर्मार्थं पूर्ववद्धोमयेत् सकृत् ॥ १५३ ॥
निःसृतस्य च वै गर्भाज्जातकं तदुदाहृतम् ।
हिरण्यमधुसर्पिभ्यां स्तनसम्प्राशनं द्विज ॥ १५४ ॥
कुर्यात् तदनु वै नाम जातस्याग्नेः प्रयत्नतः ।
वासुदेवादिनाम्ना वै प्रसिद्धेनाङ्कयेत् तु तम् ॥ १५५ ॥

हृदानलं पुटीकृत्येत्यत्र हृदा हृन्मन्त्रेण, अनलं रेफम्, "रोनलः कालपावकः" इति जयाख्यवचनात् । पुटीकृत्य सम्पुटीकृत्येत्यर्थः । एवं गर्भाधानादिसंस्कारानुष्ठानं मण्यादिसम्भवाग्निविषयः; अरणिसम्भवाग्निविषये तु गर्भाधानादिसंस्कारत्रयस्य मथनेनैव चारितार्थ्यात्, जातकर्मादीनामेवानुष्ठानम् । तथोक्तं लक्ष्मीतन्त्रे-

"ध्यायेत् सर्वात्मिकां शक्तिं तामेव त्वधरारणिम् । उत्तरं चारणिं ध्यायेत् सर्वतेजोमयं हरिम् ॥ मथ्नीयात् तारया सम्यक् तथा चैवानुतारया ॥" इति ।

अत एव स्पष्टमुक्तं तत्रैव - "सर्वध्यानमयं कार्यं जातानामादिकर्म तत् । लोहपाषाणमण्युत्थवह्नौ कार्यवशात् कृते ॥ लौकिके वापि संस्कारान्निषेकादि समाचरेत् ॥" इति ।

१०. संस्कारमग्ने - B, D, E
११. कल्पना - D, E

power, which is in the holy abdomen of fire, is inert and subtle. It acquires diffusion of sentience slowly as a result of consecration with the vital air and efficiency of sentience getting Bhagavān's powers. The priest shall then think of this and do *homa* of it with ghee uttering his (its) mantra. There shall be then Puṃsavana for the fire because of bringing (there) the power of sentience. A rite called Sīmanta[80] is then to be done for the fire. All these, head, hands and others (limbs) which are unmanifest within that, get aroused (attain) in their own limits of actions and occupy their place. This is called Sīmanta, since the divisions are arranged (in the foetus which till then does not have them there). *Homa* is to be done once as before for the rite of Jātakarma.[81] That is called *jāta* for that which has issued out of the womb. O brahmin! Eating (suckling) of the breasts is to be arranged with gold (ladle) touched with honey and ghee. The name is then to be given (with effort) to the fire that is now born. It (fire) is to be marked with the reputed names like Vāsudeva and others.

80. The word *sīmanta* is used here to mean the ritual done to a pregnant woman in the sixth or eighth month of pregnancy. It is stated in Ślokas 152-153a that the ace foetus which is in a mass without any distinctions regarding the limbs of the child to be born, gets divided (*vibhāgakalanāt*) resulting in the formation of head, hands and others, with definite limits (*sīmā*) set for each limb; *anta* — measuring, end. *Sīmanta* means thus the end set for the limits (proportionate size) for each limb, that is, a definite shape being given to each limb.

The name *sīmanta* is given, according to the Gṛhyasūtras, to the sacramental act "parting the hair on the head of the pregnant woman to have line" (P.V. Kane: History of Dharmaśāstra, Vol. II Part-I, pp. 223-224). Kātyāyana's *Vārttika* on Pāṇini's *Aṣṭādhyāyī* determines the form of this word to mean this rite; vide: *sīmantaḥ keśaveśe* (Vārttika no. 3633 under *Aṣṭādhāyāyī* I.1.64 in the *Siddhāntakaumudī* of Bhaṭṭoji Dīkṣita, *sūtra* No. 79 *Sandhiprakaraṇa*). It is shown that *sīmanta* means boundary set for the areas in villages. The Sanskrit-English Dictionary (P. 218) of M.M. Williams contains the following:- a line of separation on the human body (14 are enumerated corresponding to the joints of the bones on Asthisaṅghātā, (*Suśrutasaṁhitā*). It seems that Kātyāyana sought to explain the sense of the word *sīmanta* in its formation following the denotation obtained during his days, particularly as it was founded on the rules laid down in the Gṛhyasūtras. The more correct sense seems to be that is stated in the Dictionary mentioned above, as contained in the *Suśrutasaṁhitā*, a medical treatise. This sense appears to have been well-known in other fields of learning also like the *JS*. XV.141b-142 for an identical interpretation

81. Jātakarman: a birth ceremony in which the newly born child's tongue is touched thrice with ghee; *Yājñavalkyasmṛti*, I.11.

एवं संस्कारशुद्धस्य वैष्णवाग्नेः प्रयत्नतः ।
मन्त्रान्नदानं पूर्वं यत्तदन्नप्राशनं भवेत् ॥ १५६ ॥
शिखाबन्धं यदग्नेस्तु तच्चौलमिति चोच्यते ।
यदग्नेर्होमयेदाज्यं तच्चोपनयनं स्मृतम् ॥ १५७ ॥
वेदव्रतं च गोदानं समावर्तविवाहकौ ।

[अग्नेः सप्तजिह्वापरिकल्पनम्]

कृत्वाऽनलस्य जिह्वानां भावयेत् सप्तकं पुनः ॥ १५८ ॥
नवखण्डे समिन्धाने कुण्डेऽग्नावर्चिषोद्धृते ।
प्रभा दीप्तिः प्रकाशा च मरीचिस्तापिनी तथा ॥ १५९ ॥
कराला लेलिहा चैव कुण्डं व्याप्य व्यवस्थिताः ।
ईशपूर्वाग्निदिग्भागे प्रभाद्यं त्रितयं स्मृतम् ॥ १६० ॥
रक्षोवारुणवायव्ये मरीच्याद्यं त्रयं तु तत् ।
उदग्दिङ्मध्यतो याम्ये स्थितैका लेलिहाभिधा ॥ १६१ ॥
रक्तं श्वेतं तथा नीलं कृष्णं पीतं तथारुणम् ।
सौदामिनीनिभं ध्यायेज्जिह्वानां सप्तकं क्रमात् ॥ १६२ ॥
स्वस्वबीजैः स्वसंज्ञैर्वा स्वबीजैर्वा[१२] स्वनामभिः ।

१२. सबीजैः - D, E

Mantras are to be offered at first as food with effort to the Vaiśvānara fire that is thus made pure with consecration. This is called Annaprāśana. Formation of the flames is said to be Caula (tonsure). Offering of ghee in the fire is held to be Upanayana. After doing Vedavrata,[82] Godāna,[83] Samāvartana[84] and Vivāha...[85]

(Arrangements of seven tongues for the fire)

158-163... The seven tongues[86] are to be imagined (as had by) for the fire; (they are): Prabhā, Dīpti, Prakāśa, Marīci, Tāpinī, Karālā and Lelihā stationed themselves spreading in the fire-pit. When fire rises up in flames in the ignited fire pit having nine parts. The three beginning with Prabhā are in the north-east, east and south-east and other portions of the quarters. The three Marīci and others are in the south-west, west and north-west. Lelihā is the name for that one (flame) which is in the south and the middle of the

82. Vedavrata: observances of a Vedic student during the period of studies of the Vedas. There are several versions. It is four: Mahānāmnī, Mahāvrata, Upaniṣadvrata and Godāna (*Āśvalāyana Gṛhyasūtra* II.11-12: also four Śukrīya, Śakvara, Vrātika and Aupaniṣada (*Śāṅkhyāyana Gṛhyasūtra*). It is five: Godānika, Vrātika, Āditya, Aupaniṣaḍa, Jyeṣṭhaśāmika (*Gobhila Gṛhyasūtra* III. 1.26-31); and also five: Hotāra, Śukrīya, Upaniṣada, Godāna and Sammita (*Baudhāyana Gṛhyasūtra* III.2-4).

    For a detailed treatment see P.V. Kane: History of Dharmaśāstra, Vol. II. Part: I, p. 370.
83. Godāna: a ceremony performed with the cutting of the side hair of a youth of 16 or 18 years of age. This is suggestive of the boy's fitness to marry. This precedes marriage; vide: अथास्य गोदानविधेरनन्तरं विवाहदीक्षं निरवर्तयत् प्रभु: । *Raghuvaṃśa*, III. 33; see Mallinātha on ibid.— गावो लोमानि केशा दीयन्ते खण्ड्यन्तेऽस्मिन्निति । cf. एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारोभ्रातरो विवाहदीक्षिता यूयम् । *Uttararāmacarita*, I.17; this rite is also called Keśānta; cf. केशान्त: पुन: गोदानाख्यं कर्म गर्भादारभ्य षोडशे वर्षे ब्राह्मणस्य कार्यम् । *Mitākṣarā* on *Yājñavalkyasmṛti*, I.36; cf. *Manusmṛti*, II.65. However, according to the *Rāmāyaṇa. Bāla.* LXXII.21-24; Iodāna refers to the gift of cars to be made before marriage.
84. Samāvarta: returning home of Brahmin student of the Vedas after completing the study of the Vedas in the house of the preceptor. For rules on this, see *Āpastamba Dharmasūtra*, I.11.30-31; see P.V. Kane: History of Dharmaśāstra, Vol. II, Part: I, p. 40.

    It is interesting to note that the rites of sacramental character which are to be gone through by a householder (who performs) are dealt with here as applicable to the sacred fire in order to make it perfect and become qualified for doing home there.

    cf. LT. XL.42-45 for a brief treatment; *JS.* XV.131-147.

    The four rites Vedavrata, Godāna, Samāvarta and Vivāha are mentioned by their names without any treatment.
85. Svāhā and Svadhā are the wives of Agni; vide: *LT.* XL. 44b-45a.
86. Saptajivha: cf. *JS.* XV. 138-140b.

एतैर्मन्त्रैर्द्विजश्रेष्ठ भावयेच्च यथाक्रमम् ॥ १६३ ॥

विवाहप्रकारोऽपि स्पष्टमुक्तस्तत्रैव -

"ततः स्वाहास्वधाभ्यां तु देवीभ्यां जातवेदसः ।
पाणिग्रहणकं कुर्यात् तारया त्वनुतारये ॥" इति ।

अथाग्नेर्जिह्वाकल्पनमाह- **कृत्वाऽनलस्य जिह्वानाम्** इति प्रक्रम्य **भावयेच्च यथाक्रमम्** इत्यन्तैः । अत्राग्निजिह्वाबीजसप्तकं जयाख्योक्तं ज्ञेयम् । — **ल्रीं व्रीं श्रीं श्ट्रीं स्त्रीं ह्रीं क्ष्रीम्** इति ।

[अग्निसत्तापरिज्ञानपूर्वकं तद्ध्यानं कार्यम्]

अङ्गाराण्यर्चिषश्चैव शक्तिर्या दहनात्मिका ।
त्रिलक्षणोऽयमाधारः आधेयो हुतभुग्विभुः ॥ १६४ ॥
आत्मनोऽग्नेस्तु विश्वेशो वासुदेवः सनातनः ।
एवं ज्ञात्वा पुरा सम्यक् सक्तां वैश्वानरीं पराम् ॥ १६५ ॥
आधेयोल्लिङ्गिताकारं ध्यात्वा कुण्डगतानलम् ।

[पूर्वमावाहितस्य नारायणशक्त्युपसंहारक्रमः]

तज्जनित्रीं ततः कुण्डाज्ज्वालामार्गेण चागताम् ॥ १६६ ॥
परानन्दप्रकाशाभां नासिक्यां द्वादशावधि ।
ततोऽवतारयोगेन प्रविष्टां भावयेद्धृदि ॥ १६७ ॥

अथाग्निसत्तापरिज्ञानपूर्वकं तद्ध्यानं कार्यमित्याह- **अङ्गाराणि** इति सार्धद्वाभ्याम् । आधेयोल्लिङ्गिताकार-माधेयवत् स्वान्तस्थितनारायणवदुल्लिङ्गित उत्कृष्टचक्रादिलाञ्छनयुक्त आकारो यस्य तं तथोक्तम् । एवं स्पष्टमुक्तं जयाख्ये -

"इति संस्कारसंशुद्धं वह्निं नारायणात्मकम् । चतुर्भुजं चतुर्वक्त्रं शङ्खचक्रगदाब्जिनम् ॥ कुण्डमध्यस्थितं ध्यात्वा उदयार्कसमप्रभम् ।" इति ।

अत्र मूलमन्त्रवद्वह्नेरपि चतुर्मुखत्वोक्त्या सर्वत्र तत्तत्संहितोक्तमूलमन्त्रध्यानानुसारेणैवाग्निध्यानमिति सिद्धम् ।

पूर्वं कुण्डविन्यस्तनारायणशक्त्युपसंहारक्रममाह- **तज्जनित्रीम्** इति सार्धेन । नासिक्यां द्वादशावधि नासिकोत्पन्नद्वादशाङ्गुलसञ्चरद्वायुपर्यन्तं ज्वालामार्गेणोद्गतामित्यन्वयः । तदनन्तरं पूरकमार्गेणान्तःप्रवेशः सम्भवतीति भावः ।

१३. रुचिम् - D, E

northern directions. The seven coloured columns are to be thought of (as had by the fire) in the order of red, white, blue, black, yellow and ruddy (like the rising sun) resembling lighting. O best brahmin! These flames are to be meditated upon in the (this) order with (their) these mantras each of which has its own name or their *bījas* and their names.[87]

(Meditation is to be done after knowing the existence of fire there)

164-166a. The container (for fire) has three forms, charcoal, flame and power to burn. The lord of fire is to occupy it. Eternal Vāsudeva, the lord of the universe is the soul of the fire. Knowing well before hand that the supreme Vaiśvānara is attached to it (fire), fire in the fire-pit shall be meditated upon as having an (external) form manifested by the marks of the fire contained there.

(Method of withdrawing Nārāyaṇa's power already invoked)

166-167. It (Nārāyaṇaśakti) is to be thought in the heart as having produced it (fire), as having come out of the fire-pit through the flame, resembling the brilliance of supreme bliss and having entered (by) coming down upto the air moving twelve *aṅgulas* from the nose.[88]

87. See commentary for the *bījamantras* of all these flames.
88. *Nāsikāyāṃ dvādaśāvadhi:* reaching the breath issuing out of the nostrils and upto the limit of twelve *aṅgulas*. This is to be done through the flames. Entering into the heart means entering through Pūraka done in Prāṇāyāma.

[सम्बोधजनकहोमः]

तस्य संशुद्धदेहस्य पुनरेवं समाचरेत् ।
सम्बोधजनकं होमं जडभावप्रशान्तिदम् ॥ १६८ ॥
उच्चार्य मूलमन्त्रं तु प्रणवद्वितयान्वितम् ।
जुहुयादाहुतीनां च सहस्रं शतमेव वा ॥ १६९ ॥
तद्वदाज्येन सन्तर्प्य दद्यात् पूर्णाहुतिं तथा ।

[अग्न्यर्चनं ध्यानं च]

संस्कृतस्याथ वै वह्नेः पूजां कुर्यात् तु भक्तितः ॥ १७० ॥
पुष्पैर्धूपेन दध्ना च तिलैरक्षतमिश्रितैः ।
अन्नैर्भक्ष्यफलोपेतैराज्येन क्रमशो द्विज ॥ १७१ ॥
सम्पूज्यैवं विधानेन स्वमन्त्रेणानलं ततः ।
तर्पयेत यथाशक्ति तिलाज्याद्यैरनुक्रमात् ॥ १७२ ॥
आज्येन वा केवलेन सहस्रशतसंख्यया ।
अग्नेः पूर्णाहुतिं दत्त्वा वौषडन्तां घृतेन तु ॥ १७३ ॥
ततः पूजा प्रकर्तव्या देवस्याग्नेस्तु मध्यतः ।
पूर्ववच्च स्मरेद्वह्निं साकारं निष्कलप्रभम् ॥ १७४ ॥
स्वयोगबलवीर्येण व्यापकं रविदिग्गतम् ।
कदम्बकुसुमाकारं स्वप्रभाभिर्विराजितम् ॥ १७५ ॥
कुण्डमापूरयन् सर्वं सर्वाकृत्या तु सर्वतः ।
एवं हि विततो व्यापी निराकारस्सुदीप्तिमान् ॥ १७६ ॥

अग्निस्सम्बोधजनकं होममाह —**तस्य** इति सार्धद्वाभ्याम् ।

अथाग्न्यर्चनं तद्ध्यानञ्चाह—**संस्कृतस्य** इत्यारभ्य **निराकारस्सुदीप्तमान्** इत्यन्तैः । स्वमन्त्रेण - अग्निमन्त्रेण, तन्मन्त्रश्च जयाख्योक्तः— **ओं ज्रौं ल्रीं व्रीं श्रीं ष्ट्रीं ह्रीं क्ष्रीं तेजसे सप्तार्चिषे स्वाहा** इति ।

[अग्निमध्ये भगवदावाहनध्यानार्चनादि]

अथ ज्वालाजटाधारे वह्नेर्वै कुण्डमध्यतः ।
अनुसन्धीयते बुद्ध्या विष्टरन्तु यथोदितम् ॥ १७७ ॥
तदर्थनमधः कुर्यात्पुष्पैर्धूपैस्सचन्दनैः ।
मुद्राबन्धं ततः कुर्यात्पीठामरगणस्य च ॥ १७८ ॥

(Homa that would awaken fire)

168-170a. A *homa* must be done to arouse, wake it (fire) up whose flame has thus been purified in order to give solace (supression) to its inert condition. Offerings are to be made thousand or hundred times after uttering Mūlamantra associating it with two *Praṇavas*. It is to be done after causing delight to it with ghee.

(Worship of fire and meditation upon it)

170b-184. Worship shall be done with devotion to the fire that has been consecrated, O brahmin! with flowers, incense, curds, seasamum mixed up with Akṣata, food preparations together with eatables and fruits and ghee, in due order. After worshipping fire, then according to the precept, with its mantra it (fire) shall be made satisfied, according to one's means, with seasamum, ghee and others in this order or ghee alone one thousand times. Pūrṇāhuti shall be offered to the fire with ghee uttering *vauṣaṭ*. Then worship is to be done to Agni, the deity in the midst (of the fire-pit). Agni shall be thought of as before as possessing a form and have a faultless splendour[89] as pervading with *bala, vīrya*[90] associated with itself and had gone (pervaded) to all directions to be a form of Kadamba flower,[90] shining with its own splendour and filling the entire fire-pit on all sides with all the forms. Thus he (fire) is spread out, pervading, formless and very refulgent.

Then the seat as stated must be thought of mentally in the midst of the fire-pit for the fire which bears the matted hair in the form of flames. Worship for the fire must be done below with flowers, incense, together with sandal paste. Then the *mudrā* must be formed (for the fire) and for the host of gods (stationed) in the pedestal. The supreme lord shall be brought down to its (fire) midst from the heart[91] (of the priest) and handful of flowers shall be offered to the lord with his mantra[92] (*niraudakāt*). Supreme lord shall be meditated upon who has all parts[93] (full) for all times and marks and shall make him become favourably inclined present there and to remain there

89. *niṣkala:* partless; *kalā* — part; which has parts is not considered to be supreme. Hence this word can be taken to mean faultless.
90. *bala* and *vīrya*, strength and vigour.
91. Kadamba: a particular tree which blossoms in the rainy season.
92. *niraudakāt:* does not given any sense; *audaka* means belonging to water, watery; *niraudaka*, non-watery; it must govern *hṛdayāt*: no sense is available, the reading must be defective.
93. *sakala*: having parts, that is, clearly visible in a finalised form.

ततोऽवतार्य तन्मध्ये हृदयात्परमेश्वरम् ।
निरौदकात्स्वमन्त्रेण दद्यात्पुष्पाञ्जलि विभोः ॥ १७९ ॥
साङ्गं सलाञ्छनं ध्यायेत्सकलं परमेश्वरम् ।
साम्मुख्यं सन्निधानञ्च सन्निरोधनमाचरेत् ॥ १८० ॥
अर्ध्यप्रदानपूर्वन्त सर्वं कुर्यात्तु पूर्ववत् ।
मूलबिम्बे यथा ध्यानमग्निमध्ये तथा भवेत् ॥ १८१ ॥
यानगे यानगं ध्यायेदग्नौ स्थाने यथास्थितम् ।
आसीने त्वथ चाऽऽसीनं आयाने च तथाविधम् ॥ १८२ ॥
पद्मरागाऽगुरुणंशुचि[१३] स्मर्तव्यमनलास्पदे ।
मूलादिसर्वमन्त्राणां तत्तन्मुद्राः प्रदर्श्य च ॥ १८३ ॥
अर्ध्यगन्धादिनाऽभ्यर्च्य पूजयेत्सकलं प्रभुम् ।
लयभोगात्मना सम्यक् पूर्वोक्तविधिना तथा ॥ १८४ ॥

[इध्महोमाधारहोमौ]

समिद्गणं तु पात्रस्थं कृत्वाभ्यर्च्य हृदा ततः ।
शिरसावनतेनैव विनिवेद्य ततः प्रभोः ॥ १८५ ॥

अथाग्निमध्ये पीठपरिकल्पनपूर्वकं भगवदावाहनध्यानार्चनक्रममाह- **अथ ज्वालाजटाधारे** इत्यारभ्य **पूर्वोक्तविधिना तथा** इत्यन्तैः। अत्र अर्घ्यप्रदानपूर्वं तु इत्यादौ घृतेनैवार्घ्यदानं कार्यम्। ''अर्घ्यपूर्वन्निवेद्यान्तं सर्पिषा जुहुयात् सकृत्'' इति पाद्मवचनात्।

इध्महोमक्रममाह- **समिद्गणम्** इति प्रक्रम्य **वाय्वीशपदसंरुद्धम्** इत्यन्तैः।

आज्येनोभयतः सिक्तं ब्रह्मक्षीरद्रुमोद्भवम् ।
इध्माष्टकं समादाय द्विधा कृत्वा द्विजोत्तमाः ॥ १८६ ॥
निधाय दक्षिणस्यां च मध्य आग्नेयदिग्गतम् ।
विश्रान्तं नैर्ऋतपदे उत्तरस्यां तथापरम् ॥ १८७ ॥
वाय्वीशपदसंरुद्धमाघाराज्यं ततः क्षिपेत् ।

१३ रुचिम् -D,E

with stability. Every act shall be done as before, after giving *arghya*. Meditation shall be done amidst fire as it is done to the Mūlabimba. Meditation upon him when mounted on the vehicle shall be as he is on the vehicle and as he is when he is in the fire and as seated when he occupies a seat and when lying (on the couch) as he is there. He shall be thought of as shining red like the ruby, while he is in the fire. The respective *mudrās* for Mūla and other mantras shall be shown. Worship is to be done to the lord having concrete form with *arghya*, sandal-paste and others doing Laya and Bhoga according to the rules already stated.

(Homa with faggots and homa with sprinkling ghee on fire)

185-188a. Multitude of faggots is to be kept in a vessel and worshipped with Hṛdayamantra. Offerings of food are to be made to the lord, with the head bent. O best brahmins! Then eight faggots produced from the tree which exudes milk and have both sides sprinkled with ghee are to be taken and divided into two. One part is to be placed in the southern direction in the middle (of fire) so as to face south-east extending to south-west and the other (half) in the north from north-west to north-east. Then they are to be sprinkled with ghee.

[आज्यभागः]

इध्ममूलादथाक्रान्तमिध्मेध्मोपरि संस्थितम् ॥ १८८ ॥
स्रुवमाज्येन सम्पूर्य सूर्यबीजेन चिन्तयेत् ।
सहस्रांशुं च तन्मध्ये दद्यात् कुण्डस्य दक्षिणे ॥ १८९ ॥
अपरस्मिन् स्रुचि ध्यात्वा सोमाख्येनाक्षरेण तु ।
पूर्णं शशाङ्कबिम्बं च प्रदद्यात् तत उत्तरे ॥ १९० ॥

[अग्नेर्वदनलोचनकल्पनम्]

संख्यानुगुणमिध्मानां घृतं च जुहुयात् तु वै ।
सूर्यसोमात्मकं चाग्नेर्विद्धि तल्लोचनद्वयम् ॥ १९१ ॥
एतयोरन्तरं यद्वै तदग्नेर्वदनं स्मृतम् ।

[सप्तसमिद्धोमः]

तत्र वै जुहुयात् पूर्वं समिधां सप्तकं क्रमात् ॥ १९२ ॥

आघारहोममाह- **आघाराज्यम्** इति ।

आज्यभागावाह- **स्रुवम्** इति द्वाभ्याम् । सूर्यबीजेन हकारेण । सोमाख्येनाक्षरेण सकारेण ।

"सकारश्चामृतं तृप्तिः सोमस्तु परिपठ्यते । सूर्यो हकारः प्राणस्तु परमात्मा प्रकीर्तित ॥" इति जयाख्यवचनात् ।

इध्मसंख्याहोमपूर्वकमग्नेर्वदनलोचनकल्पनमाह- **संख्यानुगुणम्** इति सार्धेन ।

अथ सप्तसमिद्धोममाह- **तत्र वै जुहुयात् पूर्वम्** इत्यारभ्य **आज्याख्यां जुहुयात् ततः** इत्यन्तैः ।

घृतसिक्तां चतुःसंख्यामेकैकां हि सुपुष्कलाम् ।
प्राक्कुङ्कुमादिना लिप्तां काष्ठसंज्ञां तु होमयेत् ॥ १९३ ॥
स्रुग्धूपमधुपर्कं च बीजान्याज्यं यथाक्रमम् ।

[अन्नसमिधौ विशेषः]

तत्रान्नसमिधो दाने विशेषोऽयं विधीयते ॥ १९४ ॥
सादितं संस्कृताग्नौ प्राक् तं निधायाग्रतश्चरुम् ।
समुद्घाट्यावलोक्यादौ सम्प्रोक्ष्यार्घ्याम्भसा ततः ॥ १९५ ॥
दर्भकाण्डचतुष्केण साग्निना तदनु स्पृशेत् ।
तन्मध्ये स्रुक्चतुष्कं तु मन्त्रेणाज्यस्य निक्षिपेत् ॥ १९६ ॥

(Ājyabhāgaḥ)

188b-190. The *sruva*, which is placed touching the root of the faggot and which is above one faggot placed upon another, shall be filled with ghee and be thought of with the *bīja* of the sun,[94] and poured in its midst to the thousand rayed sun at the right portion of the fire-pit. On the other portion, *sruk* is to be (filled with ghee) and thought of as the full orb of the hare-marked (moon) called Soma[95] and be given at the northern part.

(Arrangement of mouth and eyes for fire)

191-192a. Ghee shall be offered according to the number of faggots. Know the two eyes of fire to be of the nature of sun and moon. That, which lies between them, is considered to be the mouth of fire.

(Homa with seven faggots)[96]

192b-194a. *Homa* is to be at first with seven faggots in due order. It shall be done with faggots four in number sprinkled with ghee one by one, purified and smeared at first with saffron and others and called Kāṣṭha, then garland, incense, Madhuparka, seeds and ghee in (this) order.

(Special feature in using samit in fire with woked food)

194b-200. This special feature is laid down while offering the *samit* with cooked food. Placing in front that Caru[97] which was kept before in the well-prepared fire, it (lid) must be opened and looked into. Sprinkling it at first with *arghya* water, it must be touched with the four stalks of *darbha* (glowing) with fire. Then four *sruks*, with ghee, are to be placed amidst them uttering the mantra. Ghee shall be taken in *sruk* four times (filling it) and attened amidst there with the mantra. The *sruva* shall be taken and offerings made likewise four times. Morsels of cooked food of the measurements of four *aṅgulas* shall be made (offered). Placing it (*sruva*) down, taking ghee in the

94. Sūryabīja: *ha.*
95. Somākhyākṣara: *sa.*
96. *Samit*, flowers, incense, Madhuparka seeds, ghee and *caru* (rice boiled with milk and butter). These are also treated calling them as *samits*. *Samit*, flowers and incense are to be offered into the fire with the hand and Madhuparka with *sruva*. *Sruk* shall be used while offering the rest. Cf. *LT.* XL.65-69.
97. Caru: name of an offering made of rice, barley and pulse boiled with butter and milk.

अथादाय स्रुचं तत्र तद्वद्दद्याच्चतुष्टयम् ।
चतुरङ्गुलमानेनाप्यन्नग्रासमथाचरेत् ॥ १९७ ॥
तं निधाय स्रुवागर्भे तदूर्ध्वे पूर्ववद्धृतम् ।
दद्यादग्नौ चतुष्कं तु क्षिपेन्नाहुतिं ततः ॥ १९८ ॥
भूयोऽग्नौ स्रुक्चतुष्कं त्वप्याज्यस्यापाद्य यत्नतः ।
ततोऽन्नमाज्यसंसिक्तं प्राग्वत् कृत्वाहुतिं पुनः ॥ १९९ ॥
दद्यात् पूर्वप्रयोगेण एवमेव चतुष्टयम् ।
हुत्वाप्यन्नाहुतीनां च आज्याख्यां जुहुयात् ततः ॥ २०० ॥

अत्र समिद्ध्यते दीप्यतेऽग्निरनयेति व्युत्पत्या समित्पुष्पधूपमधुपर्कबीजाज्यचरूणां सप्तानामपि समिदित्येव व्यवहारः । अत्र समित्पुष्पादिद्रव्याणां हस्तेन होमः । मधुपर्कादीनां स्रुवेण होमः । अन्नस्य स्रुचथा होमः कार्य इति ज्ञेयम् । तथोक्तं लक्ष्मीतन्त्रे –

"आदध्यात् समिधः सप्त ततस्तारिकया सुधीः । यज्ञकाष्ठगयीमादौ ब्रह्मक्षत्रतरूद्भवाम् ॥ ततः पुष्पमयीं दद्यात् धूपद्रव्यमयीं तथा । एतास्तु त्रिविधा देया हस्तेनैव मनीषिणा ॥ मधुपर्कमयीं पश्चात् स्रुवेण जुहुयात् सुधीः ॥ स्रुच्यन्नं चतुरादाय" इत्यादि ।

[तिलादिहोमः]

तिलैर्घृतसमायुक्तैरष्टोत्तरसहस्रकम् ।
शतं शतार्धं पादं वा यथाशक्ति समाचरेत् ॥ २०१ ॥
आज्याक्तैरक्षतैस्तद्वत्तिलैश्च जुहुयात् ततः ।
अर्धमर्धांशसंयुक्तमधिकं चाग्रवर्तिनाम् ॥ २०२ ॥
जपकाले तथा होमे कर्तव्यं सिद्धिमिच्छता ।

[स्विष्टकृद्धोमः]

स्विष्टकृद्धवनं कुर्यादन्नग्रासेन वै सकृत् ॥ २०३ ॥

[काम्येषु द्रव्यविशेषः]

काम्यैरवश्यफलदैर्देशकालसमुद्भवैः ।
तिलैर्घृतेन पयसा दध्ना वा पायसेन तु ॥ २०४ ॥

hollow of *sruva* is be offered on it as before for four times. Then the offering is to be made with the cooked food. Taking again ghee kept in water, four offerings shall be made with it in the fire. The food preparation sprinkled with ghee shall be offered as before. Similarly four offerings shall be made as before. After making the offerings of cooked food, ghee shall be offered.

(Homa with seasamum and others)

201-203a. *Homa* shall be done with seasamum along with ghee 1008 or 100 or 50 or 25 times according to (one's) capacity. Then *homa* is to be done with Akṣata smeared over with ghee and then likewise with seasamum. One half or a part of or more of things kept in front at the time of *japa* or *homa* shall be offered by him who seeks to have his work accomplished.

(Sviṣṭakṛt homa)

203b. *Homa* shall be performed to Sviṣṭakṛt[98] once with food offerings.

(Special things in Kāmya sacrifies)

204-210a. *Homa* shall always be performed in the midst of fire with the faggots, when desires to be fulfilled results are bound to occur and occasions for them are fixed at particular places and times. These shall be done with seasamum, ghee, milk, curds, porridge, dressed food, effected with eatables, seeds, fried grains, rice, roots, fruits, sprouts, Sthalapadma[99] and others which are commendable, gentle and fragrant, flowers of white and other colours, Guggulu mixed with ghee and well wrapped[100] with cloves, Dhātrī fruit, juicy and auspicious very white, black and red lotuses, holy Bilva, stalks

98. Sviṣṭakṛt: name of a *homa* when an offering is made with his name in honour of fire.
99. Sthalapadma: is rare and grows between stones in the stony ridges.
100. Sajjarasā: is meant here by the use of the word *śrī*. It is a kind of incense according to the commentary.

सिद्धान्नैः साधितैर्भक्ष्यैर्बीजैर्लाजैश्च तण्डुलैः ।
मूलैः फलैः पल्लवैश्च सुप्रशस्तैश्च कोमलैः ॥ २०५ ॥
सुगन्धैः स्थलपद्माद्यैः पुष्पैश्चैव सितादिकैः ।
गुग्गुलेनाज्यमिश्रेण सम्यक्छ्रीवेष्टकेन वा ॥ २०६ ॥
धात्रीफलैश्च सरसैरुत्पलैश्च शुभैस्तथा ।
सुसितासितरक्तैश्च पद्मैर्बिल्वैः सुशोभनैः ॥ २०७ ॥
दूर्वाकाण्डैरभग्नाग्रैर्दन्तिसद्दन्तनिर्मलैः ।
एधोभिर्ब्रह्मवृक्षोत्थैः क्षीरकाष्ठमयैस्तथा ॥ २०८ ॥
अमृता क्षीरसंयुक्ता औदुम्बर्यो मधुप्लुताः ।
अच्छिन्नाग्रा ह्यभग्नाश्च कण्टकैः परिवर्जिताः! ॥ २०९ ॥
सर्वास्त्रिमधुयुक्ताश्च घृतयुक्तास्तु वा पुनः ।

अथ सहस्राद्यन्यतमसंख्यया तिलादिहोममाह- **तिलैः** इति सार्धेन ।

स्विष्टकृदाहुतिमाह- **स्विष्टकृत्** इत्यर्धेन।

अथ काम्येष्वाहुतिद्रव्याण्याह- **काम्यैः** इत्यारभ्य **घृतयुक्तास्तु वा पुनः** इत्यन्तैः। सज्जश्रीवेष्टकेन सज्जरसाख्यधूपद्रव्येण । त्रिमधुयुक्ता मधुक्षीराज्ययुक्ताः ।

[क्षेप्याक्षेप्यभागः]

योक्तव्यान्यग्निमध्ये तु समिद्भिः सह सर्वदा ॥ २१० ॥
सर्वाण्यन्नविशेषाणि चन्दनादीनि यान्यपि ।
सदन्तकाष्ठं ताम्बूलमुत्कटक्षारवर्जितम् ॥ २११ ॥
दाप्यानि लक्षहोमे तु आसनादीनि यानि च ।
मधुलवणपानांशुकटुतैलोज्झितानि च ॥ २१२ ॥

[द्रव्यभेदेन फलभेदः]

आज्यसिक्तैः[१४] तिलैः शान्तिः सिद्धयः सकलास्तथा ।
घृतेन पयसा दध्ना होमस्तृप्तिं प्रयच्छति ॥ २१३ ॥
पायसेन तु सिद्धान्नैर्भक्ष्यैः पुष्टिः सदा भवेत् ।
बीजैर्धान्यैस्तण्डुलैश्च तर्पितो मन्त्रराट् द्विज ॥ २१४ ॥

१४. युक्तैः - A

of *dūrvā* grass with unbroken edges and pure like the good (unbroken) ivory of the elephant, fuels got from huge trees, milk-yielding[101] trees, milky juice to Amṛta[102] with milk, fruits of the big tree soaked in honey, with unbroken edges, unbroken and devoid of thorn, all with three Madhus[103] or with milk.

(Division of these as fit for offering and unfit)

211-212. All the special food, sandal paste and others together with the stick for the teeth; Tāmbūla free from excessive salt, seats and others which are to be given in Lakṣahoma[104] and (are to be) free from honey, salt-drinks, Aṃśu,[105] bitter and oily preparations.

(Difference in the results according to the difference in the materials used)

213-220a. Tranquility and all successes in undertakings result when seasamum smeared with ghee is used. Satisfaction is the result by the use of ghee, milk and curds. Dressed food, porridge with milk and eatables bring always nourishment. O brahmin! The king of mantras[106] (Mūlamantra), when pleased with the (use of) seeds, grains, rice, offers always prosperity. The supreme lord offers contentment. The use of sprouts, fruits and roots in *homa* bring joy; avoiding premature death and destroys diseases. O brahmin! unequalled prosperity is the result got quickly when Sthalapadma and flowers of white and other colours are used. O brahmin! health is obtained by offering Guggulu and ghee and auspicious (splended) fruits.

101. Brahmavṛkṣa: divine tree, see note under 62.
102. Amṛta: means myrobalan, Guḍūcī and Harītakī, the milky juice from any one among these could have been meant here. Here Guḍucī is meant.
103. Three Madhus are honey, milk and ghee; Madhu here means floral juice (see commentary).
104. Lakṣahoma: a *homa* in which offerings are made for one lakh of times.
105. Pānāṃśu: *pāna* to be taken with *madhu* or *lavaṇa* and means drinks prepared out of floral juice or salt; *aṃśu* — filament of Soma plant. Drink prepared with *aṃśu* is therefore prohibited.
106. *mantrarāṭ*: Mūlamantra.

प्रयच्छति सदा श्रेय: प्रसन्न: परमेश्वर: ।
पल्लवै: फलमूलैश्च होमस्तुष्टिं प्रयच्छति ॥ २१५ ॥
जहाति चापमृत्युं च रोगांश्चोपशमं नयेत् ।
तर्पित: स्थलपद्माद्यै: पुष्पैश्चान्यै: सितादिकै: ॥ २१६ ॥
सौभाग्यमतुलं विप्रा: अचिरात् सम्प्रयच्छति ।
गुग्गुलाज्यैर्द्विजा आरोग्यं शुभैर्धात्रीफलैस्तथा ॥ २१७ ॥
शर्करै: बिल्वफलकै: पञ्चगव्यसमुक्षितै: ।
आज्यान्नै: पद्मबीजैश्च लक्ष्मीं शीघ्रं प्रयच्छति ॥ २१८ ॥
उत्पलैर्वश्यकामस्तु भोगकामस्तु होमयेत् ।
दूर्वाङ्कुरैश्च होमेन आयुषो बुद्धिमाप्नुयात् ॥ २१९ ॥
एधोभिश्च शुभैर्होमो माषै: शान्तिप्रद: प्रभु: ।

होतव्याहोतव्यविवेकमाह- **योक्तव्यानि** इति सार्धद्वाभ्याम् । अत्र मधुशब्द: पुष्परसपर: ; न तु माक्षिकपर; तस्य सर्वत्राग्राह्यत्वोक्ते: । पारमेश्वरव्याख्याने व्यत्यासेनोक्तं विचारणीयम् ।

द्रव्यभेदेन फलभेदमाह- **आज्यसिक्तै:** इति प्रक्रम्य **माषै: शान्तिप्रद: प्रभु:** इत्यन्तै: ।

[द्रव्याणामाहुतिपरिमाणम्]

तिलानां शस्यते[१५] होमो हरिणाननमुद्रया ॥ २२० ॥
घृतस्य कार्षिको होम: क्षीरस्य च विशेषत: ।
शुक्तिमात्राहुतिर्दध्न: प्रसृति: पायसस्य वा ॥ २२१ ॥
ग्रासार्धमानमन्नानां भक्ष्याणां स्वप्रमाणत: ।
सर्वेषामेव बीजानां मुष्टिना होममाचरेत् ॥ २२२ ॥
अग्राङ्गुलिस्तु लाजानां शालीनां पञ्चकं हुनेत् ।
फलानां स्वप्रमाणं च पल्लवानां तथैव च ॥ २२३ ॥
कर्कन्धुमात्रा गुलिका होतव्या गुग्गुलो: सदा ।
धात्रीफलप्रमाणं वा सम्भवे सति होमयेत् ॥ २२४ ॥
दूर्वाकाण्डानि विप्रेन्द्र चतुरष्टाङ्गुलानि वा ।
समित्प्रादेशमानेन समच्छेदास्त्वगन्विता: ॥ २२५ ॥

१५. स शते - B, D, E

Fortune is quickly acquired by using sugar and Bilva fruits, sprinkled over with Pañcagavya, food with ghee and lotus-seeds. To acquire control over others, lilies are to be used. Seeking enjoyments, *homa* is to be done with the blossoms of the lotus. *Homa* with tender grass will prolong life and bestow wisdom. The lord (fire) will award calmness when *homa* is done with good fuels and black grams.

(Quality of the materials for doing homa)

220b-225. *Homa* with seasamum is laudable with the *mudrā* of deer's face,[107] with ghee shall measure a Karṣikā[108] in particular when ghee is used; with curds measuring the size of *śukti*;[109] *prasṛti*[110] for the porridge with milk; half of the *grāsa*[111] for food offerings and their own measurement for the eatables.[112] Seeds are to be used measuring a *muṣṭi*,[113] tip of the *aṅgula*[114] for the fried grains, *pañcaka*[115] for Śāli rice. Fruits have their own size for measurement and sprouts too have the same. Guggulu is always of the size of Karkandhu[116] Gulikā[117] or of the size of the Dhātrī fruit when there is facility. O eminent brahmin! the stalks of tender grass may be four or eight *aṅgulas* long, faggot of the size of *prādeśa*[118] with the barks shall have equal cutting.[119]

107. Hariṇānanamudrā: *hariṇa* — deer; *ānana* — face; a *mudrā* resembling the face of the deer. See *JS.* XV.180b reads *mṛgamudrayā.* This is described in *Pād. S. Caryā.* XXII.73b without mentioning the word *mudrā.* This identification is made by the commentator. This is called Mṛgīmudrā, *SKS. Ṛṣi.* II.19-20a.
108. Karṣikā: name of a *homa* in which the offerings that are made are of the weight of *karṣa* equivalent to the weight of 176 grains; this name for the weight cannot be fixed as it may refer to the thing weighed gold, silver, copper or any grain; see M.M. Williams: Sanskrit-English Dictionary, PP. 259-276.
109. *śukti:* 1/2 *pala* or 4 *karṣas.*
110. *prasṛti:* handful; 2 *palas.*
111. *grāsa:* mouthful.
112. *svapramāṇataḥ:* as the sweet (savoury) prepations may be of varying size, weight could not be easily determined for them.
113. *muṣṭi:* handful, one *pala.*
114. *aṅgula:* see under 64.
115. *pañcaka:* five varieties, or all the five fingers.
116. Karkandhu: Badarī fruit.
117. Gulikā: a small ball; *karkandhu-mātrā* — of the size of *badarī* fruit.
118. *prādeśa:* a size measurable by the space between the span of the thumb and forefinger.
119. *JS.* XV.180b-186a has an almost identical treatment

होमद्रव्याणामाहुतिप्रमाणमाह- **तिलानाम्** इत्यारभ्य **समच्छेदास्त्वगन्विता:** इत्यन्तै:।'हरिणाननमुद्रया' इत्यत्र तल्लक्षणं पाद्मोक्तम् -

''मध्यमानामिकाभ्यां तु अङ्गुष्ठाग्रेण सङ्गति:।कनिष्ठा तर्जनीयुग्मं दीर्घीकृत्य यथातथम्॥तिलव्रीहियवादीनां होमकर्मणि शस्यते ।'' इति ।

घृतस्य होम: कार्षिक: कर्षपरिमित: । ''गुञ्जा: पाञ्चाद्यमाषक: । ते षोढशाक्ष: कर्षोऽस्त्री पलं कर्षचतुष्टयम्'' (२.९.८५-८६) इत्यमर: ।'शुक्ति:', 'प्रसृति:' इत्यत्र पारमेश्वरे हवि:पाकप्रकरणे -

''द्विपर्वस्राविणी बिन्दु: द्वात्रिंशद्बिन्दुभिस्त्रुटि: । त्रुटिद्वयं तथा शुक्तिस्तद् द्वयं प्रसृतिर्भवेत् ॥'' इति ।

ग्रासार्धम् इत्यत्र कुक्कुटाण्डप्रमाणं तु ग्रास इत्यभिधीयते इति स्मृति:।स्वप्रमाणत: इत्यनेनाखण्डभक्ष्यहोम उक्त: । कर्कन्धु: बदरीफलम् ।

[अग्नेर्वर्णगन्धादिना फलभेद: प्रायश्चित्तं च]

अग्नेर्वर्णाश्च गन्धाश्च शब्दाश्चाकृतयस्तथा ।
विकारा विशिखा चैव संवेद्या: कर्मसिद्धये ॥ २२६ ॥
पद्मरागद्युति: श्रेष्ठो लाक्षालक्तकसन्निभ: ।
बालार्कवर्णो हुतभुक् जयार्थं शस्यते द्विज ! ॥ २२७ ॥
इन्द्रकोपकसङ्काश: शोणाभो वाथ पावक: ।
चक्र[१६]चापनिभ: श्रेष्ठ: कुङ्कुमाभस्तथैव च ॥ २२८ ॥
रक्तानां पुष्पजातीनां वर्णेनाग्निरिहोच्यते ।
सुगन्धो द्रव्यगन्धोऽग्निर्घृतगन्धश्च शोभन: ॥ २२९ ॥
आयुर्द: पद्मगन्ध: स्याद्बिल्वगन्धश्च सुव्रत: ।
उग्रगन्धोऽभिचारे तु विहित: सर्वदानल: ॥ २३० ॥
जीमूतवल्लकीशङ्खमृदङ्गध्वनितुल्यक: ।
शब्दोऽग्ने: सिद्धये हेतुरतोऽन्य: स्यादसिद्धिद: ॥ २३१ ॥
रक्ताभस्तु यदा वह्नि: क्षीणार्चि: परिदृश्यते ।
पद्मरागोपलाभश्च स्फटिकाभस्तथा शुभ: ॥ २३२ ॥
यद्रूपं कथितं पूर्वं यदि तस्य प्रदक्षिणम् ।
अन्योन्यत्वं प्रपद्येत तदा सिद्धिकरोऽनल: ॥ २३३ ॥

१६. शक्र - D

(Difference in the results in fire according to the colour and smell and expiation for it)

226-240. Fire's colours, smells, sounds, (external) forms, changes and flames are to be known for success in undertakings. The brilliance of the ruby is the best, resembling lac and wax. O brahmin! fire of a colour like that of young (rising) sun is extolled for attaining victory. Fire, which has the purple colour or is like fire-flies or the colour of the rainbow, is the best and so also is of the colour of saffron. Fire is stated here by the colour of (species of) flowers red in colour. Good smell is that of the thing (offered) and the fire with the smell of ghee is auspicious, that of lotus will bring in longevity, that of Bilva makes the person become very religious. Fire, always of strong smell, is ordained in auspicious practies. Sound of fire similar to that of cloud, Vallakī,[120] conch and Mṛdaṅga causes success in undertakings. Any other sound will not bring success. Fire, red in colour and appearing to have the flame declining, and with the colour of the ruby and crystal is auspicious. Circumambulating fire with the forms stated above would bring mutual friendship and success. Colour, which is reproachable like that of the pigeon, brings about sẹt back (failure). O brahmins ! that is, the result will be reversed. It is for this purpose (to avoid this kind of result) that *homa* is required to be done more than one hundred times. Odd number of flames, as they rise, brings prosperity. Flame, which is short, not short (slightly

120. Vallakī: one of the four kinds of lutes the other being Vīṇā, Vipañcī and Prativādinī the last of which is stated to have seven stringes; vide: *Nāmaliṅgānuśāsana* I.7.3, cf. *Raghuvaṃśa*, VIII.34.

गर्हितेन तु वर्णेन यदि कापोतकादिना ।
परिवर्तं करोत्यग्निस्तथा विप्र विपर्ययः ॥ २३४ ॥
होमान्ते तन्निमित्तं वै होमं कुर्याच्छताधिकम् ।
विषमा च शिखा वह्नेरुदयाश्च शुभावहाः ॥ २३५ ॥

अग्नेर्वर्णगन्धादिना सिद्ध्यसिद्धिपरीक्षान्तप्रायश्चित्तादिकं चाह- **अग्नेर्वर्णाश्च गन्धाश्च** इत्यारभ्य **अवलीढश्च योऽशुभः** इत्यन्तैः ।

ह्रस्वाह्रस्वोन्नता दीर्घा ज्वाला सिद्धिप्रदा स्मृता ।
स्निग्धः प्रदक्षिणावर्तः श्रुतिप्रच्छादितध्वनिः ॥ २३६ ॥
स नित्यमेव शुभकृद्यदन्यैर्वर्जितो गुणैः ।
प्रदीप्ते लेलिहानोऽग्नौ निर्धूमे सगुणे तथा ॥ २३७ ॥
हृद्ये तुष्टिप्रदे चैव होतव्यं श्रियमिच्छता ।
अल्पतेजोऽल्परूपश्च विष्फुलिङ्गसमन्वितः ॥ २३८ ॥
ज्वालाभ्रमविहीनश्च कृशानुर्नैव सिद्धिदः ।
अप्रबुद्धे सधूमे च जुहुयाद्यो हुताशने ॥ २३९ ॥
कर्महानिर्भवेत् तस्य त्वाभिचारार्थमश्नुते ।
दुर्गन्धः पीतवर्णश्च अवलीढश्च योऽशुभः ॥ २४० ॥

[जिह्वाभेदेन फलभेदः]

प्रभामूर्तिगतो मन्त्रस्तर्पितो यदि सत्तम ।
विद्यां प्रयच्छत्यचिराद्दीप्तिस्थो भूप्रदः प्रभुः ॥ २४१ ॥
तापयत्याशु शत्रूणां प्रकाशोपर्यवस्थया ।
शत्रुक्षयं ददात्याशु मरीच्यामूर्ध्वगो विभुः ॥ २४२ ॥
तापिन्यामूर्ध्वगो मन्त्रः सर्वतापोपशान्तिदः ।
विपक्षोच्चाटनं कुर्यात् करालासंस्थितो हुतः ॥ २४३ ॥
लेलिहावस्थितो मन्त्रो यदि सन्तर्प्यते मुने ।
दद्यादभीप्सितं चैव देहान्ते परमं पदम् ॥ २४४ ॥

जिह्वाभेदेन फलभेदमाह- **प्रभामूर्तिगतः** इति चतुर्भिः ।

longer) raised and long, is considered to yield success. A sound resplendent flame, having turnings in clockwise manner and concealed in the ears (of the listener that is not audible outside the area of the ear) does always good and yields auspicious results, as it is bereft of other qualities.[121] One, who wishes to have prosperity, shall do *homa* in the blazing fire playing frequently (with its tongue),[122] is free from smoke and possesses threads or wicks, pleasing and satisfying. The fire, which has very little lustre, little form, has sparks and free from revolutions of flame, will not award any success (or accomplish any thing). His undertakings would be ruined if the fire (in which he does *homa*) is underdeveloped and smoky. Bad odour, yellow colour, flickering, inauspiciousness in the case of fire make him who does *homa* there get the fruit of exorcism.[123]

(Difference in the result according to difference in the flames)[124]

241-244. O good man! if the mantra when it is pleased (while doing *homa*) takes the form of Prabhā, it would offer bearing (or wisdom) within a short period; with the form of Dīpti, it offers land; in the form of Prakāśa, it torments the enemies quickly; as Marīci, rise in status is offered; as Tāpini, relief is given from all curses; as Karālā, it drives away the opponents, O sage! as Lelihāna it grants when it is pleased what is desired and the supreme position in the end.[125]

121. *anyairguṇairvajitaḥ:* bereft of other qualities. Here *guṇa* must be taken as different from those stated above, that is defects.
122. Lelihāna: stretching forth the tongue.
123. *JS.* XV.198-214 contains an almost similar treatment.
124. The names of the flames (are given in 159b-160a are treated here).
JS. XV.218b-222 a contains an almost similar treatment.
186b-188a for an identical treatment.
125. cf. *Pauṣ. S.* XXXVIII.269-271; here is given a different account regarding results that are obtainable; for a yet different account, see *Sks. Brahma.* IX.9b-14.

[कर्मभेदेन मन्त्राणां जातिभेदः]

स्वाहाकारं सदा[१७] होमे पूर्णायां[१८] वौषडेन च ।
तमेव शान्तिके कुर्याद्वषडाप्यायने तथा ॥ २४५ ॥
स्वधा पितृक्रियायां च फट्कारं क्षयकर्मणि ।
विद्वेषे हुं वशे स्त्रीणां नमो मोक्षप्रसिद्धये ॥ २४६ ॥

[पूर्णाहुतिप्रकारः]

कर्महोमावसाने च घृतेनापूर्य सस्रुचम् ।
अभावाच्च प्रभूतेन होमद्रव्येण पूरयेत् ॥ २४७ ॥
तत्रोपरि घृतं दद्यात् ततोऽर्घ्यकुसुमादिभिः ।
मूलदेशात् समारभ्य स्रुचं पूज्य स्रुवान्विताम् ॥ २४८ ॥
घृतयुक्तं तु तद्द्रव्यं स्रुचः पुष्करकुक्षिगम् ।
द्रवच्चन्द्रोपमं ध्यायेत् ततः पूर्णं समुद्धरेत् ॥ २४९ ॥
स्रुग्दण्डे देहनाभौ तु मूले संरुध्य संस्मरेत् ।
निष्कलं मन्त्रनाथं तु पूर्णशीतांशुविग्रहम् ॥ २५० ॥

अथ कर्मभेदेन मन्त्रजातिभेदानाह– **स्वाहाकारम्** इति द्वाभ्याम् ।

अथ पूर्णाहुतिप्रकारमाह– **कर्महोमावसाने** इत्यारभ्य **न तु कर्मणि कर्मणि** इत्यन्तैः । अत्र स्रुक्दण्डस्य स्वदेहनाभिसंयोजने युक्तिरुक्ता विष्णुसंहितायाम्–

"प्राणापानस्वरूपौ च स्रुक्स्रुवौ कथितावुभौ । कर्तव्यौ नाभिसंलग्नौ प्राणस्थानं तु तं विदुः ॥" इति ।

आमूलाच्च मरुच्छक्त्या प्रोद्धरेच्च स्वविग्रहात् ।
विधाय चेश्वराधारे तस्माद्धारामृतं महत् ॥ २५१ ॥
नासिकासन्धिमार्गेण स्रुक्पद्मे पतितं स्मरेत् ।
सामृतामाज्यधारां च वसुधारामिव क्षिपेत् ॥ २५२ ॥
मुखमध्ये तु मन्त्रस्य तद्ब्रह्मविवरेऽथ वा ।
हृत्पद्मान्तर्गतां सम्यक् प्रविष्टामनुभावयेत् ॥ २५३ ॥

१७. तदा - E
१८. पूर्णायाः - B, E

(Classification of mantra according to the differences in Karma)

245-246. The words *svāhā* shall be used always in *homa, vauṣaṭ* in Pūrṇāhuti[126] and Śāntika,[127] vaṣaṭ in Āpyāyana,[128] *svadhā* in acts done in honour of the manes, *phaṭ* in acts done for destruction, *huṃ* is hostile acts and controlling the women and *namaḥ* in acts done to get *mokṣa.*

(Method of doing Pūrṇāhuti)

247-261a. At the end of *homa* connected with any act, the *sruk* shall be filled with ghee and with profuse articles used for *homa,* in its absence (non-availability), ghee shall be poured on it; then *arghya,* flowers and others. *Sruk* together with *sruva* shall be adored from the bottom.[129] One must meditate that material as having ghee and as having entered the cavity of the *sruk* and is comparable to the trickling moon. He shall then lift up Pūrṇa. He shall then think that it is contained (restricted to be) in the handle of *sruk,* in its centre and bottom. He shall then lift it up. The lord of the mantras is partless and has a body resembling the full, cool-rayed moon. He shall be lifted up from his body from the very base with the power of air and place him in the seat of god. He shall imagine a copious flow of nectar from it; fallen on the lotus of *sruk* through the joint of the nose. He shall throw the stream of ghee with nectar as though it were a stream of wealth in the midst of the face of mantra or in the Brahmavivara.[130] He shall properly experience it as gone within the lotus of the heart and entered there. He shall divide the mantra

126. *pūrṇāyām:* when it is completed, Pūrṇāhuti is meant here.
127. Śāntika: propitiatory rite.
128. Āpyāyana: any act that leads to giving strength and nourishment, e.g. Somayāga.
129. *mulāt-Mulādhārāt:* mystical circle situated above the generative organ.
130. Brahmavivara: brahmarandhra.

तया वै बृंहितं मन्त्रं दारयेद् ब्रह्मधारया ।
तृप्तं पुष्टं च हृष्टं च तुष्टं वै साधकोपरि ॥ २५४ ॥
मन्त्रोच्चारसमेता वै शरीरकरणान्विता ।
ध्यानोपेता द्विजश्रेष्ठ पूर्णेयं परिकीर्तिता ॥ २५५ ॥
सर्वसिद्धिकरी शश्वन्मोक्षलक्ष्मीविवर्धनी ।
बहुशुष्केन्धनेऽग्नौ च होतव्यं कर्मसिद्धये ॥ २५६ ॥
एकानेकप्रयोगाणां न तु कर्मणि कर्मणि ।

[सार्चनं मुद्रादर्शनम्]

ततोऽर्घ्यगन्धपुष्पाद्यैर्मन्त्रनाथं समर्चयेत् ॥ २५७ ॥
मुद्राः प्रदर्शयेत् सर्वा मूलमन्त्रादितः क्रमात् ।

एकानेकप्रयोगाणाम् इत्यत्रैकदेवतोद्देशेनानेकप्रयोगाणामप्येकैव पूर्णाहुतिः न तु कर्मणि कर्मणि प्रतिप्रयोगं न कार्येत्यर्थः । एवमर्थेऽङ्गीकृते न क्वचिदपि विरोधः । अतोऽत्र पारमेश्वरव्याख्याकारोक्ता योजनास्वरसा। अथ सार्चनं मुद्रादर्शनमाह– **ततः** इत्यादिना ।

[हृदयाद्यङ्गमन्त्रादीनां होमप्रकारः]

चतुर्थांशेन चाङ्गानां कुर्यान्मूलस्य तर्पणात् ॥ २५८ ॥
लाञ्छनाभरणानां च लक्ष्म्यादीनां तदर्धतः ।
अथ वा हृदयादीनां ततोऽर्धेनाखिलासु च ॥ २५९ ॥
परमेश्वरकान्तासु तदर्धेन द्विजोत्तम ।
लाञ्छनाभरणादीनि सर्वाणि जुहुयात् क्रमात् ॥ २६० ॥
हृदादिसर्वमन्त्राणामेकैकं जुहुयात् तु सा ।

which has grown through it with the Brahmadhārā.[131] O best brahmin! the mantra is satisfied, nourished, rejoiced and pleased with the priest. This, which is associated with the utterance of the mantra, has the body as the instrument[132] and is meditated upon and is called Pūrṇa.[133] This brings about always all accomplishments and increases Lakṣmī of *mokṣa*. *Homa* must be done for the success of undertakings in the fire having many dried fuel, adopting are or more procedures but not for every act.

(Display of mudrā with worship)

257b-258a. Then the lord of mantra is to be worshipped with an *arghya*, sandal-paste, flowers and others. All the *mudrās*[134] must be shown in due order beginning with Mūlamantra.

(Method of doing homa for Hṛdaya and other Aṅgamantras)

258b-261a. The Mūlamantra must be pleased with (the offerings of) one fourth of Aṅgamantras, by one half for marks (*lāñchana*), ornaments and half of it for Lakṣmī and others. Or, by half of it to Hṛdaya and others; O best brahmin! by half of it to all consorts of the supreme lord. Marks, ornaments all of them are to be offered in due order. *Homa* must[135] be done one by one for Hṛdaya and all mantras.

131. Brahmadhārā: flow of Brahman; *dhārā* — stream, flow, the priest shall then imagine that Brahman's presence is noticed in the mantra; its presents is experienced to be entering into the mantra, as if it is a regular flow of liquid.
132. Mantra is uttered while it is meditated upon as having Brahman possessing a body with the instruments (organs of sense) there. This gives the full picture of the mantra.
133. Pūrṇāhuti: this means the offering of the materials in the fire with the utterance of the mantra while reciting which the priest shall be aware that the mantra is full with Brahman's presence.

 Pūrṇāhuti is only one, though the offerings made with reference to one and the same deity may vary. *JS.* XV. 188b-198a gives the same treatment to this matter.
134. While displaying a *mudrā*, the mantra, which has relevance to it will have to be uttered; vide: *JS.* VIII.1-2.

 cf. मुद्राकोशं प्रवक्ष्यामि मन्त्रकोशस्य वासव ।
 येन विज्ञातमात्रेण मन्त्रसिद्धिर्महीयसी ॥ *LT.* XXXIV.1.
135. The word *sā* in 260b refers to *āhuti*, a word in feminine gender.

[दृष्टान्तप्रदर्शनपूर्वकं विसर्जनक्रमः]

विर्सजनं ततः कुर्याद्दत्त्वार्घ्यं धूपसंयुतम् ॥ २६१ ॥
भोगस्थानगता मन्त्राः पूजिता ये यथाक्रमम् ।
मुख्यमन्त्रशरीरं च सम्प्रविष्टांश्च संस्मरेत् ॥ २६२ ॥
ज्वाला ज्वालान्तरे यद्वत् समुद्रस्यैव निम्नगाः ।
तं मन्त्रविग्रहं स्थूलं सर्वमन्त्रास्पदं द्विज! ॥ २६३ ॥
प्रविष्टं भावयेत् सूक्ष्मे अध्यक्षे हृदयात्मके ।
परे प्रागुक्तरूपं तु तं सूक्ष्ममुभयात्मकम् ॥ २६४ ॥
तं परं प्रस्फुरद्रूपं निराधारपदाश्रितम् ।
सन्धिमार्गेण हृत्पद्मे सम्प्रविष्टं तु भावयेत् ॥ २६५ ॥

अथ हृन्मन्त्रादीनां होमक्रममाह- **चतुर्थांशेन** इति त्रिभिः ।

अथ विसर्जनक्रममाह- **विसर्जनम्** इति सार्धैः पञ्चभिः । मन्त्रमुद्रासमेतेन विसर्जनमन्त्रविसर्जन-मुद्रान्वितेनेत्यर्थः। विसर्जनमन्त्रस्तु गच्छपदशिरस्कोमूलमन्त्रः। यद्वा सुदर्शनार्चनप्रकरणे वक्ष्यमाणो जयाख्योक्तो विसर्जनमन्त्रो ग्राह्यः ।

मन्त्रमुद्रासमेतेन पूरकेण तु सप्तमम् ।
भासितं भावयेद्देहं तेन पादाच्छिरोऽवधि ॥ २६६ ॥

[सिद्धिलिङ्गप्रदर्शनम्]

प्रविष्टेन तु मन्त्रेण प्रयत्नेन विना द्विज ।
विग्रहः कम्पते यस्य मन्त्रस्तस्य प्रसीदति ॥ २६७ ॥

[आसनमन्त्रादीनां तर्पणक्रमः]

एवं विसृज्य मन्त्रेशं मुद्राबन्धेन वै सह ।
साधारासनमन्त्राणां गणेशस्य द्विजोत्तमाः ॥ २६८ ॥
गुर्वादीनां तु विहितमर्घं लाञ्छनतर्पणात् ।
एतेषां च लयं विप्र कुर्यात् सृष्टिक्रमेण तु ॥ २६९ ॥
द्वाःस्थास्त्रिलोकपालानां वप्रस्थहरिसेविनाम् ।
गुरुपूर्वक्रमादित्थमर्घमर्घं यथाक्रमम् ॥ २७० ॥
सकृत् सकृत् स्वशक्त्या वा पूर्णां सर्वेष्वथ क्षिपेत् ।

(Send off with illustrations)

261-266. Send off is to be given offering *arghya* and with incense. Those mantras which occupied the places of *bhoga* in their order are to be considered to have gone into the body of the (important) mantras. O brahmin! they are to be imagined to have entered him for whom the mantras are the body, like flame into another flame and rivers into the sea, him a gross abode for all mantras as having fully gone into the subtle, controller the supreme form of the heart subtle (and gross) both natures of the supreme person[136] already said, having a shining and sparkling form staying in a supportless place and entered into the lotus of the heart (of the priest) through the joints (in the body). The body from the foot to head must be imagined to illumine the seventh mantra[137] with the Pūraka together with the *mudrā* of mantra.

(Display of the marks of success)

267. O brahmin! the mantra becomes pleased with him (priest) whose body trembles when the mantra has entered him without (his) effort.

(Pleasing the Āsana and other mantras)

268-271a. Thus sending off the lord of the mantras along with the formation of the *mudrās*, O brahmin! the mantras of Ādhārāsana,[138] Gaṇeśa, and of the preceptors shall be pleased with half that enjoined for pleasing the marks. O brahmin! Laya must be done to this following the order of (their) creation, one half for each (to be given) in the order for the guardians of the worlds stationed at the entrance, serving Viṣṇu, and those stationed in the ramparts with the preceptor preceding them. Pūrṇa (Pūrṇāhuti) shall be given to all once for each according to one's capacity.

136. Brahman is the abode of all mantras. The mantras are its body. The mantras are uttered and are to be treated as gross. Thus the mantras represent the body of God.

137. *saptamam:* seventh. This cannot mean *praṇava* as having seven *mātrās*, since *saptamam* meaning seventh is used here. The reading does not make any sense.

138. The word *ādhārāsana* means the seat which is occupied by him. The word used here is sādhārāsana. Viṣṇu's *śakti* is called Sādhāra; vide:

शक्तिर्भगवतो विष्णोः साधाराख्याभिधीयते । *Pauṣ. S.* XXII.7a.

Viṣṇu is the substratum (*ādhāra*) in three ways — first through *śakti*, then as universe and thirdly as various mantras; vide: *Paus. S.* XXII.3. All the mantras form as the seat of Viṣṇu. The mantras are different and are applicable to all deities but their mantras also are based on the main mantras which belong to Viṣṇu. See Gaṇeśamantra (*JS.* VII.39b-43) and preceptors (ibid VII.59-62). The word *ādi* in *gurvādi* may include the manes, lords of the region and others.

[विष्वक्सेनतर्पणक्रमः]

विष्वक्सेनस्ततो भक्त्या तर्पणीयस्तिलाक्षतैः ॥ २७१ ॥
वौषडन्तेन मन्त्रेण दद्यात् पूर्णाहुतिं द्विज ! ।
पूजयित्वा यथान्यायं कुर्यात् तस्य विसर्जनम् ॥ २७२ ॥

स्वहृदये भगवत्प्रवेशनानन्तरं सिद्धिलिङ्गमाह- **प्रविष्टेन** इत्यादिना ।

अथासनमन्त्रादीनां तर्पणक्रममाह- **एवम्** इति सार्धैस्त्रिभिः । अत्र परिवारमन्त्राणां बहुत्वात् तत्तद्धोमपरिपूर्त्यर्थं मूलमन्त्रेणैव पूर्णाहुतिः कार्या। अत्र परिवाराणामग्निमध्ये आवाहनं विना होमो न संभवति । अतस्तदावाहनं कदा कार्यमित्याकाङ्क्षायाम् - "एवं विसृज्य मन्त्रेशं लोकपालास्त्रवर्जितम्" इति जयांख्यवचनात्, पूर्वं भगवदावाहनवेलायामेव परिवाराणामपि भगवता सहैवावाहनं कार्यमित्यवगम्यते ।

अथ विष्वक्सेनतर्पणक्रममाह- **विष्वक्सेनः** इति सार्धेन । अत्र विष्वक्सेनस्याग्निमध्ये आवाहनपूर्वकं तर्पणं कार्यम् ।

[अग्निसन्तर्पणक्रमः]

अनलं पूजयित्वा तु शक्तितस्तर्पयेत् ततः ।
अच्छिद्रकरणीं पूर्णां पूर्णामन्त्रेण पातयेत् ॥ २७३ ॥
सन्दर्शयेत् ततो वह्नेर्मुद्रां मन्त्रसमन्विताम् ।
कुण्डे पुष्पाञ्जलिं क्षिप्त्वा वह्निमन्त्रमनुस्मरन् ॥ २७४

[अग्नेर्विसर्जनादिकम्]

क्षान्त्वा चैव नमस्कृत्य यथाविधि विसृज्य तत् ।
समाघ्राय न्यसेत् कोष्ठे ह्यवतारक्रमेण तु ॥ २७५ ॥

[स्रुक्स्रुवसंस्कारस्तथा परिषेचनप्रोक्षणादीनि]

सम्मार्ज्य स्रुक्स्रुवावग्नौ स्रुचं निक्षिप्य चाम्भसा ।
अर्घ्यपात्रात् तु चापूर्य कुण्डबाह्ये प्रदक्षिणम् ॥ २७६ ॥
कुर्यादीशानकोणाद्वै अच्छिद्रोदकधारया ।
पवित्रकेणाथ ऊर्ध्वे विनिक्षिप्य करेण वा ॥ २७७ ॥
दद्याच्छिरसि वै शेषं स्रुगधोवदनान्यसेत् ।

तथोक्तं जयाख्ये विस्तरेण द्रष्टव्यम् । अथाग्निसन्तर्पणक्रममाह- **अनलम्** इति द्वाभ्याम् । पूर्णां पूर्णाहुतिम्। पूर्णामन्त्रेण वौषडन्ताग्निमन्त्रेणेत्यर्थः। 'पूर्णायां वौषजडेव च' इत्युक्तत्वात् । पारमेश्वरव्याख्याने तु पूर्णामन्त्रेण "पूर्णमदः पूर्णमिदम्" इति मन्त्रेण "पूर्णादर्वीति" मन्त्रेण वा इत्युक्तम्; तदयुक्तम् । यन्मन्त्रेण होमः कृतस्तेनैव वौषडन्तेन पूर्णाहुतेः कर्तव्यत्वात् । ननु पूर्णामन्त्रेणैव होमोऽपि स्यादिति चेन्न; "स्वमन्त्रेण ततो वह्निं शक्तित स्तर्पयेद्द्विज । अच्छिद्रकरणीं पूर्णां पूर्णामन्त्रेण पातयेत् ॥"

(Method of pleasing Viṣvaksena)

271b-272. Viṣvaksena must then be pleased with devotion using seasamum and Akṣatas. O brahmin! Pūrṇāhuti is to be given with the mantra[139] ending in *vauṣaṭ*. He must be given send-off after duly worshipping him.

(Method of pleasing the fire)

273-274. The fire is to be worshipped and then pleased according to capacity. Pūrṇa (Pūrṇāhuti) which does not give rise to any interruption, is to be done using the mantras of Pūrṇāhuti. Then the (Vahni) *mudrā*[140] is to be shown with mantra to the fire and palmfuls of flowers are to be thrown into the fire-pit, thinking of the Agnimantra.[141]

(Send off to Agni)

275. Begging pardon, saluting according to rule, Agni must be given send off. Smelling it (*sruk* and *sruva*), it shall be placed in its place in the order of its descent (production).

(Consecration to sruk and sruva and Pariṣecana, Prokṣaṇa and others)

276-278a. Cleaning (rubbing) *sruk* and *sruva* in the fire, *sruk* shall be placed down with water. It shall be filled with the water from the vessel of *arghya*. It must be brought round in the clockwise manner outside the fire pit from the north-east corner pouring water trickling down without a break. It shall then be kept above with Pavitra or hand, the rest shall be thrown on its head. The *sruk* shall be placed its front facing down.

139. The mantra of Pūṇārhuti is that with which the *homa* was done; vide:-*JS*. XV. 255b-256.
140. vide: *Pād. S. Caryā*. XXII.33b-34a. *Sks. Ṛṣi*. II.75b.
141. vide: *Sks. Brahma*. XI (P. 95).

इति जयाख्ये वह्निमन्त्रेण होमविधानात् । अग्निविसर्जनमाह- **क्षान्त्वा** इत्यादिना । तत्राग्नौ पूर्वं विन्यस्तं तेजः समाघ्राय पूरकेणोपसंहृत्य कोष्ठे स्वस्थाने भगवति न्यसेत् संयोजयेदित्यर्थः । स्रुक्स्रुवनिः-स्नेहीकरणपरिषेचनप्रोक्षणान्याह- **सम्मार्ज्य** इति सार्धद्वाभ्याम् ।

[प्रणीताविसर्जनं तथा तिलकधारणम्]

आत्मनो वामभागे तु विष्टरस्रवसंयुतम् ॥ २७८ ॥
अपवास्य जलं पात्रद्वितयस्थं तदर्चितम् ।
उपसंहृत्य तु तथा भस्मना तदनन्तरम् ॥ २७९ ॥
जलनिर्मथितेनैव ह्यूर्ध्वपुण्ड्रचतुष्टयम् ।
हृद्यंसयोर्ललाटे च कुर्याद्दीपशिखाकृतिम् ॥ २८० ॥

[होमसमर्पणम्]

अथार्घ्यपात्रमादाय गत्वा भगवतो गृहम् ।
नमस्कुर्याज्जगन्नाथमष्टाङ्गपतनेन तु ॥ २८१ ॥
आपूर्य पाणियुगलं पुष्पैस्तत्रोपरि स्थितम् ।
संस्मरेन्निष्कलं मन्त्रममृतेनोपबृंहितम् ॥ २८२ ॥
प्रभूतदीप्तिच्छुरितं निक्षिपेन्मन्त्रमूर्धनि ।
तर्पितोऽसि विभो भक्त्या होमेनानलमध्यग ॥ २८३ ॥
होमद्रव्येषु यद्वीर्यं तदिदं चात्मसात्कुरु ।
विनिवेद्यं[१९] विभोर्होमं पूजां कृत्वा यथाविधि ॥ २८४ ॥
गृहीतं भावयेत् तेन प्रसन्नेनान्तरात्मना ।
एवं समाप्य होमान्तमर्घ्यगन्धादिभिर्विभुम् ॥ २८५ ॥
समभ्यर्च्य पितृणां च संविभागमथाचरेत् ॥

अग्नावित्यत्र सन्ताप्येति शेषः । निक्षिप्येत्यत्र स्रुवमिति शेषः ।

प्रणीताविमोकमाह- **आत्मनः** इति । तिलकधारणमाह- **भस्मना** इति । अत्र मन्त्राश्चोक्ताः पारमेश्वरे - "शिरस्तनुत्रहृन्मन्त्रैर्ललाटे चांसयोर्हृदि" इति ।

अग्निमध्यात् स्वहृदयसमारोपितस्य भगवतो मूलबिम्बे नियोजनपूर्वकं होमसमर्पणादिकं चाह- **यावदध्यायपरिसमाप्तिः** ।

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य
श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां
सात्वतार्थप्रकाशिकाख्यायामीश्वरतन्त्रव्याख्यायां पञ्चमोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां भोज्यासनाग्निकार्यविधिर्नाम पञ्चमोऽध्यायः ॥

१९. विनिवेद्य - B, D, E

(Leaving off Praṇītā and wearing of the tilaka)[142]

278b-280. The water kept in two vessels shall be placed aside to one's left along with water flowing from the seat. Concluding that worship, four Ūrdhvapuṇḍras[142] are to be worn with the ashes powdered with water in the heart (chest), two upper arms and forehead taking the shape of the flame of light.

(Offering the homa)

281-286. Taking then these *arghya* vessel, he shall go to the house of Bhagavān and bow to the lord of the world falling down with the eight limbs. Filling up the two palms with flowers, he must think of mantra as standing above it, which is partless, strengthened by nectar blended with huge refulgence and throw it on the head of the mantra. "O lord! you have been pleased with devotion, *homa* done with you are in the midst of fire. Whichever is powerful among the things offered in the *homa* be pleased to make it your own." After offering the *homa* to the lord and doing worship duly he must imagine that it has been received by that inner soul who has become pleased. Completing upto *homa* and worshipping the lord with *arghya*, sandal paste and others, he shall do the partitioning for the manes.

Thus (ends) the fifth chapter called *Bhojyāsanāgnikāryavidhi* in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra.*

142. The number of Ūrdhvapuṇḍras is stated to be four — one on the forehead, second on the chest, third on the right upper arm and the last on the left upper arm. It shall be worn with the ashes taken from the sacred fire. The third aspect that it shall be of the form of the flame of light. *Pāram. S.* identifies each of the four *puṇḍras* as having the presiding deities, respectively in Vāsudeva, Saṃkarṣaṇa, Pradyumna and Aniruddha (III. 15).

SS. (XVII.103b) recommends sandal paste or ashes for preparing ūrdhvapuṇḍra (paste); ashes alone are to be used (*ibid.* XVII.284a).

In the *Saccaritrarakṣā,* section II, Vedāntadeśika offers a critical study of the number of Ūrdhvapuṇḍras and noting the citations from some of the Āgama texts which favour the wearing of four Ūrdhvapuṇḍras, he settles the issue by determining the number to be only twelve. That four *puṇḍras* are to be put on is only with reference to specific contexts and this can not be cited as a general rule. He notes that the Āgama texts and Smṛti texts enjoin the use of ashes or sandal. These are shown to be invalid and he proves, on the strength of the passages in the *Pārameṣṭhyasaṁhitā, Brahmāṇḍapurāṇa* and others, that the material shall only be white mud.

As regards the form of *puṇḍra,* Vedāntadeśika notes instances from various sources for the forms of *puṇḍra,* such as the flame of light, leaf of the bamboo, leaf and others, and concluders in favour of having the form of the foot of Viṣṇu as the ideal and most authentic.

The system of Rāmānuja upholds the authority of the Pāñcarātra but does not admit all the injunctions particularly about *puṇḍra.* A well-reasoned analysis of this matter is undertaken by Vedāntadeśika and his findings find favour among the community of the followers of Rāmānuja.

षष्ठोऽध्यायः

पितृसंविभागादिशयनोत्सवान्तविधिः

[पितृसंविभागविषयकः प्रश्नः]

मुनयः—

पितृणां संविभागस्य विधिः कीदृक् फलं च किम् ।
तत्सर्वं मुनिशार्दूल वर्ण्यतां भवताधुना ॥ १ ॥

[पितृसंविभागप्रकारः]

नारदः—

आराध्यस्याग्रतो विप्राः प्रत्यहं क्रियते तु यत् ।
विज्ञेयं संविभागं तमुत्तमं सर्वकर्मणाम् ॥ २ ॥
संविभागात्पितृणां च भवत्यनृणवान्नरः ।
प्रयान्ति तृप्तिमतुलां तेन कर्मवशादपि ॥ ३ ॥
संविभागः पितृणां च यथा कार्यस्तथोच्यते ।
कुण्डस्य योनिनिकटे दक्षिणाग्रांस्तरेत् कुशान् ॥ ४ ॥
भद्रपीठसमीपे तु क्ष्मातले वा तदूर्ध्वतः ।
स्तरोपरि विकीर्याऽथ तिलान् सरजतोदकान् ॥ ५ ॥
क्रमेण भावयेत्तत्र पितृनथ पितामहान् ।
तृप्तये ह्यथ सर्वेषां देवाय विनिवेद्य च ॥ ६ ॥
प्रोक्षितान्यन्नपात्राणि चत्वारि कबलानि वा ।
स्तरोर्ध्वे तु निधायाथ सम्पूज्यार्घ्यादिना ततः ॥ ७ ॥
क्रमेण चातुरात्मीयैर्मन्त्रैरप्य्यययोगतः ।
ततस्तु नाम्ना गोत्रेण मन्त्रपूर्वं तिलोदकम् ॥ ८ ॥
सर्वेषाम्र्घ्यकलशात् प्रदद्याच्च यथाक्रमम् ।
तादर्थ्येनाथ चतुरो विनिवेश्यासनेषु च ॥ ९ ॥

अथ पूर्वाध्यायान्ते सूचितं पितृसंविभागं पृच्छति - **पितृणाम्** इति ।

एवं पृष्टो नारदः तत्प्रकारमाह - **आराध्यस्याग्रतो विप्राः** इत्यारभ्य **तत्तेषामक्षयं भवेत्** इत्यन्तैः । एवं पितृसंविभागः प्राभाविकार्चनमात्रानुष्ठाने होमानन्तरं कार्यः । माध्याह्निकार्चनस्याप्यनुष्ठाने तु तदनन्तरमेव कार्यः ।

CHAPTER VI

Procedure for Pitṛsaṃvibhāgādiśayanotsavānta

(Question on the subject of Pitṛsaṃvibhāga)[1]

1. Sages: Of what kind is the rule for apportioning of food and preparations for the departed souls and what is the result (obtainable thereby), O best sage! may you now describe all that.

(The mode of dividing (the offerings for the manes)[2]

2-21. Nārada: O brahmins! that apportioning (of the preparations) which is done daily in front of god (who is fit to be worshipped) shall be understood as the best apportioning among all acts. Man becomes freed from debt by apportioning (the food) for the departed ancestors. They (ancestors) get high (unequalled) satisfaction by this (act) even when it is done as an act. It is now stated how this allotment for the departed soul is to be done. The *darbhas* shall be strewn, with their (pointed) edges to face the

1. Pitṛsaṃvibhāga: The routine of a religious Hindu is goverened by the Kalpasūtras especially, the Dharma and Gṛhya parts and the Dharmaśāstra texts which are based on the *śrutis*. Every Hindu is bound by three debts, called Ṛṣiṛṇa, Devaṛṇa and Pitṛṛṇa. The first *ṛṇa* is cleared by the study of the Vedas, the second by performing sacrifices and worship in honour of gods and the third by getting a son. Apart from adopting the means to clear these debts, a person is required to perform everyday in the morning, the *tarpaṇa* (offering libations of water) to the Gods, *Ṛṣis* and *Pitṛs*. This act is considered as worship of Viṣṇu himself;

   vide: ये यजन्ति पितृन् देवान् ब्राह्मणान् सहुताशनान् ।
   सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ॥ *Mbh. Śānti.* CCCLV.41.

   It is the bounded duty which a person is expected to carry out.

   Consistent with this Vedic tradition the Āgamas follow the Vedic precepts and prescribe an act called Pitṛsaṃvibhāga, as part of daily routine to be carried out after worshipping God.

   Thus there is justification for the treatment of this topic in this text as forming part of the worship of Viṣṇu.

   This topic is treated as *SS.* V.

2. This is to be done after *homa* during morning worship.

लब्धलक्ष्यान्परे[1] तत्त्वे ब्राह्मणान् पाञ्चरात्रिकान् ।
प्राङ्मुखं द्वितयं चैव द्वितयञ्चाप्युदङ्मुखम् ॥ १० ॥
सम्पद्यभावेऽप्येकं वा विनिवेश्योत्तराननम् ।
अथ तेषां क्रमात्कुर्यादर्चनं चातुरात्म्यवत् ॥ ११ ॥
अर्घ्यानुलेपनाद्यैस्तु भोगैर्मात्रावसानकैः ।
तत्तत्कालोचितैस्सर्वैरनुपादेयवर्जितैः ॥ १२ ॥
तैश्चापि मौननिष्ठैस्तु भवितव्यं सुयन्त्रितैः ।
वाग्यता लब्ध[2]लक्षास्त्वप्यन्नमूर्तौ जनार्दने ॥ १३ ॥
येऽश्नन्ति पितरस्तेन तृप्तिमायान्ति शाश्वतीम् ।
अतस्सव्यभिचारं तु मौनं वर्ज्यं क्रियापरैः ॥ १४ ॥
शुभमव्यभिचारं यत्तत्कार्यं सर्ववस्तुषु ।
यदङ्गसङ्केतमयैरव्यक्तैर्नासिकाक्षरैः ॥ १५ ॥
कृतमोष्ठपुटैर्बद्धैर्मौनं तत्सिद्धिहानिकृत् ।
स्वयमेव स्वबुद्ध्या यत्सर्ववस्तुषु वर्तते ॥ १६ ॥
शब्दैरनुपदिष्टैस्तु तन्मौनं विद्धि सर्वदा ।
तस्माद्वै श्राद्धभोक्तृणां दिव्ये वा पितृकर्मणि ॥ १७ ॥
दद्यान्नैवेद्यवत्सर्वं मर्यादाभ्यन्तरेऽग्रतः ।
येनाचमनपर्यन्तं कालं तिष्ठन्ति वाग्यताः ॥ १८ ॥
विधिनानेन वै नित्यमथ यज्ञे तु वैष्णवे ।
संविभागः पितृणां च कार्यस्तद्द्रविणैर्नरैः ॥ १९ ॥
कृत्वा तिलोदकान्तं वा फलमूलैस्त्वशक्तितः ।[3]
तदर्थं[4] ग्रासमात्रं तु दद्याद्गोष्पथभैक्षुके ॥ २० ॥
यस्माद्दिव्यैर्महामन्त्रैर्दत्तं यत्पूजितेऽच्युते ।
पित्रर्थमल्पं वा भूरि तत्तेषामक्षयं भवेत् ॥ २१ ॥

१. लक्षात् - पा.
२. बद्ध - A
३. तिलोदकान्नं वा फलमूलैः स्वशक्तितः - A
४. तदर्थम् - A, E

south, on the layer of the fire-pit near the *yoni*[3] or on the ground near Bhadrapīṭha[4] above it, and then scattering seasamum with water mixed up with silver (or silver vessel) on the layer. He (priest) shall think of (the presence there) the fathers and paternal grandfathers in due order. After offering (food) to god for the satisfaction of all of them, he shall place the vessels containing food after sprinkling water over them or four morsels (of them) on the layer adoring (them) with *arghya* etc. in due order with the Cāturātmīyamantras[5] through Apyayayoga.[6] Then shall be offered in due order the water mixed up with seasamum from the pitcher of *arghya* to all (ancestors) uttering the mantra and the name of the *gotra*.[7] For this purpose, he shall offer the seats for four Pāñcarātrika brahmins who have fixed the supreme *tattva* as their goal, two (among) them to face the east and two north. In the absence of (availability of) funds, one (brahmin) shall be placed to face north. They shall be worshipped in their order, as in the case of Cāturātmīya, with *arghya*, unguents, and other enjoyables ending with *mātrā*,[8] all befitting that time and free from what shall not be taken up (by them). They (brahmins) shall observe silence and have (senses) well controlled. The manes get everlasting satisfaction through them (brahmins) who take (eat) it (food) with restrained speech and have fixed their goal (in life) in Janārdana, who is in the form of food. Therefore, those, who are bent upon doing the work, shall avoid silence which is unnecessary and attend to all auspicious work with reference to all things, when it is absolutely necessary. That act of silence which is marked by the use of indistinct

3. *yoninikaṭe:* near the *yoni; yoni, nābhi, nemi,* and others are parts of a fire-pit. For full details refer to *SS.* Ch. XI.

   vide: प्राच्यां शिर: समाख्यातं बाहू दक्षिणसौम्ययो: ।
   उदरं कुण्डमित्युक्तं योनि: पादौ च पश्चिमे ॥ *VS.* VIII.8b-9a.

4. Bhadrapīṭha: see note under III.5.

5. Cāturātmiyamantra: the mantra in which the four *vyūha* deities, Vāsudeva, Saṃkarṣaṇa, Pradyumna and Aniruddha are mentioned together. Cāturātmya is also called Caturbrahma. *Ha, Sa, Ṣa* and *Sa* are the respective bījākṣarās for the four *vyūha* deities.

   vide: हात् सात् षात् शात्तत: शश्वच्छक्त्यूष्माण उदीरिता: ।
   चातुरात्म्यमिदं प्रोक्तं चतुब्रह्मेति शब्दितम् ॥ *Ahs.* XVI.83b-84a.

6. *apyayayoga:* the method of dissolution, making the effect enter into its cause.

7. *gotra:* patronymic name descended from an ancient ancestor.

8. *mātrā:* see *ĪS.* V.22b-23a.

[मूलमूर्त्यर्चनम्]

समभ्यर्च्या[5] र्घ्यगन्धाद्यैर्मूलमूर्तिगतं विभुम् ।

[प्राङ्गणादिस्थितस्वतन्त्रमूर्त्याद्यर्चनम्]

प्राङ्गणेषु च सर्वेषु प्रासादेष्वाश्रमेषु च ॥ २२ ॥
प्रतिष्ठितेषु शोभार्थं विभवव्यूहमूर्तिषु ।
तथैव गोपुरद्वारदिङ्मूर्तिषु च मण्डपे ॥ २३ ॥
सान्निध्यं चैव यातासु शक्त्या नित्यं समर्चनम् ।
षोडशैरुपचारैर्वा द्वात्रिंशद्भिस्ततोऽधिकैः ॥ २४ ॥
कुर्यात्तन्मूर्तिमन्त्रैश्च तथा नैमित्तिकेष्वपि ।
जपान्तं हवनान्तं वा स्नानाद्यं साधकस्ततः ॥ २५ ॥
तत्तन्मूर्त्यग्रदेशस्थे कुण्डे होमं समाचरेत् ।
न कर्मार्चादिकं तत्र स्नपनं चोत्सवादिकम् ॥ २६ ॥
बलिदानं च सर्वत्र पवित्रारोहणादिषु ।
नार्चतव्यं विशेषेण परतन्त्रासु मूर्तिषु ॥ २७ ॥
नित्याभिषेकमात्रं तु तासु तत्र समाचरेत् ।
सितादिवर्णयुक्तासु प्रोक्षणं वा निवेदनम् ॥ २८ ॥
मूलालयार्चया सार्धं परतन्त्रासु देशिकैः ।
पवित्रारोहणं कार्यमङ्गत्वेनाधिवासितैः ॥ २९ ॥
पूरकेषु च सर्वेषु तथैवाश्रयणादिके[6] ।

सकृदेव कर्तव्यत्वात्; तथैव ''त्रिकालेष्वेकमष्टाङ्गं षडङ्गं चाचरेद्वयम्'' इति वक्ष्यमाणत्वाच्च । किञ्च परार्थभगवदाराधनमात्रानुष्ठाने मन्दिर एव भगवत्सन्निधौ पितृसंविभागः कार्यः । स्वगृहेऽपि भगवदर्चनानुष्ठाने तु तदनन्तरमेव कार्यः, तत्पूर्वमेव कर्तुमनौचित्यात्तथैव —

''पितृणां संविभागश्च अनुयागं यथोदितम् । देशिकस्स्वेज्या कुर्यात् नित्यं माध्यन्दिनार्चने'' ॥ इति ।

वक्ष्यमाणत्वाच्च । पुनर्मूलमूर्त्यर्चनमाह- **समभ्यर्च्य** इत्यर्धेन । अत्र पुनरर्चनं पितृक्रियासाद्गुण्यार्थकम् अथवा मूलार्चनानन्तरमव्यवधानेनाश्रयमूर्त्याद्यर्चनकालविधानार्थकम् ।

प्राङ्गणादिस्थिता स्वतन्त्रमूर्त्याद्यर्चनप्रकारमाह—**प्राङ्गणेषु** इत्यारभ्य तथैवाश्रयणादिके इत्यन्तैः।

५. तमभ्यर्च्य –A

६. आग्रायणादिके –A

syllables uttered with nasal tinge, indicated (filled with) by the gestures made with the limb and through the space between the lips (without opening them) will ruin the result. Always understand silence as applicable to all objects with one's own intellect[9] and of its own accord without uttering the words. Therefore, everything shall be offered in advance observing the limits, to those who partake the food in the ceremonies performed in honour of the departed ancestors or during the divine (acts of worship) so that they could remain restrained in speech till they sip water (*ācamana*). Apportionment (of food) for the departed souls shall be done always, according to this process, by men with money and (also) in the sacrifices (done for) of Viṣṇu. After doing this upto (offering) the water mixed up with seasamum or with fruits and in case of incapacity (to spend enough money to prepare the rich food) one half of it, at least a morsel shall be given to the group of mendicants (waiting) in the ground (intended for) of the cows,[10] since whatever little or much is given, for the manes, when Acyuta is worshipped with the divine great mantras, that will be free from decay (imperishable) for them (manes).

(Worship of Mūlamūrti)

22-30a. After worshiping the powerful lord present in the Mūlamūrti with *arghya*, sandal-paste and others,

(Worship of independent forms stationed in the courtyard and other places)

Worship is to be done, necessarily according to one's capacity, to the forms of divine descent and *vyūha*, installed for brilliance (to make the precints brightened) in all courtyards, temples, *āśramas*, likewise to the forms at the (four) directions at the entrance of the tower and those which are present in the pavilion, with sixteen or thirty-two or even more acts of attendance (*upacāra*) using the mantras of (those) forms (of deities). So also has to be done on special occasions. Then the *arcaka* shall attend to bath etc. to the conclusion of *japa* or shall do *homa* in the fire-pit in the sites in front of the various deities. Worship to the Karmārcā, bath, festival, offering of *bali*

9. *svabuddhyā:* according to one's own intellect, i.e. understanding the circumstances while dealing with them.

10. *gospatha:* ground frequented by the kine; *bhikṣuka:* beggars who expect, as they know, morsels of food would be offered when they stand in *gospatha*, for, it is better to take that the cows throng in that place expecting the offerings of morsels of food.

[परिवारेऽपि मूर्तीनामाश्रयमूर्तिवदर्चनम्]

खगेशविष्वक्सेनादिपरिवारगणेष्वपि ॥ ३० ॥
प्रतिष्ठितेषु गेहेषु पूज्यमाश्रयमूर्तिवत् ।

[अमूर्तानां केवलबलिदानम्]

अमूर्तस्य खगेशस्य विष्वक्सेनादिकस्य तु ॥ ३१ ॥
कुमुदादि गणेशानां द्वारावरणवासिनाम् ।
अन्येषां परिवाराणां महापीठनिवासिनाम् ॥ ३२ ॥
अग्रे नित्योत्सवार्चायाः दद्यात्कालत्रये बलिम् ।

[निराकारस्यापि विष्वक्सेनपर्यन्तमर्चनं कार्यम्]

साकारो वा निराकारो विष्वक्सेनो गणैस्सह ॥ ३३ ॥
यद्वा समर्चनीयश्च बल्यन्ते शिष्टवस्तुभिः ।

shall not be done during the Pavitrārohaṇa[11] other occasions particularly to the deities which are dependent (on the main deity). *Abhiṣeka*[12] alone shall be done to them. Sprinkling with water or offerings (of food preparations) shall be done by the priests to the dependents (dependent deities) of white and other colours along with the idol in the main temple. Pavitrārohaṇa in these cases with *pavitra* etc. which undergo *adhivāsa*[13] as part of the main act and likewise with dependence (upon the main deity) in all cases of Pūraka.[14]

(Worship is to be done to the attendant deities as in the case of main deity)

30b-31a. Worship is to be done as in the case of main deity, to the host of subordinate deities like the lord of birds (Garuḍa), Viṣvaksena and others, installed in houses.

(Mere offering of bali to the formless deities)

32a-33a. Bali is to be offered three times a day, in front of Nityotsava idol, to the formless lord of birds (Garuḍa), Viṣvaksena and others, Kumuda, Gaṇeśa and to others those who dwell in enclosure at the entrance as well as other subordinate deities who dwell at the main (big) pedestal (of the main deity).

11. Pavitrārohaṇa is also read as Pavitrāropaṇa; *pavitra:* purified thread, that which protects from falling. Pavitrotsava is the name of expiatory rituals undertaken to atone for all the sins of omission and commission that could have occurred in temple worship. This is done once in a year. Threads of silk of various colours are prepared and garlanded on the idol, utensils, etc. *homa* is performed then for a fixed number of days. Here Pavitrārohaṇa means putting the *pavitra* on the idol and others; *VS.* XXVIII.68b-94, *SS.* XIV.1-35 deal with this.
12. *Abhiṣeka:* ablution, ceremonial bath, distinct from *snapana*; specific vessels are used distinct from those of *Ācāryābhiṣeka* where a person gets initiated and declared as having completed *dīkṣā*.
13. *adhivāsa: adhi*—locative sense in some thing (may be water, milk, shade of a tree, grains or bed); *vāsa*—living, staying which are made of several materials like metals, wood or mud are to be kept in a vessel containing the things mentioned above for making it free from impurities if any and also to invoke the presence of the deity after some time or days. This applies also to *pavitra*.
14. Pūraka: the ball of rice offered at the conclusion of the oblations to the departed souls.

[नित्योत्सवप्रकारः]

नित्योत्सवं ततः कुर्यात्सर्वालङ्कारसंयुतम् ॥ ३४ ॥
प्राकारद्वारदेवानां बलिदानपुरस्सरम् ।
तद्विधानं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥ ३५ ॥
कृतेन येन भक्तानामभीष्टं जायते फलम् ।

[नित्योत्सवेन भक्तानामभीष्टफलम्]

नित्योत्सवार्थं बिम्बं तु सौवर्णं राजतं तु वा ॥ ३६ ॥
ताम्रजं पैत्तलं वाथ नात्युच्चं तच्चतुर्भुजम् ।
मूलबेरानुरूपं च यदेव स्थापितं पुरा ॥ ३७ ॥

परिवारेऽपि मूर्तीनामाश्रयमूर्तिवदर्चनं कार्यमित्याह - **खगेश** इत्यादिना ।
अमूर्तानां केवलबलिदानमाह– **अमूर्तस्य** इति द्वाभ्याम् ।
निराकारस्यापि विष्वक्सेनस्य बल्यन्तैरर्चनमेव कार्यमिति पक्षान्तरमाह — **साकारः** इति ।
नित्योत्सवप्रकारमाह - **नित्योत्सवं ततः कुर्यात्** इति प्रक्रम्य **कूर्चेन वान्नमूर्त्या वा कुर्यान्नित्योत्सवं ततः** इत्यन्तैः ॥

वस्त्राभरणमाल्यैश्च यथाशोभमलङ्कृतम् ।
मूलबिम्बगतां शक्तिं तस्मिन्नारोप्य मन्त्रतः ॥ ३८ ॥
समभ्यर्च्यार्घ्यपुष्पाद्यैर्भोगैर्धूपान्तिमैस्ततः ।

[स्वयंव्यक्तादिके साधकवरणं नित्योत्सवक्रमश्च]

आप्तैराराधिते देवे स्वयं व्यक्तालयादिषु॥ ३९ ॥
साधकं वरयेदन्यं बलिदानादिकर्मणि ।
पुरा गर्भगृहद्वारि तथा चैवाग्रमण्डपे ॥ ४० ॥
घण्टानादसमेतेन दीपेन ज्वलितेन तु ।
द्वास्स्थानर्घ्यादिधूपान्तैस्समभ्यर्च्यार्घ्यवारिणा ॥ ४१ ॥
दत्त्वार्हणं ततश्चान्नं तर्पणाम्भस्ततः परम् ।
ताम्बूलं च क्रमाद्दत्त्वा तत्तन्मन्त्रैरनुक्रमात् ॥ ४२ ॥

(Worship must be done even for the formless[15] including Viṣvaksena)

33b-34a. Whether having the form or formless, Viṣvaksena, with his hosts, shall be worshipped at the end of *bali* (offering) with the remaining offerings.

(Method of doing Nityotsava)

34b-36a. Then Nityotsava shall be done with all decorations after offering *bali* to the gods at the entrance to the enclosures. O eminent sages! I shall tell the method for it, listen. The devotees get the (their) desired ends (fruits) when it is done.

(The devotees getting the desired fruit by the performance of Nityotsava)

36b-39a. That very idol made of gold or silver or copper or brass not very high and having four hands, which was installed before, conforming to the Mūla idol, shall be bedecked to look attractive (beautiful) with apparels, ornaments and garlands. The power, which is in the *Mūla* idol, shall be infused (raised) into it with mantras and worshipped well with *arghya*, flowers and other delightful things, ending with the (use of) incense.

(Selection of the Arcaka in the self-manifested (temples) and method of doing Nityotsava)

39b-42. Another *arcaka* is to be chosen for attending to works like offering *bali* to god worshipped by reliable persons in the self-manifested temples etc. Worship is to be done at first at the entrance to the sanctum sanctorum, likewise at the front pavilion with the glowing light along with the ringing of the bell, offering *arghya* etc. at the region of entrance ending with the (offering of) incense. Water of *arghya* is to be given for *arhaṇa*, then food, then water for drink; Tāmbūla must be given in due order with the various mantras.

15. *amūrta*; not *mūrta*, not having a finalised form; here is meant deities who are to be mentally conceived to be present at particular spots mentioned here.

[बलिबिम्बस्य यानालङ्कारादि]

स्वर्णादिनिर्मितं यानं पुरस्तात्प्रथमाङ्गणे ।
सुगन्धपुष्पप्रभया क्षौम्यैर्माल्यैस्सितादिभिः ॥ ४३ ॥
यथाशोभमलङ्कृत्य तस्मिन् बल्यर्थकौतुकम् ।
प्राचीमुखं समारोप्य प्राङ्गणेषु प्रदक्षिणम् ॥ ४४ ॥
आतपत्रैस्सिताद्यैश्च मायूरैः केतुयष्टिभिः ।
पताकाभिश्चामरैश्च तालवृन्तैश्च शोभनैः ॥ ४५ ॥
गणिकादेवदासीभिर्गायकैर्वाद्यसञ्चयैः ।
भेरीपटहघोषैश्च श्रुतिघोषसमन्वितैः ॥ ४६ ॥
एवमाद्यैरलङ्कारैर्गोमयेनोपलेपिते ।
मण्डले हस्तमात्रे तु बलिदानपुरस्सरम् ॥ ४७ ॥
द्वारावरणदेवानां ध्यातॄणां वा स्वदिक्षु च ।
वक्ष्यमाणविधानेन नियतोत्सवमाचरेत् ॥ ४८ ॥

[महापीठे विष्णुभूतविषयः]

पीठोर्ध्वे विष्णुभूतानां सगणानामथार्चनम् ।
कृत्वा समुत्किरेच्छेषं तृप्त्यर्थं सोदकं बलिम् ॥ ४९ ॥
पीठं प्रदक्षिणं नीत्वा चतुर्धा वा द्विधाथवा ।
सन्तोष्य नृत्तगीताद्यैर्देवमन्तः प्रवेशयेत् ॥ ५० ॥
प्राङ्गणेषु विशालेषु बहिष्ठेषु च सादरम् ।
मण्डितं रथमारोप्य परिभ्रमणमाचरेत् ॥ ५१ ॥
यानादेरवरोप्याथ पादुके विनिवेद्य च ।
अग्रमण्डपभूमिष्ठे भद्रपीठे निवेश्य च ॥ ५२ ॥
पाद्यार्घ्याचमनाम्भोभिश्चन्दनाद्यनुलेपनैः ।
माल्यैर्नानाविधैश्चापि धूपैस्ताम्बूलपश्चिमैः ॥ ५३ ॥
अभ्यर्च्य श्रमशान्त्यर्थं स्वस्थाने सन्निवेशयेत् ।
आदौ निवेशितां शक्तिं तन्मूले विनियोज्य च ॥ ५४ ॥
तमभ्यर्च्यार्घ्यगन्धाद्यैः प्रणमेत् स्तुतिपूर्वकम् ।

(Vehicle and decoration etc. for bali idol)

43-48. The idol of (for) *bali* shall be mounted, to face the east, on a vehicle made of gold and other (metals) placed (already) in the first courtyard and decorated with the halo of sweet smelling flowers, white silks and white garlands etc. so as to impart brilliance to it. It is (to be drawn) in the courtyards circumambulating (it) (accompanied) by white and other coloured umbrellas, flagstaff, brilliant peacocks, plumes, flags, chowries, fans made of palm-leaf, with courtesans, temple nautch girls, singers, multitude of musical instruments, with the (loud) sound of kettle-drums, and tabors, together with the sound (the recitation) of the Vedas and similar establishments. Daily festival shall be done according to the process given below, in the *maṇḍala* of the measurements of a cubit, smeared with cow-dung after offering *bali*, to the deities in the enclosure at the gate or to the meditators (in the form of divine figures) in their own quarters.

(Matter regarding those (deities) who have become Viṣṇu (to be done) in the main pavilion)

49-55a. Worship is to be done above the seat for the groups (of deities) who have become Viṣṇu. Then the remaining offerings of *bali* are to be strewn about with water for (their) satisfaction. The deity shall be taken within *garbhagṛha* after circumambulating the seat four or two times and causing delight to him with dance, music etc. He shall be taken about (that region) mounting him in a decorated chariot respectfully in the outer spacious courtyards. He shall be taken down from the vehicles, and offered the sandals. He shall be placed on the auspicious seat (Bhadrapīṭha) kept in the front pavilion and be worshipped with the waters of *pādya, arghya* and *ācamana,* unguents like sandal-paste, various kinds of garlands, incense followed by Tāmbūla. He shall be kept in his own place to get relief from exertion. The power which was at first infused (in this idol) shall be placed into the Mūlabera. The priest shall bow to him (after) eulogising him, having worshipped with *arghya,* sandal-paste etc.

(Result of doing Niyatotsava)[16]

55b-57a. All affluences would be there always for the king and country where Niyatotsava is duly done three times (in a day). Nityotsava shall be

16. Niyatotsava is the reading in 55b; it must mean the festival done regularly perhaps Nityotsava is the reading meant here.

[नियतोत्सवफलम्]

त्रिकालं यत्र विधिवत्क्रियते नियतोत्सवः ॥ ५५ ॥
तत्र सर्वसमृद्धिस्स्याद्राज्ञो राष्ट्रस्य चानिशम् ।
अभावे बलिबिम्बस्य हेतुनासन्निधीकृते ॥ ५६ ॥
कूर्चेन वान्नमूर्त्या वा कुर्यान्नित्योत्सवं ततः ।

[अर्घ्यादिमन्त्रोपसंहारपूर्वकं तीर्थतुलस्यादिस्वीकारमाहात्म्यम्]

निश्शेषस्योपसंहारं कृत्वा चार्घ्यादिकस्य च ॥ ५७ ॥
नत्वा स्तुत्वा च देवेशं ततः पाद्यप्रतिग्रहात् ।
पादोदकं समादाय विग्रहं सेचयेत्स्वकम् ॥ ५८ ॥
भुक्तानि पत्रपुष्पाणि विदध्यान्मूर्धनि[1] स्वके ।
पुष्पार्घ्यगन्धपूर्वाणां देवयज्ञे कृते सति ॥ ५९ ॥
विनयादाहूतानां च भक्तानां मन्त्रसेविनाम् ।
मूर्ध्नि सन्धारणाच्छश्वद्दौर्भाग्यं क्षयमेति च ॥ ६० ॥
कीर्तिं कान्तिं श्रियारोग्यसिद्धिं समुपयाति च ।

अथार्घ्यादिमन्त्रोपसंहारपूर्वकं तीर्थतुलस्यादिस्वीकारं तन्माहात्म्यञ्चाह —**निश्शेषस्य** इति चतुर्भिः।

[अनुयागविधिः]

पश्चाच्छरीरयात्रार्थमभ्यर्थ्य परमेश्वरम् ॥ ६२ ॥
लब्धानुज्ञस्तु वै कुर्यादनुयागं यथाविधि ।
भोज्यं नैवेद्यपूर्वं तु सर्वमादाय पात्रगम् ॥ ६२ ॥
विनिवेद्य च देवाय पवित्रीकृत्य चाम्भसा ।
सत्यरूपा ह्यलक्ष्या चाप्यन्नदोषक्षयंकरी ॥ ६३ ॥
चेतसा चातुरात्मीया भावनीया च भावना ।
रसा[2]त्माऽध्यक्षसंज्ञोऽन्ने स्वादुभावे व्यवस्थितः ॥ ६४ ॥
प्रद्युम्नो भगवान् रूपे एतद्वीर्ये तु लाङ्गली ।

१. निदध्यान् - D, E
२. तथा - पा.

done with the Kūrca or Annamūrti[17] in the absence of *bali* idol or not brought there for some reason.

(Greatness of receiving the holy water, Tulasī, etc. after the conclusion of the mantras of arghya and others.)

57b-61a. Withdrawing *arghya* etc. completely; bowing to and eulogising the Lord of gods, the priest shall take the *pādodaka* (water collected in a vessel after washing his feet) from the *pādya* vessel and sprinkle his body with it. The leaves (petals) and flowers, used (during worship) or enjoyed by god shall be placed (by him) on his head. Misfortune gets destroyed for ever when those who are invited with respect, devotees and those who utter the mantras, receive on their heads, flowers, *arghya* (water), sandal-paste with which the lord has been worshipped. Reputation, splendour, acquisiton of health along with fortune descend on them.

(Anuyāgavidhi)[18]

61b-67a. Then the priest shall request the supreme lord for (adopting) the means for his bodily subsistence and getting permission shall attend to Anuyāga according to the rule. All the food that has been offered (to god)[19] which is in the vessel shall be taken after offering to god and purifying with water. That which is true and not having any particular mark, destroys the defects in the food. This shall be mentally treated to be of the form of Cāturātmīya.[20] Lord Aniruddha is present in the delicious food with the name Adhyakṣa and being of the nature of *rasa*, lord Pradyumna in its (food)

17. Annamūrti: A figure made of cooked rice and to have the power from the Mūlabera to be infused. This is to be treated for offering *bali*. For details see *Pād. S. Caryā* V.12-19.
18. Anuyāga: *anu*—after; after performing a *yāga*, worship to the deity; *yāga*—worship. This means the individual soul taking food, which was already offered to the deity. The word *anu* is taken as *aṇu*, atom, meaning the soul's size being atomic; *anuyāga*: taking food for the subsistence of the atomic sized soul.
19. *vinivedya devāya:* must be taken to mean offering the food to the inner controller, *antaryāmin*.
20. All the *vyūha* deities are to be treated to be present in the *yāga*. Aniruddha is in the form of *rasa*; may mean watery part of liquid, Pradyumna in the solid form, Saṃkarṣaṇa (Lāṅgalī) having the plougshare for his weapon in the essence of the food and Vāsudeva Himself takes the food representing the individual person.

भोक्ताहमात्मा भगवान् वासुदेवस्स्वयं त्वजः ॥ ६५ ॥
चतुःप्रणवसञ्जप्तं ततोऽम्भश्चुलकं पिबेत् ।
वक्त्रकुण्डे तु तेनैवाप्यन्नाहुतिचतुष्टयम् ॥ ६६ ॥
हुत्वा चाभिमतैर्ग्रासैस्ततोश्नीयाद्यथारुचि ।

अथानुयागविधिमाह — **पश्चात्** इत्यारभ्य **ततोऽश्नीयाद्यथारुचि** इत्यन्तैः । अनुयागशब्दार्थः सच्चरित्ररक्षायां तृतीयेऽधिकारे उक्तः — "निवेदितान्नेन सह पाकपात्रावशिष्टेन साम्बुफलादिना च यो यागः क्रियते सोऽनुयागः' । 'अणुभूतजीवात्मसिद्ध्यर्थत्वाच्चायमनुयागमित्यपि ग्राह्या' इति । एवं निवर्चनमूलं पौष्करवचनमपि तत्रैव लिखितम् ।

"अण्वात्मतत्त्वं विज्ञेयं विहितं तस्य सर्वदा । आत्मनैवात्मसिद्ध्यर्थं यागमन्नेन तेन च ॥ सहयज्ञावशिष्टेन साम्बुना च फलादिना । अनुयागं च तं विद्धि आत्मनात्मनि यत्कृतम्" ॥ इत्यादि ॥

"पवित्रीकृत्य चाम्भसा इत्यत्र "अयोग्यजननिरीक्षितत्वयातयामत्वादिदोषसम्भावनायां तन्निवृत्त्यर्थं पवित्रीकरणोक्तिः" इति तत्रैवोक्तं वेदान्ताचार्यैः — 'विनिवेद्य च देवाय' इत्यत्र पारमेश्वरव्याख्याने देवाय स्वगृहार्चाभूताय विनिवेद्येति व्याख्यातम् । तदस्माकमप्यभिमतमेव । तथापि तत्प्रकरणे तदर्थो न लभ्यते । तत्पूर्वमेव पितृसंविभागस्योक्तत्वात् ।

[अष्टाङ्गनमस्कारप्रकारः]

समाचम्य पुनर्यायात्प्रयतो भगवद्गृहम् ॥ ६७ ॥
मनो बुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥ ६८ ॥
प्रदक्षिणसमेतेन त्वेवं रूपेण सर्वदा ।
अष्टाङ्गेन नमस्कुर्यादष्टाक्षरपुरस्सरम् ॥ ६९ ॥
एवमष्टाङ्गयजनमनुयागान्तमीरितम् ।

[आराधनाङ्गानां विवरणम्]

अन्तःकरणयागादि यावदात्मनिवेदनम् ॥ ७० ॥
तदाद्यमङ्गं यागस्य नाम्नाभिगमनं महत् ।
पूजनं चार्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने ॥ ७१ ॥
बाह्योपचारैस्तद्विद्धि भोगसंज्ञं तु नारद ।
मध्वाज्याक्तेन दध्ना च पूजा च पशुनार्चया ॥ ७२ ॥

form and Saṃkarṣaṇa (Lāṅgalī) in its energy, the unborn Lord Vāsudeva is by Himself the consumer (myself) (of that food). A handful (palmful) of water is to be drunk which is (sanctified, by uttering *Praṇava* four times. He shall then put into the cavity of the mouth with the same (*Praṇava*) four offerings of food. After doing *homa* with desirable (required according to convenience) mouthful and then eat according to his liking.

(Method of doing Aṣṭāṅganamaskāra)

67b-70a. He shall do *ācamana* and go again to the house of god with piety. He shall prostrate on the surface of the earth, the mind with intellect and the four feet, like the tortoise and the head as the fifth. He shall always do obeisance with eight limbs in this way together with circumambulation uttering Aṣṭākṣaramantra. This kind of worship with eight limbs is stated to be end of Anuyāga.

(Description of the parts of worship)[21]

70b-75. The first part of the worship beginning with that made by the mind (inner instrument) till offering of himself is great called by the name Abhigamana. O sage! all the worship done with the pleasant (enjoyable) *arghya*, flowers etc. with external services are to be known as *bhoga*, O Nārada! That is, the third part of worship which is done with curds smeared over with

21. Aṣṭāṅgayajana, cf. *JS.* XXII.74b-81a.

तदनन्तरं स्वगृहार्चानिवेदनानौचित्यात्। किञ्च 'भोज्यं नैवेद्य पूर्वन्तु' इत्यादि अनुयागविधानं श्रीसात्वते पितृसंविभागाव्यवहितमेव दृश्यते । अतो वेदान्ताचार्यैः सच्चरित्ररक्षायाम् विनिवेद्य च देवाय इति वाक्यमन्तरात्मनिवेदनाभिप्रायकत्वेनोदाहृतम् । प्राणाहुतिमन्त्रविचारश्च तत्रैव कृतः "एषान्तु तत्र भगवदसाधारणमन्त्रैर्वक्त्रकुण्डे विहितहोमः, न तेषु वैदिकमर्यादाविरोधश्शङ्कनीयः, कल्पसूत्रप्रतिनियत-धर्मान्तरवत् तदुपपत्तेः" इति ।

अथ पुनराचमनपूर्वकं भगवन्मन्दिरप्रवेशमष्टाङ्गनमस्कारप्रकारञ्चाह — **समाचम्य** इति सार्धद्वाभ्याम्।

एतावत्पर्यन्तमुक्तमर्थं सर्वं निगमयति — **एवम्** इति ।

आराधनाङ्गानां विवरणमाह- **अन्तःकरण** इति सार्धैः पञ्चभिः ।

तत्तृतीयं हि यागाङ्गं तुर्यमन्नेन पूजनम् ।
निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने ॥ ७३ ॥
सम्प्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ।
वह्निसन्तर्पणं षष्ठं पितृयागस्तु सप्तमम् ॥ ७४ ॥
प्राणाग्निहवनं नाम्ना त्वनुयागस्तदष्टमम् ।
एवमष्टाङ्गसहितां पूजां कुर्याद्यथाविधि ॥ ७५ ॥

[अष्टाङ्गयजनस्य केषुचित्कालेषु सङ्कोचः]

यत्र द्वादशकालेज्या कर्तव्याभूतिविस्तरात् ।
तत्र प्राभातिकीं कुर्यात्पूजामष्टाङ्गसंयुताम् ॥ ७६ ॥
अङ्गद्वयं तु पाश्चात्यं विना गाथां समाप्य च ।
पितृणां संविभागं च अनुयागं यथोदितम् ॥ ७७ ॥
देशिकस्स्वेच्छया कुर्यान्नित्यं माध्यन्दिनार्चने ।

[त्रिकालार्चने एकस्य अष्टाङ्गत्वम्, इतरयोः षडङ्गत्वं च]

त्रिकालेष्वेकमष्टाङ्गं षडङ्गं चाचरेद्द्वयम् ॥ ७८ ॥

[स्वाध्यायः]

योगार्थिनां च स्वाध्यायं भोगमध्यात्मसंज्ञितम् ।
तत्तत्कालेषु कुर्वीत स्वाध्यायमधुनोच्यते ॥ ७९ ॥
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतो विभोः ।
आगमाध्ययनं कुर्यात्तद्वाक्यार्थविचारणम् ॥ ८० ॥

honey and ghee and worshipped with (the offering of) animal and the fourth is worship with food. O sage! giving away the food that has been offered (to god) according to the procedure stated before, is called Sampradāna and is considered as the fifth part of worship. Pleasing the fire (*homa*) is the sixth and worship of the manes in the seventh, Anuyāga is the eighth and it consists in doing *homa* to please the fire of life. Worship with eight parts shall be done according to the rule.

(Worship with eight parts to be abridged on certain occasions)

76-78a. Where worship is to be done on twelve periods[22] of time (in a day) elaborately with available funds, there worship is to be done with eight parts at dawn. The priest shall always do at his own will, during the midday worship; leaving the last two parts, completing it with the songs of praise, apportioning (*saṃvibhāga*) to the manes and attending to Anuyāga as mentioned (before).

(In the case of worship done on three periods, one (period) shall have eight parts and the other two have six)

78b. In the case of (doing it during) three periods, one shall have eight parts and the (other two have six parts).

(Study of one's own Veda)

79-80. Those who seek to perform *yoga* shall study at those periods, their own Veda which is enjoyable and called Svādhyāya. Svādhyaya is now stated. After bowing with eight limbs the aspirant shall sit in front of the lord, study the Āgama and reflect upon the meaning of the passages there.

22. Worship on twelve periods in a day.
vide: *Pāram. S.* XI.3, 5.
cf. *Pād. S. Caryā.* V. 54b-66.

एवं पितृसंविभागानुयागयोरपि पूजाङ्गत्वे द्वादशकालार्चनादौ प्रत्यर्चनं तयोरप्यनुष्ठानं सम्भवेदित्याशङ्कां परिहरति — **यत्र** इति सार्धद्वाभ्याम् ।

तथैव त्रिकालार्चनेष्वपि प्राभातिकम्, माध्याह्निकं वा एकमेवार्चनमष्टाङ्गमन्यद्द्वयं षडङ्गमेव कार्यमित्याह— **त्रिकालेषु** इति । एकस्मिन् दिने पितृसंविभागस्य सकृदेव कर्तव्यत्वात् । रात्रावनुयागस्य नैय्यत्याभावाच्चात्र षडङ्गमित्युक्तम् । एतेन एकादश्याद्युपवासदिवसेषु दिवापि षडङ्गमेवार्चनमित्युक्तं भवति ।

अथ स्वाध्यायमाह — **योगार्थिनाम्** इति द्वाभ्याम् ।

[सायंसन्ध्यादिनिद्रान्तं कर्तव्यकर्मणां सङ्ग्रहः]

प्राप्तेऽथ सन्ध्यासमये स्नात्वा वा जघनावधि ।
क्षालयित्वा ततः कुर्याद्वाससां परिवर्तनम् ॥ ८१ ॥
सायन्तनार्चनं कुर्यात् षडङ्गं बलिपश्चिमम् ।
तत्तत्कालेषु कुर्वीत यथाशास्त्रोदितेन च ॥ ८२ ॥
जपं कृत्वा यथाशक्ति स्वासाद्य शयनं ततः ।
समाधाय बहिर्देवं निरालम्बपदे स्थितम् ॥ ८३ ॥
अप्रयत्नेन वै तावदनिरुद्धेन चेतसा ।
सह तेनैव वै निद्रा यावदभ्येति साम्प्रतम् ॥ ८४ ॥

[योगाभ्यासपूर्वकृत्यम्]

समुत्थायाऽर्धरात्रेथ जितनिद्रो जितश्रमः ।
कमण्डलुस्थितेनैव समाचम्य तु वारिणा ॥ ८५ ॥
गुरुं देवं नमस्कृत्य उपविश्याजिनासने ।

सायंसन्ध्यादिनिद्रान्तं कर्तव्यकर्माणि सङ्ग्रहेणाह — **प्राप्ते** इति चतुर्भिः । 'समाधाय बहिर्देवम्' इत्यत्र तेन बहिःस्थितेन भगवता सह, निद्रा यावदभ्येति तावदन्तं बहिर्निरालम्बपदे स्थितं देवं समाधाय ध्यात्वेति योजना । पारमेश्वरव्याख्याने — 'अबहिः हृत्कमले' इति व्याख्यातम्, तदुन्मत्तप्रलपितम् । यतः सात्वत-ईश्वर-पारमेश्वरादिषु पञ्चरात्ररक्षादिषु च 'समाधाय बहिर्देवम्' इति एकरूप एव पाठो दृश्यते ।

अथ योगं विधास्यन् तत्पूर्वक्रममाह — **समुत्थाय** इति सार्धेन । इदमित्थं व्याख्यातं पाञ्चरात्ररक्षायाम्— "एतत्संहितानिष्ठानामेष योगकालनियमः । निश्शब्देसर्वसुषुप्तिकाले चैकाग्र्यातिशयसम्भावनया च तद्विधिः । तत्तत्पुरुषशक्त्याद्यनुसाराच्च, तत्तत्कालविधेर्न विरोधः" इत्युक्तम् । अत्र —

"वैष्णवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् । यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले" ॥

इत्यादिभिः मन्वाद्युपदिष्टसोदककमण्डलुधारणादिकं भगवद्योगिनोऽपि विहितमिति ज्ञापनाय कमण्डलुस्थितेनेत्युक्तम् । निद्रान्तनिमित्ततयोत्तर -

(Summary of the acts to be done beginning with evening sandhyā and ending with sleep)

81-84. Taking bath and washing upto the hip (from the feet) at the approach of the time for *sandhyā*, the priest shall change (his) dresses. He shall do the evening worship with six parts afterwards with *bali*. He shall do *japa* at the various periods according to the direction of the *śāstras* and to his capacity. He shall take to bed and contemplate upon god who is external to him and is in the supportless place, with an unchecked mind and without effort and remain with him till he gets sleep.

(Preparation for Yogābhyāsa)

85-86a. Then he shall wake up at midnight overcoming his sleep and tiresomeness and do *ācamana* with the water kept in the water jar. He shall pay obeisance to god, the teacher and sit on a seat made of the hide of the deer.

[योगः]

योगाभ्यासं ततः कुर्याद्यथाविधि मुनीश्वराः ॥ ८६ ॥
समाधायात्मनात्मानमेवं त्यक्त्वा जपक्रियाम् ।
ध्यातृध्येयविभागेन यावत्तन्मयतां व्रजेत् ॥ ८७ ॥
सदा संवेद्यनिर्मुक्ते समाधौ लभते स्थितिम् ।
अभ्यासाद्भगवद्योगी ब्रह्म सम्पद्यते तदा ॥ ८८ ॥

[ब्राह्ममुर्हूतपर्यन्तं विश्रामः]

तत्र श्रमजयं कुर्यात्त्यक्त्वा ध्यानासने क्रमात् ।

[शय्यासनोपचाराः]

शय्यासनं निवेद्याथ मूलमूर्तेरनन्तरम् ॥ ८९ ॥

कर्माङ्गतया चात्र तन्त्रेणाचमनम्। 'तु' शब्देन स्वशास्त्रोक्तविशेषः, तोयालाभदशायां दक्षिणश्रवणस्पर्शश्च व्यज्यते । स्मरन्ति हि —

"सत्यामाचमनाशक्तावलाभे सलिलस्य च । पूर्वोक्तेषु निमित्तेषु दक्षिणं श्रवणं स्पृशेत्" ॥ इति ।

अजिनासनम् इति चेलाजिनकुशोत्तरम् इति गीते प्रधानांशग्रहणमिति ।

अथ योगमाह **योगाभ्यासम्** इति सार्धद्वाभ्याम्। 'यथाविधि' सात्वतोक्तविधिमनतिक्रम्येत्यर्थः। किन्तु तत्र चातुरात्म्याराधन- प्रकरणोक्तत्वाद्योगविधानमपि मन्त्रचतुष्टयघटितमेव दृश्यते । अत्र तु मूलमन्त्रेणैव योगः । अत्र ध्यातृध्येयविभागेन इति वाक्यं निर्विकल्पकसमाध्यवस्थाप्रतिपादकं, 'ब्रह्म सम्पद्यते तदा' इत्यपि परमसाम्यप्रतिपादनपरमिति बोध्यम् । अन्यथा शुद्धाद्वैतप्रसक्तेः ।

ननु इदं वाक्यद्वयमपि सात्वतान्तर्गतमेव । अत्र पूर्वं 'योऽयं सोऽहमनेनैवाप्यद्वैतेन सदैव हि' इत्यादिभिर्वाक्यैरद्वैतमेवोक्तम्; तदनुसारेण इदमपि वाक्यद्वयं व्याख्येयमिति चेत्, सत्यम्; योऽयं सोऽहमित्यादिवाक्यान्यपि शरीरशरीरिणोः, जीवात्मपरमात्मनोः विशिष्टाद्वैतपराणि; न स्वरूपैक्यप्रतिपादकानि। अतो न पूर्वोत्तरासङ्गतिविरोधः ।

एवं योगानुष्ठानानन्तरं पुनर्ब्राह्ममुहूर्तपर्यन्तं विश्राममाह — **तत्र** इत्यर्धेन।

अथार्धरात्रे समर्पणीयान् शय्यासनोपचारानाह- **शय्यासनम्** इति सार्धैश्चतुर्भिः।

लक्ष्म्यादिशक्तियुक्तस्य यागमूर्तिगतस्य च ।
तस्मिन्नारोपयेद्देवं सर्वाङ्गपरिशोभिते ॥ ९० ॥

(Yoga)

86b-88. O lordly sages! then he shall duly practise the *yoga* placing him (Atman) with in his mind. Thus leaving the work of *japa*, he shall become one with him, maintaining the division of the meditator and the object of meditation. He gets stability always in meditation which is free from the object of knowledge.[23] He who has communion with the lord gets (becomes) then through his practise, Brahman.

(Rest till Brāhmamuhūrta)

89a. He shall get over tiresomeness leaving contemplation and seat in due order.

(Services for bed and seat)

89b-93. Offering bed and seat to the Mūlabera who is associated with Lakṣmī and other powers and who is then in the Yāgamūrti (deity for

23. This is the stage of Nirvikalpasamādhi.

अर्घ्यं पाद्यं तथाचामं परिग्रहैसमन्वितम्[१] ।
दत्त्वा समालभेत्पश्चाच्चन्दनाद्यनुलेपनैः ॥ ९१ ॥
सुगन्धपुष्पमाल्यादि दीपधूपे निवेद्य च ।
भक्ष्याण्यपूपपूर्वाणि सक्षीराणि फलानि च ॥ ९२ ॥
तर्पणाम्भश्च ताम्बूलं साङ्गं सद्गन्धभावितम् ।
निवेद्य देवदेवाय विभवानुगुणं ततः ॥ ९३ ॥

[कृतस्य कर्मणो भगवति समर्पणप्रकारः]

सर्वं च विन्यसेत्पश्चात्तस्मिन् कर्मकृतं च यत् ।
तुष्टं गृहीतं तत्पूर्णं भावयेद्दक्षिणं करम् ॥ ९४ ॥
तन्मध्ये निष्कलं मन्त्रं सर्वं यत्किरणाकुलम् ।
योगोत्थां फलसम्पत्तिं लक्ष्मीरूपां विचिन्तयेत् ॥ ९५ ॥
मूलमन्त्रं समुच्चार्य पाणिमध्ये तथा स्मरेत् ।
भूयश्च निष्कलं मन्त्रं तस्मादुपरि भावयेत् ॥ ९६ ॥
सशीर्षे जानुनी भूमौ कृत्वा विष्णोर्निवेदयेत् ।
प्रसादाभिमुखेनाथ तेन तच्चात्मसात्कृतम् ॥ ९७ ॥
भावनीयं द्विजश्रेष्ठाः परितुष्टेन चादरात् ।

[सकामनिष्कामभेदेन समर्पितस्य कर्मणः त्यागसञ्चयप्रकारः]

संन्यासं सञ्चयं वाथ कृत्वा सम्यक्तु तस्य च ॥ ९८ ॥
मन्त्ररूपानुकारिण्या मुद्रणीयं च मुद्रया ।
फलार्थं प्रसवं येन नैति सन्न्यासकारिणाम् ॥ ९९ ॥
फलपर्यवसाने च काममागमचोदितम् ।
भर्तुर्नो युज्यते येन सिद्धाद्यैस्तु फलार्थिनाम् ॥ १०० ॥

कृतस्य कर्मणो भगवति समर्पणप्रकारमाह — **सर्वम्** इत्यारभ्य **परितुष्टेन चादरात्** इत्यन्तैः ।

निष्कामश्चेत् कृतस्यापूर्वस्यापि परित्यागं कुर्यात्, सकामश्चेत् तत्सञ्चयं कुर्यादित्याह —**संन्यासम्** इति सार्धद्वाभ्याम् ।

१. प्रतिग्रह - D, E

worship), the priest shall make the lord occupy it (bed) beautified in every part of it. He, the lord of gods shall be offered *arghya, pādya* and *ācamana* and associated with the vessels (to collect these), smearing him with sandal and other pastes, garlands made of sweet smelling flowers, light and incense, eatables like cake of flour, fruits with milk and water for causing delight, scented Tāmbūla with its ingredients, according to his economic condition.

(Way of surrendering the deeds (what the priest has done) to god)

94-98a. Offering all the work he has done to god, he must consider him to be delighted and his right hand, full with receiving what has been offered. He must think that all the partless mantras filled with rays in the midst (of the idol) and the wealth of fruit arising out of god as present in the form of Lakṣmī. He shall thus think the Mūlamantra uttered by him as present in the middle of his hand and consider again the partless mantra above it. O eminent brahmins! he shall surrender (all this) by touching the ground with his head and knees. He shall treat that has been accepted by him inclined to do favour and much pleased and with care

(Way of surrendering the deeds done into Sakāma and Niṣkāma kinds)

98b-100. Leaving or collecting (the results of the acts), it (deed) shall be properly sealed with the *mudrā* which closely follows (is consistent with) the form of the mantra so that it will not be grow further to frutify for those who surrender it. Desire at the time of (its act) bearing the result which is based on the Āgama, is not proper to be entertained by the agent (of the act) as those who seek the result get it.

[मण्डलकुम्भादिषु भगवदर्चने विसर्जनक्रमः]

नित्यं प्रतिष्ठितं बिम्बं विना स्थलजलादिकान्[1] ।
विसर्जनं ततः कुर्याद्दत्त्वार्घ्यं धूपसंयुतम् ॥ १०१ ॥
भोगस्थानगता मन्त्राः पूजिता ये यथाक्रमम् ।
मुख्यमन्त्रशरीरं तु सम्प्रविष्टांश्च संस्मरेत् ॥ १०२ ॥
ज्वाला ज्वालान्तरे यद्वत्समुद्रस्येव निम्नगाः ।
तन्मन्त्रं विग्रहं स्थूलं सर्वमन्त्रास्पदं द्विजाः ॥ १०३ ॥
प्रविष्टं भावयेत्सूक्ष्मे ह्यध्यक्षे ह्युभयात्मके ।
परे प्रागुक्तरूपे तु तं सूक्ष्ममुभयात्मकम् ॥ १०४ ॥
तस्मात्परं स्फुरद्रूपं निराधारपदाश्रितम् ।
दर्पणं दर्शयित्वा तु निर्मलं तस्य चाग्रतः ॥ १०५ ॥
सन्धिमार्गेण हृत्पद्मं सम्प्रविष्टं तु भावयेत् ।
स्मृत्वा परात्मना तं च स्वसंविद्गगने हृदि ॥ १०६ ॥
विश्रान्तं भावयेद्देवं स्वभावेन समन्वितम् ।

[कर्मार्चादिषु आवाहनविसर्जनक्रमः]

कर्मार्चादिषु बिम्बेषु षट्सु नित्यादिसिद्धये ॥ १०७ ॥
प्रतिष्ठितेषु विधिवन्नित्यं प्रागादिकेऽर्चने ।
तच्छक्त्या योजितां शक्तिं मूलबिम्बाद्यथाविधि ॥ १०८ ॥
समभ्यर्च्यार्घ्यपुष्पाद्यैस्ताम्बूलाद्यैः पुरोदितैः ।
पुनरारोपयेन्मूले तत्र तत्र नियोजिताम् ॥ १०९ ॥

बिम्बं विना मण्डलकुम्भादिषु भगवदर्चने तद्विसर्जनक्रममाह — **नित्यं प्रतिष्ठितं बिम्बम्** इत्यारभ्य **स्वभावेन समन्वितम्** इत्यन्तैः ।

एवं विसर्जनाकरणमपि बिम्बसामान्यविषयम्, कर्मार्चाद्यङ्गबिम्बेषु प्रत्यहमावाहनं विसर्जनञ्च कार्यमिति तत्क्रममाह **कर्मार्चादिषु** इति सार्धद्वाभ्याम् । अत्र 'तच्छक्त्या योजितां शक्तिम्' इत्यनेन पूर्वं प्रतिष्ठाकाले आवाहिता, स्वयंसन्निहिता वा काचिन्मन्त्रशक्तिः कर्मबिम्बेष्वस्त्येव, तथाप्यङ्गाङ्गिभावसिद्ध्यर्थं तत्र मूलादावाहनं कार्यमित्यर्थस्सूच्यते । एवं कर्मबिम्बेष्वावाहनं कालत्रयेऽपि कार्यम् ।

१. जलादिकात् - D

(Method of sending (the deity) away, while doing worship to god in maṇḍala, kumbha etc.)

101-106. Deity installed on the ground (*maṇḍala*) and water (pitcher) shall be sent away by giving *arghya* with incense, except the idol that is installed. The mantras which were in the places of enjoyment and worshipped in due order are (now) to be considered to have entered into god who has the body (made) of important mantras, O brahmin! that mantra is to be thought as entered into a gross body, the abode of all mantras, like the flame into another flame and rivers into the sea; the subtle one having both features (subtle and gross) into the subtle controller having both features, into him whose form was stated before; and has a brilliant transcendental form, resting in a supportless place. He shall think that he had entered into the lotus of the heart through the joints after showing before him the spotless mirror. Thinking that he is the supreme soul, he shall consider him as reposing with his own nature in the space of knowledge in his heart.

(Method of invocation and sending off in Karmārcā etc.)

107-109. The power, which is in the Mūlabera, shall be according to rule, united with the power in the six idols, Karma etc., while the worship in the morning and other periods is always done for its presence for ever. That (power) must again be placed in the Mūlabera after worshipping with *arghya*, flowers, Tāmbūla etc as stated before.

[नैमित्तिकादिकर्मसु तेषामावाहनं विसर्जनञ्च]

पूजार्थं कर्मबिम्बादौ नित्यनैमित्तिकादिषु ।
प्राप्ते तु तत्तत्कर्मादौ मूलादावाह्य मन्त्रवित् ॥ ११० ॥
समाप्य तेषु तत्कर्माण्यारब्धानि यथार्थतः ।
समर्प्य मूलबिम्बे तु तेभ्यस्तत्र विसर्जयेत् ॥ १११ ॥

[अर्घ्यादिपात्रस्थमन्त्रोत्सर्जनम्, विष्वक्सेनार्चनम्, न्यासद्वयोपसंहारः, बिम्बार्चनविनियुक्तानामर्घ्यादीनामुपसंहारपूर्वकं परिस्तरणादीनामम्भसि निक्षेपः]

मन्त्रानर्घ्यादिपात्रस्थान् विसृज्य प्राक्प्रयोगतः ।
शेषमर्घ्यादिकं सर्वं भुक्तपूर्वेण वै सह ॥ ११२ ॥
पाणिना तोयपूतेन विष्वक्सेनाय चार्च्य च ।
न्यासद्वयं च संहृत्य मनसा च स्वविग्रहात् ॥ ११३ ॥
निश्शेषस्योपसंहारं कुर्यादर्घ्यादिकस्य च ।
यागोद्देशात्तथा कुण्डात् स्तराद्यस्याखिलस्य च ॥ ११४ ॥
सहोपलेपनेनैव[1] सर्वमम्भसि निक्षिपेत् ।

"त्रिकालमङ्गबिम्बेषु कर्मार्चादिषु षट्स्वपि ।
आवाह्य पूजयेन्मूलाद्विशेषेष्वपि कार्यतः" ॥ इति वचनात् ।

एवं नैमित्तिकादिष्वपि मूलादावाहनं विसर्जनञ्चाह — **पूजार्थम्** इति द्वाभ्याम् ।

ननु एवं सति श्रीयादवाद्रौ उत्सवबिम्बे आवाहनं कुतो न क्रियत इति चेत्, तस्यैव नारायणहृदयोत्पन्नत्वादिति बोध्यम् । अथ अर्घ्यादिमन्त्रोत्सर्जनमिष्टशिष्टद्रव्यैः विष्वक्सेनार्चनं स्वविग्रहादङ्गन्यासकरन्यासद्वयोपसंहारं बिम्बार्चनविनियुक्तानामर्घ्यादीनामग्न्यर्चनविनियुक्तानां परिस्तरणादीनामुसंहारानाह **मन्त्रान्** इति सार्धैस्त्रिभिः ।

[कवाटबन्धनचक्रविहगेशयोजनाक्रमः]

कवाटबन्धनं कुर्यान्मन्त्रं कवचमुच्चरन् ॥ ११५ ॥
नियोज्य तत्र रक्षार्थं चक्रं च विहगेश्वरम् ।
स्वपेच्छय्यागतो मन्त्री प्रातरुत्थाय पूर्ववत् ॥ ११६ ॥
यथोक्तं सकलं कुर्यात्प्रबोधयजनादिकम् ।

१. सहोपलोप - D, E

(Invocation and send off during acts done on occasions)

110-111. The priest, who knows the mantras shall draw it (power) from the Mūlabera and infuse it into Karmabera etc. for the sake of doing worship at the commencement of the various acts during the obligatory and occasional periods. He shall place it (power) in the Mūlabimba from them after correctly completing all these works.

(Taking off the mantra from the vessels of arghya etc., worship of Viṣvaksena, withdrawing of two nyāsas. Those, who do worship to the idol have to withdraw arghya and others and throw the darbhas placed around the fire into water)

112-114. Leaving the mantras at first which are in the *arghya* and other vessels, he (priest) must worship Viṣvaksena with all the remaining *arghya* etc. which were already offered, using the hand purified with water. He shall collect the two *nyāsas* and withdraw them mentally from his own body leaving nothing to remain together with *arghya* etc. He shall throw into the water all that are strewn in the place of worship and fire-pit together with the besmearings.

(Closing of the doors and appointing the discus and Garuḍa (for security))

115-117a. The doors are to be closed uttering Kavacamantra. Discus and Garuḍa (lord of birds) are to be directed for security. The priest (who knows the mantra) shall sleep in the bed getting up in the early morning as before. He shall do every thing as accordingly enjoined (in the Āgama), like awakening the lord and doing worship etc.

कवाटबन्धनचक्रविहगेशनियोजनादिकमाह — **कवाट** इति द्वाभ्याम् । अत्रेदमनुसन्धेयमभियुक्तवचनम्

"दत्तानुज्ञः परेणापि गमनायात्मनो बहिः । निर्गन्तुकामो निक्षिप्य देवं दौवारिकादिषु ॥ सभयस्सानुतापश्च चण्डादीन् द्वारपालकान् । कुमुदादीन् गणेशांश्च चक्रादीन्यायुधान्यपि ॥ गरुडं च विशेषेण शेषं शेषाशनं तथा । प्रणम्य स्मारयेद्देवं सस्नेहादरसाध्वसम् ॥ निक्षिपन् जीवितमिव न्यस्यन्निव महानिधिम् । निधित्सन्निव-सर्वस्वमर्पयन्निवकल्पकम् ॥ सर्वे भवन्तस्सगणाः सन्नद्धास्सर्वदिक्ष्वपि । सावधानाश्च तिष्ठन्तु निक्षिपामि भवत्स्वहम् ॥ मम नाथं मम गुरुं पितरं मातरञ्च मे । हरिं श्रियं भुवञ्चापि तान् पालयत सर्वतः ॥ यथानिक्षिप्तरूपं मे सन्दर्शयत सर्वदा । भवतश्शरणं गत्वा व्रजामि गतसाध्वसः ॥ इति विज्ञाप्य तान् पश्चात्प्रार्थयेत हरिं गिराम्"। इति ।

[एवम्भूतस्याराधनस्य निरतिशयमाहात्म्यकथनम्]

सकृत् त्र्यहं च सप्ताहं पक्षं मासमथापि वा ॥ ११७ ॥
यो [१]यजेद्विधिनानेन भक्तिश्रद्धासमन्वितः ।
सोऽपि यायात्परं स्थानं किं पुनर्योऽत्र संस्थितः ॥ ११८ ॥
यावज्जीवावधिं कालं बद्धकक्ष्यो महामतिः ॥

एवं भूतस्याराधनस्य निरतिशयमाहात्म्यकथनेनाध्यायं निगमयति — **सकृत्** इति द्वाभ्याम् ॥

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां सात्वतार्थप्रकाशिकाख्यायाम् ईश्वरतन्त्रव्याख्यायाम् षष्ठोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां पितृसंविभागादिशयनोत्सवान्तविधिर्नाम षष्ठोऽध्यायः ॥

१. योजयेत् - E

(Unexcelled greatness of this kind of worship)

117b-118. He, who thus worships once or three days or seven days or a fortnight or a month, with devotion and faith, shall go to the supreme place. What about him who the high minded one remains there does all the time readily till the end of his life?

Thus ends the sixth chapter entitled From the apportioning to the manes upto the end of the celebration sleep (for god) in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra.*

सप्तमोऽध्यायः

लक्ष्मीसुदर्शनार्चनविधिः

[श्रीदेव्यर्चनं प्रति प्रश्नः]

मुनयः—

भगवन् मुनिशार्दूल सर्वशास्त्रविशारद ।
पुरा प्रधानमूर्तेर्वै पूजनात् समनन्तरम् ॥ १ ॥
प्राङ्गणेषु च सर्वेषु प्रासादेष्वाश्रयेषु च ।
प्रतिष्ठितानां बिम्बानां पूजनं समुदीरितम् ॥ २ ॥
तत्र श्रीभ्वादि[१] देवीनां पूजनं तु विशेषतः ।
देवर्षे श्रोतुमिच्छामो विस्तरेण प्रकाशय ॥ ३ ॥

[श्रीदेव्याः स्वरूपमवस्थाभेदमर्चनास्थानम्, तत्फलं च]

नारदः—

शृणुध्वं मुनयः सर्वे श्रीभूदेव्यर्चनं परम् ।
येन विज्ञातमात्रेण वाञ्छितान् लभते नरः ॥ ४ ॥
भोक्तृशक्तिः स्मृता लक्ष्मीः पुष्टिर्वै कर्तृसंज्ञिता ।
भोगार्थमवतीर्णस्य तस्य लोकानुकम्पया ॥ ५ ॥
उदितं सह तेनैव शक्तिद्वितयमव्ययम् ।
नानात्वेन हि वै यस्य परिणामः प्रकाशितः ॥ ६ ॥
तत्र श्रियादिदेवीनां रूपत्रयमुदाहृतम् ।
श्रीवत्सगा योगलक्ष्मीर्भोगलक्ष्मीस्तु पार्श्वगा ॥ ७ ॥
वीरलक्ष्मीः पृथक् स्थाने स्वातन्त्र्येण प्रतिष्ठिता ।
एवमन्यासु देवीषु रूपत्रयमुदाहृतम् ॥ ८ ॥
योगलक्ष्मीर्भोगलक्ष्म्योर्देवेन सह पूजनम् ।
वीरलक्ष्मीं पृथग्गेहे पूजयेत यथाविधि ॥ ९ ॥

१. श्रियादि - B, D, E.

CHAPTER VII

Process of worshipping of Lakṣmī and Sudarśana

(Question regarding the worship of Śrīdevī)

1-3. Sages: O lord, eminent sage! proficient in all *śāstras*! Worship was mentioned previously (described), for the idols installed in the courtyards, all temples (subshrines) and all places after the worship[1] of the principal deity. O lordly sage! we like to hear the worship of Śrī, Bhū and other goddesses in particular. Describe (them) in detail (natural form of Śrīdevī).

(The places of worship according to the stages and their results)

4-10a. Nārada: Listen, all sages! to the great worship of Śrī, Bhū and goddesses, by simply knowing which man gets (his) desires (fulfilled). Lakṣmī is considered as the power of the enjoyer and Puṣṭi is indeed known as doer. The two imperishable powers arose with Him who got down (in this world) for enjoyment, with a view to do favour to the world. His modifications (changes) are illumined (displayed) to be varied. These three forms are declared for Śrī and (other) goddesses. Yogalakṣmī is installed in Śrīvatsa, Bhogalakṣmī on (His) both sides and Vīralakṣmī in a separate place independently. Three forms are, in this way, declared in the case of other goddesses. Yogalakṣmī, who is with Śrīvatsa and Bhogalakṣmī, who is by his side are to be worshipped along with god. Vīralakṣmī shall be worshipped

1. *nīrājana:* this consists in waving lights before the deity at various stages of worship like bath, end of worship and so on.

यत्र सा पूज्यते देवी तत्र श्रीर्निश्चला भवेत् ।

अथ सप्तमोऽध्यायो व्याख्यास्यते ।

मुनयः श्रीदेव्यर्चनं पृच्छन्ति-**भगवन्** इति त्रिभिः ।

एवं पृष्टो नारदः श्रीदेव्याः स्वरूपमवस्थाभेदमर्चनस्थानं तत्फलं चाह-**शृणुध्वम्** इत्यादिभिः ।

[वीरलक्ष्म्यालयकल्पनस्थानम्]

तद्विधानं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥ १० ॥
प्रथमावरणे वाऽपि द्वितीयावरणेऽपि वा ।
तृतीयावरणादौ वा श्रियः स्थानं प्रकल्पयेत् ॥ ११ ॥

[विमानदेवतापरिकल्पनम्]

तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च मुनीश्वराः ।
तद्विमानचतुर्दिक्षु दिङ्मूर्तीः परिकल्पयेत् ॥ १२ ॥
कोणेषु वैनतेयं वा सिंहं वाऽपि यथारुचि ।

duly in a separate house[2] (shrine). Śrī will remain firmly where she is worshipped.

(Site for arranging a temple for Vīralakṣmī)

10b-11. O eminent sages! I shall tell (that) please listen. The place shall be arranged for Śrī in the first or second or third enclosure.

(Arrangement for the deities in the vimāna)

12-13a. Tuṣṭi, Puṣṭi, Sāvitrī and Vāgdevī, O lordly sages! are to be installed in the four directions of that (Śrī's) *vimāna* as the deities for the directions. Either Garuḍa or lion shall be installed in the corners according to one's taste.[3]

2. Three forms of Lakṣmī are mentioned here. Their names are Yogalakṣmī, Bhogalakṣmī and Vīralakṣmī. Among them Vīralakṣmī is said to receive worship independent of Viṣṇu. Perhaps, Vīralakṣmī got her name changed into Varalakṣmī who receives worship except in the Vaiṣṇava community following Śrī Rāmānuja. That she is declared to be independent goddess in the Pāñcarātra Āgama is not to be taken as binding on the Vaiṣṇava community to follow the rules laid down here for her worship. The Vaiṣṇava community does not follow all practices enjoined in the Pāñcarātra Āgama. This is one such practice not adopted by the Vaiṣṇava community. The reasons may suggest this. One is, Lakṣmī is not worshipped quite independent of Viṣṇu. In shrines like those at Tiruchanur near Tirupati, the goddess Padmāvatī has an independent shrine and receives worship. However, there is a small idol placed by her side in the *garbhagṛha*. This idol is that of Śrī Śrīnivāsa who is offered worship at first and then only goddess Padmāvatī is offered worship. The second reason: the practice of worship of Varalakṣmī is marked by much of Tāntrika practices such as Toraṇapūjā, Kumbhapūjā, Aṅgapūjā and others. Some of the Pāñcarātra doctrines are admitted by the Vaiṣṇavas but the Tāntrika practices do not find full favour with them. The word *pṛthaggehe* in *śl.* 9b may suggest that Vīralskṣmī is to be worshipped in a separate shrine.
3. The four corners of the *vimāna* and also the ramparts are to have the figures of Garuḍa or lion. Why should there be this option? In the temples as in Tirumalai and Alwar Tirunagari (in the Tirunaelveli District of Tamilnadu) it is the lion's figure that is found in the places mentioned above and that of Garuḍa in all other temples as a regular feature except for a solitary figure of lion as in Varadarājasvāmi Temple at Kanchi, Devanāthasvāmi Temple at Kanchi, Devanāthasvāmi Temple at Thiruvahindrapuram (South Arcot District, Tamilnadu), Śrīraṅganāthasvāmi Temple at Śrīrangam and others. Garuḍa is the chief among birds, and lion among animals. The figure of the lion must have been considered as befitting to be an emblem in the temple in the earliest of times. The need to replace it as it is a figure for any deity, by Garuḍa should have been entertained in later times when the temple of Viṣṇu had to possess a mark distinctive of the Vaiṣṇava character. Preference to Garuḍa is indicated in the passage; cf.

   गरुडेश्वरेणैव प्रभुत्वेनाधिष्ठित: । *JS.* XII.19a; न्यसेद्द्वारचतुष्काग्रे गरुडं पततां वरम् । *LT.* XXXVIII.40b.

[प्रतिष्ठास्थानम्]

तदन्तर्ब्रह्मभागे तु दिव्ये वा स्थापयेच्छ्रियम् ॥ १३ ॥

[बिम्बलक्षणम्]

चतुर्भुजामुदाराङ्गीं सर्वलक्षणसंयुताम् ।
पद्मासनेनोपविष्टां पद्मपत्रायतेक्षणाम् ॥ १४ ॥
मुख्याभ्यां चैव हस्ताभ्यामभीतिवरदायिनीम् ।
जघन्याभ्यां तु हस्ताभ्यां दिव्यपङ्कजधारिणीम् ॥ १५ ॥
त्रिकालमर्चयेद् देवीं तन्मन्त्रेण द्विजोत्तमाः ।

[श्रीमन्त्रः]

प्रणवं पूर्वमुद्धृत्य श्रीबीजं तदन्तरम् ॥ १६ ॥
श्रियै नमः षडर्णोऽयं मन्त्रः सर्वार्थसिद्धिदः ।
श्रां श्रीं श्रूं श्रैं श्रौं श्र इति योजयेद्धृदयादिभिः ॥ १७ ॥

तत्र वीरलक्ष्म्याराधनं विस्तरेण वदिष्यन् तदालयकल्पनस्थानं विमानदेवतापरिकल्पनं प्रतिष्ठास्थानं तद्बिम्बलक्षणादिकं चाह–**तद्विधानम्** इत्यादिभिः ।

श्रीमन्त्रमाह– **प्रणवम्** इति सार्धेन ।

[स्नानादिक्रियाक्रमः]

मन्त्रेणानेन वै पूर्वं स्नात्वा देशिकसत्तमः ।
प्रक्षाल्य पाणिपादौ च त्वाचम्य च यथाविधि ॥ १८ ॥
प्रासादं सम्प्रविश्याथ कुर्यात् सर्वं यथोचितम् ।
स्वासने सुखमासीनः प्राङ्मुखो वाऽप्युदङ्मुखः ॥ १९ ॥
करशुद्धिं च दिग्बन्धं प्राणायामं समाप्य च ।
धारणाद्वितयेनाऽथ शोधयित्वा निजं वपुः ॥ २० ॥
श्रीमन्त्रं तु ततः साङ्गं हस्ते देहे च विन्यसेत् ।
किरीटं वनमालां च कमलद्वयमेव च ॥ २१ ॥
हस्तादौ पूर्ववन्न्यस्य बध्वा वै पद्ममुद्रिकाम् ।
तादात्म्यमवलम्ब्याथ हृदयाम्भोरुहोदरे ॥ २२ ॥
स्वानन्दधामनिष्ठस्य देवस्य परमात्मनः ।
श्रीवत्सात् तु श्रियं देवीं सर्वलक्षणसंयुताम् ॥ २३ ॥

(Place for installation)

13b. Śrī shall be installed within that in Brahmabhāga or Divyabhāga.[4]

(Marks of the idol)

14-16a. Śrī shall have four arms, graceful limbs, possess all good marks, seated on a (seat of) lotus, possess wide eyes resembling the lotus petals, offering freedom from fear and boons with the prominent frontal two hands and bearing a divine lotus with the two hind hands. O eminent brahmins! the goddess shall be worshipped at three periods[5] with her mantra.

(The mantra of Śrī)[6]

16b-17b. *Praṇava* is to be taken at first, bīja (mantra) of Śrī after that, *śriyai namaḥ*, the mantra is six lettered, offering all the wishes. *Śrāṃ, śrīṃ, śruṃ* and *śraiṃ, śrauṃ* and *śim* are to be joined with the Hṛdaya and others (mantras).

(Method of giving bath etc.)

18-26a. The eminent Ācārya shall take his bath and wash his hands and feet with this mantra and duly do *ācamana*. He shall enter the temple and do everything in a befitting manner. Sitting comfortably in his seat, facing east or north, and do that cleaning of the hands, Digbandha and Prāṇāyāma, clean his body with the two *dhāraṇās*.[7] He shall then place in his hand and body, Śrīmantra with its constitutents, crown, Vanamālā and two lotuses in his two hands as before. He shall then form Padmamudrā.[8] He shall then feel his identity (with the goddess). He shall bring down, Śrīdevī who has all good marks from Śrīvatsa of the supreme lord who rests in the mansion of, his own bliss, to the interior of (his) lotus of heart, and worship (her) as before, with nectar-like enjoyables upto *japa*. Then he shall do external worship to Devī with the group of enjoyables as were stated before. He shall arrange five vessels as before for *arghya* and others. Then he, who knows the mantra, shall worship, as before, placing the mantras on his body. Then he shall do the

4. Brahmabhāga: central portion of the sanctum sanctorum. See. *SKS. Brahma.* VII.120b-125b for more information.
5. *Trikāla*: three periods in a day; *Pād. S. caryā.* V.54-66 mention the number of times for offering worship but the three periods morning, midday and night are held to be the best periods; vide: कालभेदेषु सर्वेषु श्रेष्ठं कालत्रयं विदु: । *ibid*, 66a.
6. Śrīmantra: vide: ओं लां लक्ष्म्यै नम: परमलक्ष्मावस्थितायै लां श्रीं ह्रीं स्वाहा; *JS*. VI.94-97a.
7. Two *dhāraṇās*, note under II.58.
8. Padmamurdrā: see note under V.49.

अवतार्यामृतैर्भोगैर्जपान्तं प्राग्वदर्चयेत् ।
ततो बहिर्यजेद्देवीं प्रागुक्तैर्भोगसञ्चयैः ॥ २४ ॥
तदर्थं कल्पयेत् प्राग्वदर्घ्याद्यं पात्र[2]पञ्चकम् ।
प्राग्वत् स्वदेहविन्यस्तान् मन्त्रानभ्यर्च्य मन्त्रवित् ॥ २५ ॥
अर्घ्याद्यैर्धूपपर्यन्तैर्द्वारयागमथाचरेत् ।

[द्वारविमानदेवतार्चने विशेषः]

वास्त्वीशं क्षेत्रनाथं च द्वारलक्ष्मीं तथैव च ॥ २६ ॥
चण्डीं चैव प्रचण्डीं च गर्भद्वारस्य पार्श्वयोः ।
समभ्यर्च्य विमानस्य पूजनं च समाचरेत् ॥ २७ ॥
लोकाध्वतत्त्वविन्यासं प्राग्वदेव समाचरेत् ।
देवतान्यसने त्वेष विशेषः श्रूयतामिह ॥ २८ ॥

अथ स्नानादिक्रियाक्रममाह-**मन्त्रेण** इत्यादिभिः ।
द्वारविमानार्चने देवताविशेषानाह-**वास्त्वीशम्** इत्यादिभिः ।

यजेन्मसूरकाधारे धर्माद्यं यच्चतुष्चटयम् ।
मूर्तयो वासुदेवाद्याः केशवाद्याश्च मूर्तयः ॥ २९ ॥
पद्मनाभादयश्चापि यत्र पूज्या मुनीश्वराः ।
तत्तच्छक्तीस्तत्र तत्र यजेत् तानेव वा क्रमात् ॥ ३० ॥
यद्वा तच्छक्तिभिः सार्धं पूजयेत् तान् यथाक्रमम् ।
लक्ष्मीः कीर्तिर्जया माया व्यूहशक्तय ईरिताः ॥ ३१ ॥
श्रीश्च वागीश्वरी कान्तिक्रियाशक्तिविभूतयः ।
इच्छा प्रीती रतिश्चैव माया धीर्महिमेति च ॥ ३२ ॥
शक्तयः केशवादीनां क्रमेण परिकीर्तिताः ।
धीस्तारा वारुणी शक्तिः पद्मा विद्या तथैव च ॥ ३३ ॥
साङ्ख्या विश्वा खगा भूर्गौर्लक्ष्मीर्वागीश्वरी तथा ।
अमृता हरिणी छाया नारसिंही तथा सुधा ॥ ३४ ॥

२. पाद्य - B, D, E.

worship at the entrance beginning with *arghya* and ending with the offering of incense.

(Speciality in worshipping the deities in the vimāna at the entrance)

26b-40a. The worship of the *vimāna* is to be done after offering worship to the lord of Vāstu, lord of the spot (*kṣetra*), Dvāralakṣmī,[9] Caṇḍī, Pracaṇḍī[10] on both sides of the entrance to the sanctum sanctorum. *Nyāsa* must be made as before with reference to the world, *adhvan* and *tattva.*[11] This particular feature shall now be listened to regarding *nyāsa* of the deity. O eminent sages! where the forms of Vāsudeva and others, Keśava and others, Padmanābha and others[12] are to be worshipped, their respective powers shall be worshipped or they too in the due order, or they shall be worshipped in due order together with their powers. Lakṣmī, Kīrti, Jayā and Māyā are stated as the powers of the *vyūha* deities. Śrī, Vāgīśvarī and Kānti, Kriyā, Śakti, Vibhūti, Icchā, Prīti, Rati, Māyā, Dhī, Mahimā are said to be the powers of Keśava and others in this order. Dhī, Tārā, Vāruṇī, Padmā, Vidyā, Sāṅkhyā, Viśvā, Khagā, Bhū, Go, Lakṣmī, Vāgīśvarī, Amṛtā, Hariṇī, Chāyā, Nārasiṃhī, Sudhā, Śrī, Kānti, Vīrā, Kāmā, Satyā, Śānti, Saroruhā, Māyā, Padmāsanā, Kharvā, Vikrānti, Narasambhavā, Nārāyaṇī, Haripriti, Gāndhārī, Kāśyapī, Vaidehī, Vedavidyā, Padminī and Nāgaśāyinī are these thirty-eight queens (consorts) or divine powers of Padmanābha and others. Śrī is to be wor-

9. Dvāralakṣmī: a female deity placed at the entrance as a mark of auspiciousness. She is different from Śrī and her other forms.

10. Caṇḍī and Pracaṇḍī are stated here as guarding the entrance. For the figures see D.H. Smith; Vaiṣṇava Iconography, p. 235. Caṇḍī is the wife of Caṇḍa, a gate-keeper. Four pairs of gate-keepers are mentioned: Caṇḍa and Pracaṇḍa; Jayā and Vijayā; Dhātā and Vidhātā and Bhadra and Subhadra; vide: *Bh P.* III 16.2, 36-37; & VIII.21.16.

11. See III.102-118a for details.

12. These are thirty-eight or thirty-nine deities considered as divinity descended; vide: *LT.*11.19-25; *SS.* IX.77-83; *Ahs.* V.54 to 56. The consorts of these are mentioned with the names enumerated here and also in *LT.* XX.45-48.

श्रीकान्तिवीरा: कामा च सत्या शान्ति: सरोरुहा ।
माया पद्मासना खर्वा विक्रान्तिर्नरसम्भवा ॥ ३५ ॥
नारायणी हरिप्रीतिर्गान्धारी काश्यपी तथा ।
वैदेही वेदविद्या च पद्मिनी नागशायिनी ॥ ३६ ॥
त्रिंशच्चाष्टाविमा देव्य: पद्मनाभादिशक्तय: ।
यत्रान्या भगवन्मूर्ति: पुण्या तत्र श्रियं यजेत् ॥ ३७ ॥
अन्यान् विमानदेवांस्तु पूर्वोक्तानेव पूजयेत् ।
विमानस्य चतुर्दिक्षु कल्पितां च विशेषत: ॥ ३८ ॥
तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च समर्चयेत् ।
अथाग्रमण्डपद्वारे दक्षिणे तु बलाकिनी ॥ ३९ ॥
वनमालिन्युदग्भागे पूजनीये क्रमेण तु ।

[योगपीठार्चनम्]

कृत्वैवं द्वारयागं तु कल्पयेदासनं तत: ॥ ४० ॥

पीठार्चनमाह-कृत्वैवमिति सार्धद्वाभ्याम् ।

सर्वाधारमयं देवं पीठस्याध: फणीश्वरम् ।
तत्कोणेषु च धर्मादींस्तदूर्ध्वेऽव्यक्तपङ्कजम् ॥ ४१ ॥
धामत्रयं ततस्तस्मिन् यजेदर्घ्यादिभि: क्रमात् ।
गणनाथादिकांश्चाथ समभ्यर्च्य यथाविधि ॥ ४२ ॥

[आवाहनादिकम्]

तत: श्रियं समावाह्य मन्त्रन्यासादिकं चरेत् ।
सन्निधानादिकं कृत्वा पद्ममुद्रां प्रदर्शयेत् ॥ ४३ ॥
मन्त्रान् विग्रहविन्यस्तान् लयोक्तविधिनाऽर्चयेत् ।

[भोगयागप्रकार:]

भोगयागश्च कर्तव्य: पद्मपीठतलोपरि ॥ ४४ ॥
प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ।
विदिग्दलेषु चैवास्त्रं नेत्रं केसरजालकम् ॥ ४५ ॥

shipped where there is some other auspicious form of god. Worship to be done to other deities in the *vimāna* who were mentioned before. Tuṣṭi, Puṣṭi, Sāvitrī, and Vāgdevī are to be worshipped specifically who are stationed in the four directions in the *vimāna*. Then Balākinī[13] is to be worshipped to the right (north) of the entrance of the front pavilion and Vanamālinī in the north in due order.

(Worship of Yogapīṭha)

40b-42. A seat may be arranged (for Śrī), then after performing this the worship is to be done at the entrance. Then it (worship) shall be done with *arghya* and others in the order of, the Lord of serpents, the support of all, under the pedestal, Dharma and others in the (four) corners and the unblossomed lotus above it and the three lights (luminiaries).[14] After worshipping properly the lords of the groups according to the rules.

(Invocation and others)

43-44a. Śrī is to be invoked and Mantranyāsa and others are to be done to her. Padmamudrā shall be shown after bringing her presence there. The mantras which were placed in (her) body are to be worshipped according to the procedure laid down for Layayāga.[15]

(Method of doing Bhogayāga)[16]

44b-47a. Bhogayāga is to be done on the surface of the pedestal of lotus, *nyāsa* of Hṛdaya and others done as before in the petals of the lotus in the east and other directions that of astramantra in the petals at the intermediate directions and of the Netramantra in the cluster of filaments, that of the crown on the pedestal outside the petals in the south-east corners of

13. Balākinī and Vanamālinī are the doorkeepers, see *LT*. CV. 8.
14. Dhāmatraya: see note under IV.12.
15. Layayāga: see note under IV.34.
16. Bhogayāga: see note under V.35.

पीठोपरि दलाद् बाह्ये त्वाग्नेयेशानकोणयोः ।
किरीटं वनमालां च यातुवायव्यकोणयोः[3] ॥ ४६ ॥
कमलद्वितयं चापि विन्यसेत् तदनन्तरम् ।

[लक्ष्मीध्यानम्]

ततो ध्यानं प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ॥ ४७ ॥
अभ्यन्तरे विमानस्य दिव्ये सरसिजासने ।
पद्मासनेनोपविष्टां फुल्लपद्मोदरप्रभाम् ॥ ४८ ॥
सर्वलक्षणसम्पन्नां सर्वालङ्कारभूषिताम् ।
चलद्द्विरेफपटलसमाक्रान्ताऽलकावलिम् ॥ ४९ ॥
विलसद्रत्नखचितकिरीटपरिशोभिताम् ।
अर्धचन्द्रललाटस्थराजमानललाटिकाम् ॥ ५० ॥

आवाहनादिकमाह- **ततः** इति सार्धेन ।
भोगयागप्रकारमाह- **भोगयागः** इति त्रिभिः ।
लक्ष्मीध्यानमाह- **ततः** इत्यादिभिः ।

प्रबुद्धोत्पलविस्तीर्णलोचनां सुस्मिताननाम्
कटाक्षैः करुणापूर्णैर्जगदाप्यायकारिणीम् ॥ ५१ ॥
दर्पणोदरसङ्काशविलसद्गण्डमण्डलाम् ।
प्रस्फुरन्नासिकावंशमौक्तिकां भ्रूलतोज्ज्वलाम् ॥ ५२ ॥
मुक्ताफलाभरदनां विलसद्विद्रुमाधराम् ।
रत्नताटङ्कविलसत्कर्णद्वयमनोहराम् ॥ ५३ ॥
पूर्णचन्द्रप्रतीकाशवदनां कम्बुकन्धराम् ।
रत्न[4]ग्रैवेयकोपेतां माङ्गल्यमणिभूषिताम् ॥ ५४ ॥
चतुर्भुजां पीवरांसां मुक्ताहारैश्च भूषिताम् ।
सुकर्कशदृढोत्तुङ्गपीनवृत्तघनस्तनीम् ॥ ५५ ॥
विचित्रकञ्चुकेनाढ्यां नानाभूषाविभूषिताम् ।
मुख्यदक्षिणहस्तेन भीतानामभयप्रदाम् ॥ ५६ ॥

३. 'E' कोशे नास्ति
४. रक्त - B, C.

Vanamālā in the north-east corner and afterwards two lotuses are to be placed in the south-west and north-west corners.

(Meditation on Lakṣmī)

47b-61. O good brahmins! then I shall speak (about) meditation. Listen to it. One shall meditate upon this Vīralakṣmī who grants all the desires, who is seated in the Padmāsana posture[17] on a divine lotus seat within the *vimāna*; with a radiance like that of the interior of the blossomed lotus, possessing all (good) marks; adorned with all ornaments, with the forelocks overspread with swarms of moving (restless) bees; splendorous all round with the crown set with bright gems; having an ornament (or ornamental mark) shining in the crescent like forehead; the broad eyes resembling full-blown lotuses, beaming face; providing nourishment to the world with her glances filled with compassion; broad cheeks shining like the interior of a mirror,[18] having a dazzling pearl ornament[19] in her nose (upper nasal bone), refulgent with arched eyebrows; teeth having the complexion of pearls; the lower lip like the shining coral, captivating the mind with the two ears shinning with gemset ear-ornaments; face resembling full-moon; conch-like neck, having a necklace set with gems; bedecked with an auspicious gem (bridal gem);[20] having four arms; plumpy shoulders; decorated with pearl necklaces; having firm, stable in shape, elevated, stout, round and hard breasts; enriched with a varieagated blouse; adorned with varied decorations; granting of security to the fear-struck with the front right hand; granting boons to those who seek shelter under her with the left lotus-like hand; bearing the lotus-bud with the hind right hand, bearing the blossomed lotus with the similar (hind) left hand; decorated with gemset bracelet, armlet and rings set with different gems; wearing a charming dress; adorned with girdles and others; having a

17. Padmāsana: see note under II.86.
18. The mirror is transparent and readily forms within it the clear image of the object placed before it. The cheeks of Lakṣmī are compared to the interior of the mirror since they set the clear images formed there of the things appearing in front of them. cf. Acchodasarovaravarṇana in Bāṇa's *Kādambarī*.
19. Nose-ornament: the practice of wearing this by Hindu women in particular is held by the scholars as of late origin. For a note on this see P.V. Kane: History of Dharmaśāstra, Vol. II, Part II, P. 537.
20. *māṅgalayamaṇi:* this refers to the *maṅgalasūtra* containing an auspicious emblem worn by Hindu women. It is learnt that it has been in practice from about 1000 A.D, vide: P.V. Kane: History of Dharmaśāstra, *ibid*, P. 537.

सव्येन पाणिपद्मेन श्रितानां वरदायिनीम् ।
पश्चाद्दक्षिणहस्तेन पद्मकुड्मलधारिणीम् ॥ ५७ ॥
तथाविधेन वामेन दधानां फुल्लपङ्कजम् ।
मणिकङ्कणकेयूरनानारत्नाङ्गुलीयकैः ॥ ५८ ॥
मण्डितां दिव्यवसनां मेखलाद्यैरलङ्कृताम् ।
गम्भीरनाभिं त्रिवलीविभूषिततनूदराम् ॥ ५९ ॥
विचित्रमणिमञ्जीरविलसत्पादपल्लवाम् ।
दिव्यगन्धानुलिप्ताङ्गीं दिव्यमाल्यविभूषिताम् ॥ ६० ॥
पूर्णेन्द्वयुततुल्याभां सौन्दर्यामृतवारिधिम् ।
वीरलक्ष्मीमिमां ध्यायेत् सर्वाभीष्टप्रदायिनीम् ॥ ६१ ॥

[हृदयाद्यङ्गमन्त्राणां किरीटादिभूषणमन्त्राणां च ध्यानम्]

एवं ध्यात्वा श्रियं देवीं हृदयादींश्च पूर्ववत् ।
किरीटं वनमालां च तथैव कमलद्वयम् ॥ ६२ ॥

हृदयाद्यङ्गमन्त्राणां किरीटादीनां च ध्यानक्रममाह-**एवम्** इति ।

[अर्चनाक्रमः]

ध्यात्वाऽथ पूजनं कुर्यादासनाद्यैर्यथोदितैः ।
चतुःषष्ट्युपचारैर्वा द्वात्रिंशद्भिस्तु वा द्विजाः ॥ ६३ ॥
हविर्निवेदयेद् देव्यै पृथक् देवार्पितं तु वा ।
जपान्तं[५] पूजयेद् देवीं होमान्तं वा यथाविधि ॥ ६४ ॥
पारतन्त्र्याद् बलिं तत्र कदाऽपि न समाचरेत् ।

[तन्त्रेण पवित्रारोपणविधिः]

मूलालयार्चया सार्धं तस्या देशिकसत्तमैः ॥ ६५ ॥
पवित्रारोहणं कार्यमङ्गत्वेनाधिवासितैः ।

[जन्मनक्षत्रकृत्यम्]

तज्जन्मर्क्षादिके कुर्यात् स्नपनं चोत्सवादिकम् ॥ ६६ ॥

५. जपन्तम् - B, C.

deep navel; the thin stomach adorned with three folds (of skin); tender feet shinning with anklets, set with various kinds of gems; her body smeared with sweet smelling sandal (paste); bedecked with graceful garlands; having an appearance (colour) of ten thousand full moons and an ocean of immortal beauty.

(Meditation upon the Hṛdaya and Aṅgamantras and mantras of the crown and other ornaments)

62. After meditating as before upon goddess Śrī and Hṛdaya and other mantras and (meditating in the same way) upon the crown, Vanamālā and the two lotuses...

(Method of worship)

63-65a.... Worship is to be done by (giving) seat etc. as are stated (prescribed) in the texts, O brahmins! with sixty-four services (attendances) or thirty-two.[21] The oblation (food preparation) shall be offered to Goddess or what was separately offered to god, or goddess shall be duly worshipped concluding it with *japa* or *homa*. *Bali* shall never be offered in this case because of her dependence (upon god).

(Method of doing Pavitrāropaṇa according to Tantra)

65b-66a. Pavitrāropaṇa[22] is to be done to her (goddess) through the best priests along with the worship in the main temple with those things (*pavitra*) kept along in *adhivāsa*,[23] as part of it (worship).

(Acts to be done on the day having the constellations of birth of goddess)

66b. That shall be done on the occasions associated with the constellations of birth of goddess and others and both, festival and others are then to be attended.

21. *upacāras:* they are 128; 32 (*ibid.*, 47-57) and 16 (*ibid* 58-62) *Pād. S. caryā* VI. 4. For further details, see the Vaikhānasa texts *K.A.* X; *V.K.* P. 290-1.

22. Pavitrāropaṇa same as Pavitrārohaṇa, see note under VI.11.

23. *Adhivāsa:* see note under VI.13.

[नवरात्र्युत्सवक्रमः]

पारतन्त्र्येऽपि वै लक्ष्म्या नवरात्रिषु चोत्सवम् ।
अङ्कुरार्पणपूर्वं तु रक्षाबन्धपुरःसरम् ॥ ६७ ॥
चतुःस्थानार्चनयुतं कुर्याद् राष्ट्राभिवृद्धये ।
बलिदानं ध्वजारोहं तीर्थं तत्र विवर्जयेत् ॥ ६८ ॥

[स्वतन्त्रवीरलक्ष्म्याराधनक्रमः]

पारतन्त्र्ये विधिरयं स्वातन्त्र्ये तूच्यतेऽधुना ।
ग्रामे वा नगरे वाऽपि पर्वते वा नदीतटे ॥ ६९ ॥

अत्रैवं हृन्मन्त्रादींश्च ध्यात्वेत्यनेन तेषामपि लक्ष्मीसमानाकारध्यानमुच्यते । तद्व्यक्तमुक्तं लक्ष्मीतन्त्रे —

"नारीर्वा संस्मरेदेतान् हृदादीन् साधकोत्तमः ।
उक्तभूषणवेषाढ्याः स्वानुरूपानुलेपनाः ॥" इति ।

किरीटादिध्यानं तु पूर्ववच्चतुर्थाध्यायोक्तरीत्यैव कार्यम् ।
अथार्चनक्रममाह-**ध्यात्वा** इति सार्धद्वाभ्याम् ।
पारतन्त्र्यात्तन्त्रेण पवित्रारोपणमाह-**मूला** इति ।
जन्मनक्षत्रकृत्यमाह-**तत्** इत्यर्धेन ।
नवरात्र्युत्सवक्रममाह-**पारतन्त्र्येऽपि** इति द्वाभ्याम् ।
स्वतन्त्रवीरलक्ष्म्याराधनक्रममाह-**पारतन्त्र्ये** इत्यादिभिः ।

सप्राकारं श्रियः स्थानं सविमानं प्रकल्पयेत् ।
तत्र श्रियं प्रतिष्ठाप्य तन्मन्त्रेण यथाविधि ॥ ७० ॥
श्रीवत्साद्देवदेवस्य श्रियं बिम्बहृदम्बुजे ।
समावाह्य तु मन्त्रेण साङ्गेन सकलीक्रियाम् ॥ ७१ ॥
कृत्वा सम्पूजयेद् देवीं भोगैस्तु हविरन्तिमैः ।
अथ श्रियं त्वग्निमध्ये प्रीणयेत् समिदादिभिः ॥ ७२ ॥
संस्कृत्य विधिवत् कुण्डं वह्निमुत्पादितं तथा ।
संस्कृताज्यस्य विप्लुड्भिः[६] संस्पृशेदिन्धनादिकम् ॥ ७३ ॥
सन्तर्पणं तथाग्नेश्च तस्मिन् मन्त्रासनादिकम् ।
तन्मध्ये हृदयाद्देवीं समावाह्य यथाविधि ॥ ७४ ॥

६. विप्रुड्भिः - A

(Order in performing Navarātri festival)

67-68. Lakṣmī is dependant (upon God). Yet, the festival shall be done (to Her) in Navarātri[24] starting with Aṅkurārpaṇa[25] followed by Rakṣābandha[26] along with worship in the four places[27] for the prosperity of the kingdom (country). Offering of *bali*, flag-hoisting and ablution on the concluding day are to be avoided.

(Way of worshipping independent Vīralakṣmī)

69-79. This is the process (just stated above) in regard to (the worship of) dependent goddess. Now is stated the procedure for independent goddess. A place must be arranged for Śrī with (provision for) enclosures and *vimāna* in villages or town or hill or bank of a river. Śrī shall be installed there duly with her mantra bringing her into the lotus-heart of the idol from the Śrīvatsa of the god of gods. The mantra with its parts is to be classified. Goddess is to be worshipped (using it) with enjoyables (services) culminating in the offering of oblations. Then Śrī must be gratified in the midst of fire with the holy faggots (*samits*) and others. The fire-pit is to be got ready according to prescriptions. The fire, which is thus produced (kindled), shall be made to get into contact with fuel and others through the drops of consecrated ghee. Goddess is to brought, according to the rules, from the heart (of the idol) to the midst of Mantrāsana and others in the fire that has been pleased. *Homa* is to be performed (there) with the faggots (*samit*) usually in use and optional in acts done to get set purposes. Sviṣṭakṛt[28] homa and expiatory offerings are then to be carried out. Lakṣmī should be let off in (her) lotus-heart after doing Pūṛnāhuti. The secondary deities (of Śrī) are

24. Navarātri: a festival done in the Āśvayuja month commencing from Śuklapakṣaprathamā and ending with Mahānavamī.
25. Aṅkurārpaṇa: a ritual which involves the germination of grains. For details refer to *ĪS.* X; *Pād. S. kriyā* XXIV.25b-99; *caryā.* XIX.52-54; *Pāram. S.* XVI.55-203; *SKS. Śiva.* 1-19a.
26. Rakṣābandha: thread smeared with turmeric powder is tied around the wrist of the priest who conducts the ritual; *J.S.* XX.168b-170a; *Pād. S. kriyā* XVII. 30.63; *SKS. Śiva.* IX.43-66a.
27. *Catussthānārcana:* the four places are *maṇḍala, sthaṇḍila,* idol and heart. *VS.* VI.40b-60; Eight places are mentioned in *Pāram S.* IV. 27;

    vide: मूर्ध्नि वक्त्रेऽ सयुग्मे च क्रमात् सव्येतरे हृदि पृष्ठे नाभौ तथा कट्यां जानुनोरथ पादयोः ।
28. Sviṣṭakṛt is the name of an offering made in honour of Agni for having had the *homa* done well.

समिद्भिश्चापि नित्याभिः काम्यैश्च जुहुयात् तथा ।
स्विष्टकृद्धवनं चाथ प्रायश्चित्ताहुतिं त्वपि ॥ ७५ ॥
पूर्णाहुत्यादिकं कृत्वा ततो लक्ष्मीं हृदम्बुजे ।
विसृज्य परिवाराणां होमं कृत्वा यथाविधि ॥ ७६ ॥
प्रविश्य तु ततो देव्या मन्दिरं यजनास्पदम् ।
समर्पणं च होमस्य पितॄणां तर्पणं त्वपि ॥ ७७ ॥
बलिदानं च भूतानामिष्टशिष्टजनस्य च ।
प्रदानं यज्ञशीलानां कारिणां भावितात्मनाम् ॥ ७८ ॥
अनुयागं च विधिवन्नैवेद्यप्राशनादिकम् ।
पूर्ववत् सकलं कुर्याद्भोगमोक्षप्रसिद्धये ॥ ७९ ॥

[द्वारावरणदेवतार्चनविधिः]

अत्रैव बलिदानादौ परिवारार्चनक्रमः ।
प्रथमावरणे पूज्याः प्रगादौ कुमुदादिकाः ॥ ८० ॥
विभीषिकां शाङ्करीं च यजेत् तद्वारपार्श्वयोः ।
द्वितीयावरणे पश्चादुपेन्द्रादीन् प्रपूजयेत् ॥ ८१ ॥

तत्र द्वारावरणदेवताक्रममाह–**अत्रैव** इत्यादिभिः ।

तद्द्वारपार्श्वयोश्चैव शङ्खपद्मनिधी यजेत् ।
तृतीयावरणे पश्चादिन्द्रादीन् परिपूजयेत् ॥ ८२ ॥
तद्द्वारपार्श्वयोः पूज्यौ नलकूबरजृम्भलौ ।
चतुर्थावरणे चैव वज्रादीन् परिपूजयेत् ॥ ८३ ॥
तद्द्वारदक्षिणे पार्श्वे शिबिकुण्डलमर्चयेत् ।
उत्तरे मणिभद्रं च पञ्चमावरणे ततः ॥ ८४ ॥
लोहिताक्षादिकानिष्ट्वा ततस्तद्द्वारपार्श्वयोः ।
जयां च विजयां चैव पूजयेत् तु यथाक्रमम् ॥ ८५ ॥
महापीठे तु विधिवत् कुमुदादीन् समर्चयेत् ।
सुमुखीं पूजयेद्विष्वक्सेनस्थाने चतुर्भुजाम् ॥ ८६ ॥

to be pleased with *homa* according to rules. He (priest) shall enter the shrine of Devī, the place for sacrifice (worship) and offer (surrender) the (result) of *homa* and the oblations also offered to the manes. He shall then do all that as before for the full accomplishment of prosperity and finally release the offering of *bali* to the living beings (spirits) and giving of the eatables offered to God to the dear and disciplined people to those who are used to perform rituals (worship). *Kāris*[29] and persons with well-trained nature and Anuyāga[30] according to rules.

(Rules for worshipping the deities stationed in the enclosure at the gate)

80-88a. There is the procedure here for worshipping the secondary deities while offering *bali*. Kumuda and others are to be worshipped at first in the first enclosure. Vibhīṣikā[31] and Śāṅkarī[32] are to be worshipped at the sides of entrance; Upendra[33] and others in the second enclosure; Śaṅkha[34] and Padma, the deities (in charge) of treasures at the sides of that entrance, Indra and others in the third enclosure. Nalakūbara[35] and Jṛmbhala[36] at the sides of that entrance, Vajra[37] and others in the fourth enclosure, Śibikuṇḍala[38] on the right and Maṇibhadra[39] on the left sides of that entrance; Lohitākṣa[40] and others in the fifth enclosure and Jayā[41] and Vijayā on the sides of that entrace. Kumuda[42] and others are to be revered in the huge pedestal. In the place of Viṣvaksena is to be worshipped Sumukhī[43] having four arms, cane

29. *Kāri*: see note under V.30.
30. Anūyāga see *JS.* XXII.75-80; *LT.* com. P. 160.
31. Vibhīṣikā see *LT.* LV.9.
32. Śāṃkarī, *ibid.*
33. Upendra: an attendant of Viṣṇu; *SKS. Śiva.* IV.3.
34. Śaṃkha and Padma: see note under III.70.
35. Nalakūbara: son of Kubera.
36. Jṛmbhala: *Pād. S. caryā* XXII.30a; xxx.170a.
37. Vajra: thunderbolt, the weapon of Indra, personified as a living being guarding the gate.
38. Śibikuṇḍala: a brother of Kubera; vide: *Pād. S. kriyā.* XXX.170 as the names of deities.
39. Maṇibhadra: a brother of Kubera; vide: *Pād. S. kriyā.* XXX.170a.
40. Lohitākṣa: an attendant; vide: *SKS. Śiva* IV.14a.
41. Jayā and Vijayā are well known attendants.
42. Kumuda: attendant on Viṣṇu.
43. Sumukhī: vide: *Pād. S. kriyā* XXX.66b.

वेत्रहस्तां दक्षिणेन तर्जनीं चापि बिभ्रतीम् ।
पश्चाद्दक्षिणहस्ताभ्यां दधानां पङ्कजद्वयम् ॥ ८७ ॥
एवं सर्वपरीवारान् बलिदानादिभिर्यजेत् ।

[पवित्रोत्सवाद्युत्सवादीनां पृथगेवानुष्ठानम्]

पवित्रारोपणादीनि पृथक् कुर्याद्यथाविधि ॥ ८८ ॥
गरुडध्वजमारोप्य कुर्याच्चैव महोत्सवम् ।
चतुःस्थानार्चनादीनि श्रीमन्त्रेण समाचरेत् ॥ ८९ ॥

[निगमनम्]

एवमुक्तो मुनिश्रेष्ठाः श्र्यादिदेव्यर्चनक्रमः[७] ।

[पुष्ट्यादिदेवीनामपि स्वातन्त्र्यपारतन्त्र्यभेदेनार्चनम्]

एवं पुष्ट्यादिदेवीश्च पूजयेत् स्वस्वमन्त्रतः ॥ ९० ॥

स्वातन्त्र्यात् पवित्रारोपणादीनां पृथगेवानुष्ठानम्, ध्वजारोहणपूर्वकमुत्सवं चाह-**पवित्रारोपणादीनि** इति सार्धेन । उक्तमर्थं निगमयति एवमिति ।

पुष्ट्यादिदेवीनामप्येवं स्वातन्त्र्यपारतन्त्र्यभेदेनार्चनं ज्ञेयमित्याह-**एवम्** इति ।

[सुदर्शनाराधनप्रश्नः]

मुनयः -
भगवन् सर्वशास्त्रज्ञ शरणागतवत्सल ।
श्रुतं श्रियाद्यर्चनं तु त्वत्तोऽस्माभिर्मुनीश्वर ॥ ९१ ॥
सुदर्शनार्चनं त्वद्य वक्तुमर्हसि नः प्रभो ।

[सुदर्शनार्चनस्थानम्, तत्फलविशेषादिकम्]

नारदः -
शृणुध्वं मुनयः सर्वे सावधानेन चेतसा ॥ ९२ ॥
सौदर्शनार्चनविधिमैहिकामुष्मिकप्रदम् ।
सौदर्शनीया मन्त्राश्च मूर्तयश्चाप्यनेकधा ॥ ९३ ॥

७. श्रीदेव्यभ्य - D, E.

in the hand, with the threatening fore-finger of the right hand and two lotuses in the two hind hands. Thus all the secondary deities are to be adored by the offering of *bali* and others.

(Pavitrotsava and other festivals are to be celebrated separately)

88b-89. Pavitrārohaṇa and others are to be celebrated separately according to rules. The great festival is to be conducted after hoisting the flag with Garuḍa's figure theme. Worship in the four places and others is to be done with the mantra of Śrī.[44]

(Conclusion)

90a. O eminent sages! the method of adoring Śrī and other goddesses is thus stated.

(Puṣṭi and other goddesses are also to be adored under their independent and dependent kinds (positions)).[45]

90b. Thus Puṣṭi and other deities shall be worshipped with the respective mantras.[46]

(Question on the worship of Sudarśana)

91-92a. Sages: Pious one! Knowing all the *śāstras*! Fond of those who seek you! O eminent sage! we have heard from you the adoration of Śrī and others, O lord! be pleased to tell us the (method of) worship of Sudarśana.

(Place for the worship of Sudarśana and the specific results of it)

92b-93. Nārada: O sages! listen all this with your attentive mind—method of venerating Sudarśana, which grants the results (desired) in this world and in the other, the mantras of Sudarśana and many forms (of him).

44. Śrīmantra: see note under 6.

45. Puṣṭi can be considered to receive independent worship like Lakṣmī and dependent worship as a deity occupying the *vimāna*.

46. See *Pād. S. caryā*. XXXIX.

[वर्णचक्ररचना तथा तदर्चनप्रकारः]

तत्राभिमतमन्त्रेण मूर्तिं चाभिमतां यजेत् ।
दिव्याद्यायतने चित्रे प्राङ्गणादौ तु कुत्रचित् ॥ ९४ ॥
ग्रामादौ तु नदीतीरे विपिने पर्वतेऽपि वा ।
प्रासादं मण्डपं वाऽथ सचित्रं सर्वतोमुखम् ॥ ९५ ॥
प्राङ्मुखं वाऽपि कुर्वीत सगवाक्षकवाटकम् ।
एकादितलसंयुक्तं चक्रलाञ्छनलाञ्छितम् ॥ ९६ ॥
मुखभद्रसमोपेतमारोहणसमन्वितम् ।
सप्राकारं समासाद्य[८] प्रासादाभ्यन्तरे तथा ॥ ९७ ॥
बिम्बं सौदर्शनं तत्र प्रतिष्ठाप्य यथाविधि ।
यजेत् त्रिकालं प्रयतो देशिकस्तस्य मन्त्रतः ॥ ९८ ॥
तत्राधिव्याधिदुर्भिक्ष भूतवेतालदुर्ग्रहाः ।
न बाधन्ते जनान् सर्वान् शुभं भवति नित्यशः ॥ ९९ ॥
तत्रार्चनविधानं तु शृणुध्वं मन्त्रपूर्वकम् ।
सुगुप्ते भूतले शुद्धे वर्णचक्रं परिस्तरेत् ॥ १०० ॥

मुनयः सुदर्शनार्चनं पृच्छन्ति-**भगवन्** इति सार्धेन ।
एवं पृष्टो नारदस्तदर्चनस्थानं तत्फलविशेषादिकं चाह-**शृणुध्वम्** इत्यादिभिः ।
सुदर्शनार्चोपयुक्तमन्त्रोद्धारार्थं वर्णचक्ररचनां तदर्चनप्रकारं चाह-**तत्र** इत्यादिभिः ।

अकारादिक्षकारान्तं सर्वार्णमयरूपिणम् ।
स्वक्षनाभ्यरनेमीभिः प्रधीभिश्चाप्यलङ्कृतम् ॥ १०१ ॥
कारणं सर्वमन्त्राणां क्षेत्रे प्रणवमालिखेत् ।
अकाराद्या विसर्गान्ताः स्वरा नाभ्यङ्गमाश्रिताः ॥ १०२ ॥
ककारादीनि भान्तानि तदराणां त्रिरष्टके ।
मादिहान्तानि नेमौ तु क्षार्णं प्रधिगणे स्थितम् ॥ १०३ ॥
शब्दब्रह्ममयं चक्रं पुरा वर्णगतं ततः ।
प्रणवाद्यैर्नमोन्तैश्च संज्ञाभिः क्रमशस्ततः ॥ १०४ ॥

८. समापाद्य - B, D, E.

(Composing of the circle-of letters and the method of adoring it)[47]

94a-106a. The form that is desired shall be adored with the desired mantra. A temple (shrine) or pavilion shall be raised in village (and others) or bank of a river, forest or mountain, in a temple of the Divya kind (charming), excellent courtyard there, pavilion with painted figures facing all directions or east, with windows and doors, having one floor (or more) marked by the symbols of discus and others and flight of steps with auspicious facade and having enclosures. The idol of Sudarśana shall be installed there inside the temple according to the prescribed rules. The priest shall adore (the idel) three times (a day) remaining pure and using his (Sudarśana's) mantras. Mental and physical ailments, famine, evil spirits, vampires (goblins) and evil planets do not afflict all people there. Happiness (welfare) will always prevail. Listen to the process of worship there (Sudarśana) using mantras. Draw a circle of letters on a pure ground, well secured (free from dangers) which shall have the letters *a* to *kṣa*; have a form (made up) of all letters, ornamented with a good axle, nave, spokes, rim and fellies. *Praṇava*, which is the origin (*kāraṇa*) of all mantras is to be written on the ground. The sonants (vowels) beginning with *a* and ending with the *visarga* are to be written (based on) in the part nave, letters from *ka* to *bha* in the twenty-four spokes, from *ma* to *ha* in the rim, and letter *kṣa* in the group of fellies. The wheel, which was formerly Śabdabrahman has become the letters. The preceptor who is the priest shall worship his (Sudarśana's) *yantra* with the source (of letters) placed with the names and mantras beginning

47. cf: *JS.* VI.5-69; *LT.* XXIII.12-15; *Ahs.* XVII. 38-42a; *Pād. S. caryā.* XXIII.2-7.

विन्यस्तमातृयन्त्रं स्वं देशिको विधिवद् गुरुः ।
समभ्यर्च्यार्घ्यपुष्पाद्यैर्मातृकामन्त्रविग्रहम् ॥ १०५ ॥
ततः समुद्धरेन्मन्त्रान् सर्वाभिमतसिद्धिदान् ।

[सुदर्शनस्वरूपम्]

जेतुं शक्त्यात्मना या तु सृष्टिस्थितिलयोन्मुखी ॥ १०६ ॥
क्रियाशक्तिः समुद्दिष्टा सुकल्पजननी पुरा ।
कालरूपमधिष्ठाय तयैतद्बृंहितं जगत् ॥ १०७ ॥
कालचक्रं जगच्चक्रं तस्मात् सौदर्शनं वपुः ।
तदधिष्ठाय सा शक्तिर्जीवभूता व्यवस्थिता ॥ १०८ ॥
विना कृतं तया सर्वमसत्कल्पमिदं भवेत् ।

[पिण्डमन्त्रोद्धारः]

तस्मात् समुद्धरेच्छक्तिमग्निष्टोमसमप्रभाम् ॥ १०९ ॥
अक्षाधारां तु वै नित्यामनाद्यन्तां च वैष्णवीम् ।
पूर्वं नेम्यन्तिमद्वन्द्वं तदाद्यं सानलद्वयम् ॥ ११० ॥

सुदर्शनस्वरूपमाह-**जेतुम्** इति त्रिभिः ।

तत्पिण्डमन्त्रोद्धारमाह-**तस्मात्** इति द्वाभ्याम् । नेम्यन्तिमद्वन्द्वं नेम्यन्तिमयोः सकारहकारयोर्द्वन्द्वम् । तदाद्यं तयोराद्यं सकारम् । सानलद्वयं रेफद्वयसहितम् ।

नाभितुर्यान्तिमद्वाभ्यां पिण्डमेतदलङ्कृतम् ।

with *Praṇava* and ending with *namaḥ* in due order, the *yantra*[48] which is the body for the mantras forming the sources and then take up the mantras which award the fruits of all deities.

(Form of Sudarśana)

106b-109a. This world has grown with the Kriyāśakti, governing the form of time and the powers, which is inclined to create, maintain and dissolve (the universe) and which conquers (brings the world under its control) through its powers and is noted as the producer of good *kalpas* long ago. Therefore the body of Sudarśana is in the form of the wheel of *kāla* and that of the world. The power presiding over it (body of Sudarśana) remains as life. All this would almost be non-existent without it.

(Formation of Piṇḍamantra)[49]

109b-111a. Power (*śakti*) is to be formed from this. Its brillance is similar to that of fire and moon, resting on the axle, belonging to Viṣṇu and ever present without beginning and end. Two letters *sa* and *ha*, that are at the extremity of the rim (of the wheel), are to be taken together at first. The first, among them, that is *sa* should get joined with two *r* letters. This must be taken with the letter *i* and *anusvāra.*[49b] This (*sahasrāra*) is the Piṇḍa (mantra) perfected.

48. *yantra*: mystical diagram drawn on paper or metallic plate with the syllables of the mantras concerned are written or engraved according to the rules prescribed in occult sciences.

   mātṛ: mother, source

   mātṛyantra: yantra which is the source of syllables.

49. A mantra has four parts, viz., *bīja, piṇḍa, sāṃjñā* and *pada. Bīja* may consist of either one or two vowels together with a consonant. This constitutes the essential part of the mantra. *Praṇava, hrīṃ, śrīṃ, aiṃ* and others are Bījamantras. Consonants which are inserted between the *bīja* and the remaining parts of the mantra are the *piṇḍa* part. Vowels are also conjoined with them; *īm* represents this. *Saṃjñā* is the name of the deity included in the particular mantra with words like Viṣṇave. A combination of verbal utterances with nominal concepts of a laudatory nature yields the *pada*, e.g. *sahasrajvālāya*;

   vide: अशेषभुवनाधारो सोऽनलः कालपावकः ।

   Ahs. XVII.25a; *LT.* XXV.24a; *JS* XV.53b.

49b. *nābhi:* axle; *turya: ī; antima: anusvāra.*

[सौदर्शनबीजमाहात्म्यम्]

सौदर्शनमहाशक्तिः सर्वसिद्धिप्रदायिनी ॥ १११ ॥
जीवभूता षडर्णस्य प्रकाशानन्दरूपिणी ।

[सौदर्शनबीजस्य हृदयाद्यङ्गमन्त्रेषु योजनाप्रकारः]

हृदयाद्यङ्गसिद्ध्यर्थं पिण्डमेतत्स्वरोज्झितैः ॥ ११२ ॥
दीर्घैराद्यैस्त्रिभिश्चान्त्यैर्भेदयेन्नेत्रपश्चिमम् ।
प्रणवादीनि चैतानि तुर्यान्तैर्हृदयादिभिः ॥ ११३ ॥
नमः स्वाहावषट्ढुंफड्वौषड्भिर्जातिभिः सह ।
क्रमान्नियोजनीयानि विज्ञानादिगुणैः सह ॥ ११४ ॥

(Greatness of Sudarśanā Bījamantra)

111b-112a. The great power of Sudarśana awards all the results, it is of a form of illumination and bliss and is the life the six-lettered mantra.[50]

(Method of joining the Bījamantra of Sudarśana in (with) the Hṛdaya and other Aṅgamantras)

112b-114. This Piṇḍamantra is to be used for forming the Hṛdaya and other limbs. With the first three long letters[51] and the last three long letters[52] leaving the vowel parts, the limbs upto the Netramantra should be separated. *Praṇava* must be at the beginning and Hṛdaya and others must end in the dative case (*caturthī*) and *namaḥ, svāhā, vaṣaṭ, huṃ, phaṭ, vauṣaṭ* — the

50. नाभितुर्यान्तिमद्वाभ्यां and *anusvāra* are meant here. These are in the nave and penultimate in the Varṇamātṛikā cakra,

vide: सोमं प्रथममादाय प्राणमब्जे नियोजयेत् ।
ततोऽमृतमुपादाय योजयेत् कालपावकम् ॥
तत्स्थमनलं कुर्यान्मायां व्यापिनमब्जतः ।
एतत्सौदर्शनं बीजं मत्क्रियाशक्तिजृम्भितम् ॥
सप्तवर्णात्मकं दिव्यमिदं बीजं महर्द्धिम् ॥ *LT.* XXIX.56, 58a.

According to this, *soma: sa; prāṇa: ha; amṛta: sa; kālapāvaka: ra; anala: ra; māyāvyāpi: īm.* The *mantra* formed thus is *sahasrāra, īm.*

51. *ā, ī* and *ū* are the first three long vowels.

52. *ai, au, aḥ* are the last three long vowels.

[सुदर्शनषडक्षरमन्त्रः]

शक्तेः प्रकृतिरूपस्य षडर्णस्योद्धृतिस्त्वथ ।
पूर्ववत् समुपाहृत्य चान्तिमद्वयमन्तिमम् ॥ ११५ ॥

नाभितुर्यान्तिमद्वाभ्यामीकारानुस्वाराभ्याम् । अत्रत्यान्तिमशब्दस्योपान्तिमत्वमर्थः । तथा चैवं भवति **स्ह्स्त्रीम्** इति । एवमेवोक्तं लक्ष्मीतन्त्रेऽपि -

"सोमं प्रथममादाय प्राणमन्ते नियोजयेत् ।
ततोऽमृतमुपादाय योजयेत् कालपावकम् ॥
तत्संस्थमनलङ्कुर्यात् मायाव्यापिनमन्ततः ।
एतत्सौदर्शनं बीजं मत्क्रियाशक्तिजृम्भितम् ॥
सप्तवर्णात्मकं दिव्यमिदं बीजमहर्द्धिदम् ॥" इति ।

एतद्बीजमाहात्म्यमाह — **सौदर्शनमहाशक्तिः** इति ।

एतद्बीजस्य हृदयाद्यङ्गमन्त्रैः योजनाप्रकारमाह—**'हृदयाद्यङ्गसिद्ध्यर्थम्'** इति सार्धद्वाभ्याम् । आद्यैस्त्रिभिर्दीर्घैराकार-ईकार-ऊकारैः । अन्त्यैस्त्रिभिः ऐकार-औकर-अःकारैः ।

अथ सुदर्शनषडक्षरमन्त्रमाह — **शक्तेः** इति सार्द्धैः षड्भिः । अन्तिममन्तिमद्वयं सकारहकारद्वयम् ।

तत्राष्टं सतृतीयं स्यात् सार्णं[1] यान्त्यं ततोऽन्तिमम् ।
स पञ्चमस्वरान्तं च कुर्यान्नेम्याद्यभूषितम् ॥ ११६ ॥
पश्चादेकादशारार्णयुक्तं तद्द्विगुणारगम् ।
अन्यार्णमविमुक्तं तु कुर्यात् तत्पञ्चषष्ठयोः ॥ ११७ ॥
अयं सौदर्शनो मन्त्रः षडर्णः समुदीरितः ।
तृतीयः पञ्चमः षष्ठः प्रत्येकं त्र्यक्षरः स्मृतः ॥ ११८ ॥
अन्ये वर्णसमोपेता वर्णाः स्युर्द्व्यक्षरास्त्रयः ।
एष कालात्मनो विष्णोर्विश्वरूपस्य वाचकः ॥ ११९ ॥
सतारया च शक्त्या च ह्यष्टार्णः परिकीर्तितः ।
क्षेत्रक्षेत्रज्ञयुक्त्या तु यथा प्रकृतिगः पुमान् ॥ १२० ॥
स्थूलसूक्ष्मात्मको ध्येयस्तथा सौदर्शनो हरिः ।

१. तत्राष्टमं सतृतीयम् अस्याम् - A

jātis.[53] These should be brought together in sequential order along with the qualities *vijñāna* and others.

(The six lettered mantra of Sudarśana)

115-121a. Forming (picking out) the six-lettered the natural forming power, the last two letters and the last must be brought together as before.[54] The eighth (*sa*) letter is to be taken with the third (*r*), then *ā* and the last letter *ha* upto the fifth vowel (*u*), all grouped together with *nemyanta* (*ma*), then that which has the eleventh letter (spoke) *ṭa* must be doubled (22) in number to become *ph*. It shall be made inseparable from the other letter (*ha*) in the 5th and 6th *(ṭ)* (*ph*).[55] This is the sixth-lettered mantra of Sudarśana,[56] the third, fifth and sixth letters are each called three letters (*srā*,

53. vide: नम: स्वाहा ततो वौषट् (वषट्)
हं वौषट् फट् समन्विता: ।
जातय: षट् समाख्याता
हृदयादीनां क्रमेण तु ॥ *JS*. VII.43.

The purposes served by these are mentioned thus:
कर्मानुरूपमन्ते नमस्कारादिकं न्यसेत् ।
तथा फलाभिसन्धाने नमस्कार: प्रकीर्तित: ॥
संप्राप्तौ त्वणिमादीनां स्वाहाकारमुदीरयेत् ।
आप्यायनेतु वै वौषट् सर्वत्र कमलोद्भव ॥
वशार्थे चापि विद्वेषे दुष्टोच्चाटनकर्मणि ।
हुंफट्कारं च निहितमन्योन्यप्रीतये वषट् ॥
तृप्त्यर्थे बलिदानेच तैजसोऽह्यभिवृद्धये ।
ऋते सप्रणवद्विप्र नमस्कारपदात्तु वै ॥ *Paus. S.* XXXVIII.268-271.

Cf. *SKS. Brahma* XI.9-14 *namaḥ* is to be used according to the nature of the act done, also intending to get a result; *svāhā* to get *aṇimā* and other eight *siddhis, vauṣaṭ* for nourishment; *huṃ* and *phaṭ* to get others under control; indicating hatred and driving away the evil spirits and *vaṣaṭ* to express mutual delight. Leaving *Praṇava* and using *namaḥ* can express one's pleasure, offering of *bali* and intention to have one's might to grow up.

Cf. *JS*. XV.186-188a for slightly different purposes served by these.

54. *antima: ha; antimadvaya*: two *ha* letters.

55. *aṣṭama: sa; satṛtīyaṃ:* with *r, arṇāntaṃ:* ending with the letter *a; antima: ha; pañcamasvarānta:* with *ū*; *nemyādya: ma* which is at the beginning of the *rim; ekādaśārṇa*: 11th letters, e.g. *ṭa; taddviguṇāragaṃ: pha, avimuktaṃ:* not separated, that is *ha + ma; pha + ṭa.*

56. Six-lettered mantra: *sahasrāra huṃ phaṭ.*

[सुदर्शनशब्दनिर्वचनम्, तत्प्रभावश्च]

दर्शनं परतत्त्वस्य स्यात् तदाख्यानदर्शनम् ॥ १२१ ॥
तन्निष्ठानामिदं नित्यमज्ञानतिमिरापहम् ।
छिनत्ति संशयं तेषां सदुपाय[१०]प्रवृत्तये ॥ १२२ ॥
रूपान्तरमिदं तस्य संशयच्छेदकारणम् ।
नूनं वर्णाश्रमाचारनिष्ठानामाननेषु[११] तु ॥ १२३ ॥

तत्राष्टमं सकाराख्यं वर्णम्, सतृतीयं रेफसहितम् । आर्णान्तम् आकारान्तम्, अन्तिमं हकारम्, सपञ्चमस्वरान्तमूकारसहितम् । नेम्याद्यभूषितं मकारभूषितम्, एकादशारार्णयुक्तं टकारयुक्तम् । तद्विगुणारगं फकारम् । पञ्चमषष्ठयो: टकारफकारयो: । अन्यार्णं हकारे मकारम्, फकारे टकारं च । अविमुक्तमपृथग्भूतं कुर्यादित्यर्थ: । तृतीय: पञ्चम: षष्ठस्त्राकारो हुंकार: फट्कारश्च । अन्ये वर्णा: सकारहकाररेफा: ।

सुदर्शनशब्दनिर्वचनपूर्वकं तत्प्रभावमाह — **दर्शनम्** इत्यादिभि: ।

छिनत्ति[१२] दूषकान् जन्तून् स्वकविद्याप्रभावत: ।
लाञ्छितानामनेनाशु भक्तानां भावितात्मनाम् ॥ १२४ ॥
करस्थो विजयस्तु स्यादिह लोके परत्र च ।
किं पुनर्विषये यत्र स्थापिते पूजिते सति ॥ १२५ ॥

[पुनरपि सविशेषं हृन्मन्त्रादीनां लक्षणम्]

लक्षणं हृदयादीनां मन्त्राणां तूच्यतेऽधुना ।
प्रागेव हृदयादीनां मन्त्रार्णानि यथाक्रमम् ॥ १२६ ॥
विन्यसेद् बीजभूतानि तारान्ते बिन्दुना तत: ।
आविसूनां[१३] क्रमादन्ते तथा सूर्याक्षरद्वयात् ॥ १२७ ॥
महासुदर्शनज्वालापदयोरन्तिमेऽपि च ।
चक्रायेति पदं षोढा शिरोऽन्ते योजयेत् क्रमात् ॥ १२८ ॥
विज्ञानादिगुणोपेतैस्तुर्यान्तैर्हृदयादिभि: ।
नम: स्वाहादिनेत्रान्तै: प्रागुक्तविधिना लिखेत् ॥ १२९ ॥

१०. समुपाय - D, E.
- do - - do - स्यादार्णम् - D.
११. आननेन - D, E.
१२. भिनत्ति - D, E.
१३. अविसूनाम् - A

hum, phat). Other letters (*sa, ha, ra*) together with letters may be three each having two letters.[57] This denotes the omnipresent form of Viṣṇu who is of the nature of time. This is called the eight-syllabled mantra with Tārā and Śakti. A soul is in matter when united with Kṣetra and Kṣetrajña. Thus Hari Sudarśana must be meditated upon he being the nature of gross and subtle.

(Derivation of the word Sudarśana and its glory)

121b-125. *Darśana* is of the Supreme Reality. Understanding of the account (or narration) of it destroys always the darkness of ignorance of those who are devoted to him (Sudarśana). It destroys their doubt in order that they could take to the good means. Its other form (*ākhyānadarśana*) is the cause for the destruction of doubt. In fact, it (dwells) in the mouths (for utterances) of those who abide by (the rules of) castes and orders. It destroys the reviling (those abuse it) beings through the power of its mantra. Victory is for them save in this world and hereafter for those devotees, who are devoted to it and who are marked with it (emblems). How much more (should be the result) in the matter of its worship after installations.

(Marks of the mantra of Hṛdaya and others in a special way)

126-129. Marks of Hṛdaya and other mantras are stated now. The letters of the mantras of Hṛdaya and others were already stated. The *bījas* are to be placed in due order at the end of Tārā[58] with Bindu.[59] Then the letters *ā, vi* and *su* are to be placed in due order and then two lettered word *sūrya*. The words *mahāsudarśana* and *jvālā* are to be placed next, to be followed by *cakrāya*.[60] The word *svāhā*[61] is to be used six times after these. Hṛdaya and others are to be used in the dative case with *vijñāna* and *guṇa, namaḥ svāhā* and others upto the Netramantra then to be written according to the rule.

57. third: *srā*; fifth: *huṃ;* sixth: *phaṭ*; have three each other letters *sa, ha* and *ra* have two each.

58. Tāra: *Oṃ (Praṇava).*

59. Bindu: Paśyantī stage in the evolution of sound.

60. *ācakrāya, vicakrāya, sucakrāya, urucakrāya, mahāsudarśanacakrāya, jvālācakrāya.*

61. *śirontaṃ: (śiraḥ:* head; *anta:* end); at the end of the mantra; ending with it six times; one for each limb (*aṅga*); *śirontaṃ: svāhāntaṃ* which occurs at the end.

[तेषां ध्यानप्रकारः]

ध्येयान्याकारवर्तीनि भोगस्थानेषु मूलवत् ।
वर्णभूषणवस्त्रास्त्रभुजसंस्थानचेष्टितैः ॥ १३० ॥

[सुदर्शनार्चने फलम्]

ज्ञात्वैवं[१४] मन्त्र[१५] माहात्म्यं योऽर्चयेद्विधिपूर्वकम् ।
दिग्बन्धवह्निप्रकारगायत्र्यावाहनादिकैः ॥ १३१ ॥
यागोप[१६]करणैर्मन्त्रैर्भोगदानविसर्जितैः ।
क्रमात् सर्वफलावाप्तिर्मन्त्रसिद्धिश्च जायते ॥ १३२ ॥

पुनः सविशेषं हृन्मन्त्रादिलक्षणमाह — **लक्षणम्** इति चतुर्भिः । आविसूनामाकारविकारसुकाराणाम्। शिरोऽन्तं स्वाहान्तमित्यर्थः ।

हृदयादीनां ध्यानक्रममाह — **ध्येयानि** इत्यादिना । मूलवत् सुदर्शनवत् ।

एवं पूर्वोक्तैः वक्ष्यमाणैश्च मन्त्रैः सुदर्शनार्चने फलमाह — **ज्ञात्वैवम्** इति द्वाभ्याम् । भोगदानविसर्जितैः भोगदानमन्त्रविसर्जनमन्त्रैरित्यर्थः । पारमेश्वरव्याख्याने तु "एवमपराङ्गमन्त्राणामुभयसाधारणमन्त्राणां भोगदानवाचकं विना प्रत्येकं फलसिद्धिरस्तीत्याह-ज्ञात्वैवमिति द्वाभ्याम्" इत्युक्तम् । तदुन्मत्तप्रलपितम्।

[दिग्बन्धनमन्त्रः]

दशदिग्बन्धमन्त्राणां वक्ष्यते लक्षणं पुरा ।
ॐ पूर्वं पुरुषायेति स्वाहान्तं तदनन्तरम् ॥ १३३ ॥
अस्त्रेण बन्धयामीति स्वाहान्तं च षडक्षरम् ।
इति दिग्बन्धमन्त्रोऽयमीरितो दुष्टदोषहृत् ॥ १३४ ॥

[अग्निप्रकारमन्त्रः]

प्रणवं प्राक् समुद्धृत्य मनुं वा[ग]ग्निजाययोः ।
आयान्तं विन्यसेच्चक्रमग्निप्रकारसंज्ञकम् ॥ १३५ ॥

[सुदर्शनगायत्रीमन्त्रः]

कीर्तितां चक्रगायत्रीं शृणुध्वं मुनिसत्तमाः ।
जातिपूर्वं पुरस्कृत्य चक्रायेति समुद्धरेत् ॥ १३६ ॥

१४. ज्ञात्वेवम् - E.
१५. यन्त्र - B
१६. यानोप - E.

(Way of doing meditation)

130. Those which are in their form, are to be meditated upon in the places of enjoyment as in the case of Sudarśana,[62] that is, colour, ornaments, cloths, arms, postures, (states and movements).

(Result of worshipping Sudarśana)

131-132. He, who adores, according to the rule, knowing the greatness of the mantra and uses them (mantras) for Digbandha, worship of the fire in the enclosure, invocation of Gāyatrī and for the utensils for sacrifice and those for enjoyments, gift and send off will get all the results and also become successful accomplishment (in the use) of the mantra.

(Digbandhanamantra)

133-134. The marks of the mantras used in Digbandhana[63] for the ten directions are now stated. *Oṃ puruṣāya,* to be taken first upto *svāhā,* then *astreṇa bandhanāya* upto *svāhā,* consisting of six-letters. Thus the Daśadigbandhanamantra is stated as destroying the defects caused by the wicked people.

(Agniprakāramantra)

135. Take the *Praṇava* at first, then the mantra of Agni, or his spouses[64] then *cakra* in the dative. This is called Agniprakāramantra.[65]

(Sudarśanagāyatrīmantra)

136-139. O good sage! listen to the famous Cakragāyatrī. It is to be formed with *jāti*[66] and the word *cakrāya.* These are to be taken the second word from Viṣṇugāyatrī,[67] first three letters from the Puruṣasūkta,[68] the word *netrābhyāṃ*[69] and (all these) to be joined with the letters at the end of the rim of the wheel;[70] *dhīmahi,* at the end and *no* to be added as unavoidable. The

62. *mūlavat:* as in the case of Sudarśana.
63. Digbandhanamantra: *puruṣāya astreṇa bandhayāmi svāhā.*
64. mantra of Agni's spouses: Svāhā and Svadhā. The mantra is given in *LT.* 45-44.
65. Agniprakāramantra: *Oṃ svadhāyai svāhāyai agnaye svāhā.*
66. *jāti: namaḥ, svāhā, vauṣaṭ, huṃ, phaṭ, vaṣaṭ.*
67. Second word in *Viṣṇugāyatrī: vidmahe.*
68. First three letters in the Puruṣasūkta: *sahasra.*
69. *netrābhayām padam: jvālā.*
70. *nemipūrvāntayojitam: ya.*

द्वितीयं विष्णुगायत्र्या नृसूक्ताद्यक्षरत्रयम् ।
नेत्राभ्यां पदमादाय नेमिपूर्वान्तयोजितम् ॥ १३७ ॥
धीमहीति तदन्ते नो विनिवेश्योऽनिवारितः ।
गायत्र्यन्तं समुद्धार्य[१७] तदन्ते चतुरक्षरम् ॥ १३८ ॥
सौदर्शनी समुद्दिष्टा गायत्री तारकाक्षरा ।
सतारका पुरा चेयं भवेदेकाक्षराधिका ॥ १३९ ॥

[मन्त्रत्रयस्योद्धारक्रमः]

अथ मन्त्रत्रयं वक्ष्ये सामान्यं सर्वपूजने ।

[आवाहनमन्त्रोद्धारः]

तारद्वयं पुरोद्धृत्य परमं पदमुद्धरेत् ॥ १४० ॥

दिग्बन्धनमन्त्रमाह — **दश** इति द्वाभ्याम् ।

अग्निप्रकारमन्त्रमाह — **प्रणवम्** इति । आयान्तं चतुर्थ्यन्तम् ।

सुदर्शनगायत्रीमाह — **कीर्तिताम्** इति चतुर्भिः । जातिपूर्वं नमः शब्दम्, विष्णुगायत्र्या द्वितीयं 'विद्महे' इति पदम् । नृसूक्ताद्यक्षरत्रयं 'सहस्र' इति पदम् । नेत्राभ्यां पदं ज्वालापदम्, नेमिपूर्वान्तयोजितं यकारसंयुक्तम् । गायत्र्यन्तं चतुरक्षरं 'प्रचोदयात्' इति पदम् । तारकाक्षरा नक्षत्रसंख्याक्षरा । पुनः सतारका आदौ प्रणवसहिता ।

अथ सर्वसाधारणं मन्त्रत्रयमाह — **अथ** इत्यादिभिः । तारद्वयं प्रणवद्वयम् ।

धामेत्यवस्थितं चाथ नेम्याद्यं द्विनवारगम् ।
द्विदशारं गतं वर्णं नाभिपञ्चममूर्धनि ॥ १४१ ॥
ततस्तु ग्रहकाम्ययो इति पञ्चार्णमुद्धरेत् ।
युतं नेमिद्वितीयेन द्विनवारं गतं ततः ॥ १४२ ॥
षोडशारं गतं वर्णं द्वितीयस्वरसंयुतम् ।
नेमिपञ्चमवर्णं च षोडशारं गतं पुनः ॥ १४३ ॥
तृतीयस्वरसंयुक्तं तृतीयं नेमिमण्डलात् ।
नेम्यन्तमास्वरोपेतमरान्तश्च स्वरान्तरम् ॥ १४४ ॥
नेम्याद्यं षोडशारस्थं नेम्यष्टममिकारगम् ।
न्यूनविंशारगोर्ध्वं तु द्विनवाक्षरमूर्धनि ॥ १४५ ॥

१७. समुद्धार्य - B, E.

ending word of Gāyatrī of Sudarśana[71] having four syllables is to be added. This is Sudarśanagāyatrī with the syllables numbering those of the stars.[72] This will have one more syllable, with the Tāraka at the beginning.[73]

(Analysis of the invocatory mantras)

140a. Then I shall tell the three mantras used in common in all worships.

(Analysis of Āvāhanamantra)

140b-147a. Take two Tārās; words *parama* and *dhāma* first letter in the rim,[74] eighteenth letter (in the spokes);[75] twentieth letter (in the spoke) with the fifth syllable in the nave above it,[76] then the words *graha* and *kāmya* having five syllables,[77] the eighteenth letter with the second letter on the rim;[78] the sixteenth letter in the spoke with the second vowel;[79] fifth syllable in the rim with the sixteenth syllable in the spoke;[80] the third syllable in the rim with the third vowel[81] the last syllable in the rim with *a*,[82] the last syllable in the spokes to be taken with another vowel.[83] Take the first letter in the rim, with the sixteenth syllable in the spokes,[84] eighth syllable in the rim[85] and syllable *ī*. Connect this with the nineteenth syllable in the spokes above that the

71. ending word of the Gāyatrī = *pracodayāt.*
72. mantra = *sudarśanāya mahājvālāya hetirājāya dhīmahi tannaścakraḥ pracodayāt*; 27 letters, the number agrees with the number of stars.
73. when Tārā (*Praṇava*) is prefixed, the number of letters will become 28.
74. first letters in the *rim* = *ma.*
75. *dvinavavāraga:* 2x9 = 18th letter in the spoke = *da.*
76. *nābhipañcama*, fifth letter in the nave:
    dvidaśāra = 2x10 = 20th letter in the spoke = *na.*
    mūrdhani: above the 20th letter = *nu.*
77. five syllables: *grahakāmyayoḥ.*
78. eighteenth letter with the second letter on the rim: eighteenth letter: 2x9: *dvinavāraga* in the spoke: *da nemidvitīya* = *ya*; then the letter formed is *dya.*
79. *ṣoḍāśara*: 16th letter in the spoke = *ta*; second vowel = *ā*; *tā.*
80. fifth letter on the rim: *va* = *tva;* sixteenth letter
81. *tṛtīyasvara:* third vowel: *i*, *tṛtīya* on the rim: *ra* = *ri.*
82. *nemyantaṃ* = *ha; āsvara* = ā vowel; *hā.*
83. *arānta* = last syllable in the spokes: *bha; svarāntara* = *i*, *bhi.*
84. *nemyādyam:* first letter in the rim = *ma; soḍaśārastham:* 16th letter in the spoke = *ta* = *tma.*
85. *nemyaṣṭam:* eighth letter in the rim = *sa*; with *i* = *si.*

स्वरं तृतीयं संयोज्य ततश्च द्विनवारगम् ।
पुनर्मन्त्रशरीरेति प्रणवान्तं ततो नमः ॥ १४६ ॥
पुनश्च नमसा युक्तो मन्त्र आवाहनोचितः ।

[भोगदानमन्त्रोद्धारः]

प्रदाने सर्वभोगानां मन्त्रोऽयं सम्प्रकाश्यते ॥ १४७ ॥
प्रणवं पूर्वमुच्चार्य सर्वभोगैककारणम् ।
नेम्यन्तं बिन्दुसंयुक्तं त्रिधेदं पदमप्यथ ॥ १४८ ॥
गृहाणेति शिरोऽन्तोऽयं भोगदानस्य वाचकः ।

[विसर्जनमन्त्रोद्धारः]

आवाहने तथाऽर्चायां विसर्जनविधौ तथा ॥ १४९ ॥
प्रणवं पूर्वमुद्धृत्य सम्बोध्य भगवन्निति ।
मन्त्रमूर्तेः पदं दद्यात् स्वपदं च द्वितीयया ॥ १५० ॥

नेम्याद्यं मकारम्, द्विनवारगं दकारम् ॥ नाभिपञ्चममूर्ध्नि स्थितं द्विदशारं गतं वर्णं नुकारम् । नेमिद्वितीयेन युतम्, द्विनवारं गतं द्यकारम् । द्वितीयस्वरसंयुतं षोडशारं गतं वर्णं तकारम् । नेमिपञ्चमवर्णं वकारम् । षोडशारं गतं तकारम् । तृतीयस्वरसंयुक्तं नेमिमण्डलात् तृतीयं रेकारम् । आस्वरोपेतं नेम्यन्तं हकारम् । स्वरान्तरमरान्तं भिकारम् ।

आसादय क्षमस्वेति प्रणवान्तं समुद्धरेत् ।
सुदर्शनार्चनार्थं तु मन्त्रास्त्वेवं मयोदिताः ॥ १५१ ॥

[सुदर्शनार्चनम्]

इहार्चनविधानं तु प्रवक्ष्यामि मुनीश्वराः ।
प्राग्वत् स्नानादिकं कृत्वा प्रविश्य यजनालयम् ॥ १५२ ॥
प्रक्षाल्य पादावाचम्य सोत्तरीयः स्वलङ्कृतः ।
धृतोर्ध्वपुण्ड्रः कुसुमैर्द्वाःस्थानभ्यर्च्य पूर्ववत् ॥ १५३ ॥
कवाटोद्घाटनं कृत्वा प्रविश्याभ्यन्तरे विभुम् ।
प्रणिपत्य च गायत्र्या पाणिप्रक्षालनादिकम् ॥ १५४ ॥
अर्चायां विष्टरे यन्त्रे कृत्वा मार्गत्रयं ततः ।
प्रासादं शोधयित्वाऽस्य पुरतः फलकादिके ॥ १५५ ॥

eighteenth syllable. Add the third vowel and the eighteenth syllable in the spoke.[86] Then add the word *mantraśarīra*, *Praṇava* at the end and then *namaḥ*, add names again. This is fit for *āvāhana*.[87]

(Analysis of Bhogadānamantra)

147b-149a. This mantra is now described (is made to shine) while offering all enjoyables. *Praṇava* is to be uttered at first, which is the only one (unique) cause for all enjoyments, then the syllables at the end of the rim[88] along with *bindu*, the word *idaṃ* in the three ways, then the word *gṛhāṇa* and *śiro'nta*.[89] This mantra denotes the offering of *bhoga*.

(Formation of Visarjanamantra)

149b-151. While invoking, worshipping and giving send-off, *Praṇava* must be taken at first, then the lord must be addressed as *Bhagavan*, *mantramūrte*, *svapadam*, *āsādaya*, *kṣamasva* and add *Praṇava* at the end.[90] These have been then shown by me for worshipping Sudarśana.

(Worship of Sudarśana)

152-159. O lordly sages! I shall tell you the way of doing worship. After taking bath as before, he (priest) shall enter the hall of worship. Washing the feet, he shall do *ācamana* and wear a well decorated upper cloth; put on Ūrdhvapuṇḍra[91] and worship as before those (deities) who at the entrance using flowers. He shall open the door, enter within, bow to the Lord and wash his hands with Gāyatrī. Adopting the three methods[92] on the idol seat and *yantra*, he shall clean the temple, and sprinkle the plank and offers in his front with Astramantra. He shall sit facing him in a good seat. He shall do *adhivāsana* connected with the worship for them (materials) which are

86. *nyūnaviṃśa:* 19 in the spoke = *dha*, connect it with the third *svara* = i, add *dvinavākṣara* = 18th letter in the spoke: *d; dvinavākṣara mūrdhani* = on the head of the 18th letter in the spoke add *i: di; d* must be over *dh:* add *ddh*; add *i - ddhi*, again: *dvinavāraga:* 18th letter in the spoke = *d*.
87. the mantra: *oṃ oṃ paramadhāmāvasthitā madamugrahakāmyordyatāvaterehābhimatasiddhi-damantrasarīrio namo namaḥ.*
88. *nemyantam:* last letter on the rim: *ha; bindusaṃyuktam = ha + ṃ = haṃ.*
89. ओं हं हं हं इदमिदमिदं गृहाण स्वाहा ।
90. Visarjanamantra: *Oṃ bhagavan mantramūrte svapadamāsādaya kṣamasve oṃ.*
91. Ūrdhvapuṇḍra: ornamental two vertical marks in the face and other specified parts of the body with white mud, a red thin vertical line in between.
92. *mārgatraya:* see note under III.12.

स्वरं तृतीयं संयोज्य ततश्च द्विनवारगम् ।
पुनर्मन्त्रशरीरेति प्रणवान्तं ततो नमः ॥ १४६ ॥
पुनश्च नमसा युक्तो मन्त्र आवाहनोचितः ।

[भोगदानमन्त्रोद्धारः]

प्रदाने सर्वभोगानां मन्त्रोऽयं सम्प्रकाश्यते ॥ १४७ ॥
प्रणवं पूर्वमुच्चार्य सर्वभोगैककारणम् ।
नेम्यन्तं बिन्दुसंयुक्तं त्रिधेदं पदमप्यथ ॥ १४८ ॥
गृहाणेति शिरोऽन्तोऽयं भोगदानस्य वाचकः ।

[विसर्जनमन्त्रोद्धारः]

आवाहने तथाऽर्चायां विसर्जनविधौ तथा ॥ १४९ ॥
प्रणवं पूर्वमुद्धृत्य सम्बोध्य भगवन्निति ।
मन्त्रमूर्तेः पदं दद्यात् स्वपदं च द्वितीयया ॥ १५० ॥

नेम्याद्यं मकारम्, द्विनवारगं दकारम् ॥ नाभिपञ्चममूर्ध्नि स्थितं द्विदशारं गतं वर्णं नुकारम् । नेमिद्वितीयेन युतम्, द्विनवारं गतं द्यकारम् । द्वितीयस्वरसंयुतं षोडशारं गतं वर्णं तकारम् । नेमिपञ्चमवर्णं वकारम् । षोडशारं गतं तकारम् । तृतीयस्वरसंयुक्तं नेमिमण्डलात् तृतीयं रेकारम् । आस्वरोपेतं नेम्यन्तं हकारम् । स्वरान्तरमरान्तं भिकारम् ।

आसादय क्षमस्वेति प्रणवान्तं समुद्धरेत् ।
सुदर्शनार्चनार्थं तु मन्त्रास्त्वेवं मयोदिताः ॥ १५१ ॥

[सुदर्शनार्चनम्]

इहार्चनविधानं तु प्रवक्ष्यामि मुनीश्वराः ।
प्राग्वत् स्नानादिकं कृत्वा प्रविश्य यजनालयम् ॥ १५२ ॥
प्रक्षाल्य पादावाचम्य सोत्तरीयः स्वलङ्कृतः ।
धृतोर्ध्वपुण्ड्रः कुसुमैर्द्वाःस्थानभ्यर्च्य पूर्ववत् ॥ १५३ ॥
कवाटोद्घाटनं कृत्वा प्रविश्याभ्यन्तरे विभुम् ।
प्रणिपत्य च गायत्र्या पाणिप्रक्षालनादिकम् ॥ १५४ ॥
अर्चायां विष्टरे यन्त्रे कृत्वा मार्गत्रयं ततः ।
प्रासादं शोधयित्वाऽस्य पुरतः फलकादिके ॥ १५५ ॥

eighteenth syllable. Add the third vowel and the eighteenth syllable in the spoke.[86] Then add the word *mantraśārīra*, *Praṇava* at the end and then *namaḥ*, add names again. This is fit for *āvāhana*.[87]

(Analysis of Bhogadānamantra)

147b-149a. This mantra is now described (is made to shine) while offering all enjoyables. *Praṇava* is to be uttered at first, which is the only one (unique) cause for all enjoyments, then the syllables at the end of the rim[88] along with *bindu*, the word *idaṃ* in the three ways, then the word *gṛhāṇa* and *śiro'nta*.[89] This mantra denotes the offering of *bhoga*.

(Formation of Visarjanamantra)

149b-151. While invoking, worshipping and giving send-off, *Praṇava* must be taken at first, then the lord must be addressed as *Bhagavan*, *mantramūrte, svapadam, āsādaya, kṣamasva* and add *Praṇava* at the end.[90] These have been then shown by me for worshipping Sudarśana.

(Worship of Sudarśana)

152-159. O lordly sages! I shall tell you the way of doing worship. After taking bath as before, he (priest) shall enter the hall of worship. Washing the feet, he shall do *ācamana* and wear a well decorated upper cloth; put on Ūrdhvapuṇḍra[91] and worship as before those (deities) who at the entrance using flowers. He shall open the door, enter within, bow to the Lord and wash his hands with Gāyatrī. Adopting the three methods[92] on the idol seat and *yantra*, he shall clean the temple, and sprinkle the plank and offers in his front with Astramantra. He shall sit facing him in a good seat. He shall do *adhivāsana* connected with the worship for them (materials) which are

86. *nyūnaviṃśa:* 19 in the spoke = *dha*, connect it with the third *svara* = i, add *dvinavākṣara* = 18th letter in the spoke: *d; dvinavākṣara mūrdhani* = on the head of the 18th letter in the spoke add *i: di; d* must be over *dh:* add *ddh*; add *i - ddhi,* again: *dvinavāraga:* 18th letter in the spoke = *d*.
87. the mantra: *oṃ oṃ paramadhāmāvasthitā madamugrahakāmyordyatāvaterehābhimatasiddhi-damantrasaririo namo namaḥ.*
88. *nemyantam:* last letter on the rim: *ha; bindusaṃyuktam* = *ha* + *ṃ* = *haṃ*.
89. ओं हं हं हं इदमिदमिदं गृहाण स्वाहा ।
90. Visarjanamantra: *Oṃ bhagavan mantramūrte svapadamāsādaya kṣamasve oṃ.*
91. Ūrdhvapuṇḍra: ornamental two vertical marks in the face and other specified parts of the body with white mud, a red thin vertical line in between.
92. *mārgatraya:* see note under III.12.

प्रोक्षिते चास्त्रमन्त्रेण सम्मुखं रुचिरासने ।
समासीनः स्वपार्श्वस्थयाज्ञीयं चाधि[१८]वासनम् ॥ १५६ ॥
करशुद्धिं स्थानशुद्धिं कृत्वाऽस्त्रेण यथापुरम् ।
पाणिभ्यामुक्तमन्त्रेण संयुक्तेनास्त्रमुद्रया ॥ १५७ ॥
पूजास्थानगतान् विघ्नान् बाह्यतोऽदृश्यविग्रहान् ।
विरेच्य बन्धनं कुर्याद्दिक्षु चैव विदिक्षु च ॥ १५८ ॥

नेम्याद्यं मकारम् । षोडशारस्थं तकारम् । इकारगं नेम्यष्टमं सिकारम् । द्विनवाक्षरमूर्ध्नि दकारोपरि । न्यूनविंशारगोर्ध्वं धकारम्, तत्तृतीयं स्वरम्, इकारं च संयोज्य, एतेनर्द्धिरिति सिद्ध्यति । द्विनवारगं दकारम्। एवं च — ''ॐ ॐ परमधामावस्थितमदनुग्रहकाम्ययोद्यतावतरेहाभिमतसिद्धिदमन्त्रशरीरों नमो नमः'' इति मन्त्रो भवति । भोगदानमन्त्रस्तु पूर्वमेव विचारितः । विसर्जनमन्त्रस्तु — ''ॐ भगवन्मन्त्रमूर्ते स्वपदमासादय क्षमस्व ॐ'' इति भवति । एतन्मन्त्रत्रयं जयाख्यलक्ष्मीतन्त्रपारमेश्वरेष्वपि स्पष्टमुक्तं द्रष्टव्यम् ।

अथार्चनविधिमाह —'**इहार्चनविधानम्**' इत्यारभ्य **यावदध्यायपरिसमाप्ति** ॥

कवचेनावकुण्ठ्याथ प्राणानायम्य पूर्ववत् ।
भूतशुद्धिं ततः कृत्वा मन्त्रन्यासमथाचरेत् ॥ १५९ ॥

[मातृकान्यासप्रकारः]

अकारादिक्षकारान्तमातृकां मन्त्रमातरम् ।
विन्यसेत् करयोः पूर्वं विग्रहे चक्रमाप्लवन् ॥ १६० ॥
कृत्वैवं व्यापकन्यासमादित्यातप[१९]सप्रभम् ।
दक्षेतरक्रमेणैव शाखासु तलयोरपि ॥ १६१ ॥

१८. चाथ - B.
१९. मादित्यानल - B.

by his side,[93] purify his hands and the spot in front of him with the Astramantra as before and drive out, with the Astramantra, the obstacles which are in the place of worship and (also) outside with their invisible forms. He shall join his two hands, using Astramantra and do (Dig) *bandhana*[94] in the directions and intermediate directions. He shall do *avakuṇṭhana*[95] with the Kavacamantra. Doing Prāṇāyāma as before, Bhūtaśuddhi[96] and Mantranyāsa are to be done.

(Method of placing the Mātṛkās)

160-170. The mother of mantras beginning with *a* and ending with *kṣa* is to be placed at first in the two hands; then merging the wheel of mantras in his own body, *nyāsa* shall then be made for the Vyāpakamantras,[97] which have the brilliance of the sun, then the fingers[98] and first in the right and then left and the two palms from the thumb to the little finger, four times for each (finger). Thus the priest shall do twenty-two *nyāsas* in the palms[99] and ten[100] in the middle and five each in the group of four fingers in each,[101] so as to make them remain in between the two *Praṇavas*. Having done thus in the two hands, *nyāsa* shall be done in one's own body after doing *nyāsa* for

93. *Svapārśvastha yājñīyam cādhivāsanam* = doing *adhivāsana* for the materials relating to worship (*yājñīya*) that are by his side. The sense of this passage is not clear. If *adhivāsana* is to be done, much time is required to make use of the materials for which it is done. It may not be possible then to use them for worship. Or *cāthāvāsanam* may be taken as the reading, then it must mean that the seat relating to the worship with the materials by his side is to be made. The word *kṛtvā*, which is in the next line, cannot be taken with these words. Or, *karaśuddhiṃ sthānaśuddhiṃ kṛtvā* must be taken to mean that purification is also intended to be done to the *yājñīya āsana* but this construction is round about and is unconvincing.
94. *bandhana:* Digbandhana, see note under II.18.
95. *avakuṇṭhana: ibid.* II.19.
96. Bhūtaśuddhi: *ibid.* II.56.
97. Vyāpakamantras are Praṇava, Ṣaḍakṣara, Aṣṭākṣara & Dvādaśākṣara.
98. *śākhāsu:* fingers.
99. *nyāsa:* in the fingers of one hand must be done with the fingres of the others hand. One *nyāsa* for the hand become five. This must be done four times. *Caturthcatuḥ:* four times for each. *Nyāsa* for the five fingers comes to twenty and two for the two palms. Thus there are twenty-two *nyāsas.*
100. Ten *nyāsas* are to be done in the middle of the two hands.
101. *Dvicatuṣke: catuṣka* = group of four; two groups of four fingers. *Nyāsa* in each *catuṣka* in one hand by the five fingers in the other. Thus ten *nyāsas* are done.

अङ्गुष्ठादिकनिष्ठान्तमेकैकस्याश्चतुश्चतुः ।
एवं द्वाविंशकं न्यस्य तलयोर्दशकं ततः ॥ १६२ ॥
मध्ये च द्विचतुष्के च पञ्चकं पञ्चकं तथा ।
प्रणवद्वयमध्यस्थानेवं न्यस्य[20] करद्वये ॥ १६३ ॥
व्यापकन्यासपूर्वं तु स्वशरीरेऽपि विन्यसेत् ।
मूर्ध्नः पादतलं यावत् पाणिभ्यां तपनांशुवत् ॥ १६४ ॥
व्यापयित्वा ततो न्यासं पृथगेव समाचरेत् ।
केशान्ते वक्त्रवृत्ते च नेत्रयोः श्रवणद्वये[21] ॥ १६५ ॥
घ्राणरन्ध्रद्वये गण्डद्वये दक्षेतरक्रमात् ।
उत्तराधरयोगेन दन्तयोस्तच्छदद्वये ॥ १६६ ॥
मूर्ध्नि न्यसेत् स्वरानन्यान् सविसर्गानन्तरम् ।
कवर्गं दक्षिणे बाहौ सन्धिपञ्चगतं क्रमात् ॥ १६७ ॥
वामे तथा चवर्गं च पादयोर्दक्षिणादितः ।
सन्धिगौ टतवर्गौ च पूर्ववत्तुन्दपार्श्वयोः ॥ १६८ ॥
पृष्ठे नाभौ च हृदये पवर्गं धातुसप्तके[22] ।
यादिसान्तानि वर्णानि हकारं हृदयान्तरे ॥ १६९ ॥
क्षकारं हृदयाकाशे न्यस्यैवं मातृकां पुरा ।
ततः शक्त्या षडर्णं तु न्यसेत् करशरीरगम् ॥ १७० ॥

[सुदर्शनमूलमन्त्रस्य करयोः शरीरे च न्यासः]

करन्यासं पुरा कुर्यात् तच्छृणुध्वं मुनीश्वराः ।
पुटीकृतेन ताराभ्यां मन्त्रेणैव सशक्तिना ॥ १७१ ॥
नखान्तं मणिबन्धादि प्राग्वत् पाणिद्वयं मृजेत् ।
आद्यन्ते तारशक्त्याद्यैः शक्ति[23]वर्णैः सबिन्दुकैः ॥ १७२ ॥

२०. न्यस्त्वा - B, E.
२१. श्रवणद्वय - B, E.
२२. सर्गिके - B, E.
२३. शक्त्याढ्यैः - E.
- do - षड्भिः - D.

the Vyāpakamantras, making it pervade (the body) from head to the region of the foot with two hands resembling the beams of the sun. *Nyāsa* must then be done separately. The vowels and others with *visarga* must be placed at the border of the hair on the forehead, around the mouth, two eyes, two ears, two nostrils, two cheeks in the order of first right and then left, teeth first upper and then lower, the two lips and head. Then the group of *ka* *(kavarga)*[102] shall be placed from the right arm, touching its five junctures[103] in due order, likewise the group of *ca* in the left arm,[104] *ṭa* and *ta* with junctures on the feet from the right foot, the group of *pa* (*pavarga*) on the belly and the two sides as before, on the back, navel, heart and the seven *dhātus*,[105] *ya* to *sa* and *ha* within the heart. After placing the sources of letters thus, the six-letters[106] are to be placed, according to one's capacity in the hand and body.

(Nyāsa of the Mūlamantra of Sudarśana in the hands and body)

171-181. Karanyāsa must be done at first, O lords of sages! listen to it. The mantra, having *śakti*, must be made to form a cup with two Tārās.[107] The two hands are to be rubbed as before from the wrist to the nails. *Nyāsa* is to be done in the middle joints (of the fingers) beginning from thumb upto the little finger with the letters[108] of *śakti* together with the *bindus*,[109] the *śakti* of

102. *kavarga: ka, kha, ga, gha* and *ṅa*.
103. *sandhipañcagatam: kavarga* touching the five junctures which must be taken to form part of the *bāhu*.
104. *bāhu:* The position of the hand between the elbow and wrist.
105. *dhātusaptaka:* ehyle, blood, flesh, fat, bone, marrow and semen.
106. Six-lettered mantra of Sudarśana: *Oṃ sahasāra huṃ phaṭ*
107. Two Tārās: two *Praṇavas*.
108. Letters of *śakti;* vide: *JS*. PP. 48-49.
109. *bindus;* vide: *LT*. XVIII.24.

अङ्गुष्ठादिकनिष्ठान्तं न्यस्य मध्यमपर्वसु ।
विन्यसेत् करजाग्रेषु चरमं वर्णमेव च ॥ १७३ ॥
एवमर्णानि विन्यस्य हृदयादीनि विन्यसेत् ।
मूलाग्रपर्वस्वङ्गानि वर्णन्यासक्रमेण तु ॥ १७४ ॥
पाणिभ्यामालभेद् देहमामूर्ध्नश्चरणावधि ।
कृत्वैवं व्यापकन्यासमङ्गन्यासं समाचरेत् ॥ १७५ ॥
मूर्ध्नि वक्त्रे च हृदये नाभौ गुह्ये च पादयोः ।
[सृष्टिन्यासो भवेदेष स्यादङ्गोपाङ्गवत्स्थितिः ।
पादयोर्गुह्यके नाभौ हृदि वक्त्रे च मूर्धनि ॥]
पादादिश्च शिरोऽन्तस्तु संहृतिन्यास उच्यते ॥ १७६ ॥
हृदि मूर्ध्नि शिखायां तु स्कन्धयोः करमध्यतः ।
नेत्रयोर्न्यसनीयानि स्वैर्मन्त्रैरुदितैः क्रमात् ॥ १७७ ॥
हृदयादीनि विन्यस्य पश्चात् पाणितलद्वये ।
किरीटं कौस्तुभं मालां श्रीवत्सं च यथापुरम् ॥ १७८ ॥
विन्यसेदायुधान्यष्टौ पद्मादीनि यथाक्रमम् ।
दक्षिणोत्तरयोरंसे इच्छाशक्तिं स्वपार्श्वयोः ॥ १७९ ॥
ऊरुमूले मनस्तत्त्वं न्यस्य मन्त्रमयं स्वकम् ।
भावयेदहमित्यन्तः सुदर्शनवपुर्हरिः ॥ १८० ॥
गायत्र्यावर्तयेद् बाह्ये स्वात्मानं चक्रमुद्रया ।
चक्रज्वालावलिं विप्राः परितो मन्त्रवित्तमः ॥ १८१ ॥

[मानसयागविधिः]

भावनाजनितं यागमाचरेदादिचोदितम् ।
नियम्य करणग्रामं प्राग्वद्वै ज्ञानगोचरे ॥ १८२ ॥
आसनं हृदि सङ्कल्प्य त्वनन्ताद्यं तु पूर्ववत् ।
परस्माद्भगवत्तत्त्वाच्चित्स्वरूपं परात्मकम् ॥ १८३ ॥
मनसा मन्त्रमुच्चार्य विष्टरोर्ध्वेऽवतार्य च ।
मन्त्रन्यासादिकं कृत्वा लयभोगार्चनं तथा ॥ १८४ ॥

Tārā kept at the beginning and end. The last letter[110] is to be placed at the tips of the nails of the fingers. After doing *nyāsa* of letters, Hṛdayas and others are to be placed, they at the lower and top joints (of the fingers) in the order of doing *nyāsa* of the letters. The body is to be touched with the two hands from the head up to the feet. After doing of (*nyāsa*) thus Vyāpakanyāsa,[111] Aṅganyāsa shall then be done, on the head, mouth, heart, navel, private parts and feet. This shall be Sṛṣṭinyāsa[112] and stationed like limbs and their parts, at the feet, private parts, navel, heart, mouth and head. Saṃhṛtinyāsa[113] is said to be performed from the foot to the head. *Nyāsa* of Hṛdayas and others is to be done on the heart, head, shoulders, middle of the hand (palm) and eyes with their mantras rising (uttered) in (their) order. The crown, Kaustubha, garland (Vanamālā) and Śrīvatsa are to be placed as before on the palms of the two hands. The eight weapons,[114] lotus and others are to be placed in their order on the right and left shoulders. Icchāśakti[115] shall be placed on the two sides. The *(tattva)* of the mind is to be placed at the spot (region) of the thigh. His (Sudarśana) mantra must be thought of as *ahaṃ*. Viṣṇu has Sudarśana for His body. One shall externally repeat (or revolve) himself with Gāyatrī[116] using Cakramudrā.[117] O brahmins! he who knows best the mantra (shall think) the range of flames of the discus.

(Method of doing mental worship)

182-186. The worship aroused by intense thinking shall be done at first, fixing the senses as before on the Lord who is within the reach of knowledge. Arrangement is to be made for a seat in the heart beginning from Ananta as before and the form of sentience as full of supreme being from the nature of Bhagavat tattva which is supreme. Bringing him down on the seat, after uttering mentally the mantra, Mantranyāsa and others are to be done and also worship of Laya and Bhoga. He (priest) shall imagine the moon's orb

110. Last letter: *kṣa*

111. Vyāpakanyāsa: covering the worshipper's body with a Vyāpakamantra.

112. Sṛṣṭinyāsa; vide: *SKS. Brahma* IX.13a.

113. Saṃhṛtinyāsa: *ibid* 14a.

114. Eight weapons: discus, pestle, goad, lotus, conch, bow, noose and mace.

115. Icchāśakti is the name of Śakti in its narrow sense. In fact, this is Śrī but must be distinguished from the main Śakti: vide: *LT.* II.28.

116. Sudarśana gāyatrī is meant here.

117. Cakramudrā: vide: *JS.* VIII.39b-40a; *Pād. S. caryā.* XXII.48b-49a.

शिरोर्ध्वे देवदेवस्य भावयेदिन्दुमण्डलम् ।
तत्स्रुतैरमृतौघैश्च कुर्यादर्घ्यादिकल्पनम् ॥ १८५ ॥
षोडशैरुपचारैर्वा द्वात्रिंशद्भिस्तु वा यजेत् ।
कृत्वैवं मानसं यागं जपान्तं तु यथाविधि ॥ १८६ ॥

[बहिर्यागविधिः]

ततो बहिर्यजेद् देवं हेतीशं देशिकोत्तमः ।
मूर्तैरर्घ्यादिभिर्भोगैर्विधिवत्समुपाहृतैः ॥ १८७ ॥
प्राग्वदर्घ्यादिपात्राणां स्थापनं पूजनं ततः ।
देहविन्यस्तमन्त्राणां गर्भद्वारस्थपूजनम् ॥ १८८ ॥
चण्डं चैव प्रचण्डं च गर्भद्वारे प्रपूजयेत् ।
तथाऽग्रमण्डपद्वारे यजेद्धातृविधातृकौ ॥ १८९ ॥
कृत्वैवं द्वारयागं तु प्रविश्याभ्यन्तरं ततः ।
फणीश्वरं समारभ्य योगपीठं प्रकल्पयेत् ॥ १९० ॥
गणनाथादिकांश्चैव समभ्यर्च्य यथाविधि ।
ततः सुदर्शनं देवं समावाह्य तु पूर्ववत् ॥ १९१ ॥
मन्त्रन्यासं ततः कुर्यात् सृष्टिन्यासादितस्त्रयम् ।
स्थानेषु हृदयादीनि भूषणानि तथैव च ॥ १९२ ॥
ततश्चास्त्रवराणां तु ह्यष्टकं चापि विन्यसेत् ।
इच्छाशक्तिं मनस्तत्त्वं विन्यसेच्च स्वदेहवत् ॥ १९३ ॥
लयभोगौ च कृत्वाऽथ ध्यायेद् देवं सुदर्शनम् ।

[सुदर्शनध्यानम्]

सहस्रारं महाचक्रमयुताग्निचयोत्कटम् ॥ १९४ ॥
षडध्वमयमुद्भ्रान्तं भगवच्छक्तिजृम्भितम् ।
अक्षस्थं परमात्मानं नारायणमनामयम् ॥ १९५ ॥
चक्ररूपिणमीशानं दिव्यकुङ्कुमसन्निभम् ।
पिङ्गाक्षं पिङ्गकेशाढ्यं रक्ताम्बरधरं विभुम् ॥ १९६ ॥
महौजसं महाकायं भुजैरष्टभिरन्वितम् ।
दंष्ट्रानिष्ठ्यूतघोराग्निज्वालाकोलाहलाकुलम् ॥ १९७ ॥

as present on the head of god of gods. *Arghya* etc. are to be arranged with the rapid flow of nectar trickling down (from that moon). Worship shall be done with sixteen or thirty-two services. After doing this mental worship duly up to *japa*.

(Method of doing external worship)

187-194a. The eminent priest shall do external worship to god, the lord of weapons, with real enjoyables, *arghya* etc., procured according to rules. Then shall be placed the vessels for *arghya* etc., and worship shall be done afterwards to the mantras placed on the body and for the deities at the entrance to the sanctum sanctorum. Caṇḍa and Pracaṇḍa are to be worshipped at the entrance to the sanctum sanctorum. Dhātṛ and Vidhātṛ are to be worshipped in the entrance to pavilion in the front. He shall enter the interior portion, after doing worship at the entrance and arrange for Yogapīṭha, beginning with the lord of the serpents. After worshipping Gaṇanātha and others according to the rules, lord Sudarśana shall be invoked as before. Mantranyāsa shall then be done and the three Sṛṣṭinyāsa[118] and others, Hṛdaya and other mantras and ornaments shall be placed in proper places. The eight prominent (best) weapons[119] shall then be placed. Icchāśakti and the *tattva* of the mind shall be placed as in one's own body. After doing Laya and Bhoga worship, he shall mediate upon lord Sudarśana.

(Sudarśanadhyāna)

194b-204. One shall mediate in this way, on god Mahācakra with thousand spokes; immense like the heap of ten thousand fires; full of the six courses; revolving; developed by the power of Bhagavān, remaining in the axle; the supreme self; faultless Nārāyaṇa, in the form of discus, lord; resembling the charming saffron; having of tawny eyes; rich with tawny hairs; wearing red cloth; all pervasive, of great vigour; having huge body, having eight hands, uproarious with flames of terrific fire issuing out of the big teeth, with the bees on the undulating hair in the front part of the face, having the knitted curved eyebrows; making the directions blaze forth with the flames rising out of the eye on the forehead, having the radiant crown licked (touched) by the multitude of flames glowing upwards; having Śrīvatsa and Kaustubha in the chest; adorned with divine (splendid) gar-

118. The two other are Sthitinyāsa and Saṃhṛtinyāsa.

119. See under 114.

कुटिलभ्रुकुटीभङ्गभङ्गुरालकषट्पदम् ।
ललाटनयनोद्गीर्णज्वालाज्वलितदिङ्मुखम् ॥ १९८ ॥
ऊर्ध्वज्वालागणालीढकिरीटतटशोभितम् ।
श्रीवत्सकौस्तुभोरस्कं दिव्यमालाविभूषितम् ॥ १९९ ॥
उद्यज्जानुमनेकास्त्रं स्थितं परमशोभनम् ।
पद्मा[२४]ङ्कुशौ च मुसलं चक्रमत्युग्रतेजसम् ॥ २०० ॥
शङ्खं च सशरं चापं पाशं कौमोदकीं क्रमात् ।
मुख्यदक्षिणहस्तादि मुख्यवामकरावधि ॥ २०१ ॥
दधानमतुलं वीरं दिव्याभरणभूषितम् ।
निजाट्टहाससन्त्रस्यद्दैत्यदानवसञ्चयम् ॥ २०२ ॥
अयुतायुतवह्नीनामास्पदे दीप्ततेजसाम् ।
अध्वषट्कमये चक्रे चक्रिणं चक्रमुत्तमम् ॥ २०३ ॥
ध्यायेदेवंविधं देवं चिन्तितार्थफलप्रदम् ।
ध्यायेच्च हृदयादीनि किरीटादीनि पूर्ववत् ॥ २०४ ॥

[आयुधानां ध्यानानि]

आयुधानामथ ध्यानं शृणुध्वं द्विजसत्तमाः ।
चक्रशङ्खगदाः पद्मं प्राग्वद्ध्यायेद्गुरूत्तमः ॥ २०५ ॥
कृशाङ्गं दीर्घबाहुं च पिङ्गलाक्षं नु चाङ्कुशम् ।
विकरालमुखं रौद्रं भिन्नाञ्जनगिरिप्रभम् ॥ २०६ ॥
कृशोदरं च मुसलमग्निज्वालावलीवृतम् ।
अङ्गारराशिसदृशं प्रलम्बमतिनिष्ठुरम् ॥ २०७ ॥
नीलोत्पलदलश्याममिष्वस्त्रं बाणविग्रहम् ।
नानारूपं च निशितं दीर्घदिग्बन्धविक्रमम् ॥ २०८ ॥
कार्मुकं[२५] हेमगौरं च किङ्किणीजालमण्डितम् ।
आस्फोटयन्तं स्वकरौ महाजलदनिःस्वनम् ॥ २०९ ॥
पाशं फणिगणाकीर्णं विद्युज्जिह्वं भयानकम् ।
हेमालिपाण्डुराभं च घोरास्यं रक्तलोचनम् ॥ २१० ॥

२४. गदा - A. वरा - E.
२५. कामुकम् - B.

lands; with one knee raised, possessing many arrows; very auspicious, having, in the right hand, lotus, goad, pestle, discus of fierce lustre and in the left hand, conch, bow with arrows, noose, and mace, all in due order, matchless in heroism (warrior) bedecked with splendid ornaments; and frightening the hosts of Daityas and Dānavas[120] with his loud laughter: one shall meditate upon the prominent discus stationed on the wheel which is of the nature of six courses (*adhvans*) and is the abode of ten thousand fires of blazing lustre. He should meditate upon the god who awards the fruits that are wished for and meditate upon Hṛdaya and the crown as before.

(Meditation on the weapons)

205-214. O best brahmins! listen to the (mode of) meditation on weapons. The eminent Ācārya shall meditate as before on the discus, conch, and mace, lotus having emaciated body, long arms, tawny eyes, frightful face, dreadful with the splendour of the broken collyrium and thin belly; pestle surrounded by the flames of fire similar to the heap of (burning) charcoal, bending forward the upper part of the body, very harsh, dark like the petals of the blue lily, quiver, having arrows for its body, having various forms; sharp (excited) with his valour capable of binding the directions for long; yellowish red-bow, resembling gold, bedecked with a multitude of small bells, striking the two hands free from sound like a huge cloud, noose, strewn over by

120. Daityas: sons of Diti: vide: *Bhp.* XI.18.10-89.

ध्येयाः स्वरुचिसंयुक्ता द्विभुजाः पुरुषोत्तमाः[२६] ।
एतेऽस्त्रनायकाः सर्वे विभोराज्ञाप्रतीक्षकाः ॥ २११ ॥
प्रोत्थिता विचलन्तश्च सुसमैः स्थानकैः स्थिताः ।
श्रोणीतटार्पितकराश्चामरव्यजनोद्यताः ॥ २१२ ॥
सपद्मं तु किरीटाद्यं वर्जयित्वा चतुष्टयम् ।
तर्जयन्तश्च दुष्टौघमन्येषां दक्षिणं करम् ॥ २१३ ॥
स्मर्तव्यं[२७] ध्यानकाले तु सर्वेषामथ मस्तके ।
ध्येयं स्वकं स्वकं चिह्नं सुप्रसिद्धं निराकृतिः[२८] ॥ २१४ ॥

[अधिष्ठातृदेवताः]

अधिष्ठातृक्रमस्तेषां कथ्यते मुनिसत्तमाः ।
ज्ञातव्यश्चाङ्कुशः कामो मुसलं नागनायकः ॥ २१५ ॥
शब्दादयः सायकास्त्रं धनुर्विद्धि समीरणम् ।
पाशो मायेति विज्ञेय एवं ध्यात्वा समर्चयेत् ॥ २१६ ॥
आसनाद्यैश्च सांस्पर्शैर्हृदयङ्गमपश्चिमैः ।
प्रीणयेत् तु विधानेन होमान्तं वा जपान्तिमम् ॥ २१७ ॥

[निगमनम्]

एवमेव स्वयं व्यक्तं दिव्यं सैद्धमथापि वा ।
स्थापितं मनुजैर्वाऽपि शैलमृल्लोहसम्भवम् ॥ २१८ ॥
अष्टबाहुं चतुर्बाहुं तथा षोडशबाहुकम् ।
चलस्थिरविभागेन स्थापितं च यथारुचि ॥ २१९ ॥
त्रिकालमर्चयेद् देवं सर्वानिष्टनिवारकम् ।
नैमित्तिकानि काम्यानि नित्यानि यजनानि च ॥ २२० ॥
विशेषेणैव कार्याणि विना स्वापं महोत्सवम् ।
शान्तिके पौष्टिके चैव तथैवाप्ययनादिषु ॥ २२१ ॥

२६. पुरुषोपमाः - D, E.
२७. कर्तव्यम् - E.
२८. निराकृतिम् - B.

group of snakes; with a tongue resembling the lightning, terrible; of whitish yellow hue like a range of gold; having a terrific mouth and red eyes. These eminent men, who have two hands and possess their own complexion are to be meditated upon. All these lords of arrows wait for the command of the lord. They get up, move about and stand even on the same standing postures, with their hands resting on their hips and raising the fans of chowris. Except the first four beginning with the crown, and lotus, they threaten the group of wicked people, with the other right hand. They must be remembered at the time of meditation. The head of others has its own individual mark well-known and formless marks.

(Presiding deities)

215-217. O eminent sages! the order in which they preside over is stated— Kāma is goad, the lord of serpents is the pestle, sound and others are arrows and know the wind as the bow and Māyā as noose. Having meditated thus, worship is to be done by giving seats which are fit (good) for touching and finally pleasing to the heart. They are to be pleased according to the rules upto *japa* or *homa.*

(Conclusion)

218-223a. In this way, worship is to be done three times a day in forms self manifested, installed by divine, or consecrated by the *siddhas*, or men, made of stone, mud or iron (metals), the lord with eight arms, four arms or sixteen arms and installed, according to the taste classified as movable or immovable, the lord who removes all undersirables, worships that are conditioned, desired, or obligatory are to be done especially the Mahotsava without sloth.

ध्यानेन पूजितेनैव हुतेन जपितेन च ।
समीहितानि पूर्यन्ते भक्तानां भावितात्मनाम् ॥ २२२ ॥
इति सम्यक् समाख्यातं परं सौदर्शनार्चनम् ।

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां सात्वतार्थप्रकाशिकाख्यायाम् ईश्वरतन्त्रव्याख्यायाम् सप्तमोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां लक्ष्मीसुदर्शनार्चनविधिर्नाम सप्तमोऽध्यायः ॥

Desires of devotees whose minds are fixed in God by meditation are fulfilled, worship, *homa* and *japa* when Śāntika,[121] and Pauṣṭika[122] dissolution rites are performed. Thus the worship of Sudarśana has been well narrated.

Thus ends the seventh chapter called *Lakṣmīsudarśanārcanavidhi* in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra*.

121. Śāntika: see *JS.* XXVI. 48-50.

122. Pauṣṭika: *ibid.* 51-55.

अष्टमोऽध्यायः

गरुडादिपरिवारार्चनविधिः

[परिवारार्चनं तत्र गरुडार्चनविषयकः प्रश्नः]

मुनयः -
भगवन् मुनिशार्दूल भगवच्छास्त्रकोविद ।
गरुडप्रमुखानां च पूजनं प्रागुदीरितम् ॥ १ ॥
तद्विधानं विशेषेण प्रकाशय कृपानिधे ।

[विहगेश्वरस्वरूपं तस्य महिमा च]

नारदः -
शृणुध्वं मुनयः सर्वे गरुडस्यार्चनं पुरा ॥ २ ॥
येन विज्ञातमात्रेण वाञ्छितं साधकोऽश्नुते ।
विष्णोः सङ्कर्षणाख्यस्य विज्ञानबलशालिनः ॥ ३ ॥
मूर्तिर्ज्ञानबलाख्या या सर्वाधारस्वरूपिणी ।
महिमेति जगद्धातुर्विज्ञेयो विहगेश्वरः ॥ ४ ॥
सर्वरोगभयघ्नश्च क्षेपकः सर्वविद्विषाम् ।
ततस्तमर्चयेन्नित्यं प्रासादे स्थाप्य मन्त्रवित् ॥ ५ ॥

[प्रासादे तस्य स्थानं तद्बिम्बोपादानद्रव्यमर्चनकालविधानं च]

प्राङ्गणे प्रथमे वाथ द्वितीये मूलमन्दिरात् ।
अग्रदेशे प्रकुर्वीत प्रासादं मण्डपाकृतिम् ॥ ६ ॥
चतुर्द्वारसमोपेतं वर्गत्रयसमन्वितम् ।
वर्गषट्कान्वितं वाथ सर्वालङ्कारशोभितम् ॥ ७ ॥
मूलगेहात् त्रिभागोच्चमर्धोच्चं वा सुविस्तरम् ।
तस्मिन् ब्राह्मेऽथ दिव्ये वा दिव्ययुक्तेऽथ मानुषे ॥ ८ ॥
संस्थाप्य लोहजां वाथ शैलीमर्चां यथोदिताम् ।
त्रिकालमर्चयेन्नित्यं मुख्यमूर्त्यर्चनान्तिमे ॥ ९ ॥

CHAPTER VIII

Procedure for Garuḍādiparivārārcana

(Worship of the secondary deities. Question regarding the worship of Garuḍa)

1-2a. Sages: Pious man! Eminent sage! Proficient in the Bhagavatśāstra![1] worship of Garuḍa and other respectable deities was described before.[2] O store of compassion! enlighten the method of doing it.

(The form of Lord of birds and his greatness)

2b-5. Nārada: O sages! listen all of you at first to the (way of) worship of Garuḍa, simply by the knowledge of which, the priest gets his desire. The form called Saṃkarṣaṇa of Viṣṇu, whose nature is knowledge and strength, is called Jñānabala. It is of the nature of being the substratum for all. The lord of birds is to be known as the greatness of the creator of the world. He destroys the fear arising from all ailments and throws away all the enemies (haters). Therefore, he, who knows the mantra, shall instal him in the temple and always worship him.

(His place in the temple, material which is to be used to make his idol and the rule regarding the time for this worship)

6-9. A temple shall be erected in the first or second courtyard, in the front portion of the main shrine. It shall be of the form of pavilion. It shall have four entrances, three or eight *vargas*,[3] beautified by all decorations, high by a third part of the main shrine or half of it and very expansive. An idol, which is made of metal or stone as ordained, shall be installed there where it is Brāhma[4] or divine or having divine aspect or made by man. It shall always be worshipped three times (a day) after the worship of the main deity.

1. Bhagavacchāstra: another name for Pāñcarātra. *kovida*: proficient.
2. See ch. III.
3. *varga:* elevations, mouldings.
4. This refers to the kinds of temples called Brāhma, Saiddha, Mānuṣa, etc.

अथाष्टमोऽध्यायो व्याख्यास्यते ।

मुनयो गरुडाद्यर्चनं पृच्छन्ति - **भगवन्** इति सार्धेन । एवं पृष्टो नारदः पूर्वं विहगेश्वरस्वरूपं तन्महिमानं चाह — **शृणुध्वम्** इति सार्धैस्त्रिभिः ।

तत्प्रतिष्ठास्थानम्, तद्बिम्बोपादानद्रव्यम्, तदर्चनसमयं चाह — **प्राङ्गणे** इत्यादिभिः ।

[गरुडमन्त्रोद्धारः]

तद्विधानं विशेषेण मन्त्रपूर्वमिहोच्यते ।
प्रणवं पूर्वमुद्धृत्य पक्षिशब्दमनन्तरम् ॥ १० ॥
पञ्चाक्षरो महामन्त्रः स्वाहान्तः सम्प्रकीर्तितः ।

[तदङ्गमन्त्रप्रकारः]

मन्त्रार्णानि सबिन्दूनि प्रागोङ्कारान्वितानि च ॥ ११ ॥
समुच्चार्याथ तुर्यान्तैर्ज्ञानाद्यैश्च हृदादिभिः ।
अनेत्रैरस्त्रपर्यन्तैरङ्गान्येतानि वै द्विजाः ॥ १२ ॥

[तस्यैव विषहरमन्त्रः]

प्राङ्मूलमन्त्रमध्याद्यव्यत्ययाद्विषहा भवेत् ।

[तन्मन्त्रमाहात्म्यम्]

सोऽयं मन्त्रः समाख्यातस्त्रिदशैरपि दुर्लभः ॥ १३ ॥
पञ्चाक्षर इति ख्यातो गारुडो मुनिसत्तमाः ।
पञ्चाङ्गानि यथापूर्वमक्षरैः स्युः सबिन्दुकैः ॥ १४ ॥

[भगवन्मूलमूर्त्यनुसारेण गरुडस्य स्थित्यादिभेदः]

साङ्गेनानेन मन्त्रेण स्थापनीयो विधानतः ।
मूलालयगते बिम्बे सुस्थिते वाथ यानगे ॥ १५ ॥
स्थितैव गारुडी मूर्तिर्याने वा गमनोन्मुखी ।
शयने चासने चैव त्वासीना वाथ सुस्थिता ॥ १६ ॥

तन्मन्त्रोद्धारमाह — **तद्विधानम्** इति सार्धेन ।

अङ्गमन्त्रप्रकारमाह — **मन्त्रार्णानि** इति सार्धेन ।

एतन्मन्त्रस्य विषावरोपणप्रयोगकाले द्वितीयतृतीयवर्णयोर्व्यत्यासमाह — **प्राक्** इत्यर्धेन । एवमुक्तं वेदान्ताचार्यैरपि -

"पक्षिव्यत्यस्तपक्षद्वितयमुखपुटप्रस्फुटोदारतारम् । मन्त्रं गारुत्मतं तं हुतवहदयिताशेखरं शीलयामः ॥" इति ।

(Composition of Garuḍamantra)

10-11a. The method of (doing) it is stated here particularly with the mantras. *Praṇava* must be taken at first and then the word *pakṣi*. The great mantra ending with the word *svāhā* is said to contain five syllables.[5]

(Method of forming his Aṅgamantra)

11b-12. O brahmins! these are the subsidiary mantras. The letters in the mantra (of Garuḍa) are to be taken with *anusvāra*, the syllable *Oṃ* at the beginning (of the mantra) and are to be uttered with *jñāna* etc. and *hṛdaya* except *netra* but with *astra* at the end, all in the dative case.[6]

(This itself becomes the mantra for removing venom)

13a. It destroys poison by the interchange of the middle and first syllables of (Garuḍa) mantra.[7]

(Greatness of that mantra)

13b-14. This (Garuḍa) mantra is stated to be hard to be obtained even to gods. O eminent sages! the Garuḍamantra contains five syllables. It contains, as stated before, five limbs with syllables together with *anusvāra*.

(Difference in the positions of Garuḍa according to the main idol of Bhagavān)

15-16. Garuḍa is to be installed according to the precepts with this mantra associated with its limbs. The form of Garuḍa shall be in the standing posture when the idol in the main temple is in the standing position or (in a posture), about to go in a vehicle when the main idol is in a vehicle. It must be seated or well-stationed when it (main idol) is in a reclining (or lying) or sitting posture.

5. Garuḍamantra: *Oṃ pakṣiṇe svāhā*.
6. Aṅgamantras of Garuḍa:
   1. *Oṃ suparṇāya jñānāya hṛdayāya namaḥ*
   2. *Oṃ vakratuṇḍāya aiśvaryāya śirase svāhā.*
   3. *Oṃ suparṇāya śaktaye śikhāyai vauṣaṭ.*
   4. *Oṃ khageśvarāya balāyakavacāya huṃ.*
   5. *Oṃ anantavīryāya vīryāya astrāya phaṭ.*

   paṃ kṣiṃ and *neṃ* to be taken with each.
7. *Kṣipa* is the form of the mantra.

पुनर्निगमयति — **सोऽयम्** इति सार्धेन ।

भगवन्मूलबिम्बानुसारेणास्याप्यवस्थानभेदमाह — **साङ्गेन** इति द्वाभ्याम् ।

[अध्यायान्तरोक्तगरुडलक्षणानि]

द्वारावरणदेवानां ध्यानाध्याये विशेषतः ।
ध्वजारोहेऽपि सुव्यक्तं लक्षणं चास्य वक्ष्यते ॥ १७ ॥

[भोगयागान्तमर्चनम्]

एवं ज्ञात्वा यथाकालं तन्मन्त्रनिरतो द्विजाः ।
स्नात्वा तदीयमन्त्रेण कृतपादावनेजनः ॥ १८ ॥
उपस्पृश्य यथान्यायं प्रासादं सम्प्रविश्य च ।
स्वासने सुखमासीनः प्राङ्मुखो वाप्युदङ्मुखः ॥ १९ ॥
करशुद्धिं च दिग्बन्धं प्राणायामं समाप्य च ।
भूतशुद्धिं च विधिवन्मन्त्रविन्यस्तविग्रहः ॥ २० ॥
पक्षीशमुद्रां बध्वाथ हृदयाम्भोरुहोदरे ।
स्वानन्दधामनिष्ठस्य देवस्य चतुरात्मनः ॥ २१ ॥
सङ्कर्षणांशात्सम्पूर्णविज्ञानबलसङ्कुलात् ।
अवतार्यामृतैर्भोगैर्जपान्तं प्राग्वदर्च्य च ॥ २२ ॥
ततो मूर्तैर्यजेद्वाह्ये प्रागुक्तैर्भोग[1] सञ्चयैः ।
पात्रशिष्टैश्च देवान्नैः साधितैः पृथगेव वा ॥ २३ ॥
तदर्थं कल्पयेत् प्राग्वदर्घ्याद्यं पात्रपञ्चकम् ।
द्वितयं चाथवैकस्मिन् पाद्यं स्नानीयवारि च ॥ २४ ॥
अर्घ्याचामे तदन्यस्मिन्नेकस्मिन् सकलं तु वा ।
प्राग्वत् स्वदेहविन्यस्तान् मन्त्रानभ्यर्च्य मन्त्रवित् ॥ २५ ॥

गरुडलक्षणं तु वक्ष्यमाणं ज्ञेयमित्याह —**द्वार** इति ।

अथ भोगयागान्तमर्चनक्रममाह — **एवं ज्ञात्वा** इत्यारभ्य **सत्याख्याः कर्णिकोपरि** इत्यन्तैः । ''अनन्तादींश्च नागेशान् न्यसेद्वामकरादिषु' इत्यत्र —

१. प्रागुक्तैर्भाग - A

(Marks of Garuḍa mentioned in other chapters)

17. The evident marks of this (Garuḍa) are mentioned especially in the chapter[8] on meditating upon the deities in the enclosure at the entrance and when the flag is raised.

(Worship up to the end of worship in bhoga)

18-38. O brahmins! knowing thus, he (priest), who is devoted to his (Garuḍa's) mantra, shall bathe (and offer worship at the right time) with his mantra. After washing the feet and sipping (the water), he shall enter the temple according to rule and shall sit in his seat comfortably facing east or north. He shall cleanse his hands, do Digbandha and Prāṇāyāma, doing Bhūtaśuddhi according to rule and *nyāsa* with the mantras on his body. He shall form the *mudrās*[9] of the lord of birds (Garuḍa) and bring him (Garuḍa) into the lotus of the heart from the part of Saṁkarṣaṇa, filled with the entire knowledge and strength of the lord of the nature of four deities[10] and stationed in the abode of his bliss. He shall be worshipped as before with immortal pleasurable services up the end of *japa*. He shall then be worshipped with concrete pleasurable things externally. The five vessels for *arghya* etc. are to be arranged as before for him (Garuḍa) with the food (offered to God), remaining in the vessels or prepared separately. Or, *pādya* and water for bath, both in one and *arghya* and *ācamana* in another vessel or all in one (vessel). He who knows the mantras shall worship, as before, the mantras placed in his own body with *arghya* etc. upto the offer of incense. He shall then arrange for seat at the four doors (entrances) for the lord of Vāstu, lord of Kṣetra, Lakṣmī at the entrance (using) with their mantras,[11] and for the group (of deities) from Caṇḍa and others. Ādiśeṣa, Dharma etc. eight deities[12] are to be placed in due order. Above them are to be placed the

8. Ch. II
9. Garuḍamudrā: also called Pakṣirājamudrā: See *JS.* VIII.42b-46a; *Pād. S. caryā.* XXI.57-58; *SKS. Ṛṣi.* II.52-53.
10. The four deities are Vāsudeva, Saṁkarṣaṇa, Pradyumna and Anirudha.
11. Vāstvīśamantra: *Oṃ vāstvīśāya namaḥ;*
    Kṣetrapālamantra: *Oṃ kṣaum kṣetrapālāya namaḥ;*
    Lakṣmīmantra: *Oṃ lāṃ lakṣmyai namaḥ.*
12. Ādiśeṣa, Dharma, Jñāna, Aiśvarya, Vairāgya, Adharma, Ajñāna, Anaiśvarya and Avairāgya.

''अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः । तक्षकः कटिसूत्रं तु हारः कार्कोटकस्तथा ॥

अर्घ्याद्यैर्धूपपर्यन्तैस्ततो द्वारचतुष्टये ।
वास्त्वीशं क्षेत्रनाथं च द्वारलक्ष्मीं स्वमन्त्रतः ॥ २६ ॥
चण्डाद्यं च गणं प्राग्वदासनं कल्पयेत् ततः ।
शेषपूर्वं च धर्माद्यमष्टकं विन्यसेत् क्रमात्[2] ॥ २७ ॥
तदूर्ध्वेऽव्यक्तपद्मं च धामत्रयसमन्वितम् ।
समभ्यर्च्य च गन्धाद्यैर्गणनाथादिकानपि ॥ २८ ॥
हृत्पद्मकर्णिकामध्ये मानसैरर्चितं पुरा ।
स्वविद्यया समावाह्य स्वस्थानाद्बिम्बहृत्कजे ॥ २९ ॥
सकलीकृत्य विधिवदङ्गभूषणलाञ्छनैः ।
किरीटं वनमालां च विन्यस्य तदनन्तरम् ॥ ३० ॥
अनन्तादींश्च नागेशान् न्यसेद्वामकरादिषु ।
सत्याख्यया दक्षिणतो बलशक्त्या स्वरूपया ॥ ३१ ॥
गाणित्रकं[3] च मन्दारकुसुमस्तबकं तथा ।
कलशं चामृताधारं फणीन्द्रं दक्षिणादितः ॥ ३२ ॥
शक्तिः प्रागुदिता तस्य बलधर्मस्वरूपिणी ।
पक्षीशमुद्रां सन्दर्श्य लययागं समाचरेत् ॥ ३३ ॥
भोगयागश्च कर्तव्यः पद्मपीठतलोपरि ।
प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ॥ ३४ ॥
विदिक्पत्रेषु चैवास्त्रमेषां वर्णानि पूर्ववत् ।
रूपलावण्यभूषाद्यैर्मूलमन्त्रशरीरवत् ॥ ३५ ॥
किरीटं वनमालां च न्यसेद्देशिकसत्तमः ।
पुरस्तात् तिष्ठतश्चास्य दक्षिणोत्तरयोः क्रमात् ॥ ३६ ॥

२. क्रमाम् - A
३. गणितृत्वम् - B

unblossomed lotus with the three luminaries. After worshipping Gaṇanātha[13] and other deities with sandal paste etc., he (Garuḍa) who was worshipped before mentally in the midst of the *karṇikā* of the lotus of the heart shall be brought, with his mantra[14] from that place into the lotus of the heart of the idol. Differentiating[15] him with limbs, ornaments and marks *nyāsa* of Kirīṭa and Vanamālā and of Ananta and other lords of serpents are to be done in the left hand. Other *nyāsas* shall be done in the right hand on the rosary garland, with the power of *bala* called Satya, also to bunches of Mandāra flowers, and to pitcher having nectar, lord of the serpents from the southern (right side) direction. His power, which is of the nature of *bala*, was already stated. Layayāga shall of be done showing the *mudrā* of the Lord of birds (Garuḍa). Bhogayāga shall be done on the surface of Padmapīṭha Hṛdaya etc. as before on the petals of the lotus in the east and other quarters and Astramantra on the petals in the intermediate directions. Their colours shall be as (stated) before, colour, beauty, ornaments etc. are to be as in the body of Mūlamantra[16] (of Garuḍa). The eminent preceptor shall do *nyāsa* on the crown and Vanamālā. In the order of south and north as he stands facing

13. Gaṇanātha must mean any of the four subordinates to Viṣvaksena, e.g., Gaṇanāṭha.
14. Garuḍamantra: see above 5.
15. *sakalīkṛtya*: the mantras are made of words. In this state, they are differentiated (*sakalīkṛta*); *sakala:* having parts. *Bindu*, which is the stage next to that of *nāda* in its evolution is called undifferentiated (*niṣkala*). This applies also to God, who is undifferentiated (*niṣkala*) becames differentiated by possessing parts (*sakala*) like body, ornaments and others.
16. Mūlamantra of Viṣvaksena is meant.

पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः । शङ्खः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे ॥'' इति वक्ष्यमाणरीत्यानन्तादिन्यासो ज्ञेयः ।

चतुष्टयक्रमेणैव शेषाद्याः पन्नगेश्वराः[४] ।
अग्नीशरक्षोवायव्यकोणेषु विहगेशितुः ॥ ३७ ॥
चतुष्टयं गणित्राद्यं विन्यसेत् तु यथाक्रमम् ।
दक्षिणे विहगेशस्य सत्याख्याः कर्णिकोपरि ॥ ३८ ॥

[भोगयागे सत्यादिगरुडव्यूहस्यार्चनं ध्यानं च]

प्राणापानसमानोदानव्यानप्राणरूपिणः ।
मध्यस्थस्य खगेशस्य बहिः प्रागादितः क्रमात् ॥ ३९ ॥
सत्यः सुपर्णो गरुडस्तार्क्ष्यश्च विहगेश्वरः ।
पञ्चात्मकस्य प्राणस्य विकारस्त्वेष पञ्चधा ॥ ४० ॥
सत्याद्या दिक्षु चत्वारः कोणेषु विहगेश्वरः ।
ध्यानमेषां विशेषेण समासात्कथ्यतेऽधुना ॥ ४१ ॥
आचाङ्घ्रिगोचराः सर्वे यस्य देहस्तु पौरुषः ।
द्विभुजस्तुहिनाभस्तु स सत्यः प्राणदैवतम् ॥ ४२ ॥
सुपर्णः पद्मरागाभो निर्मलः स्वर्णलोचनः ।
गरुडः काञ्चनाभस्तु कुटिलभ्ररुणेक्षणः ॥ ४३ ॥
केकराक्षस्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभः ।
द्रवत्कनकनेत्रस्तु शैवलाभश्च[५] पञ्चमः ॥ ४४ ॥
चतुर्भुजाः सुपर्णाद्याः सौम्यरूपा ह्यनाकुलाः ।
पतत्रिचरणाः सर्वे पक्षमण्डलमण्डिताः ॥ ४५ ॥
लम्बोदराः सुपीनाङ्गाः कुण्डलाद्यैर्विभूषिताः ।
कुटिलभ्रूसुवृत्ताक्षा वज्रतुण्डाः सितాननाः ॥ ४६ ॥

४. पञ्चखेश्वराः - B
५. शबलाभिस्तु - B, शबलाभस्तु - D, E

east. Śeṣa and other chief serpents are to be placed (*nyāsa*), in the order of the four corners—south-east, north-east, south-west and north-west— of the lord of birds. *Nyāsa* must be done in due order to the rosary garland and others. The powers Satya and others are to be placed on the *karṇikā* to the right of the Lord of birds.

(Worship of Satya and other divisions of Garuḍa and meditation on them in Bhogayāga)

39-51. The divisions of the lord of birds who is in the centre as Satya, Suparṇa, Garuḍa, Tārkṣya and Vihageśvara are of the forms respectively of Prāṇa, Apāna, Samāna, Udāna and Vyāna[17] external to him in the quarters beginning from the last. Then five modifications are of Prāṇa which is of five natures.

Satya and other lords of birds are four in the (four) quarters, at the corners. The method of contemplation upon them is now stated in a special way and briefly.

All these are visible upto the feet. Satya has the human body with two hands and has the complexion of snow. He is the deity of Prāṇa. Suparṇa is of the colour of the ruby, spotless and has golden (coloured) eyes. Garuḍa is of the colour of gold, has red eyes with curved eyebrows. Tārkṣya has squint[18] eyes and is of the colour of the winter cloud. The fifth (Vihageśvara) has eyes resembling molten (liquid) gold, and is like moss. Suparṇa and others have four arms, gentle form and unruffled. Their feet are of the birds and are bedecked with the circle of wings. They have protuberant belly, stout limbs, ornamented with ear-rings, round eyes with curved eye-brows, hard-beaked and white faces. They are stationed controlling the Apāna and other winds. They are of great strength and have huge body. The fifth (Vihageśvara) has a red beak. All the eminent birds having the palms of flowers with both the hands having the rosary garland interwoven between each thumb. Suparṇa bears the bunch of Mandara flowers with the hind hands, right and left and (putting) Vismayamudrā.[19] Garuḍa bears them with the two hands

17. The five vital airs are enumerated in an order different from the well-known.
18. *kekara:* squint eye. This word is found used mostly in literary works written after the 6th century A.D.
19. Vismayamudrā: a pose of the hands and fingers indicating astonishment. This is not found treated in the Āgama texts.

अत्र भोगयागे सत्यादिगरुडव्यूहस्याप्यर्चनं ध्यानं चाह —**प्राणापान** इत्यारभ्य **वामेन तु फणीश्वरम्** इत्यन्तैः। केकराक्षः केकरे वक्रेऽक्षिणी यस्य स तथोक्तः। "वलिरः केकरे" इत्यमरः (२-६-४९)। केकरपदेनैव वक्राक्षत्वे सिद्धेऽप्यत्र पृथगक्षिपदनिर्देशात् केकरशब्दस्य वक्रमात्रपरत्वं द्रष्टव्यम्।

अपानादिसमीराणामाधिपत्येन संस्थिताः।
महाबला महाकाया रक्ततुण्डोऽत्र पञ्चमः॥ ४७ ॥
स्वस्वाङ्गुष्ठद्वयप्रोतगणित्रोभयपाणिना।
पुष्पाञ्जलिधराः सर्वे मुख्येन विहगोत्तमाः॥ ४८ ॥
सुपर्णः पश्चिमाभ्यां तु पाणिभ्यां दक्षिणादितः।
मन्दारपुष्पस्तबकं दधद्विस्मयमुद्रिकाम्॥ ४९ ॥
तथाविधाभ्यां गरुडस्ते धत्ते व्यत्ययेन तु।
तार्क्ष्यः पश्चिमयोर्नित्यं धत्ते दक्षिणवामयोः॥ ५० ॥
कद्रूं तथामृतं कुम्भं पञ्चमो विहगेश्वरः।
दक्षिणेन सुधाकुम्भं वामेन तु फणीश्वरम्॥ ५१ ॥

[गरुडव्यूहस्य भगवत्परत्वाद्यवस्थानुसारेण परिवारत्वम्]

नित्योदितस्य व्यूहस्य तथा शान्तोदितस्य च।
प्राणापानादिवायूनां पञ्चानामपि नामभाक्॥ ५२ ॥
गरुडः परिवारत्वे ध्वजत्वेऽपि विशेषतः।
योजनीयस्तथान्येषु सुषुप्त्यादिपदेषु च॥ ५३ ॥
वासुदेवादिमूर्तीनां चतुर्णां क्रमशस्त्वमी।
सत्याद्यास्तार्क्ष्यपर्यन्तास्तत्तन्मूर्त्यन्तरेषु च॥ ५४ ॥
त्रिषु त्रिषु समादेयाः सत्याद्याः केशवादिषु।
पद्मनाभादिमूर्तीनां पञ्चमो विहगेश्वरः॥ ५५ ॥

पारमेश्वरव्याख्याने तु "केकराक्षः भगवद्ध्यानवशादर्धोन्मीलितलोचन इत्यर्थः" इति लिखितं तदपहास्यतमम्।

एतद्गरुडव्यूहस्य भगवत्परत्वाद्यवस्थानुसारेण परिवारत्वमाह — **नित्योदितस्य** इति चतुर्भिः। नित्योदितस्य स्वविभूत्यनुभवदशाविशिष्टस्य। शान्तोदितस्य स्वात्ममात्रानुभवदशाविशिष्टस्य। सुषुप्त्यादिपदेषु सुषुप्तिस्वप्नजाग्रत्तुरीयव्यूहपदेषु।

in the reverse way. Tārkṣya[20] bears always Kadrū with the hind right and left hands. Vihageśvara, the fifth, holds the pitcher of nectar. The fifth Lord of birds bears the pitcher of nectar and lord of snakes with the left hand.

(Division of Garuḍa become the retinue according to the station of Para and others of Bhagavān)

52-55. Prāṇa, Apāna and other divisions of the five winds belonging to the division ever-rising and Śāntodita[21] have their names Garuḍa, must be associated with being a (member) of retinue and flag and also in other stages like deep sleep etc.[22] These from Satya to Tārkṣya belong in this order to the positions in the four forms of Vāsudeva and others, Satya and others are to be taken (placed) three by three in between Keśava and other forms. Vihageśvara, the fifth, will be for Padmanābha and other forms.

20. Kadrū and Vinatā were the wives of sage Kaśyapa. The former gave birth to serpents and the latter to Garuḍa and Aruṇa. When the divine horse Uccaiśravas arose from the milky ocean as it was churned, Kadrū and Vinatā had a wager regarding the colour of the tail of the horse: Vinatā held it to be white, Kadrū maintained it to be black and had her children the serpents twain round the tail, declaring it to be black. According to the wager, Vinatā became a slave of Kadrū. Kadrū agreed to release Vinatā from slavery on condition that nectar is brought to her. Garuḍa went, thereupon, to heaven, fought with Indra and brought the pitcher containing nectar. He placed it on *darbhas* and asked the snakes to take bath and receive nectar. In the meanwhile, Indra snatched away the pitcher containing nectar. Few drops of nectar were sprinkled the *darbhas* which the snakes licked and it is said that their tongues became therefore forked. Vinatā was then relieved of her slavery. Here Tārkṣya, one of the forms of Garuḍa, is described as holding Kadrū with the right hand and the pitcher of nectar with the left. Garuḍa is described as holding the pitcher of nectar with the right hand and the lord of serpents with the left.
21. Here the divisions of Garuḍa is stated to be *nityodita* ever active and *śāntodita*, spasmodically active, thereby meaning that Garuḍa represents the *śāntodita* stage, others that of *nityodita.*
22. The four stages are meant here: *jāgrat, svapna, suṣupti,* and *turīya.*

परत्वाद्यवस्थापञ्चानां सर्वेषामप्येक एव प्रथमोपात्तगरुड: परिवार: स्यादिति पक्षान्तरमाह —

[मूर्त्यन्तराणां विभवानां च पक्षान्तरम्]

परात्परपरव्यूहव्यूहान्तरतनोर्विभो: ।
प्रादुर्भावतनोश्चापि जगद्रक्षणकाङ्क्षिण: ॥ ५६ ॥
खगानां कारणत्वाच्च प्रागुक्तो वा खगेश्वर: ।
इति ते गरुडव्यूहप्रभाव: सम्प्रकाशित: ॥ ५७ ॥

[कुमुदादीनामर्चनं तदनुयायिनां पूजास्थानानि]

कुमुदाद्यास्ततो बाह्ये शक्राद्यास्तद्बहि: क्रमात् ।
तद्बहि: कुमुदादीनां भूतेशाश्चोत्कटादय: ॥ ५८ ॥
गणेश: पूजनीयो वा तदग्रे बलिमण्डपे[६] ।
महापीठेऽथ वा पूज्या: गरुडस्यानुयायिन: ॥ ५९ ॥
पालयन्तश्च तद्भक्तान् दिव्यान्यायतनान्यपि ।

[तेषां मुख्यामुख्याधमक्रमेण पूजाविकल्प:]

ध्यात्वैवमर्चनं कुर्यादासनाद्यैर्यथोदितै: ॥ ६० ॥
चतु:षष्ट्युपचारैर्वा द्वात्रिंशद्भिस्तु वेतरै: ।
षोडशैरुपचारैर्वा मुख्यमध्याधमक्रमात् ॥ ६१ ॥

[गरुडनिवेदितान्नादिविनियोगक्रम:]

तन्निवेदितमन्नाद्यं नराणां रोगिणां सदा ।
वन्ध्यानां वनितानां च जयेच्छूनां च भूभुजाम् ॥ ६२ ॥
विषोपहतवेषाणां प्रदद्यात् संविभज्य च ।

परात्पर इति द्वाभ्याम् । परात्परो नित्योदित: । पर: शान्तोदित: । व्यूहा वासुदेवादय: । व्यूहान्तराणि केशवादय: । प्रादुर्भावा: पद्मनाभादय: ।

आवरणदेवानाह — **कुमुदाद्या:** इति सार्धद्वाभ्याम् । उत्कटादय: पारमेश्वरोक्ता ज्ञेया: ।

तदर्चनक्रममाह — **ध्यात्वा** इति सार्धेन ।

तन्निवेदितविनियोगमाह — **तन्निवेदितम्** इति सार्धेन ।

६. मण्डले - D

(Another view of other forms and divine descents)

56-57. For the lord in this supreme, beyond the supreme division and other divisions, having the form with which he appears and is eager to protect the world, the lord of the birds is mentioned at first as he is the cause for the creation of birds. Thus the glory of Garuḍa's divisions is made clear to you.

(Worship of Kumuda etc. and the places of worship for those who follow him)

58-60a. Kumuda etc. are to be stationed outside. Indra and others still beyond. The lords of spirits Utkaṭa[23] and others are to be placed outside the place of Kumuda etc. Gaṇeśa must be worshipped in front of them in the pavilion intended for *bali.* Or, the followers of Garuḍa are to be worshipped in the Mahāpīṭha, who protect his devotees and the charming temples also.

(Alternatives in doing worship according to (their position) as prominent, not prominent and low)

60b-61. Having adored thus, worship must be done providing seats etc. as prescribed with 64 or 32, 16 services in the order of main, middle and low.

(Method for distributing food etc. offered to Garuḍa)

62-63a. Food etc. which were offered to him (Garuḍa) shall be apportioned and given to people suffering from diseases, barren women, kings who seek victory and those whose forms are affected by poison.

23. Utkaṭa, Vikaṭa and others are meant here; vide: *SKS. Indra.* VII.9; *Pāram. S.* mentions these and others numbering fifth XVII.149b-156.

[विशेषार्चनकालः]

आर्द्रायां प्रतिमासं तु विशेषेणैवमर्चयेत् ॥ ६३ ॥
उत्सवेषु विशेषेण भ्रामयेदुत्सवार्चया ।
इति सम्यक् समाख्यातं गरुडस्यार्चनं परम् ॥ ६४ ॥

[विष्वक्सेनार्चनम्]

विष्वक्सेनार्चनं त्वद्य पौष्करोक्तं तु कथ्यते ।
शृणुध्वं मुनयः सर्वे सावधानेन चेतसा ॥ ६५ ॥

[विष्वक्सेनस्याराधनप्रयोजनकालद्रव्यस्वरूपाणि]

पौष्कर उवाच –
किमर्थमाह भगवन् विघ्नोच्छेदकरं प्रभुम् ।
समस्तविघ्ननाथानां परमं कारणं च यत्[७] ॥ ६६ ॥
विष्वक्सेनस्तु यष्टव्यो भोगभूमि[८]गतेऽच्युते ।
कैर्द्रव्यैः केन विधिना किं करोत्यभिपूजितः ॥ ६७ ॥
श्रीभगवान्[९] –
भाविनां भाविनो[१०] विघ्नाः सद्धर्मविनिवारकाः ।
न यागयज्ञधर्माद्यैर्मन्ये संसारिणां शुभम् ॥ ६८ ॥
तत्प्रवृत्तौ तु ये विघ्नाः प्रोत्साहविनिवारकाः ।
व्यपयान्ति[११] च ते सर्वे चक्रज्वालाभयार्दिताः ॥ ६९ ॥

तद्वैशेषिकोत्सवादिकमाह — **आर्द्रायाम्** इति सार्धेन । अथ क्रमप्राप्तं विष्वक्सेनार्चनं पौष्करसंहिता-विंशाध्यायेनैव दर्शयति — 'विष्वक्सेनार्चनम्' इति प्रक्रम्य 'इति सम्यक् समाख्यातं विष्वक्सेनार्चनं परम्' इत्यन्तम् । भोगभूमिगतेऽच्युते भोगभूमेर्मण्डलाग्न्यादियागस्थानाद्गते विसर्जिते सतीत्यर्थः ।

प्रागार्जितेन केनापि कर्मणा चैव साम्प्रतम् ।
अनुभुङ्क्ते फलं यागाद्विविधं चाग्रतः स्थितम्[१२] ॥ ७० ॥

७. यः -A
८. भोगभूमौ - पौ
९. श्रीभगवान् उवाच - D, E
१०. बहवो - पौ
११. व्यपारयन्ति - A व्यापयन्ति - B, D, E
१२. स्वकम् - पौ

(Method of doing special worship)

63b-64. Special worship is to be done in Ārdrā star every month. He must be taken round particularly during festivals along with the Utsava idol. The great worship of Garuḍa is described (told) well.

(Viṣvaksenārcana)

65. Viṣvaksena's worship is now stated as dealt with in the *Pauṣkarāgama.*[24] O sages! all of you listen with an attentive mind.

(Nature of Time, materials which are of use for worshipping Viṣvaksena)

66-76a. Pauṣkara said: "O lord! what for is Viṣvaksena to be worshipped when the Lord had gone to the region of enjoyment — (Viṣvaksena) the Lord who destroys obstacles and the great cause for all lords of obstacles? With what materials, which method, and what does he do when worshipped?"

Śrī Bhagavān said: "Obstacles which would recur keeping off the good Dharma of good people and which ward off enthusiasm while activities are taken up (to do *dhāraṇā*) go away, all of them oppressed by the fear of flames of discus. I consider that no good is available to those in bondage by worships, sacrifices, *dhāraṇā* and others."

24. See *Pauṣkarāgama* ch. XX.

तस्य संरक्षणार्थं तु विष्वक्सेनस्तदैव हि ।
काले यागावसानाख्ये द्वितीये वासरेऽथवा ॥ ७१ ॥
कृत्वा निर्व्याकुलं चित्तं यष्टव्यः फलसिद्धये ।
यागनिर्वर्तनाच्छेषैरम्लानैरर्घ्यपूर्वकैः[१३] ॥ ७२ ॥
उपचारमयैर्भोगैः सर्वैराभरणादिकैः ।
नैवेद्यैर्मधुपर्काद्यैर्मुख्यमूर्तेर्निवेदितैः ॥ ७३ ॥
द्विजप्रदानशिष्टैस्तु स्वयम्प्राशनवर्जितैः ।
तथा चर्वन्तरस्थैश्च ह्यपरेभ्योऽनिवेदितैः ॥ ७४ ॥
संस्कृतैरूष्मलोपेतैर्मधुराज्यपरिप्लुतैः ।
पौष्करः[१४] —
क एषोऽतुलवीर्यो हि यस्य दूराद्द्रवन्ति च ॥ ७५ ॥
विघ्ना निमेषमात्रेण त्रैलोक्योन्मूलनक्षमाः ।

[तस्य द्विजदेवाख्यत्वोपपादनम्]

भगवान्[१५] —
कालवैश्वानराख्या या मूर्तिस्तुर्यात्मनो विभोः ॥ ७६ ॥
स एव द्विजदेवो हि विष्वक्सेनः प्रकीर्तितः ।
स्थित आहवनीयादिभेदेन मखयाजिनाम् ॥ ७७ ॥
ऋक्पूतं हुतमादाय तर्पयत्यखिलं जगत् ।
एवं मन्त्रमयाद्यागात् सात्त्विकाद्ब्रह्मभावितात् ॥ ७८ ॥
सम्प्राप्य गुरुमूर्तेर्वै प्रापणं मन्त्रसंस्कृतम् ।
अनाहुतामराणां च सर्वलोकनिवासिनाम् ॥ ७९ ॥

'काले यागावसानाख्ये द्वितीये वासरेऽथवा' इत्यत्र यागानन्तरमेव भगवद्विसर्जने कृते तदानीमेव विष्वक्सेनार्चनकालः । तदा विसर्जनाकरणे द्वितीयवासरादौ भगवद्विसर्जनानन्तरं तदर्चनकाल इति भावः । एवमर्चनकालो मण्डलवह्न्याद्यर्चनप्रकरणे ज्ञेयः ।

१३. पूजकैः - B, E
१४. पौष्करः उवाच - D, E
१५. भगवान् उवाच - D, E

Man now experiences the fruit of some deed done before. The fruit is of various kinds by doing worship. Viṣvaksena is to be worshipped then itself, to protect it, at the time of completing worship or on the second (next) day, with the mind free from confusion, for success in getting the result. (This is to be done) with what remains after performing worship, *arghya* etc. which have not faded; enjoyable services, all ornaments, food offerings, Madhuparks, which have been offered to the main deity; which remain after having been offered to the brahmins, which have not been eaten by himself (priest), kept in other vessels (earn) (preparations) and not offered to others; dressed; heated; and soaked in sweet ghee.

Pauṣkara: Who is this of unequalled valour and (at whose presence) the obstacles which are capable of destroying the three worlds run far away.

(Justification of the name Dvijadeva for him)

76b-80a. Bhagvān: That form called Kālavaiśvānara and belonging to the fourth form of the lord is held to be Dvijadeva who is Viśvakṣena. He is in different forms like Āhavanīya[25] and others for those who perform sacrifices. He pleases the entire world with what is offered and sanctified by *ṛk* (hymn). Thus he (Viṣvaksena) acquires the food offerings, purified by the mantras from the form of Guru, getting it from the worship full of mantras, of the *sāttvika* kind and considered to be Brahman. He himself apportions it quickly for the gods who have not been called there and are living in all the worlds, with a view to show favour to the good.

25. Āhavanīya: fire in which the oblations are offered.

स्वयंसंविभजत्याशु सदनुग्रहकाम्यया ।

[एतादृशज्ञानपूर्वं त्रिसन्ध्यमर्चनम्]

ज्ञात्वैवं तस्य माहात्म्यं वृत्तिस्थं फलसिद्धये ॥ ८० ॥

त्रिसन्ध्यं नित्यपूजायां बल्यन्ते तं समर्चयेत् ।

[कर्मारम्भेषु विष्वक्सेनार्चनस्यावश्यकत्वम्]

वत्सरोत्सवपूर्वेषु तथा वैशेषिकेष्वपि ॥ ८१ ॥
वृत्त्या[१६]द्याधारभूतेषु[१७] क्रमात् कृत्वा पुरार्चनम् ।
केवलं वाथ होमान्तं स्वशक्त्या विभवेन वा ॥ ८२ ॥
विस्तरेणाथ वा शश्वत् ततः कमलसंभव ।
कृत्वा पर्णपुटे तोयं पात्रे वा कलशेऽव्रणे ॥ ८३ ॥
तमात्मनोत्तरे भागे ह्यर्चयित्वा निवेद्य च ।
अथापरस्मिन् भाण्डे तु तदस्त्रपरिमन्त्रिते ॥ ८४ ॥
नैवेद्याद्भागमादाय तथा चर्वन्तरस्थितात् ।
ओदनादंशमुद्धृत्य दध्याज्यव्यञ्जनैः सह ॥ ८५ ॥
समालभनपुष्पार्घ्यकुशाम्बुपरिभावितम् ।
तद्धृन्मन्त्रेण बहुशो ह्यभिमन्त्र्याब्जसम्भव ! ॥ ८६ ॥
तन्मूलमन्त्रमुच्चार्य ध्यानभावनयान्वितम् ।
प्राक्सन्निवेशिते भाण्डे समुत्कीर्य पिधाय तत् ॥ ८७ ॥
प्रणवाष्टकजप्तं वा तन्नाम्ना सह पौष्कर ।
एकं वै सोदकं पात्रं सनैवेद्यं जलाप्लुतम् ॥ ८८ ॥

बिम्बार्चनप्रकरणे तु 'त्रिसन्ध्यं नित्यपूजायां बल्यन्तैस्तं समर्चयेत्' इत्युक्तम् ।

वत्सरोत्सवादिषु तु प्रारिप्सितकर्मणां निर्विघ्नतासिद्ध्यर्थं प्रथममेव तदर्चनमुक्तम् – **वत्सरोत्सवपूर्वेषु** इत्यादिभिः। आक्रान्तमनलेनेत्यत्रानलेन रेफेण, प्राणाख्यं बीजनायकं हकारं, त्रैलोक्यैश्वर्यदोपेतमनुस्वारसहितम्, ऊर्जोपरिगतमूकारशिरस्कम्, एवं च 'ह्रूम्' इति प्रथमं बीजं सिद्ध्यति । द्वितीयबीजं तु वराहं वकारम् ।

सर्वत्र सर्वदा यागे कुर्यात् प्राग्विधिना विना ।

१६. व्यक्त्या - E
१७. भेदेषु - B, E

(Worship on three Sandhyas with this knowledge)

80b-81a. Knowing thus his greatness as resting on his function for attaining the result. He is to be worshipped on three Sandhyas[26] at the end of the offering of *bali* during daily worship.

(Worship of Viṣvaksena is essential at the commencement of works)

81b-89a. Worship must be done at first on the various substrata like *vṛtta*[27] on the occasions of annual festivals and special festivals also in due order. O born of lotus! it can be done always merely till the end of *homa*, or in large scale consistent with one's capacity, or elaborately. Taking water in a cup made of leaf, or vessel or pitcher without rents, he shall be worshipped in the northern direction of one's self and make offerings. A portion of the food offerings shall be taken in the other vessel consecracted with Astramantra and a small part of cooked rice shall be taken from another vessel along with curds, ghee and *vyañjana*[28] containing unguent, flowers, *arghya* water mixed with *darbha* which are seasoned. O lotus-born! Consecrating it many a time with Hṛdayamantra, strewing it, which is imagined to have been meditated upon after uttering the Mūlamantra into the vessel kept there before and then it shall be closed. O Pauṣkara! *japa* is to be done for it with eight *Praṇavas* together with his name, one vessel containing the food offerings with water shall be always kept there.

This shall always be done in every case of *yāga*, soaked in water, without following the previous procedure.

26. Trisandhyās: three junctives: that is, meeting points of day and night, e.g., twilight in the morning (sunrise) and evening (sunset) and noon.
27. *vṛtta:* moulding of a particular shape.
28. *vyañjana:* vegetable preparation with sauce, condiments etc.

[विष्वक्सेननिवेदितस्य त्यागः]

तच्चापि क्ष्मातले कूपे तटाकादौ तु चोत्किरेत् ॥ ८९ ॥
ज्ञात्वैवं यत्नतो मन्त्री तन्मन्त्रेण समर्चयेत् ।

[विष्वक्सेनप्रतिष्ठादिमन्त्रः अङ्गमन्त्राश्च]

साङ्गं मन्त्रमथो वक्ष्ये यथावदवधारय ॥ ९० ॥
आक्रान्तमनलेनैव प्राणाख्यं बीजनायकम् ।
ततो वराहमादाय भूधरव्योमभूषितम् ।
विष्वक्सेनाय तदनु सनमस्कं पदं न्यसेत् ॥ ९२ ॥
प्रणवाद्यो ह्ययं मन्त्रो विष्वक्सेनस्य कीर्तितः ।
पूर्वबीजं हि यच्चास्य ऊकारस्वरवर्जितः ॥ ९३ ॥
आकाराद्यैश्च षड्दीर्घैर्भिन्नमङ्गगणं नयेत् ।
प्रणवेन स्वनाम्नाथ जातिभिः षड्भिरन्वितम् ॥ ९४ ॥
नमः स्वाहादिभिश्चायं विष्वक्सेनस्य वाचकः ।

[मुख्यानुकल्पभेदेन विष्वक्सेनस्थानतदर्चनादिकम्]

साङ्गेनानेन मन्त्रेण प्रतिष्ठाप्यो विधानतः ॥ ९५ ॥
प्रथमावरणे वाथ द्वितीयावरणेऽथवा ।
ईशानसोमदिङ्मध्ये प्रासादे दक्षिणामुखे ॥ ९६ ॥
मूलालयोच्चान्नीचे च कल्पिते गर्भमन्दिरे ।
ब्रह्मस्थानेऽथवा दिव्ये मूलबेरांशमानतः ॥ ९७ ॥

भूधरव्योमभूषितमौकारानुस्वाराभ्यामलङ्कृतम् । एवं च 'वौम्' इति भवति । तथा च "ॐ हूं वौं विष्वक्सेनाय नम" इति मूलमन्त्रः । एतन्मन्त्रस्य जयाख्योक्तत्वात् । एतद्वर्णसंज्ञापि जयाख्ये तदुपबृंहणे लक्ष्मीतन्त्रे वा द्रष्टव्या । 'साङ्गेन' इत्यादिभिः

कल्पितस्य शिलादारुलोहपूर्वैस्तु वस्तुभिः ।
पूजनं मुख्यकल्पं स्यादनुकल्पेऽग्रमण्डपे ॥ ९८ ॥
प्रागुक्तकोणभूभागे मेखलात्रयनिर्मिते ।
पीठेऽवतार्य गगनादमूर्तं मूर्तमेव वा ॥ ९९ ॥
केवलं बलिदानेन तर्पयेदुदकेन च ।

(Leaving of what is offered to Viṣvaksena)

89b-90a. This can be scattered on the ground, well, tank and other places. Knowing thus he (priest) who knows the mantra shall worship him (Viṣvaksena) with his mantra and with efforts.

(Mantra for the installation of Viṣvaksena and Aṅgamantras)

90b-95a. Then I shall tell the mantra with its parts, understand it as it is The mantra is called Prāṇa,[28] lordly *bīja*, (*ha*)[29] shall be taken with *anala (r)* associated with that which offers the sovereignty of the three worlds (*anusvāra*) above *u*. Then take *varāha*[30] (*v*) ornamented by *bhūdhara (au)* and *vyoma* (*anusvāra*). The word with *namas* shall be placed after the word Viṣvaksenāya. This mantra,[31] which begins with *Praṇava*, is stated to be that of Viṣvaksena. The first (earlier) mentioned bījamantra without *ā* and differentiated with *ā* and others and six long letters shall be the group of Aṅgmantra with *Praṇava*, its name and associated with six *jātis*. This denotes Viṣvaksena with *namaḥ*, *svāhā* and others.

(Position of Viṣvaksena and his worship etc. with its divisions as primary and secondary)

95b-100a. He (Viṣvaksena) is to be installed, according to rule, with this mantra together with its parts in the first or second enclosure facing south in the temple in between north-east and north. The sanctum sanctorum shall be arranged (of a height) lower than the height of the main temple, or in the place of the Brahman or divine place, to the measurement of the main idol made of substances like stone, wood, metal. This is the worship of the primary kind. In the secondary kind, (installation shall be) in the front pavilion, in the region of the corner stated before, prepared with three ridges. He (Viṣvaksena) shall be brought down on the pedestal from the sky whether formless or having form and pleased merely with the offering of *bali* and water.

29. *prāṇākhyaṃ bījanāyakam: ha*
30. The second *bīja: varāha: v.*
31. *vau* is the resulting form; the Mūlamantra of Viṣvaksena is *Oṃ huṃ vau viṣvaksenāya namaḥ*
cf. *Oṃ rhuṃ vauṃ jñānadāya namaḥ LT.* XXXIII.

[तदर्चनकालादि]

चतु:स्थानावतीर्णस्य मण्डलादिषु वृत्तिषु ॥ १०० ॥
परव्यूहादिरूपस्य देवस्य यजनावधौ ।
प्रासादान्तर्गतस्यापि स्वस्थानस्थस्य मण्डपे ॥ १०१ ॥
पूजनं विधिवत् कार्यमारम्भदिवसादित: ।
सर्वकर्मावसाने तु मण्डलादिगते विभौ ॥ १०२ ॥
स्वे स्वे धाम्नि विसृष्टे तु ध्यात्वा मण्डलमध्यत: ।
पूजयेद्विधिवन्मन्त्री द्वितीये वासरेऽपि च ॥ १०३ ॥
भगवद्यजनार्थं तु प्रासादस्थं विशेषत: ।
यथाविधि समभ्यर्च्य नैवेद्यैस्तन्निवेदितै: ॥ १०४ ॥
अर्घ्याद्यैरखिलैरन्यैस्ताम्बूलाद्यैश्च नित्यश: ।
जलस्थलादिनियलांस्तद्भूतांश्चाथ तर्पयेत् ॥ १०५ ॥

मुख्यानुकल्पभेदेन विष्वक्सेनस्थानतदर्चनादिकमुक्तम् । अमूर्तं निष्कलम्, मूर्तं सकलमित्यर्थ: । 'चतु: स्थानावतीर्णस्य' इत्यदिभिर्महोत्सवादिषु चतु:स्थानार्चनानन्तरं प्रत्यहं प्रासादाग्रमण्डपान्यतरस्थितस्य विष्वक्सेनस्याप्यर्चनम्, उद्वासनदिने भगवद्विसर्जनानन्तरं मण्डलादिष्वेव तदर्चनादिकं चोक्तम् ।

[उत्सवार्चाकल्पनम्]

प्रासादस्थस्य तस्याथ देहमानानुसारत: ।
कृत्वा हेमादिभिर्द्रव्यैर्विशेषार्चां विधानत: ॥ १०६ ॥
उग्रां वा शान्तरूपां वा विघ्नविध्वंसनक्षमाम् ।
चतुर्भुजां वा द्विभुजामासीनां वाथ सुस्थिताम्[१८] ॥ १०७ ॥
द्विभुजस्य[१९] चतुर्हस्तामन्यथा वा प्रकल्पिताम् ।
वैशेषिकेषु प्राप्तेषु पूजयेदुत्सवार्चया ॥ १०८ ॥
मृगयाद्युत्सवे प्राप्ते यत्र यत्र व्रजेत् प्रभु: ।
तत्र तत्र नयेदेनां निर्विघ्नफलसिद्धये ॥ १०९ ॥

१८. वा समुत्थिताम् - D, E
१९. द्विभुजां वा - B

(Time for worship of Viṣvaksena)

100b-105. Worship must be done according to the precept, from the very first day (beginning with the day of installation) to Viṣvaksena, at the end of worship to god, who has come down in the four places, *maṇḍala* and other places of action (worship) who has the form of transcendental, division etc., though he is within the temple in his own place in the pavilion. He shall be worshipped duly, from the first day by him (priest) who knows the mantras at the conclusion of all acts, when the lord is in the *maṇḍala* and other places, meditating upon him taken back to the various places, as staying in the middle of the *maṇḍala*. On the second day also, he (Viṣvaksena) must be duly worshipped, particularly when he is in the temple in order to worship the lord with the offerings, which have been offered to god with *arghya*, Tāmbūla etc. There are the beings (spirits) which reside in water, ground and other places, which must be pleased.

(Arrangement for worship during festivals)

106-109. A specific idol must be prepared, according to rule with divine (charming) gold and others ornaments, in proportion to the measurement of his (Viṣvaksena) body stationed in the temples. It (idol) shall be fierce or calm (in appearance) which shall be capable of destroying the obstalces,[32] with four or two arms, seated or standing or providing four arms to the idol having two arms. It shall be worshipped as *utsava* idol on specific occasion. During festivals like hunting, the idol shall be taken to all those places where the lord goes, so that the results would bear their fruits without obstacles.

32. Viṣvaksena is stated to help in driving away the obstacles and bring the work undertaken to a successful end;

vide: *Pauṣ. S.* XX.52 — removal of obstacles is not mentioned but a reference is made to it in *śloka* 6 *ibid.*

[ध्यानम्]

ध्यानमस्य प्रवक्ष्यामि यथावच्छृणु सत्तम ।
नवदूर्वाङ्कुराभं च त्वीषत्पीतलकान्तिभाक्[20] ॥ ११० ॥
चतुर्दंष्ट्रं चतुर्बाहुं चतुष्किष्कुं चतुर्गतिम् ।
पूर्णाङ्गं केसरिस्कन्धं पृथूरःस्थलराजितम् ॥ १११ ॥
दक्षिणावर्तनिम्नेन नाभीरन्ध्रेण शोभितम् ।
आजानुबाहुं श्रीमन्तं पिङ्गलार्चिर्जटाधरम् ॥ ११२ ॥
द्रवत्कनकपिङ्गाक्षं चिपिटं पृथुनासिकम् ।
सितदीर्घनखश्रेणीशोभितं कुटिलभ्रुवम् ॥ ११३ ॥
विस्तीर्णगण्डवदनं बालेन्दुकुटिलोपमैः ।
नवकिंश्वरुणाकारैर्लोमभिः पूर्णविग्रहम् ॥ ११४ ॥

''प्रासादस्थस्य' इत्यादिभिरुत्सवार्चाकल्पनमप्युक्तम् । ध्यानप्रकरणे – चतुर्दंष्ट्रं चतस्रो दंष्ट्रा यस्य स चतुर्दंष्ट्रः । दन्तपङ्क्तिद्वये मध्यदन्तचतुष्कमभितो द्वौ द्वौ दन्तविशेषौ दंष्ट्र इत्यभिधीयते । चतुष्किष्कुं चत्वारः किष्कवः प्रमाणं यस्य स चतुष्किष्कुः । किष्कुर्नाम चतुर्विंशत्यङ्गुलात्मको हस्तः । तथा च षण्णवत्यङ्गुलोत्सेधो इत्यर्थः । 'षण्णवत्यङ्गुलोत्सेधो यः पुमान् सः दिवौकस' इत्युक्तेः । चतुर्गतिं चतुर्णां सिंहशार्दूलगजवृषभानां गतिरिव गतिर्यस्य स चतुर्गतिः । कालभेदेन तत्तद्गतिमानित्यर्थः ।

शोभनेन प्रलम्बेन पृथुना प्रोन्नतेन च ।
माणिक्यकुण्डलाढ्येन युक्तं श्रोत्रद्वयेन तु ॥ ११५ ॥
मकुटेनोन्नतेनैव हाराद्यैरुपशोभितम् ।
चित्रकौशेयवसनं विचित्रस्रग्विमण्डितम् ॥ ११६ ॥
प्रलयद्वादशादित्यसहस्रगुणदीधितिम् ।
ईषदूर्ध्वं तथा तिर्यग्विनिपातितलोचनम् ॥ ११७ ॥
कुन्देन्दुकान्तिदशनं किञ्चिद्विहसिताननम् ।
स्वभावसौम्यममलं मायाक्रोधोपरञ्जितम् ॥ ११८ ॥
सविलासचलत्पादन्यासस्थानकसंस्थितम् ।
स्वेनान्तः करणेनैवं भावयन्तं परं पदम् ॥ ११९ ॥

२०. भूत् – D, E

(Meditation)

110-131. I shall tell about meditation. O good man! listen to it as it is (told). He has the colour of fresh tender grass, a splendour which is slightly yellow; having four prominent teeth[33] four arms, four fore arms[34] and four gaits,[35] has all the limbs in full, with a shoulder resembling that of lion, shining with a huge chest, beautified by the cavity of the navel having a depression turning from left to right; having arms extending up to the knees, charming and having matted hair of tawny colour; with tawny eyes resembling liquid gold, huge and flat nose;[36] shining with rows of white and long nails, with curved eyebrows; having a wide cheek and mouth, with the body filled with hairs comparable to curved crescent moon and their red exterior resembling new Kiṃśuka (flowers); having two huge and raised ears with the beautiful and hanging ear-rings made of rubies; shining with a very raised crest; crowned with necklaces etc.; wearing a silk of varieagated colours; bedecked with garlands of manifold colours; radiant with thousand times of that of the twelve suns of deluge; the eyes slightly raised and cast askance (aside); teeth with the complexion of Kunda flower and moon; the slightly smiling face gentle by natures, spotless and affected (coloured) by feigned anger, stationed in a posture with one foot gracefully moving, thinking of the supreme abode with the mind (inner instrument); holding three creepers in his left palm from (with) the thumb upto little fingers; one of them (creepers) bent and raised so as to reach the tip of the nose. He has a *mudrā*[37] instilling fear to the impediments. His hands hold the discus and

33. Four teeth in the midst of the two rows of teeth are called *Daṁṣṭrā*.
34. *kiṣku:* fore arms — 24 inches long.
35. Four kinds of gait: those of lion, tiger, elephant and bull.
36. *cipiṭa*: flat.
37. The Āgama texts do not mention this *mudrā*. Tarjanīmudrā may be taken to represent this, see *SKS. Ṛṣi.* II. 13b-14a.

अङ्गुष्ठादिकनिष्ठान्तं वामपाणौ लतात्रयम् ।
नमयित्वोन्नता चैका घ्राणाग्रे विनियोजिता ॥ १२० ॥
सद्विघ्नभीतिप्रदया त्वनया मुद्रयान्वितम् ।
रथाङ्गशङ्खहस्तं च लम्बमानगदाधरम् ॥ १२१ ॥
श्रोणीतटनिविष्टेन सावहेलनपाणिना ।
इत्थं रूपधरं देवमनेकाद्भुतविग्रहम् ॥ १२२ ॥
उग्ररूपमिमं ध्यायेदाग्नेयमनलप्रभम् ।
दंष्ट्रातर्जननिर्मुक्तं साभयं शान्तलक्षणम् ॥ १२३ ॥
मुख्यदक्षिणहस्तेन भक्तानामभयप्रदम् ।
तथाविधेन वामेन लम्बमानगदाधरम् ॥ १२४ ॥
पृष्ठदक्षिणवामाभ्यां चक्रशङ्खधरं क्रमात् ।
एवं चतुर्भुजस्योक्तं द्विभुजस्यावधारय ॥ १२५ ॥
उक्ताभ्यामुग्रशान्ताभ्यां चक्रशङ्खधरं विना ।
प्रागुक्तद्वितयं वाथ द्वितीयं चिन्तितं तु वा ॥ १२६ ॥
गदादिरहितं वाथ वामकट्यवलम्बितम् ।
स्थानकेनासने वाममूरुदेशे निवेशितम् ॥ १२७ ॥
गोपनीमुद्रया वाथ कटकाकारमुद्रया ।
उभाभ्यामपि पाणिभ्यां विश्रान्तं पीठपृष्ठतः ॥ १२८ ॥
अवष्टभ्य गदामूर्ध्वे मातङ्गमुसलाकृतिम् ।
प्राक्पद्मदलमाक्रम्य पादाभ्यां कर्णिकासनम् ॥ १२९ ॥
सुस्थितं कर्णिकायां वा प्राग्वदन्यैरलङ्कृतम् ।
एवं ध्यानविशेषेषु त्वेकं स्थाप्य विधानतः ॥ १३० ॥
समर्चयीत कालेषु प्रागुक्तेषु स्वमन्त्रतः ।
चतुःस्थानार्चनार्थं तु मण्डलानां तु मध्यतः ॥ १३१ ॥

[पुनः प्रकारान्तरेण स्थानानि]

पूजितेष्वथ मन्त्रेषु नियुक्तेषु स्वधामनि ।
ईशानसोमदिङ्मध्ये चतुरश्रे पुरेऽथवा ॥ १३२ ॥

conch, mace hanging down held quite easily by the hand resting on the hip. This form of the lord (Viṣvaksena), who holds a form like this having many a marvellous body and a fierce form, shall be meditated upon. This belongs to the sacred fire and has the brilliance of fire; free from fear (at the sight) of the huge teeth; affording security and marked by calmness; granting freedom from fear to his devotees with the main right hand and with the mace hanging from the left (main) hand; holding discus and conch with the hind right and left hands respectively— this is stated is for the four armed lord. Ascertain for the two armed lord as fierce and calm except having discus and conch. The two are stated or imagined of hand without the mace, or hanging from the left hip in the standing or sitting posture, placed in the region of the left thigh; resting both his hands on the back of the seat showing Gopana[38] or Kaṭakamudrā;[39] holding upwards the club resembling the elephant and pestle; occupying with his feet the petal of the lotus in the east, forming Karṇikāsana[40] or standing on the *karṇikā* decorated or embellishments as before with other (ornaments). Thus one (form) to be especially placed during specific meditations, he must be worshipped with his mantra on occasions stated before. Worship in the four places however shall be in the middle of the *maṇḍalas*.

(Sites according to a different method)

132-133. When the mantras have been adored and assigned to their places, (the site to be chosen shall be) between north-east and north, or a

38. Gopanīmudrā: *gopana:* protecting, concealing; A *mudrā* with this name is not found treated in the Āgama texts.
39. The same must be said of Kaṭakamudrā.
40. Karṇikāsana: this may be the name of a posture which is not found mentioned in the Āgama texts.

द्वारशोभाग्रनिर्मुक्ते रेखात्रितयभूषिते ।
तदन्तरेऽर्धचन्द्रस्थे कमलेऽष्टदलान्विते ॥ १३३ ॥

[तदाराधनक्रम फल मानसयागादयः]

साम्राज्येन नियुक्तेऽस्मिन् विघ्नानामच्युतेन तु ।
पूजिते विधिना शश्वदभीष्टं साधकोऽश्नुते ॥ १३४ ॥
तस्मान्मन्त्रैस्तदीयैस्तु स्नात्वा पूर्वं विधानतः ।
प्रक्षाल्य पाणिपादौ वा त्वाचम्य न्यासमाचरेत् ॥ १३५ ॥
तदधिष्ठातृकत्वेन धारणाभिः स्वविग्रहम् ।
शोधयित्वा पुनर्न्यस्य षडङ्गादिकरादितः ॥ १३६ ॥
प्राग्वदानन्दधामाच्च ह्यवतार्य तथा प्रभुम् ।
इष्ट्वा हृत्पुण्डरीके तु स्वापेक्षां निष्कलात्मकम् ॥ १३७ ॥
तमेव सकलत्वेन यातं ध्यात्वा बहिर्यजेत् ।
प्राग्वदर्घ्यादिपात्राणि प्रतिष्ठाप्य स्वविग्रहे ॥ १३८ ॥

[द्वारपालौ बलप्रबलौ]

विन्यस्तमन्त्रानभ्यर्च्य द्वारदक्षिणसौम्ययोः ।
चण्डप्रचण्डसदृशौ बलप्रबलसंज्ञितौ ॥ १३९ ॥

[पीठकल्पने विशेषः]

वायुवेगं महाघ्राणं द्वाराग्रे गरुडोपमम् ।
समभ्यर्च्य यथापूर्वं प्राग्दत्त्वा कमलासनम् ॥ १४० ॥
धर्माद्यनन्तपर्यन्तं पञ्चकं नवकं तु वा ।
सत्वेनाच्छादितं पश्चात् केवलेनाम्बुजं स्मरेत् ॥ १४१ ॥
तस्मिन्नावाह्य तं देवं हृदये ध्यानचोदितम् ।
सन्निधानादिकं कृत्वा मुद्राबन्धपुरःसरम् ॥ १४२ ॥
समभ्यर्च्यार्घ्यपुष्पाद्यैर्लययागविधानतः ।
कर्णिकामध्यगं तस्य हृदाद्यं मुख्यमन्त्रवित् ॥ १४३ ॥
पद्मच्छदान्तरस्थाश्च तदाकारद्युतिं विना ।
किंत्वङ्गानां च सर्वत्र ध्यानमुक्तं सितादिकम् ॥ १४४ ॥

quadrangular town or in a lotus with eight petals of the shape of half moon within that abode which is free from the best splendour at the entrance and adorned with three lines.

(Method of worshipping it, the result, mental worship etc.)

134-138. When his work is bound by the powerful obstacles and worship is done by his firm method, the priest, who worships, always obtains his desires. Therefore, one should take bath at first according to the precepts, or wash his hands and feet, perform *ācamana* and do *nyāsa* (Viṣvaksena) with his own mantras. He shall clean his body with *dhāraṇās*[41] as he controls it and do *nyāsa* with the six limbs and hand. He shall bring God down as before from the place of bliss and worship in the lotus of his heart. He shall meditate upon the partless (undifferentiated) deity to have become possessed of parts (limbs) and worship him externally. Installing, as before, *arghya* and other vessels in his own body, he shall...

(Bala and Prabala, the guardians of the entrance)

139. ...worship the mantras placed there. He shall adore the deities called Bala and Prabala[42] who are equal to Caṇḍa and Pracaṇḍa.

(Speciality in assigning a pedestal)

140-146. He shall worship (Viṣvaksena) as before in front of the entrance, who is moving swiftly like wind, having a huge nose, resembling Garuḍa. After giving a lotus, seat at first, he shall think of the five or nine, from Dharma to Ananta[43]— the lotus imagined with intellect. Invoking therein the heart, that deity be brought to his heart (prompted) by meditation, he (priest), who knows the important mantra, shall adore with forming the *mudrā* with *arghya*, flowers etc., according to the procedure of Layayāga, him, the foremost who is in the midst of pericarp, mentally (with the heart) to be done to them (deities) who are in other lotus-petals without his bright form. However, meditation must be done everywhere indicated by white and other colours for the limbs. He shall worship the lustrous powers called Kriyā,

41. *dhāraṇā* is of many kinds; see *LT.* XIX.16; XX.22; CL. III.16.

42. Bala and Prabala; see *SKS. Indra,* VII.42.

43. The five are Dharma, Jñāna, Vairāgya, Aiśvarya and Ananta. The nine may have these five and Adharma, Ajñāna, Avairāgya and Anaiśvarya added to them.

क्रियाख्यां तैजसीं शक्तिं स्वाहापर्यायरूपिणीम् ।
लक्ष्मीरूपधरां प्रीतां सर्वालङ्कारमण्डिताम् ॥ १४५ ॥
प्रियानुरूपां सततं स्वासीनां वाथ सुस्थिताम् ।
दक्षिणोत्तरयोगेन चामरोभयधारिणीम् ॥ १४६ ॥

[तच्छक्तिस्वरूपमन्त्रौ]

ॐ ह्रीं क्रियायै स्वाहान्तो मन्त्रोऽयं सम्प्रकीर्तितः ।
अनेन स्वामिनो देहात् तैजसाद्विघ्नसूदनात् ॥ १४७ ॥
वामपार्श्वेऽवतार्यास्य भोगयागावसानतः ।

भोगयागप्रकरणे विष्वक्सेनस्य कालवैश्वानरूपत्वात् तच्छक्तिः स्वाहापर्यायरूपिणीत्युक्तम् । तस्या एव 'सूत्रवती' इत्यपि व्यवहारः । अत्र चामरोभयधारिणीति पाठ एव सुष्ठु । पारमेश्वरव्याख्याने त्वयमेव पाठोऽङ्गीकृतः ।

[गजाननादितत्पारिवाराणां स्थानध्यानसाधारणाकारमन्त्राः]

गजाननो जयत्सेनो हरिवक्त्रो महाबलः[21] ॥ १४८ ॥
कालप्रकृतिसंज्ञश्च चतुर्थः कमलोद्भव! ।
गणराजेश्वराश्चैते चत्वारश्चण्डविग्रहाः ॥ १४९ ॥
आज्ञाप्रतीक्षकाश्चास्य सुश्वेतचामरोद्यताः ।
विनायकादयश्चैव विघ्नेशप्रवरास्तु ये ॥ १५० ॥
अमीषां गणनाथानां नित्यमाज्ञानुपालिनः ।
ईशानादिषु कोणेषु पद्मबाह्ये स्थितान्न्यसेत् ॥ १५१ ॥
वीक्ष्यमाणा विभोर्वक्त्रं तत्तुल्यस्थानके स्थिताः ।
तद्वत्कराङ्किताः सर्वे किन्तु मुद्राविवर्जिताः ॥ १५२ ॥
ध्यानमेषां पृथग्भूतं शारीरमवधारय ।
भीमद्विपेन्द्रवदनं चतुर्दंष्ट्रं त्रिलोचनम् ॥ १५३ ॥
कम्बुग्रीवं चतुर्बाहुं पूर्णचन्द्रायुतद्युतिम् ।
हारनूपुरकेयूरमेखलादाममण्डितम् ॥ १५४ ॥

२१. महाबलिः - B

having another form with the name Svāhā[44] which has taken the form of Lakṣmī, who is pleased, who is bedecked with all ornaments, who is always conformable to her spouse, well seated or standing, bearing both (two) chowries in the right and left hands.

(Mantras and form of power)

147-148a. This mantra is *Oṃ hrīṃ kriyāyai svāhā.* The priest shall bring down using this at the end of Bhoga worship, it (power) comes down to the left side of the lord from his lustrous body which destroys all obstacles.

(Mantra for place, meditation, general appearance of the secondary deities like Gajānana and others)[44]

148b-162a. Gajānana, Jayatsena, very powerful Harivaktra and with the name Kālaprakṛti as the fourth, O born of lotus! all these four are the lords

44. Kālavaiśvānara is also the name of five and so Svāhā is mentioned here as the Icchāśakti; but Sūtravatī is mentioned as the wife of Viṣvaksena;

vide: वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ॥ *Yatirājasaptati* 3.

नानास्त्रग्गन्धवस्त्राढ्यमनौपम्य[२२]पराक्रमम् ।
ध्यायेद्गजाननमतो जयत्सेनं च संस्मरेत् ॥ १५५ ॥
महत्तुरङ्गवदनं पद्मरागाचलप्रभम् ।
द्रवच्चामीकराक्षं च त्वनेकाद्भुतविग्रहम् ॥ १५६ ॥
हरिवक्त्रमतो ध्यायेत् सटाच्छुरितमस्तकम् ।
निष्टप्तकनकप्रख्यं घोरघर्घरनिःस्वनम् ॥ १५७ ॥
मृगराड्वदनं विप्राः[२३] कल्पान्तानल[२४]वेगिनम् ।
कालप्रकृतिनामानं भावयेदञ्जनाद्रिवत् ॥ १५८ ॥
दंष्ट्राकरालवदनं पिङ्गलश्मश्रुलोचनम् ।
झषकुण्डलभृद्रौद्रं मीनवन्निम्ननासिकम् ॥ १५९ ॥
गणराजेश्वरा ह्येते महापुरुषलक्षणैः ।
संयुक्ताश्चाखिलैर्विप्राः[२५] आ पादात्कन्धरावधि ॥ १६० ॥
यत्किञ्चिन्मण्डनं वस्तु तदाद्योक्तं स्मरेत् त्रिषु ।
एतेषामर्चनं कुर्यात् स्वनाम्ना प्रणवादिना ॥ १६१ ॥
नमान्तेना[२६]ऽब्जसम्भूत नानासिद्धिफलाप्तये ।

[क्षिप्रकर्मसिद्ध्यै तदाराधनस्य कर्तव्यत्वम्]

अष्टाष्टकैस्तदर्धैर्वा तस्यार्धैर्वा यथारुचि ॥ १६२ ॥
क्षिप्रकर्मप्रसिद्ध्यर्थमष्टाभिर्वा समर्चयेत् ।

[तन्निवेदितस्य दातृभोक्तॄणां प्रत्यवायः]

तन्निवेदितमन्नाद्यमर्घ्यस्त्रक्चन्दनादिकम् ॥ १६३ ॥
न देयं कस्यचित्प्राज्ञैरैहिकामुष्मिकाप्तये ।
स्वाश्रितानामनुज्ञातं भूतानां चैव तेन तत्[२७] ॥ १६४ ॥

२२. अन्यौपम्य - B
२३. विप्र - B, D, E
२४. अनिल - D, E
२५. विप्र - B, E
२६. नमान्तेनोब्ज - A
२७. ते - B, E

of the groups with fierce irresistable valour. They look forward for the command from him (Visvakśena) holding high the white chowries. These, who are Vināyaka and others are eminent lords of Vighna, Vighneśas. *Nyāsa* is to be done, for these lords of groups who always abide by his command, in the north-east and other corner outside the lotus. They look at the face of the powerful lord (Visvakśena) standing in a posture same as his and have the hands like him but without *mudrā.* Meditation on these is separate (distinct from others). (Understand the internal one)[45]. Meditation upon Gajānana must be done, whose face is like that of fearful lordly elephant; having four tusks, three eyes; neck resembling conch, four hands; a lustre of ten thousand full moons, bedecked with necklace anklets, armlets and girdles string, endowed with garlands of various kinds, sandal-paste (perfumes) clothings, and incomparable powers. Then one should think of Jayatsena having the face of a big horse, of the radiance of a hill of ruby, with eyes like liquid gold, having many astounding forms. Meditation is then to be done on Harivaktra, whose head is radiant with the manes, bright like the well-heated gold, having a terrible and girgling voice. He who is called Kālaprakṛti shall be thought of, O brahmins! as having the face of the lion, of a speed like that of the fire of deluge, and like the hill of collyrium, face frightful with big teeth, tawny moustache and eyes having the fish-like earrings, dreadful, with a depressed nose like the fish. These are the lords of the hosts possessing all the marks of great men. O brahmins! from the foot to the neck. One shall think in these three as having them as an ornament and stated for the first lord. Worship is to be done to these with their names, *Praṇava* preceding them, born of lotus! and ending with *namaḥ* so as to attain all the results accomplished.

(His worship must be done for quickly attaining the acts accomplished)

162b-163a. Worship is to be done with sixty-four or half of it (thirty-two) or half of (sixteen) services according to one's taste or eight for quite accomplishment of one's work.

(Sin of what is offered to him (Visvakśena) being partaken by the givers and enjoyers (receivers)

163b-170a. Food etc., *arghya,* garland, sandal paste and others which have been offered to him (Visvakśena) shall not be given by the learned to

45. This agrees with ch. XX. of *Pauṣ. S.*

नित्यं तदूर्ध्वतस्तेषामाशास्थगितचारिणी ।
अत एव हि भोक्तृणामर्थहानिं ददाति तत् ॥ १६५ ॥
नूनमाशागणं सर्वं ध्वंसयन्ति सदैव हि ।
तस्माद्ददाति योऽन्येषां स्वयमश्नाति वाधमः ॥ १६६ ॥
मोहादुपेक्षते वापि स याति नरकेऽधमः ।
अतः श्रेयोऽर्थिना कार्यः परिहारः सदैव हि ॥ १६७ ॥
तच्चापि क्ष्मातले कूपे तटाकादौ तु चोत्क्षिपेत् ।
नोपभोगं यथा याति काकादिष्वब्जसम्भव ॥ १६८ ॥
यस्मात् सन्मन्त्रपूतं तत्प्राधान्येनापि वर्धते ।
अतो निषिद्धः पापानामपापानां विशेषतः ॥ १६९ ॥
इति सम्यक् समाख्यातं विष्वक्सेनार्चनं परम् ।

[कुमुदादिपरिवारार्चनम्]

पूजनं कुमुदादीनां शृणुध्वमथ योगिनः ॥ १७० ॥

अथ क्रमप्राप्तं कुमुदाद्यर्चनमाह — **पूजनं कुमुदादीनाम्** इत्यादिभिः ।

द्वारावरणदेवानां सुस्थितानां स्वसद्मसु[२८] ।
चलानां वाथ हेमाद्यैर्निर्मितानां यथाविधि ॥ १७१ ॥
त्रिकालं वा द्विकालं वा सङ्कटे त्वेककालकम् ।
तत्तन्मन्त्रेण कुर्वीत पूजामष्टोपचारतः ॥ १७२ ॥
इत्येवं वैनतेयादिपरिवारगणस्य च ।
पूजनं सर्वमाख्यातं सर्वसिद्धिफलप्रदम् ॥ १७३ ॥
इतोऽन्यच्छ्रोतुमिच्छा चेत् कथ्यतां मुनिसत्तमाः ।

मुनयः -

भगवन् मन्दिरे विष्णोः स्थापिता लोकपूजिताः ॥ १७४ ॥
विष्णुभक्ताः कथं पूज्यास्तद्विधानं वदस्व नः ।

२८. स्ववर्त्मसु - B, स्वकर्मसु - E

any one (wishing) to get the good, here and here after. It (offering) is permitted to those who are dependent upon him (priest) and the spirits. Their (who receive) hope has always interrupted course. Therefore that (offering) causes loss of wealth to the enjoyers (receivers). They (spirits) do always destroy all the hopes. Therefore he, the low person, who offers it to others or himself takes (eats) it or one, who overlooks (this rule) out of delusion, goes to hell.[46] Therefore, he who seeks prosperity must always avoid it. It shall be thrown on the ground, well, tank etc., O born of lotus! so that it will not be eaten by the crow and others. Since what is purified by good mantra grows prominently, therefore it is prohibited in the case of sinners and particularly non-sinners. Thus the great worship of Viṣvaksena is well mentioned.

(Worship of Kumuda and other secondary deities)

170b-175a. O yogins! listen then to the way of worship of Kumuda and others who are the deities at the entrance and enclosures stationed well in their places or the movable idols or those made of gold and other (metals), thrice or twice (a day) or once in (times of) distressing periods. Thus all the worship which would yield the fruits of all kinds, is told (to occur) by the worship of the group (or host) of Garuḍa and other secondary deities.

O eminent sages! tell me, if you desire to hear anything more than this.

Sages: O lord! the devotees of Viṣṇu, who are adorned in the world, are installed in the temple of Viṣṇu. How are they to be worshipped. Tell that process.

46. See note under III. A.

[शठकोपाद्यर्चनम्]

नारदः –

एकान्तिनो महाभागाः शठकोपपुरःसराः ॥ १७५ ॥

क्षोण्यां कृतावतारा ये लोकोज्जीवनहेतुना ।

शाण्डिल्याद्याश्च ये चान्ये पाञ्चरात्र[२९]प्रवर्तकाः ॥ १७६ ॥

प्रह्लादश्चैव सुग्रीवो वायुसूनुर्विभीषणः ।

ये चान्ये सनकाद्याश्च पञ्चकालपरायणाः ॥ १७७ ॥

भक्तोत्तमास्ते विज्ञेयास्तान् दिव्यायतनादिषु ।

चर[३०]स्थिरविभागेन लोहैर्वा शिलयापि वा ॥ १७८ ॥

स्वस्ववर्णाश्रमाचारसदृशाकृतिचेष्टितान् ।

बद्धाञ्जलिपुटान् वाथ प्रमाणेनोपलक्षितान् ।

अथ मुनिभिः पृष्टे नारदः शठकोपाद्यर्चनमाह—**एकान्तिनो महाभागाः** इत्यारभ्य **यावदध्यायपरिसमाप्तिः**।

लाञ्छितांश्चक्रशङ्खाभ्यां भूजयोर्दक्षिणादितः ॥ १७९ ॥

पद्मविष्टरमध्ये तु स्वासीनान् वाथ सुस्थितान् ।

ऋजुस्थितान्यथाशोभं पैशाचस्थानकेऽथवा ॥ १८० ॥

निर्माय च विधानेन प्राङ्गणे मण्डपेऽथ वा ।

प्रासादेष्वनुरूपेषु कल्पितेष्वग्रतो विभोः ॥ १८१ ॥

यथावकाशं वामे वा दक्षिणे वाथ पश्चिमे ।

स्वस्वमन्त्रैः प्रतिष्ठाप्य विधिवच्छ्रद्धयार्चयेत् ॥ १८२ ॥

२९. पञ्चरात्र - E

३०. चल - E

(Worship of Śaṭhakopa and others)

175b-182. Nārada: The illustrious devotee persons, with Śaṭhakopa, as their precursors, have descended on earth for uplifting the world. Śāṇḍilya and others, those other promulgators of the Pāñcarātra, Prahlāda, Sugrīva, Hanumān (son of wind), Vibhīṣaṇa, Sanaka and others are wholly devoted to the duties assigned to the fivefold division of the day.[47] They are to be treated as eminent among the devotees. They are to be installed in the divine temples by classifying them as movable and immovable, (made of) with metals or stones,[48] with the appearance, form and activities consistent with

47. See *ĪS.* I.31, note under I.60, 69,

48. It is interesting to note that the early Pāñcarātra texts like Ratnatraya do not mention the name of Śaṭhakopa, the chief among the Dravidian saints called Ālvārs, nor in the *Pauṣkarasaṁhitā* or *Pādmasaṁhitā.* This text which is said to represent the *Sātvatasaṁhitā* as its expository text mentions the name of this Ālvār and must be taken to include the names of other Ālvars also. The problem here is that this text belongs to the Karnataka area and is adopted in the temple at Melkote, so how did the names of the Ālvārs, who wrote in Tamil, get induded in this text belonging to the Karnataka area where Kannada and not Tamil is the prevailing language.

 The *Īśvarasaṁhitā* is cited (*Āgamaprāmāṇya.* P. 76 Rāmānuja Research Centre, Madras) by Yāmunācārya (916-1041 A.D.) but his citations are not formed in the texts of this *saṁhitā* which are now available. Rāmānuja (1017-1037) who spent about a decade at Melkote was virtually the founder of the temple at Melkote to which this *saṁhitā* is attached but Rāmānuja does not refer to this text. In all likelihood, devotees from Srirangam could have visited Melkote to pay their respects to the Ācārya. Availability of the *Nālāyiradivyaprabandha* and the popularity of Śaṭhakopa and other Ālvārs could have become known to the Vaiṣṇavas of Melkote through them. Passages from the *Pauṣkarasaṁhitā,* a text attached to the Srirangam temple, are found included in the *Īśvarasaṁhitā.* The present text of the *Īśvarasaṁhitā* should have, if it was already available then, got the present shape with the inclusion of the passages from the *Pauṣkarasaṁhitā* during Rāmānuja's stay at Melkote (latter half of the 11th century) or after that period. Śaṭhakopa, his writings and the honour shown to the recitations of his compositions and some such mentioning show the bold attempt of finding room in this *Saṁhitā* for them made by the scholars of Melkote, in this work, though the *Pārameśvarasaṁhitā,* adopted in the temple at Srirangam, does not make reference to Śaṭhakopa and other Ālvārs. Later additions in the ancient texts, particularly of religious nature, are too well-known.

 Shrines were built within the main temple or separately also to install the idols (*dhruva* and *utsava* kinds) for these Ālvārs.

[साङ्गस्य भक्तमन्त्रस्योद्धारः]

शृणुध्वमथ तन्मन्त्रान् स्थापनादिषु कर्मसु ।
प्रधानपुरुषेशात्म[31]तारकब्रह्मणाथवा ॥ १८३ ॥
अहं स तारकेणैव सविसर्गेण चान्तिके ।
आद्येन वा द्वितीयेन युक्तया त्रितयेन वा ॥ १८४ ॥
संज्ञया योजनीयास्ते साङ्गयागस्त्वथोच्यते ।
ताराद्य[32]योर्द्वयोरेकं षोढा कृत्वा तदन्तिमे ॥ १८५ ॥
ज्ञानादिहृदयादीनि चतुर्थ्यन्तान्युदीरयेत् ।
प्रणवाधारयुक्तानि प्रागेवाङ्गान्यमूनि वै ॥ १८६ ॥
मन्त्रेणानेन वै भक्तान् पूजयेत् तु यथाविधि ।
प्राग्वत् स्नानादिकं कृत्वा सोर्ध्वपुण्ड्रः स्वलङ्कृतः ॥ १८७ ॥

मन्त्रोद्धारप्रकरणे "प्रधानपुरुषेशात्मतारकब्रह्मणाथवा" इत्यत्र प्रधानं मकारः। पुरुषो लकारः। तदुक्तं जयाख्ये — "मकारो मर्दनः कालः प्रधानः परिपठ्यते" (जयाख्यस. ६.५२) इति । "लकारो विबुधाख्यस्तु धरेशः पुरुषेश्वरः" (जयाख्यस. ६.५४) इति च । एतद्वर्णद्वयात्मकेन तारकब्रह्मणा 'म्लः' इत्यक्षरेणेत्यर्थः । अस्यार्थस्तु मकारवाच्यो जीवः । लः-लीयतेऽस्मिन् सर्वमिति लः, जगत्कारणभूत ईश्वरः। तच्छेष इति फलितोऽर्थः । अन्तिके सविसर्गेणाहं स तारकेणाहं स इति पदद्वयात्मकतारकेण । एतदुक्तं जयाख्येऽपि —

पादौ प्रक्षाल्य चाचम्य प्रविश्य यजनालयम् ।
कवाटोद्घाटनं कुर्याद्द्वाःस्थाभ्यर्चनपूर्वकम् ॥ १८८ ॥
तन्मन्त्रेण प्रणम्याथ बिम्बशुद्ध्यादिकं तथा ।
प्रासादशोधनादीनि कृत्वा वै तस्य दक्षिणे ॥ १८९ ॥
पार्श्वे समुपविश्याथ करशुद्धिं समाचरेत् ।
दिग्बन्धं चैव सायामां भूतशुद्धिं समाप्य च ॥ १९० ॥
पुटीकृतेन ताराभ्यां भक्तमन्त्रेण मन्त्रवित् ।
नखान्तं मणिबन्धाद्यं प्राग्वत् पाणिद्वयं मृजेत् ॥ १९१ ॥

३१. पुरुषेशाद्य – A, पूरुषे B
३२. ताराख्य – पा

their respective conduct of castes and orders,[49] with the palms folded; who are distinguished according to authority; marked on their right (and other) arms by the discus and conch; well seated in the lotus-seat or in a good standing posture, standing erectly with their (natural) complexion (brilliance) or in the posture of Piśāca.[50] Or (they are to be installed) after making them according to the precepts, in the courtyards, or pavilions, temples arranged suited to them, in front of the lord. They are to be installed with their respective mantras[51] to the left or right or behind, according to the available space, and should be worshipped with faith and according to rules.

(Composition of the mantras of the devotees with their limbs (mantras)

183-208. Listen to their mantras for installation and other acts, with the syllable with Tārakabrahma[52] which is of the nature of Pradhāna[53] and Puruṣa[54] *mla*[55] or *ahaṃ saḥ*[56] or with the first mentioned or second or with the

49. Among the twelve Ālvārs, the castes and orders, to which they belonged, are known in some cases and remain unknown in others. The need to observe the rules for these is stressed here.
50. The posture, in which the idols of the Ālvārs are to be exhibit, is to be erect or take that of Paiśāca. Several forms are mentioned for the idols, among which Paiśācī is one. It is described but the posture is not mentioned. (*Pād. S. kriyā.* XVI.48-49, 70-71).
51. The mantras are to be formed well-suited to them; vide: *JS.* Ch. VI & VII; Ahs. XVIII & XIX; *SS.* III, IV, XVII & XXIII; *Pāram. S.* XXIV; *Pād. S. caryā.* XXVI, XXVIII & XXXI; *Param. S.* VI; *Śrīpraśnasaṁhitā* LII; *SKS. Brahma.* XI, *Indra* II.
52. The word *tārakabrahma* occurs in the passage — *pradhāna puruṣeśātmatāraka brahmaṇāthavā* (*śloka* 183b).
53. Here Pradhāna denotes the letter *ma*
54. Puruṣa for *ḷa.*
55. The two become *mla.* The commentator observes that *ma* denotes the self and *la* Īśvara in whom everything merges and so *mla* means *śeṣa,* subordinate to god.
56. *ahaṃ saḥ* — may be taken as the mantra; vide: *JS.* VI.52, 54.

    ha + aṃ + sa + aḥ = ahaṃ sa;

    vide: *JS.* VII. 25.

अङ्गानि चैव विन्यस्य पूर्वोक्तविधिना ततः ।
तुलसीनलिनाक्षाणां मालिकाद्वितयं तथा ॥ १९२ ॥
चक्रशङ्खौ पाणितलद्वये न्यस्य यथाक्रमम् ।
कृत्वैवं करविन्यासं ततस्तन्मन्त्रमुच्चरन् ॥ १९३ ॥
पाणिभ्यामालभेद्देहमामूर्ध्नश्चरणावधि ।
कृत्वैवं व्यापकन्यासं हृदयादीनि विन्यसेत् ॥ १९४ ॥
ततो मालाद्वयं कण्ठे चक्रशङ्खौ भुजद्वये ।
विन्यस्य हार्दधीमुद्रां बध्वा तादात्म्यमाश्रयेत् ॥ १९५ ॥
ततः स्वहृदयाम्भोजे देवस्य परमात्मनः ।
पादाधस्ताच्चेतनं तु विचिन्त्य तदनन्तरम् ॥ १९६ ॥
तस्माच्चैतन्यमावाह्य यजेद्भोगैस्तु मानसैः ।
ततो बहिर्यजेद्भक्तं प्रागुक्तैर्भोगसञ्चयैः ॥ १९७ ॥

"अप्रमेयेण सूर्येण व्योमाख्येनामृतेन च । परमेश्वरयुक्तेन त्रितारोक्तात्मनाथवा ॥" (जयाख्यसं. ७.२५) इति ।

अयमेवार्थः स्पष्टमुक्तो लक्ष्मीतन्त्रे — "प्रत्यगात्मपरामर्शिशब्दः सोमोऽथ सर्गवान्" इति । न ह्यत्र जीवात्मपरमात्मनोः स्वरूपैक्यं शङ्कनीयम् । तत्त्वमसीत्यादौ श्रीमद्भाष्यसमर्थितप्रकारेण शरीरशरीरिणोस्तयोर्विशिष्टाद्वैतस्य विवक्षितत्वात् । एवं च म्लः अहं स इति द्वयोरपि प्रसिद्धप्रणवेन सहार्थैक्यात्तारकव्यपदेशः ।

तदर्थं पञ्चपात्राणि चतुस्त्रिद्व्येकमेव वा ।
कल्पयित्वा ततो देहन्यस्तान् मन्त्रान् समर्चयेत् ॥ १९८ ॥
द्वारयागं ततः कुर्यादर्घ्याद्यैर्देशिकोत्तमः ।
सावित्रं सवितारं च गर्भद्वारस्य पार्श्वयोः ॥ १९९ ॥
सम्पूज्य तद्विमाने तु चतुर्दिक्षु यथाक्रमम् ।
भक्तमूर्तीः समभ्यर्च्य अर्घ्याद्यैर्मुनिसत्तमाः ॥ २०० ॥
ततोऽग्रमण्डपद्वारे दुर्गां गणपतिं यजेत् ।
इन्द्रादिलोकपालांस्तु प्रथमावरणादिषु ॥ २०१ ॥
सम्पूज्यावरणद्वारे त्विन्द्रं चेन्द्रजयं यजेत् ।
यद्वा द्वारेषु सर्वेषु तथैवावरणेषु च ॥ २०२ ॥

third[57] together with their names.[58] Worship with its component parts is then stated. One of the two Tārāmantras[59] is to be split into six parts.[60] The words *jñāna*, *hṛdaya* etc. ending in the dative case shall then be uttered, with *Praṇava* as before. The devotees are to be worshipped duly with this mantra. After taking bath as before, wearing Ūrdhvapuṇḍra, well-decorated, he (priest) shall wash his feet, do *ācamana* and enter the hall of worship. The doors shall be opened after adoring those (deities) at the gate (or entrance). After bowing with their (devoted) mantras, he shall clean the idols and the temple (precincts) and sit to the right side of him (devotee). Attending to the cleaning of the hands, he shall do Digbandha with Prāṇāyāma and complete Bhūtaśuddhi. He who knows the mantra, shall encase the mantra of the devotee (who is to be worshipped) with two Tāras and rub as before the two hands from the wrist upto the nails. Doing then Aṅganyāsa according to the rule stated before he shall place two garlands of Tulasī[61] and lotus-seeds,[62] discus and conch in the two hands in due order and shall do thus Karanyāsa. Uttering that mantra, he shall touch with his two hands his body from the head to foot, he shall do *nyāsa* of *hṛdaya* and others with the Vyāpaka mantras. Placing then two garlands in the neck, discus and conch in the two arms, he shall form Hṛdayamudrā[63] and feel one with them. Then he shall

57. *ahaṃ* + *saḥ* = three lettered mantra;

    vide: *LT.* XXXIII.47. This is called Cidbhāsana mantra — first is *mla*, second is *ahaṃ saḥ*, the third is *oṃkārāmlakarāhaṃ saḥ*. This does not mean that identity between the self (denoted by the word *ahaṃ*) and God (denoted by *saḥ* is meant there, because, cases like this must be taken to convey the sense of body and soul *mla* and *ahaṃ saḥ* with *Praṇava* prefixed to each are treated as Tāraka mantra.
58. Names Śaṭhakopa, Viṣṇucitta and others are to be used with this mantra when Śaṭhakopa, Viṣṇucitta and others are to be installed and worshipped. The mantra is *Oṃ mlaḥ ahaṃ saḥ śaṭhakopāya namaḥ.*
59. One of the Tārāmantras is *mla.*
60. This *mla* is to be divided into six parts as *mlāṃ, mlīṃ, mlūṃ, mlaiṃ, mlauṃ* and *mlaḥ* and used with the six *aṅga* mantras, e.g.,

    Oṃ mlāṃ jñānāya hṛdayāya, namaḥ, oṃ mlīṃ aiśvaryāya śirase svāhā etc.
61. The dried seeds of Tulasi are strung together to form a garland.
62. Lotus-seeds: rosary garland is made also with the seeds of the lotus.
63. Hṛdayamudrā: see *JS.* VIII.12b-13; *LT.* XXXIV.18; *Pād. S. caryā.* 5b-6a.

तत्तच्छिष्यगणानेव परिवारान् प्रकल्पयेत् ।
महापीठे यजेत् सर्वभूतेभ्यो नम इत्यथ ॥ २०३ ॥
गर्भगेहं[33] सम्प्रविश्य कल्पयेदासनं गुरुः ।
धर्मादीन् चतुरः पीठकोणेष्वभ्यर्च्य पूर्ववत् ॥ २०४ ॥
सत्वेनाच्छादितं पश्चात् केवलेनाम्बुजं यजेत् ।
तत्रावतार्य तं भक्तं मन्त्रन्यासं समाचरेत् ॥ २०५ ॥
यथा देहे तथा बिम्बे लयोक्तविधिना ततः ।
समभ्यर्च्य ततो भोगयागं कुर्याद्यथाविधि ॥ २०६ ॥

आद्येन 'म्ल' इति तारकेण । द्वितीयेन 'अहं स इति पदद्वयात्मकतारकेण वा' तृतीयेन वा ॐकाराम्लकाराहं सतारकैः समस्तैर्वा युक्तायाः संज्ञायाः शठकोपादिनाम्ना ते शठकोपादयो योजनीयाः । तथा च '' ॐ म्लः अहं सः शठकोपाय नमः '' इति मन्त्रो भवति । ताराख्ययोर्द्वयोरेकं म्लकारम् । षोढा कृत्वा आकारादिषट्दीर्घैः षोढा कृत्वा । एवं च — '' ॐ म्लां ज्ञानाय हृदयाय नमः '' ॐ म्लीं ऐश्वर्याय शिरसे स्वाहा '' इत्याद्यङ्गमन्त्रा ज्ञेयाः ।

प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ।
विदिग्दलेषु चैवास्त्रं नेत्रं केसरजालगम् ॥ २०७ ॥

think the soul (sentient being) to be in his lotus-like heart below the feet of the supreme lord and then invoking sentience from there, he shall worship with enjoyables mentally conceived. He shall then do external worship to the devotee with the group of enjoyables stated before. He shall arrange for that purpose five vessels, four or three or two or one and worship the mantras placed on the body. The eminent priest shall then do worship for the entrance with *arghya* etc. After worshipping Sāvitra[64] and Savitṛ on the two sides of the entrance to the sanctum sanctorum, the forms of the devotees in the four directions on the *vimāna*[65] in due order with *arghya* etc., O eminent sages! he shall worship Durgā and Gaṇapati[66] at the entrance to the pavilion in the front. After worshipping Indra and other guardians of the world in the first and other enclosures, he shall adore Indra and Indrajaya[67] at the entrance to the enclosures. Or, arrangements could be made at all entrances and all enclosures, for the host of their disciples[68] as secondary deities. Uttering the words 'Salutation to all living beings', he shall worship at the main pedestal. The priest shall arrange for a seat, after entering the sanctum sanctorum. After worshipping the four deities,[69] Dharma and

64. Sāvitra: belonging to sun (Savitā); what does this name mean actually is not known. This is the name of one of Vasus; Rudras and Maruts. Or it may mean the luminous nature of Savitā; vide: *sāvitraṃ nāma yajjyoti.* (*Ahs.* LVII.1b;), it is also called Sāvitrī (another name for Gāyatrī), *Pād. S. kriyā.* X.136b mentions the deities with the names Savitā and Savitraka.
65. The forms of devotees, here Ālvārs are to be installed in the *vimāna.*
66. Durgā and Gaṇapati are to be worshipped at the outset: Durgā has her own mantras for worship (*Pād. S. caryā.* XXX.94-154 p. Her worship is enjoined; vide: *Pād. S. kriyā.* II.65a; Gaṇeśa's worship is enjoined apart from treating his mantra; vide: *LT.* XL. 88b; *Ahs.* XVII.48a; *SS.* XVII.57a; *Pauṣ. S.* III.3a.

    In all these references. Gaṇeśa is to be taken as one of the subordinates of Viṣvaksena as stated in Ch. X. of the *Pauṣkarasaṁhitā.* It is not the name of Gaṇeśa, son of Śiva. The *Pauṣkarasaṁhitā* does not refer to Śiva as the father of Gaṇeśa.

    Durgā has a shrine in the temple of lord Trivikrama at Tirukkovalur in the South-west district of Tamil Nādu.
67. A secondary deity like Indra. Vide: *Pād. S. kriyā* X.137a.
68. *tacchiṣyagaṇa*: groups of the disciples of the Ālvārs. This may refer to Madhurakavi, pupil of Saṭhakopa, Kaṇikaṇṇa, pupil of Bhaktisāra and others.
69. Dharma, Jñāna, Vairāgya and Aiśvarya are meant here.

पीठोपरि दलाद्बाह्ये त्वाग्नेयेशानकोणयोः ।
मालाद्वयं तु पूर्वोक्तं चक्रशङ्खौ च पूजयेत् ॥ २०८ ॥

[ध्यानम्]

ततो ध्यायेद्विष्णुभक्तं सर्वलक्षणसंयुतम् ।
स्वस्ववर्णाश्रमाचारसदृशाकृतिचेष्टितम् ॥ २०९ ॥
बद्धाञ्जलिपुटं वाथ व्याख्यामुद्रासमन्वितम् ।
पद्मविष्टरमध्ये तु स्वासीनं वाथ सुस्थितम् ॥ २१० ॥
ललाटादिषु चाङ्गेषु ह्यूर्ध्वपुण्ड्रैरलङ्कृतम् ।
लाञ्छितं चक्रशङ्खाभ्यां भुजयोर्दक्षिणादितः ॥ २११ ॥
तुलसीनलिनाक्षाणां मालाद्वितयभूषितम् ।
एवं ध्यात्वा विष्णुभक्तं हृदयादींश्च पूर्ववत् ॥ २१२ ॥
ध्यात्वाथ पूजनं कुर्यादासनाद्यैर्यथोदितैः ।
द्वात्रिंशदुपचारैर्वा ह्यष्टभिर्वा द्विरष्टभिः ॥ २१३ ॥
जपान्तं वापि होमान्तं तत्तन्मन्त्रेण पूर्ववत् ।
अस्वातन्त्र्याद्बलिं तत्र न कदापि समाचरेत् ॥ २१४ ॥

[परतन्त्रे वैशेषिकार्चनविधिः]

तत्तज्जन्मदिने कुर्यात् तेषां वैशेषिकार्चनम् ।
सहैव देवदेवेन सङ्क्रान्त्यामयनादिषु ॥ २१५ ॥
कालेष्वेतेषु कर्तव्यमुत्सवभ्रमणादिकम् ।
पृथग्वाप्युत्सवः कार्यो ध्वजारोहणवर्जितः ॥ २१६ ॥
न होमो[३४] न बलिस्तीर्थं पारतन्त्र्ये विधिस्त्वयम् ।

३४. होमम् - A

others at the corners of the pedestal as before, lotus shall be worshipped later as covered with mere *sattva.*[70] The devotee (idol) shall be brought down there and Mantranyāsa shall be done to him. Worship is to be done on the idol, as on the body following the procedure mentioned for Laya, and shall then do Bhogayāga according to the rule. Hṛdaya and others (mantras) are to be placed in the lotus petals in the east and other directions, *astra, netra* with the filaments in the petals at the intermediate quarters. Two garlands as stated before, discus and conch are to be worshipped on the pedestal outside the petals in the south-east and north-west corners.

(Meditation)

209-214. Then one (priest) shall mediate on the devotee of Viṣṇu, having all features with form and activities consistent with the conduct of their respective castes, orders, and folded palms, or having the *mudrā* of exposition,[71] well-seated in the middle of lotus seat or standing, ornamented with the Ūrdhvapuṇḍras in the forehead and other parts of the body, marked by discus and conch on the arms right and other (left), bedecked by two garlands made of Tulasī and lotus seeds. After meditating thus upon the devotee of Viṣṇu, meditation is to be undertaken on Hṛdaya and others (mantras). Worship is then to be done with the (offering of) seats and others as stated (in texts) with thirty-two or eight or sixteen services, upto the conclusion of *japa* or that *homa* with the respective mantras as before. *Bali* shall never be offered for want of independence (in them).

(Method of doing special worship in the case of dependents)

215-217a. Special worship is to be done to them on their (respective) days of birth. Festival and processions are to be done to them along with God of gods on the transit of sun's motion from one sign of zodiac to another, sun's

70. The lotus in the seat is to be covered with *sattva* and worshipped. That is, the lotus must be imagined not as made of matter with the mace qualities but as having became pure *sattva.*

71. Vyākhyāmudrā: the Āgama texts do mention this. Vide: *LT.* XXXVII.67b; तर्जन्यङ्गुष्ठसंसर्गाद् व्याख्यामुद्रासमाकृतिः ।

This *mudrā* is to be formed in the case of an idol of the devotee of Viṣṇu, but Śaṭhakopa alone has this.

[स्वतन्त्रालये भक्तबिम्बस्य स्थानादि]

स्वातन्त्र्ये चाग्रहारादौ विपिने वा नदीतटे ॥ २१७ ॥
सप्राकारं विमानं[35] तु यथेष्टतलशोभितम् ।
कल्पयित्वा प्रयत्नेन रथ्याभिश्च परिष्कृतम् ॥ २१८ ॥
देशान्तरगतानां वा भगवल्लोकवासिनाम् ।
दृश्यरूपमदृश्यं वा देवसारूप्यतां गतम् ॥ २१९ ॥
स्थापयित्वा विधानेन प्रासादे मानुषे पदे ।
दिव्यमानुषयोर्वाथ दिव्ये वा मानुषाश्रिते ॥ २२० ॥
विष्णोर्मन्त्रासनाव्यक्तपद्ममध्यस्थचेतनाम् ।
भक्तबिम्बहृदम्भोजे चैतन्यमवतार्य च ॥ २२१ ॥
सकलीकृत्य मन्त्रेण साङ्गेनाभ्यर्चयेत् सदा ।
आवाहने विशेषोऽयं जीवतां वाप्यजीवताम् ॥ २२२ ॥
सर्वत्राव्यक्तपद्माद्यैरष्टभिर्वा द्विरष्टभिः ।
भोगैः प्रागुदितैः स्फीतैस्ताम्बूलान्तैः समर्चयेत् ॥ २२३ ॥
कृत्वा पद्मध्वजारोहं हंसध्वजमथापि वा ।
समारोप्य यथाशास्त्रं कुर्यात् तत्र महोत्सवम् ॥ २२४ ॥
बलिदानादिकं तीर्थं सर्वं तत्र समाचरेत् ।
भक्तप्रणीता गाथाश्च श्रुत्यन्तार्थोपबृंहिताः ॥ २२५ ॥
श्रावयेद्विधिवद्देवं भक्त्या गीतिपुरःसरम् ।

३५. सप्रकारं समानम् - A, सप्राकारा विमानम् - E

motion to the north and south and these occasions or the festival[72] is to be conducted separately except raising the flag, without *homa* and without *bali*, both. This is the rule in case of dependents.

(Places for the idols of devotees in independent temples)

217b-228a. Arrangements are to be made to construct *vimāna* with enclosures, beautified by the storeys according to one's desire in independent places like in Brahmin localities, forest or bank of river,[73] with well laid streets. Installation shall be made for those who had gone to other countries or who live in the lord's regions with a form visible or otherwise or displaying similarity to god's form, in a palace, in the place of mortals or divine and resorted to by men.[74] Sentience of Viṣṇu, which is in the middle of the unmanifested lotus in the Mantrāsana, is to be brought down to the lotus-like heart of the idol of the devotee and should be differentiated by the mantra.[75] It shall always be worshipped with all the limbs (parts). This is the special feature in invoking the presence of persons whether alive or not.[76] Worship must be done in all cases with the unmanifested lotus etc. with eight or sixteen enjoyable services mentioned before upto *tāmbūla*. The flag with lotus or swan[77] may be raised, the huge festival may be celebrated, offering of *bali* etc. and all that must be done. The poems composed by the devotees,[78]

72. Generally, the festivals, which are conducted in honour of the Ālvārs, are celebrated in the temples of Viṣṇu, where there are subshrines for them. There is no flaghoisting, *homa* or *bali* or bath at the conclusion but where there are separate shrines like for Viṣṇucitta at Śrīvilliputtar in the Tirunelveli District of Āṇḍal. There the festivals are conducted in the same way as it is done for Viṣṇu.
73. Temple is there for Āṇḍāl at Śrīvilliputtur.
74. This *śloka* (219) does not help in identifying the devotees who are referred to. The Ālvārs are not certainly meant here. Perhaps, the idols of Ācaryas from Nāthamuni downwards are meant.
75. *Mantrāsanānyaktapadmasthacetanā:* sentience is in the midst of the unmanifested lotuses; refering to Mantrāsana. Sentience shall be brought down from there into the lotus-like heart of the idol of the devotee. Here Mantrāsana must refer to one of the six seats of god during worship. *Avyaktapadma* is above Kālacakra and below *jīva* in the Yogapīṭha.
76. The forms of devotees, whether alive or not, may refer to those of the heads of Maṭhas like Ahobila, or in the Bṛndāvana, of Ācāryas erected after their passing away.
77. Swan-flag or lotus-flag is enjoined to be hoisted during the festivals conducted in honour of the Ālvārs.
78. The poems composed by the Ālvārs are in Tamil and contain 4000 (metrical) stanzas.

तन्निवेदितमन्नाद्यं गायकेभ्यः प्रदापयेत् ॥ २२६ ॥
इति सम्यक् समाख्यातं विष्णुभक्तार्चनं परम् ।
गोपनीयं प्रयत्नेन नास्तिकानां विशेषतः ॥ २२७ ॥
प्रकाशनीयं भक्तानां नित्यकर्मरतात्मनाम् ।

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां सात्वतार्थप्रकाशिकाख्यायाम् ईश्वरतन्त्रव्याख्यायाम् अष्टमोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां गरुडादिपरिवारार्चनविधिर्नाम अष्टमोऽध्यायः ॥

supplemented by the meanings of Vedānta[79] (Upaniṣads) are to be sung according to rules and songs are to be sung with devotion and the food preparation that are offered to them (devotees) be given to those who sing. Thus the worship of devotees[80] of Viṣṇu has been well described. This shall be protected well particularly from non-believers and shall be displayed to the devotees who are interested in their daily duties.

Thus ends the eight chapter called the rule of worship for the Garuḍa and other subordinate deities in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra.*

79. *śrutyantārthopabṛṃhitāḥ*: the verses, which are to be sung, are stated to be supplemented by the meaning (really purport) of the Upaniṣads. That is, the passages of the Ālvārs, compositions were interpreted, according to this statement, as conveying the meanings of the Vedānta (Upaniṣadic) passages.

80. Three points are worthy of note here: One is, the Ālvārs, headed by Śrī Śaṭhakopa are treated as deities. The second is, there is no objection to the use of compositions in Tamil getting the pride of place to be recited or sung in temples. The third is, the question of caste does not made any sense here. The Ālvārs belonged to different castes and they receive worship in the shrines. In fact, Śaṭhakopa belonged to a caste other than that of Brahmins. Yet, he is *prapanna* par excellence and is the first human Ācārya for all the members of the Vaiṣṇava community.

It must be noted that the ancient texts do not treat this topic but there are, besides the *Īśvarasaṃhita*, texts which treat this topic, along with the Adhyayanotsava in the Dhanurmāsa (December 15 to January 15). The texts which deal with this topic are the following:

1. *Anīruddhasaṁhitā* ch. XXVI, XXXIV
2. *Upendrasaṁhitā* ch. IV, V, VI & VIII
3. *Paramapuruṣasaṁhitā* VIII
4. *Parāśarasaṁhitā* XXII
5. *Viṣṇutattvasaṁhitā* IV
6. *Viṣṇutantra* XIX
7. *Viṣṇusaṁhitā* XXX which is called Bhāgavatayoga. The word *bhāgavata* may be taken to mean a devoted who could be identified with Ālvār.
8. *Viṣṇusiddhāntasaṁhitā* XXXIII
9. *Śrīpraśnasaṁhitā* ch. XCVI, which is called Mokṣotsava, referring to Śaṭhakopa's attainment of *mokṣa.*

नवमोऽध्यायः

द्वारावरणदेवतालक्षणादिविधिः

[द्वारावरणदेवानां ध्यानादिप्रश्नः]

मुनयः –
पुरा नित्योत्सवविधौ द्वारावरणवासिनाम् ।
देवानां पूजनं प्रोक्तं तेषां ध्यानादिकं क्रमात् ॥ १ ॥
वदस्व मुनिशार्दूल सर्वशास्त्रविशारद ।

[उत्तरकथनप्रतिज्ञा]

नारदः –
शृणुध्वं मुनयः सर्वे सावधानेन चेतसा ॥ २ ॥
द्वारावरणदेवानां लक्षणं तु यथाविधि ।

[प्रथमावरणदेवाः]

प्रासादद्वारदेवेभ्यः समारभ्य यथाक्रमम् ॥ ३ ॥

[वास्त्वीशक्षेत्रपालयोः स्थानम्]

प्रासादद्वारबाह्ये तु ह्यधः स्थौदुम्बरान्तिमे ।
वास्त्वीशक्षेत्रनाथौ द्वौ स्थितौ दक्षेतरक्रमात् ॥ ४ ॥

[वास्त्वीशलक्षणम्]

शुक्लवक्त्रः कृष्णदेहो द्विभुजो रत्नपात्रधृक् ।
दक्षिणेन करेणैव सर्वामरसमाश्रयः ॥ ५ ॥

अथ नवमोऽध्यायो व्याख्यास्यते ।

इह द्वारावरणदेवानां लक्षणं पृच्छन्ति मुनयः – **पुरा** इति सार्धेन।

तैः पृष्टो नारदः प्रथमं गर्भगृहद्वारादिदेवानां वास्त्वीशक्षेत्रनाथलक्ष्मीचण्डप्रचण्डगरुडानां लक्षणमाह – **शृणुध्वम्** इत्यादिभिः ।

नन्वेतत्तन्त्रोक्तरीत्याऽऽराध्यमानस्य यादवादीश्वरस्य गर्भगेहद्वारभाजश्चण्डप्रचण्डयोरत्रौक्तलक्षणं कुतो न दृश्यत इति चेत् सत्यम् –

CHAPTER IX

Procedure for Marks of the deities stationed at the entrance and enclosures

(Question regarding meditation etc. upon the deities at the entrance and enclosures)

1-2a. Sages: Worship of deities who dwell at the entrance and enclosures was stated[1] while dealing with the deity worship (festival). O eminent sage! conversant with all *śāstras*! tell in due order about meditation etc.

(Assent for giving the reply)

2b-3a. Nārada: O sages! all (of you) listen with an attentive mind, to the marks of deities at the entrance and in the enclosures, (as given) according to the rules.

(Deities in the first enclosure)

3b. Beginning with the deities at the entrance to the temple, in due order...,

(Places for the lord of Vāstu and the guardian of the site)

4. ...the two, the lord of Vāstu[2] and the guardian of the shrine[3] are stationed to the right and left outside the entrance to the temple at the edge of the fig basis (or threshold) at the entrance.

(Marks of the lord of Vāstu)

5-6. O brahmins! Vāstupuruṣa has a white mouth (face), dark body, two hands holding a jewelled vessel or the with gems (or set with gems) in the

1. See Ch. IV.
2. Vāstu: area, ground where the temple is built.
3. Kṣetra: shrine.

पुण्डरीकसमानाभवस्त्रस्त्रगनुलेपनः ।
गदोद्यतकरो विप्राः ध्यातव्यो वास्तुपूरुषः ॥ ६ ॥

[क्षेत्रपाललक्षणम्]

क्षेत्रेशं द्विभुजं ध्यायेद्धेमाभवसनस्त्रजम् ।
नीलजीमूतसङ्काशं दण्डहस्तं महातनुम् ॥ ७ ॥
मुष्टिकृद्वामहस्तेन यागक्षेत्रस्य पालकम् ।

[उभयोः साधारणाकारः]

कुण्डलाद्यैरलङ्कारैरेतौ शोभितविग्रहौ ॥ ८ ॥
वीक्षमाणौ विभोर्वक्त्रं तेजसातीव निर्भरौ ।

[उध्वोंदुम्बरस्थलक्ष्मीलक्षणम्]

तप्तकाञ्चनवर्णाभां प्रवालसदृशाम्बराम् ॥ ९ ॥
हारनूपुरकेयूरकरण्डमकुटादिकैः ।
अलङ्कृतामलङ्कारैः पुण्डरीकनिभेक्षणाम् ॥ १० ॥
अकलङ्कसुसम्पूर्णशरच्चन्द्रनिभाननाम् ।
पद्मकुम्भकरां लक्ष्मीं पद्मोपरि गतां स्मरेत् ॥ ११ ॥
पद्मासनेनोपविष्टां द्वारस्योर्ध्वे उदुम्बरे ।

'यद्वा भद्रो दक्षकरेऽभीतिमुद्रासमन्वितः' (ई० सं० ९.८१) इति वक्ष्यमाणलक्षणान्तरमनयोरस्तीति न शङ्कावकाशः। वक्ष्यति खलु –

"चण्डादिष्वप्येवमेव द्विभुजत्वादिकं भवेत् । चण्डप्रचण्डौ धाता च विधाता च जयस्तथा ॥ विजयश्चापि भद्रश्च सुभद्रश्च गणेश्वरः । एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना ॥ देहवक्त्राकृतैस्तुल्या-स्तथैवाभरणायुधैः ॥" (ई० सं० ९.८४–८५.१/२) इति ।

[चण्डस्य लक्षणकार्यस्थानानि]

तरुणादित्यसङ्काशो महोरस्कश्चतुर्भुजः ॥ १२ ॥

right hand, the resort to all gods (immortals), garments, garlands and unguents of a colour similar (same as) to the lotus and the raised hand (left) with the mace. He is to be meditated upon.

(Marks of the guardian of the site)

7-8a. One shall meditate upon the lord of the site, having two hands, with dress and garland of the colour of gold, who is like the blue cloud, holding a staff in the hand, possessing a huge body and left hand formed into a fist and the guardian of the site of sacrifice (worship), O brahmins!

(Common form to both)

8b-9a. These two have their bodies beautified by the ear-rings and other ornaments and exceedingly full of lustre and are looking at the face of the lord.

(Marks of Lakṣmī in the upper part of the threshold made of fig wood)

9b-12a. Lakṣmī seated on the lotus shall be recalled as of a complexion like the colour of heated gold, with a dress resembling coral decorated with the ornaments like necklace, anklet, armlet, honey-comb, crown and others with looks resembling lotuses, face like the spotless and full autumnal moon, having lotus-shaped pitcher in the hand and seated on the lotus-seat in the Padmāsana posture[4] on the fig- threshold up at the entrance.

(Marks, works and places of Caṇḍa)

12b-18. Caṇḍa, the chief of the hosts (of servants) and of unsurpassed valour, is like the rising sun, has broad chest, four hands, tall, has elevated

4. Padmāsana: see *Ahs*. 34.

उन्नतश्चोन्नतांसश्च पूर्णाङ्गो[1] नातिमांसलः ।
तनूदरो निम्ननाभो रोमराजिविराजितः ॥ १३ ॥
दंष्ट्राकरालवदनः पिङ्गश्मश्रुजटाधरः ।
मधुपिङ्गलनेत्रश्च कुटिलभ्रूलतायुतः ॥ १४ ॥
प्रलम्बलोलश्रवणः पृथुघ्राणः स्मिताननः ।
कुण्डलालङ्कृतश्चैव हारकेयूरभूषितः ॥ १५ ॥
बद्धोष्णीषललाटश्च तिलकेनाप्यलङ्कृतः ।
शुक्लाम्बरधरः स्रग्वी भुजयुग्मेऽस्य दक्षिणे ॥ १६ ॥
प्रोद्यतं संस्मरेच्चक्रं प्रज्वलन्तीं गदां परे ।
श्रोणीतटनिषण्णां तु विश्रान्तां वसुधातले ॥ १७ ॥
पूर्ववामकरे शङ्खमन्यस्मिंश्चाक्षसूत्रकम् ।
एवं गणाधिपश्चण्डो विक्रमेणापराजितः ॥ १८ ॥

[प्रचण्डस्य लक्षणादि]

क्रुद्धो विघ्नायुतानां तु क्षणात् संहरणक्षमः ।
ध्येयो गर्भगृहद्वारशाखामूले तु दक्षिणे ॥ १९ ॥
तत्रैवापरभागे तु प्रचण्डं त्वीदृशं यजेत् ।
किं तु सव्यापसव्याभ्यां भुजाभ्यां स्याद्विपर्ययः ॥ २० ॥
भुजद्वये यच्चण्डस्य वामे सम्परिकीर्तितम् ।
दक्षिणे तत्प्रचण्डस्य ध्येयं वा परिकल्प्य वा ॥ २१ ॥

अतएवाग्रमण्डपद्वारशाखालिखितयोर्धातृविधात्रोः प्रथमावरणगोपुरद्वारस्थयोर्जयविजयोश्चण्डप्रचण्ड-सारूप्यमेव परिदृश्यते ।

[द्वाराग्रस्थगरुडलक्षणादि]

ध्यायेद् द्वाराग्रदेशे तु गरुडं काञ्चनप्रभम् ।
कुटिलभ्रूसुवृत्ताक्षं पक्षमण्डलमण्डितम् ॥ २२ ॥

१. पूर्णाङ्गे - B, E

shoulders well-formed (full of limbs), not fleshy, with slender stomach, depressed navel, shinning with the line of hairs on the body, face frightful with large teeth, with matted hair and tawny moustache, eyes reddish brown like wine, curved creeper-like eyebrows, hanging and dangling ears; large nose; smiling face; bedecked with ear-rings, decorated with necklace and armlets, the forehead with a turban (head-gear), beautified by the ornamental mark (on the forehead), wearing white dress and garlands (be thought of) as having a lifted up discus in the right hand (among the pair of hands) and in the other the dazzling mace attached to the region of the hip and resting on the ground, the conch in the frontal left hand, and the rosary garland in the other.

(Marks of Pracaṇḍa)

19-21. Enraged and capable of destroying ten thousands of obstacles in a moment, Pracaṇḍa is to be meditated upon, stationed at the right bottom of the door post at the entrance to the sanctum sanctorum. On the other side (there is) Pracaṇḍa of similar kind is to be worshipped, but there is the transposition of the left and right arms. What is stated for Caṇḍa in the left of the two arms that is to be meditated for Pracaṇḍa in the right or be it (worship) arranged thus.

(Marks of Garuḍa stationed in front of the entrance)

22-28. He (priest) shall think of (meditate upon), in the front region of the entrance, Garuḍa of the radiance of gold, with well-rounded eyes having curved eyebrows, decorated with the circles of wings; having belly, stout limbs, decorated with all the ornaments, shining with the crown and other ornaments and anklets etc.; wearing a blue cloth, beautified by various garlands; facing the god of gods, standing on the ground, putting on folded palms; having two hands; with the complexion of snow, with the name Satya,[5] lord of birds and the presiding deity of vital air (Prāṇa) shall be thought of

5. Satya : one of the forms of Garuḍa, See ĪS. VIII.39-40.

लम्बोदरं सुपीनाङ्गं सर्व[2]भूषणभूषितम् ।
मकुटाद्यैरलङ्कारैर्नूपुराद्यैर्विराजितम् ॥ २३ ॥
नीलं वसानं वसनं नानामाल्योपशोभितम् ।
सम्मुखं देवदेवस्य भूगतं विधृताञ्जलिम् ॥ २४ ॥
द्विभुजं तुहिनाभं तु सत्याख्यं विहगाधिपम् ।
प्राणाधिदैवतं चक्रे बलिमण्डलमध्यगे ॥ २५ ॥
संस्थितं संस्मरेत् सर्वैरङ्गैः पूरुषरूपिणम् ।
प्रलम्बमानजठरं पक्षराजिविराजितम् ॥ २६ ॥
दक्षिणेन करेणैव धारयन्तं गणित्रकम् ।
उत्तानितेतरकरं कुण्डलाद्यैर्विभूषितम् ॥ २७ ॥
नीलकौशेयवसनं नीलमाल्यानुलेपनम् ।
अनाकुलाभ्यां नेत्राभ्यां वीक्षमाणं सदा विभुम् ॥ २८ ॥

[धातृविधात्रोः स्थानादि]

अथाग्रमण्डपद्वारशाखायुगलसंस्थितौ ।
पद्मगर्भप्रतीकाशावतिभीमपराक्रमौ ॥ २९ ॥
चण्डप्रचण्डसदृशौ भुजलाञ्छनभूषणैः ।
रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ ॥ ३० ॥
गणौ धातृविधातारौ ध्यात्वा सम्पूज्य तत्परः ।

अथाग्रमण्डपद्वारपालयोः प्रथमावरणदेवानां च लक्षणमाह — **अथाग्रमण्डप** इत्यादिभिः ।

[कुमुदकुमुदाक्षयोः स्थाने]

कुमुदादिगणेशानान् प्रथमावरणे यजेत् ॥ ३१ ॥
पूर्वे च वह्निदिग्भागे पूज्यौ द्वौ गणनायकौ ।

[साधारणलक्षणम्]

कुमुदः कुमुदाक्षश्च प्रसन्नवदनेक्षणौ ॥ ३२ ॥

२. सर्प - D

as stationed in a wheel placed in the midst of the circle (*maṇḍala*) (intended for offering) of *bali*; who has the form of man with all limbs; with a hanging belly, shining with a row of wings; holding the rosary garland in the right hand; the other hand with the palm turned upwards; adorned with the ear-rings and others; having (dressed in) a blue silken cloth, blue garland and unguents and always beholding the lord with unruffled eyes.

(Place for Dhātṛ and Vidhātṛ)

29-31a. Dhātṛ and Vidhātṛ representative of groups (of attendants) are stationed at the pair of door-posts at the entrance to the pavilion in the front, resembling calyx, possessing very terrifying valour, and similar to Caṇḍa and Pracaṇḍa in respect of arms, marks and ornaments and wearing red dress and red flowers and unguents. They are to be worshipped.

(Places for Kumuda and Kumudākṣa)

31b-32a. Kumuda and other lords of groups (*gaṇa*) are to be worshipped in the first enclosure. The two lords of groups are to be adored in the eastern and south-east parts.

(General features)

32b-34a. Kumuda and Kumudākṣa have pleasing face and looks, resembling the hill of snow and in the first stage of age and youth, have their limbs

तुहिनाचलसङ्काशौ प्रथमे वयसि स्थितौ ।
नानाभरणदिग्धाङ्गौ नानाकुण्डलभूषितौ ॥ ३३ ॥
नानामाल्याञ्चितौ चैव नानामौलिधरौ द्विजाः ।
नानागन्धविलिप्ताङ्गौ नानावस्त्रविभूषितौ ॥ ३४ ॥

[कुमुदस्यासाधारणाकारः]

कुमुदाख्यगणेशस्य ध्यातव्यो दक्षिणः करः ।
चन्द्ररश्मिप्रतीकाशचामरेण विराजितः ॥ ३५ ॥
अभिगच्छदभयं ध्यायेद् द्वितीयं दक्षिणं करम् ।
भवभङ्गात् प्रपन्नानां परेषां गुणशासनम् ॥ ३६ ॥
तस्यैवाद्यं वामकरं प्रबुद्धकमलोद्यतम् ।
तूष्णीं भीसूचकं ध्यायेद् बहिःस्थानां परं करम् ॥ ३७ ॥

[कुमुदाक्षस्यासाधारणाकारः]

एतद् वै कुमुदाक्षस्य वैपरीत्येन भावयेत् ।

[पुण्डरीकादिष्वतिदेशः]

द्वाभ्यां द्वाभ्यां कराभ्यां वै त्वन्येषामेवमेव हि ॥ ३८ ॥

[पुण्डरीकवामनयोः स्थानलक्षणम्]

पुण्डरीको वामनश्च द्वावेतौ हुतभुक्प्रभौ ।
गरुडध्वजहस्तौ च शेषमन्यत् पुरोदितम् ॥ ३९ ॥
कृत्वा ध्यात्वाऽथवा न्यस्य दक्षिणे नैर्ऋतेऽपि च[3] ।

[शङ्कुकर्णसर्वनेत्रयोर्लक्षणस्थाने]

शङ्कुकर्णाभिधानो यः सर्वनेत्राभिसंज्ञितः ॥ ४० ॥
द्वावेतौ चम्पकाभौ तु मायूरव्यजनोद्यतौ ।
महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ ॥ ४१ ॥

bear the beauty of various ornaments, bedecked with various ear-rings, adorned with various garlands, wearing different crowns, with their limbs besmeared with different perfumes and decorated with various garments, O brahmins!

(The specific statue of Kumuda)

34b-37. The right hand of the lord of the hosts called Kumuda must be meditated upon as, shining with the chowry resembling the moon's rays. The second right hand is to be considered as giving freedom from fear to those who approach him, his frontal left hand, directing those who surrender themselves (to him) out of frustration in worldly life to cultivate virtures (found) in others, has the blossomed lotus held high must be thought of and (likewise) the other hand indicates fear silently who are away from him.

(The specific stature of Kumudākṣa)

38a. This shall be considered to be in the reverse of that mentioned for Kumudākṣa.

(Application in the cases of Puṇḍarīka and others)

38b. Thus is for others for each of the two hands.

(Description of the place for Puṇḍarīka and Vāmana)

39-40a. Puṇḍarīka and Vāmana, these two, have the brilliance of the sacred fire and hands holding the flag with the emblem of Garuḍa and others are as stated before. Having formed him and contemplating, they are to be placed in the south and south-west.

(Marks and places for Śaṅkukarṇa and Sarvanetra)

40b-41. Those two are called Śaṅkukarṇa and Sarvanetra. They have the complexion of the Campaka (flower) and have the fan (or chowry) made of peacock's plume and are stationed in the west and south-west of god of great prosperity.

[सुमुखसुप्रतिष्ठयोः स्थानलक्षणे]

सुमुखः सुप्रतिष्ठश्च विभोः सोमेशदिक्स्थितौ ।
चिन्त्यौ मुद्गफलश्यामावातपत्रकरोदितौ ॥ ४२ ॥
नोक्तशेषकराणां तु तद्विद्धि कुमुदोदितम् ।

[एतेषां परिजनसम्पत्तिसाधारणाकारौ]

एते भगवतो विप्रास्त्वन्तरङ्गा मयोदिताः ॥ ४३ ॥
कर्मणा मनसा वाचा तद्भावगत[४]मानसाः ।
ज्ञानादिषड्गुणो[५]पेतैराकीर्णाः कोटिशः परैः ॥ ४४ ॥
भूतैः सिद्धैरनन्तैश्च प्रार्थयानैः परं पदम् ।
वस्त्रभूषाङ्गरागाद्यैः सर्वे ते कुमुदोपमाः ॥ ४५ ॥
श्वेतमृत्कल्पितेनैव ह्यूर्ध्वपुण्ड्रेण भूषिताः ।
ललाटस्थेन सर्वेऽपि कुमुदादिगणाधिपाः ॥ ४६ ॥

[एवमेव भूतपारिषदावृतिदेवद्वाःस्थादीनां पुण्ड्रद्रव्यसंख्यादि]

एवमन्येऽपि भूताद्याः सर्वे पारिषदा द्विजाः ।
एवमावृतिदेवाश्च द्वारस्थाश्च तथैव हि ॥ ४७ ॥
एवं तदीया विप्राश्च क्षत्रविट्छूद्रजातयः ।
मृदैव वा चन्दनेन कल्पितैरूर्ध्वपुण्ड्रकैः ॥ ४८ ॥
द्वादशैश्च चतुर्भिर्वा भूषिताः स्युः सदा द्विजाः ।

[जयविजययोर्लक्षणस्थाने]

अतसीकुसुमश्यामौ पीतमाल्याम्बरान्वितौ ॥ ४९ ॥
पीतोष्णीषधरौ रौद्रौ प्राग्वद्भुजविभूषितौ ।
गणौ चण्डाकृतिधरौ दुर्दर्शौ दुरतिक्रमौ ॥ ५० ॥
जयं च विजयं नाम्ना यजेत् तद्द्वारपार्श्वयोः ।

४. भागवत - B, E
५. षड्गुणो - D, E

(Place and mark of Sumukha and Supratiṣṭhita)

42-43a. Sumukha and Supratiṣṭhita are stationed in the north and north-east. They are to be thought as dark as the fruit of *mudga* (green gram) and have umbrella raised in their hands. What has been said for Kumuda must be applied to the remaining hands which are not treated here.

(Attendants and general statures for these)

43b-46. O brahmins! these stated by me are essential to the Lord with their minds filled with the thoughts of Him, His deed, thinking and words. They are surrounded by others in crores possessing six qualities, (knowledge etc.) infinite number of spirits, *siddhas* seeking (to attain) the supreme position. All these are comparable to Kumuda in their dress, ornaments, unguents and others. They are adorned with perpendicular ornamental marks,[6] made of white mud in (their) foreheads. All of them are the chiefs of Kumuda and other groups.

Thus the substance (used) for the ornamental mark, their number for the spirits, members of the assembly deities on all sides and at the gates.

47-49a. O brahmins! thus others like the spirits and members of the groups (*gaṇa*) of gods who are on all sides and at the gates and thus the Brahmins, Kṣatriyas, Vaiśyas and Śūdras are ever adorned, O brahmins! by twelve or four perpendicular marks, made of mud or sandal paste.[7]

(Marks and positions of Jaya and Vijaya)

49b-51a. The two groups called by the names Jaya and Vijaya who are at the entrance of the gate are to be adorned. They are dark like Ātasī flower, wearing yellow garland and garments, yellow turban, terrific, their arms adorned as (stated for others) before, with their fierce stature, hard to be looked at and formidable.

6. The attendants wear Ūrdhvapuṇḍra, which is a vertical mark on the forehead made with white mud (*śvetamṛt*) what was the material used in the early days to put this mark Vedāntadeśika refers to the use of sandal paste citing evidences from the Purāṇas but he aruges for the use of white mud alone; vide: *Pāñcarātrasaṁhitā* texts cited in the *Saccaritrarakṣā* pp. 67-70. *Bhaktisāra*, one of the Drāvidian saints (Alvārs) had the vision of Śrī Veṅkaṭeśvara. At his direction, the Alvār went to the Tirumalai hills to get the white mud (vide: *Divyasūricarita* III. 17, 18). The period of this Alwar is fixed in the 8th century AD. This practise of using white mud must have been earlier to this period.

7. It is strange that the use of the white mud is stated here to be optional.
The number of Ūrdhvapuṇḍras must be twelve but four is recommended here. Note the remark of Vedāntadeśika in this - *Saccaritrarakṣā* P. 76.

[द्वितीयावरणदेवाः]

[द्वितीयावरणस्थगरुडलक्षणम्]

तदुद्देशात् समारभ्य बहिर्द्वारावसानकम् ॥ ५१ ॥
द्वितीयावरणक्षेत्रं षोढा कृत्वा तु पञ्चमे ।
भागे तु गरुडं विप्राः कृत्वा ध्यात्वाऽथवा न्यसेत् ॥ ५२ ॥
दीप्यच्चामीकराकारं भीमभ्रुकुटिलोचनम् ।
पृथुदंष्ट्रं पृथुघ्राणं पृथुगात्रं पृथूदरम् ॥ ५३ ॥
पक्षाङ्कुराञ्चितोरस्कं पक्षमण्डलमण्डितम् ।
हारकेयूरताटङ्कमकुटाद्यैस्तु भूषणैः ॥ ५४ ॥
भूषितं नीलवसनं नानामाल्यविभूषितम् ।
नानागन्धविलिप्ताङ्गं नागैकादशभूषितम् ॥ ५५ ॥
पुष्पस्तबकसम्पूर्णमञ्जलिं दधतं द्विजाः ।
उन्नम्य दक्षिणं जानुमासनीकृत्य चेतरत् ॥ ५६ ॥
सुखासने समासीनं विभोराज्ञाप्रतीक्षकम् ।

[द्वितीयावरणदेवानामुपेन्द्रादीनां दशानां स्थानानि लक्षणं लक्षणान्तरं च]

ततः[६] कर्मात्मतत्त्वानां दर्शकं[७] सिद्धतां गतम् ॥ ५७ ॥
भगवत्तुल्यसामर्थ्यसार्वज्ञ्यादिगुणैर्युतम् ।

प्रथमावरणद्वारपालयोर्लक्षणमाह — **अतसी** इति द्वाभ्याम् ।
द्वितीयावरणस्थगरुडलक्षणमाह — **तदुद्देशात्** इत्यादिभिः ।
द्वितीयावरणदेवानाह — **ततः** इत्यादिभिः ।

वियुक्तं प्राकृताद्दुःखान्नियुक्तं चेश्वरेण तु ॥ ५८ ॥
भवसन्तारकत्वेन ह्येतदावृतिके क्रमात् ।
उपेन्द्रः पूर्वदिग्भागे संस्थितो द्विजसत्तमाः ॥ ५९ ॥
वह्नौ तेजोधराख्यस्तु दक्षिणे दुरतिक्रमः ।
नैर्ऋते तु महाकर्मा पश्चिमे तु महाह्रदः ॥ ६० ॥
अग्राह्यो वायुदिग्भागे वसुरेतास्तथोत्तरे ।
पूर्वोत्तरे वर्धमानः साक्षी गगनगोचरः ॥ ६१ ॥

६. तपः - A
७. दशकम् - B, D, E

(Deities of the Second enclosure)

(Marks of Garuḍa stationed in the second enclosure)

51b-57a. Beginning with that area upto the end of outer entrance, the region in the second enclosure is to be divided into six parts. O brahmins! Garuḍa is to be stationed in the fifth part. He must be placed there after meditation. Garuḍa shall be of a form of burnished gold, shall have frightful knitted eyebrows and eyes, huge teeth, large nose, huge body and huge belly, chest adorned with the shoots of wings, bedecked with the circle of wings, ornamented by necklace, armlet, ear ornaments, crown etc. Wearing blue cloth, adorned with different garlands, limbs smeared with various perfumes, bedecked with eleven serpents and bearing palmful of bunches of flowers, O brahmins! with his right knee raised and the other turned into a seat, seated comfortably and awaiting the orders of the Lord.

(Positions, marks and other features of Upendra etc. ten deities in the second enclosure)

57b-67a. The groups showing the real name of Karma and Ātman, which has become *siddha* possessing efficiency (skill) equal to that of the Lord and omniscience and other qualities, free from material miseries and commissioned by the Lord is the order as surrounding and conveying (others) across worldly life. O brahmins! Upendra is stationed in the eastern quarter, Tejodhara in south-east, Duratikrama in the south, Mahākarmā in south-west, Mahāhrada in the west, Agrāhya in the north-west, Vasuretā in the north, Vardhamāna in north-east; a witness, being in the sky. One shall think Ādhāranilaya as lying beneath all. These are of the colour of crystals, having white garlands and dresses, bearing the rosary garland, discus, conch, club with the frontal right and other four hands and hind ones. All are equal (for similar) and are adorned with the crowns etc.; groups of

8. The ten weapons are: Vajra, Śakti, Daṇḍa, Khaḍga, Pāśa, Dhvaja, Śiśira, Triśūla, Lāṅgala and Mūsala; vide: *ĪS.* IX.116a-47b.

आधारनिलयं नाम्ना सर्वस्याधोगतं स्मरेत् ।
एते स्फटिकवर्णाभा:[८] श्वेतमाल्याम्बरान्विता: ॥ ६२ ॥
गणित्रकं रथाङ्गं च शङ्खं चैव गदां तथा ।
दधाना मुख्यदक्षादिमुख्यवामान्तमेव हि ॥ ६३ ॥
करैश्चतुर्भि: सुसमा मकुटादिविभूषिता: ।
तेजसा विघ्नजालानि प्रेरयन्तो महौजस: ॥ ६४ ॥
स्थानकै: संस्थिता: सर्वे ध्यानोन्मीलितलोचना: ।
अथवा द्विभुजा एते वज्राद्यं दशकं क्रमात् ॥ ६५ ॥
दक्षिणे लोकपालीयं धारयन्त: करेण तु ।
गणित्रकं तु वामेन वरदाभयदास्तु वा ॥ ६६ ॥
तथा वर्णाङ्गरागाद्यैरिन्द्रादिसदृशास्तु वा ।

[शङ्खपद्मयोर्निधीशयोर्द्वितीयगोपुरस्थाने, लक्षणत्रयविकल्प:, परस्परवैलक्षण्यं च]

द्वितीय[९]गोपुरद्वारपार्श्वयोरन्तरस्थयो: ॥ ६७ ॥
विन्यसेद् द्वारपालाख्यावेतौ वामादितो गणौ ।
निधीशौ शङ्खपद्मौ तु निधिभाण्डोपरि स्थितौ ॥ ६८ ॥

द्वितीयगोपुरद्वारान्त:पार्श्वस्थयो: पद्मनिधिशङ्खनिध्योर्बहि:पार्श्वस्थयोर्भद्रसुभद्रयोश्च लक्षणमाह- **द्वितीयगोपुर** इत्यादिभि: ।

स्थूलदन्तौ च दान्तौ च द्विभुजौ भगवन्मयौ ।
कुटिलभ्रूलतायुक्तौ किञ्चिदुन्नतवक्षसौ ॥ ६९ ॥
लम्बोदरौ सुपीनाङ्गौ ह्रस्वपाणिपदौ द्विजा: ।
शङ्खपद्मसमानाभौ नीलशुक्लाम्बरस्रजौ ॥ ७० ॥
मकुटाद्यैस्तु विविधैरलङ्कारैरलङ्कृतौ ।
दक्षिणेन करेणैव धारयन्तौ सरोरुहम् ॥ ७१ ॥
इतरेण करेणैव ह्युत्तानेन निधिं स्वकम् ।
अथवा वामदक्षाभ्यां[१०] प्रवेशाभीतिदान्वितौ ॥ ७२ ॥

८. वर्णाभा - D, E
९. द्वितीये - B
१०. हस्ताभ्याम् - B, D

obstacles with their lustre as they are, they drive them away who are standing in good positions, all with eyes closed in meditation. Or, these have two arms bearing the ten weapons beginning with thunderbolt, holding in the right hand, Lokapālīyam,[9] the rosary garland or boon-giving and security (freedom from fear) giving, in the left. They are similar to Indra and others in their complexion, unguents etc.

(Alternations in respect of three features of Śaṅkha and Padma, lords of treasures, in their place on the second Gopura and their mutual distinction)

67b-75a. Śaṅkha and Padma, lords of treasures, who are in between the sides of the entrance of the second tower are called the guardians of the entrance. They who represent the groups shall be placed in the left and (right) sides, as standing on the vessels containing treasures. They have thick teeth, and are controlled in their senses. They are filled with (the thoughts of) Bhagavān and have two arms. They possess curved (creeperlike) eyebrows and have their chest a little raised. Their belly is protuberant and limbs are stout. They have short hands and feet, O brahmins! and are of the complexion of conch and lotus. Their clothes and garlands are blue and white (respectively). They are adorned with crowns and different ornaments. Lotus is borne by them with the right hand and their treasure with the other hand turned upwards. Or, permission to enter and security from fear are displayed by the left and right hands or, O brahmins!, they will be bearing

9. Lokapālīya: this does not appear to be the name of any particular weapon. Rather, it is a general name standing for weapons which are intended to protect the world.

करद्वयेन शङ्खं वा पद्मं वा दधतौ द्विजाः ।
वामेन दधतौ[११] पद्मं दक्षं शङ्खं निधीश्वरौ ॥ ७३ ॥
शङ्खपद्मधरौ वापि शिरसा मकुटोपरि ।
शङ्खचक्रधरौ वापि साधकेच्छावशेन तु ॥ ७४ ॥
तद्द्वारशाखानिष्ठौ तु संस्मरेद् दक्षिणादितः ।

[भद्रसुभद्रयोस्तत्रैव स्थाने, लक्षणद्वयविकल्पश्च]

क्षीरकुन्दावदातौ च नीलकौशेयवाससौ ॥ ७५ ॥
नीलनीरजवर्णाभैः पुष्पैर्भूषितविग्रहौ ।
पूर्वोक्तगणसादृश्यौ नाम्ना भद्रसुभद्रकौ ॥ ७६ ॥
तद्द्वारबाह्यतः पश्चात् पार्श्वयोर्गोपुरस्थितौ ।
एतौ गणेश्वरौ न्यस्येद् ध्यात्वा वा परिकल्प्य वा ॥ ७७ ॥
अथवा द्विभुजावेतौ तदा भद्रस्य दक्षिणम् ।
करं तु तर्जनीयुक्तं वाममीषत् तु कुञ्चितम् ॥ ७८ ॥
गदाग्रोपरि विश्रान्तं गदामूलोपरि स्थितम् ।
व्यत्यस्तं[१२] दक्षिणं पादं वामं तु भुवि संस्थितम् ॥ ७९ ॥
भद्रस्य वामयोर्विप्रा यदुक्तं पाणिपादयोः ।
दक्षयोस्तत्सुभद्रस्य दक्षोक्तं वामकं भवेत् ॥ ८० ॥
किन्तु तद्वामहस्तं तु युक्तं विस्मयमुद्रया ।
यद्वा भद्रो दक्षकरेऽभीतिमुद्रासमन्वितः ॥ ८१ ॥
गदोपरिष्टाद्विश्रान्तवामहस्तो द्विजोत्तमाः ।
पश्चात् करद्वयेनापि चक्रशङ्खधरः क्रमात् ॥ ८२ ॥
सुभद्रस्तु गदान्यस्तदक्षहस्तस्तथेतरे ।
अभीतिमुद्रासंयुक्तश्चक्रशङ्खसमन्वितः ॥ ८३ ॥

११. धारयेत् - B, D, E
१२. व्यत्यस्त - B

conch or lotus. The two lords of treasures bear lotus with the left hand and conch with the right hands. Or, bearing the conch and lotus with their heads. Or, conch and discus are borne by them on their crowns according to the liking of the priest. They shall be thought of as stationed at the door-posts in the right and (left) sides.

(Bhadra and Subhadra have their places there itself and have alternation in two features)

75b-83. Clean (or white) like milk and jasmine, dressed in blue silk, with their frames bedecked with flowers of the blue lily and having similarity to the groups already stated, they are named Bhadra.

These two lords of groups are stationed outside the entrance and behind on both sides of the tower. They shall be contemplated upon and arranged there. Or, these two, having two arms, with the right hand of Bhadra having the threatening feature and the left hand slightly bent, resting on the top of the mace and lying in its lower portion. The right foot is in a reversed position and the left kept on the ground. O brahmins! what has been said for the left hand and foot of Bhadra shall be for those of the right for Subhadra and those stated for the right shall be for the left, but the left hand shall possess the *mudrā* of amazement (or arrogance),[10] or, O brahmins! Bhadra shows the *mudrā* of security[11] from fear by the right hand and the left hand resting on the top of the mace and bears by the two hind hands, discus and conch in their order. Subhadra however has his right hand placed on the mace and the other (left) hand having the *mudrā* of security from fear and having discus and conch.

10. See note under VII. 19.

11. Abhayamudrā: this is described along with Varamudrā *J.S.* VIII.104-107a; *LT.* XXXIV.78b-79.

[चण्डादीनामष्टानां कृत्यादि]

चण्डादिष्वप्येवमेव द्विभुजत्वादिकं भवेत् ।
चण्डप्रचण्डौ धाता च विधाता च जयस्तथा ॥ ८४ ॥
विजयश्चापि भद्रश्च सुभद्रश्च गणेश्वरः ।
एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना ॥ ८५ ॥
देहवक्त्राकृत्यैस्तुल्यास्तथैवाभरणायुधैः ।
भक्तानां विघ्नजालस्य सर्वदिक्संस्थितस्य च ॥ ८६ ॥
संसारफलदातुर्वै छेदनार्थं समुद्यताः ।
परस्परमुखाः सर्वे स्थानकैः संस्थिताः समैः ॥ ८७ ॥
गणेशायुतलक्षैस्तु नानावर्णवपुर्धरैः ।
अच्युताराधनपरैरनेकैः परिवारिताः ॥ ८८ ॥

भद्रसुभद्रोक्तं लक्षणान्तरपक्षद्वयं चण्डादीनामपि समानमित्याह — **चण्डादिषु** इत्यादिभिः ।

[तृतीयावरणदेवाः]

[इन्द्रादिषु दशस्विन्द्रस्यासाधारणवर्णवाहनायुधानि]

तृतीयावरणे पश्चात् पूर्वादिक्रमयोगतः ।
इन्द्रादिलोकपालानां दशकं विन्यसेद्द्विजाः ॥ ८९ ॥
शतधामनिभं ध्यायेच्चतुर्बाहुं पुरन्दरम् ।
महितद्विपसंस्थं तु सुतीक्ष्णकुलिशोद्यतम् ॥ ९० ॥

[अग्न्यादिनवानां साधारणासाधारणवर्णादीनि, भुजे विकल्पश्च]

अजारूढं स्मरेद् रक्तं शक्तिपाणिं हुताशनम् ।
सहस्रार्चिभिराकीर्णं सहस्रादित्यभासुरम् ॥ ९१ ॥
महामहिषसंस्थं तं त्वञ्जनाद्रिसमप्रभम् ।
सभीमदण्डहस्तं च स्मरेद्देवं पित्रीश्वरम् ॥ ९२ ॥
दंष्ट्राकरालवदनं कृष्णमेघसमप्रभम् ।
घोरं प्रेतासनं ध्यायेत् खड्गधृग्राक्षसेश्वरम् ॥ ९३ ॥
मुक्ताफलद्युतिसमं भीमं पाशकरोद्यतम् ।
नागकन्यासहस्राढ्यं मकरस्थमपां पतिम् ॥ ९४ ॥

(Work of Caṇḍa and others who are eight in number)

84-88. Caṇḍa and others also have two arms. Caṇḍa and Pracaṇḍa, Dhātṛ and Vidhātṛ, Jaya and Vijaya, Bhadra and Subhadra — these are eight lords of group, are equal to each in body, face and actions, decorations and weapons except in their complexion, flowers and garments. They are prepared to destroy the multitude of obstacles present in all directions and that which grant the fruits in worldly life, all in the case of devotees. All face each other and remain in their own postures. They are surrounded by ten thousand lakhs of the lords of the groups, having bodies of varied colours and by many who intend to worship Acyuta.

(Gods of the third enclosure)

(Among Indra etc. ten protectors of the directions, the specific colour, vehicle and weapons of Indra)

89-90. O brahmins! the ten guardians of the quarters beginning with Indra are to be placed in the third enclosure starting from the direction of east etc. Indra with four hands is to be meditated upon as resembling Viṣṇu, mounted on the respectable elephant and having the raised sharp thunder-bolt.

(General and special colours of the seven deities beginning with Agni and alternations in their arms)

91-105a. One shall think of Agni as mounted upon goat, red-coloured and holding the spear in the hand; encircled (spread over) by thousand flames and shinning like thousand suns; The lord of the manes (Yama), shall be considered as stationed on a huge bull, having a complexion like that of the hill of collyrium and having a formidable staff in the hand. The lord of the demons (Nairṛti) shall be meditated upto with a face frightful with huge teeth, having a complexion like that of blue cloud, dreadful and seated on the corpse and holding the sword. One shall think of the lord of waters (Varuṇa), having a complexion similar to that of pearls, dreadful with the noose raised in the hand, having the company of thousands of serpent maidens and seated on the crocodile. The lord of wind shall be meditated upon as seated on the deer, resembling blue cloud and having the mark of a huge flag cloth. Soma (moon) shall be considered as having the cluster of

नीलतोयदसङ्काशं महाध्वजपटाङ्कितम् ।
ध्यायेत् समीरणं देवं संस्थितं हरिणोपरि ॥ ९५ ॥
सोमं तारागणोपेतं शङ्खगोक्षीरपाण्डरम् ।
बृहच्छशकपृष्ठस्थं शिशिरास्त्रकरं स्मरेत् ॥ ९६ ॥
सित[१३]भूतिविलिप्ताङ्गं त्रिनेत्रं वृषवाहनम् ।
त्रिशूलायुधहस्तं च त्वीशानं ज्ञानिनं स्मरेत् ॥ ९७ ॥
पातालदिग्गतं ध्यायेत् कूर्मारूढं हलायुधम् ।
सितं सहस्रफणभृद्योऽनन्तो नाम नागराट् ॥ ९८ ॥

तृतीयावरणदेवानाह — **तृतीयावरणे** इत्यादिभिः ।

भचक्रं[१४] भ्रामयन्तं तु दण्डहस्तं प्रजापतिम् ।
हंसारूढं स्वसंस्थं तु ध्यायेद् ध्रुवमजं विभुम् ॥ ९९ ॥
एते चतुर्भुजाः सर्वे अक्षसूत्रविभूषिताः ।
चिन्तयन्तः परं तत्त्वं वराभयकरोद्यताः ॥ १०० ॥
दिव्याभरणदिग्धाङ्गा दिव्यमाल्याम्बरान्विताः ।
दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विजाः ॥ १०१ ॥
रक्तशुक्लनिशापीतनीलचम्पकसप्रभैः ।
व्योमस्फटिकमार्तण्डराजोपलनिभैस्तथा ॥ १०२ ॥
माल्याङ्गरागवसनैः महार्घैः समलङ्कृताः ।
भूषिता भूषणैश्चित्रैः करण्डमकुटादिभिः ॥ १०३ ॥
एभ्यश्चतुर्भुजस्त्वत्र विज्ञेयो वृषभध्वजः ।
द्विभुजास्त्वथ वा चान्ये वरदाभयदास्तु वा ॥ १०४ ॥
इति लोकेश्वरेषूक्तं ततो वै द्विजसत्तमाः ।

[तृतीयगोपुरद्वारपालयोर्मध्ये सुदर्शनलक्षणादि]

तृतीयावरणद्वारे शाखामूले तु दक्षिणे ॥ १०५ ॥

१३. सितो - B
१४. भवक्रम् - B, D, E

stars, whitish yellow like conch, cow and milk, seated on the back of a huge hare and having a cool weapon[12] in the hand. Śiva (Īśāna), endowed with knowledge shall be thought of as having the limbs smeared with white ashes, three eyes, bull as the vehicle and trident as the weapon in the hand. Ananta, the king of serpents shall be thought of as being in the Pātāla, surmounted on the tortoise, having the ploughshare as the weapon, white and having thousand hoods. Brahmā, the Lord of the created beings shall be thought of as rotating the wheel of stars, holding the staff in the hand, mounting on the swan, remaining in himself, eternal, unborn and all powerful. All these have four arms, bedecked with the garland of rosaries, contemplating on the Supreme Reality, with the hands bent on giving boons and security, their limbs brightended by divine ornaments, wearing divine garlands and dresses, with divine forms, O brahmins! bearing divine, fragrance, with brilliance of red, white, black, yellow, blue and Campaka (green flower) and like the sky, crystal sun, and Rājopala decorated by invaluable garlands, unguents, garments; bedecked with varied ornaments — honey, comb (Karaṇḍa), crown etc. Here Śiva, the bull bannered shall be known as having four hands as distinct from others. Or, having two hands, or others granting the boons and security, O best brahmins! thus is said with reference to the Lords of the worlds.

(Marks of Sudarśana etc. amidst the guardians of the gates of the third tower)

105b-111a. Sudarśana shall be contemplated at the bottom of the right doorpost at the entrance to the third enclosure, as having four hands, small body, of dazzling complexion with eyes red with anger, besmeared with the

12. This is mentioned as given to Śrī Rāma by Viśvāmitra; vide: *Rāmāyaṇa. Bālakāṇḍa* XXVII.19b. *Ahs.* XXXIV.98b-100a mentions a weapon as *Sitesvastra.* Perhaps, it means a weapon aimed at objects that are chill. Śiśira, on the other hand, may mean a weapon creating chillness on the targets. See the text 124b-125a, cf. *Pāram. S.* XI.119-127.

सुदर्शनं चतुर्हस्तं ह्रस्वकायं ज्वलत्प्रभम् ।
क्रोधरक्तेक्षणं दैत्यदानवासृग्विलेपनम् ॥ १०६ ॥
नृत्यन्तं मदमत्तं च सहस्रारान्तरस्थितम् ।
दंष्ट्राकरालवदनं कुटिलभ्रूलतायुतम् ॥ १०७ ॥
कल्पान्तपावकाकारं स्वरश्मिपरिवेष्टितम् ।
दक्षिणे भुजयुग्मे तु पूर्वेण च सुदर्शनम् ॥ १०८ ॥

तृतीयद्वारपालयोश्चतुर्थावरणदेवानां च लक्षणमाह — **तृतीयावरणद्वारे** इत्यादिभिः ।

धारयन्तं ततोऽन्येन विश्रान्तां भूतले गदाम् ।
शङ्खं मुख्येन वामेन ह्यपरेण गणित्रकम् ॥ १०९ ॥
हारकेयूरताटङ्कमकुटादिविभूषणैः ।
विभूषितं विचित्रैस्तु श्वेतमाल्याम्बरादिकैः ॥ ११० ॥
विघ्नानुत्पाटयन्तं तु दीप्तेन स्वेन तेजसा ।

[तद्वारपस्य गरुडस्य लक्षणादि]

संस्मरेत् तु ततोऽन्यस्मिन् शाखामूले ततो द्विजाः ॥ १११ ॥
सुस्थितं गरुडं विप्राः तप्तकाञ्चनसन्निभम् ।
सौम्यवक्त्रं विवृत्ताक्षं रक्ततुण्डं सुभीषणम् ॥ ११२ ॥
पृथूदरं दीर्घपुच्छं पक्षमण्डलमण्डितम् ।
रक्ताम्बरधरं चैव रक्तस्रगनुलेपनम् ॥ ११३ ॥
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ।
विचित्रकञ्चुकधरं भुजगेन्द्रैरलङ्कृतम् ॥ ११४ ॥
मकुटाद्यैरलङ्कारैर्विविधैस्तु विभूषितम् ।
भुजद्वये यच्चक्रस्य वामे सम्परिकीर्तितम् ॥ ११५ ॥
दक्षिणे तद्भवेदस्य दक्षोक्तं वामकं भवेत् ।

[चतुर्थावरणदेवाः]

[चतुर्थावरणदेवानां वज्रादीनां नामानि स्थानानि च]

वज्रं शक्तिस्तथा दण्डः खड्गः पाशो ध्वजस्तथा ॥ ११६ ॥
शिशिराख्यं त्रिशूलं तु लाङ्गलं मुसलं तथा ।
पूर्वादिक्रमयोगेन चतुर्थावरणे स्थिताः ॥ ११७ ॥

blood of Daityas and Dānavas dancing (active) excited by pride standing amidst the thousand spokes and having the mouth (face) frightful with big teeth, curved creeperlike eyebrows; of an exterior form like the fire at the end of aeons, encircled with his rays, bearing the discus in the frontal right hand and the mace with the other resting on the ground, conch by the frontal left hand and the rosary garland in the other adorned with necklaces, armlets, ear-rings, crown and other ornaments, by the bright white garlands, dresses etc. and making the obstacles flee away with his dazzling lustre.

(Marks of Garuḍa, the guardian of that entrance)

111b-116a. O brahmins! one shall think of Garuḍa at the other doorpost, well-stationed, resembling burnished gold, with a pleasant countenance, rotating eyes, red beak, very frightful, huge belly, long hind part (tail) and adorned with a circle of wings. He wears a red garment, has a red garland and red unguent, has a face (mouth) frightful with big teeth, eyes crooked with eyebrows, wearing a pretty overcoat ornamented by chief snakes and bedecked with various ornaments like crown etc. What was stated for the discus (Sudarśana) in the left hand, that shall be in the right hand for him (Garuḍa) and that for the right shall be in the left hand.

(Deities in the fourth enclosure)

(Names and places for thunderbolt etc. of deities in the fourth enclosure)

116b-117. Thunderbolt, spear, club, sword, noose, flag, that which is called Śiśira, trident, ploughshare and pestle are for these (deities) who are stationed in the fourth enclosure starting from the direction of east etc.

[एतेषां लक्षणानि ध्यानं च]

एतेषां क्रमशो ध्यानं साम्प्रतं कथ्यते द्विजा: ।
वज्रं वज्रोपलाभं तु सितदीर्घनखाङ्कितम् ॥ ११८ ॥
दंष्ट्राकरालवदनं ज्वलत्कनकलोचनम् ।
सौदामिनीप्रभां शक्तिं शान्ताग्निवदनेक्षणाम् ॥ ११९ ॥
घनघर्घरनिर्घोषमुद्गिरन्तीं मुहुर्मुहुः ।
बद्धमुष्टिं स्मरेद्दण्डं रक्ताङ्गं रक्तलोचनम् ॥ १२० ॥
क्रोधमूर्तिं स्वदशनैर्दशन्तमधरं[१५] स्वकम् ।
स्वरश्मिखचितं ध्यायेन्नृत्यमानं तु नन्दकम् । १२१ ॥
शरदाकाशसङ्काशं दशन्तं दशनावलीम् ।
पाशं गुणगणाकीर्णं विद्युज्जिह्वं भयानकम् ॥ १२२ ॥
हेमालिपाण्डराभं तु[१६] घोरास्यं रक्तलोचनम् ।
शरज्जलदसङ्काशं ध्वजं कुटिललोचनम् ॥ १२३ ॥
स्वतेजसा जगत्सर्वं द्योतयन्तं बलोत्कटम् ।
शिशिरं शीतधामाभं पीनाङ्गं पृथुविग्रहम् ॥ १२४ ॥
जटाकलापधृत्सौम्यं पुण्डरीकनिभेक्षणम् ।
उदयार्कसहस्राभं त्रिशूलं भीषणाकृतिम् ॥ १२५ ॥
कल्पान्तपावकाकारं स्वरश्मिपरिवेष्टितम् ।
सन्ध्याजलदसङ्काशं लाङ्गलं भीमलोचनम् ॥ १२६ ॥
क्षामाङ्ग[१७]मुन्नतांसं तु वज्रकायं बलोत्कटम् ।
कुन्दावदातं मुसलं सौम्यमीषत् स्मिताननम् ॥ १२७ ॥
रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ।
नीलरक्तसितापीतपावकाञ्जनसन्निभैः ॥ १२८ ॥
हेमचन्द्रहिमाकाशसमानाभैः क्रमेण तु ।
माल्याङ्गरागगवसनैरुचितैः समलङ्कृताः ॥ १२९ ॥

१५. अधरैः - E, मधुरम् - B
१६. च - D, E
१७. क्षमाङ्ग - B, D, E

(Marks of these and meditation)

118-131a. O brahmins! now the marks and the (method of) meditation are stated. The thunderbolt[13] has the brilliance of diamond (adamantine stone), has the marks made by white and long nails; has terrific face with huge teeth and bearing golden eyes. Śakti spear has the brilliance of lightning, mouth and looks resembling extinguished fire. It ejects frequently a deep gurgling sound. The staff club is to be thought of as having the fist-formed, red-limbed and red eyed, a form personified with anger and biting its own lower lip with its teeth. The sword called Nandaka, which is inlaid (filled) with its own splendour, dances, resembles the autumnal sky and biting the row of (its own) teeth. The noose is strung with a cluster of strings, has the tongue resembling lightning, frightful, has the white colour, reddish line of gold, dreadful mouth and red eyes. The flag staff resembles the autumnal cloud, has crooked (curved) eyes, illumines the entire world with its lustre and has excessive strength. The weapon called Śiśira has the complexion of the moon, and is stout-limbed and huge-bodied. It bears knots of matted hair, is gentle and has lotus-like eyes. The trident has the brilliance of the rising sun, a frightful form, an exterior like the fire of deluge and surrounded by its own splendour. The ploughshare resembles the cloud of twilight, has fearful eyes, thin limbs, raised shoulders, hard body and is excessively strong. The pestle is bright as Jasmine, gentle with a slightly smiling face and making a sweet sound pleasing to the organ of heading. All these are well adorned with suitable garlands, unguents and dresses resembling blue, red, white, yellow, fire and collyrium and similar to gold, moon, snow and sky in complexion. Possessing divine ornaments, their heads,

13. Rājapala, Vajra, thunderbolt.

दिव्यैराभरणैर्युक्ताः स्वचिह्नाङ्कितमस्तकाः ।
तर्जयन्तश्च दुष्टौघं दक्षिणेन करेण तु ॥ १३० ॥
वामेन कटिमालम्ब्य सुसमैः स्थानकैः स्थिताः ।

[चतुर्थावरणद्वारदेवतयोः गङ्गायमुनयोः स्थाने]

चतुर्थावरणद्वारदक्षिणोत्तरशाखयोः ॥ १३१ ॥
गङ्गां च यमुनां चैव ध्यात्वा सम्पूजयेत् क्रमात् ।

[गङ्गायाः लक्षणं कार्यं च]

भगवत्पादसंभूतां गङ्गां कुमुदसन्निभाम् ॥ १३२ ॥
नवयौवनलावण्यसौकुमार्यगुणैर्वृताम् ।
नीलाङ्गरागवसनां नीलमाल्यैरलङ्कृताम् ॥ १३३ ॥
द्विभुजां सौम्यवदनां पुण्डरीकनिभेक्षणाम् ।
हारनूपुरकेयूरकुण्डलाद्युपशोभिताम् ॥ १३४ ॥
संसारतापसन्तप्तानारुरुक्षून् परं पदम् ।
वासनाकर्मपङ्कानि क्षालयन्तीं स्वतेजसा ॥ १३५ ॥
वहन्तीं दक्षिणेनैव कलशं वारिपूरितम् ।
वामेन तर्जयन्तीं तु करेण प्राकृतान् जनान् ॥ १३६ ॥

चतुर्थद्वारपालयोः पञ्चमावरणदेवानां च लक्षणमाह — **चतुर्थावरण** इत्यादिभिः ।

[यमुनायाः लक्षणं कार्यं च]

यमुनां नीलरत्नाभां नीलकुञ्चितमूर्धजाम् ।
सिताङ्गरागवसनां सितमाल्योपशोभिताम् ॥ १३७ ॥
दक्षिणे तर्जनीमुद्रा वामे तु कलशः स्मृतः ।
अन्यत् सर्वं तु गङ्गोक्तमत्रापि स्यान्मुनीश्वराः ॥ १३८ ॥

[पञ्चमावरणदेवाः]

[पञ्चमावरणदेवानां लोहिताक्षादीनां प्रत्येकं स्थानानि, लक्षणानि साधारणाकारश्च]

लोहिताक्षो महावीर्यस्त्वप्रमेयः सुशोभनः ।
वीरहा विक्रमो भीमः शतावर्तस्तु चाष्टमः ॥ १३९ ॥

marked by their emblems, they threaten the host of the wicked people with their right hand and stand in well-balanced postures holding the waist with the left hand.

(Place for Gaṅgā[14] and Yamunā, the deities at the gates of the fourth enclosure)

131b-132a. Gaṅgā and Yamunā are to be thought of as (stationed) on the right and left (south and north) door posts at the entrance to the fourth enclosure and worshipped in their order.

(Marks and work of Gaṅgā)

132b-136. Gaṅgā shall be thought of as having risen from the foot of the lord, resembling Jasmine (in colour), possessing the groups of fresh youth, loveliness and tenderness, wearing a dress like blue pigment, adorned with blue garlands, having two hands, pleasant (gentle) countenance (face), lotus-like eyes, shinning with necklace, anklets, armlets, ear-rings etc., cleansing with its lustre the mud of Karma, in the form of impressions of those who seek to ascend the supreme and who are tortured by the afflictions of mundane existence. She bears a pitcher filled with water with the right hand and threatens ordinary people with the left hand.

(Marks and work of Yamunā)

137-138. O lordly sages! Yamunā has the complexion of a blue gem, blue curved locks of hair, dress like a white unguent and shinning with white garlands. She is to be thought as having the *mudrā* of threatening in the right hand and a pitcher in the left. Other (matters) which were stated for Gaṅgā apply here also.

(Deities of the fifth enclosure)

139-153. (Individual places for Lohitākṣa and other deities of the fifth enclosure, their marks and general forms)

Lohitākṣa, Mahāvīrya, Aprameya, Suśobhana, Vīrahā, Vikrama, Bhīma, and Śatāvarta these eight remain in the fifth enclosure in the north-east (Aiśvarī) and other directions in this order. Lohitākṣa shall be thought of as

14. Gaṅgā and Yamunā represented as embodied beings.

ऐश्वरीदिक्क्रमेणैव पञ्चमावरणे स्थिताः ।
ध्यायेच्चन्द्रप्रतीकाशं लोहिताक्षं बलोत्कटम् ॥ १४० ॥
नीलाम्बरधरं नीलमाल्यं नीलानुलेपनम् ।
महावीर्यं महाकायं पीतवर्णं महाभुजम् ॥ १४१ ॥
प्रवालाभाम्बरधरं रक्तस्रगनुलेपनम् ।
संस्मरेदप्रमेयाख्यमप्रमेयबलोत्कटम् ॥ १४२ ॥
हरिताकृतिमापीतवसनस्रग्विलेपनम् ।
सुशोभनं शोभनाङ्गं मुक्ताफलनिभं स्मरेत् ॥ १४३ ॥
अतसीपुष्पसङ्काशवासोमाल्यानुलेपनम् ।
वीरघ्नं[१८] वीरहाख्यं च ध्यायेच्चम्पकसन्निभम् ॥ १४४ ॥
बाह्लीकारञ्जितारक्तवसनस्रग्विमण्डितम् ।
विक्रमं विक्रमावासं चाषोदरनिभं स्मरेत् ॥ १४५ ॥
कुन्देन्दुकान्तिवसनं सितमाल्यानुलेपनम्[१८] ।
भीमं भीमाकृतिं ध्यायेत् तप्तकाञ्चनसन्निभम् ॥ १४६ ॥
पाण्डरारुणकौशेयं तद्वद्गन्धस्रगन्वितम् ।
अतसीकुसुमश्यामं शतावर्तं तु भावयेत् ॥ १४७ ॥
पीताम्बरधरं पीतमाल्यगन्धविभूषितम् ।
भुजद्वयान्विता ह्येते चान्तर्मुदितमानसाः ॥ १४८ ॥
दक्षिणैः पाणिभिः सर्वे ज्वलन्तं परशुं तथा ।
वामैः शङ्खवरं दीप्तं दधानाश्चारुकुण्डलाः ॥ १४९ ॥
समाः समविभक्ताङ्गाः प्रशान्ताकृतयस्तथा ।
स्थानकैः संस्थिताः सर्वे सप्रभाविर्राजिताः ॥ १५० ॥
प्रसन्नवदनाः सौम्यास्त्रैलोक्योद्धरणक्षमाः ।
हारनूपुरकेयूरपूर्वभूषाविभूषिताः ॥ १५१ ॥
तदाज्ञाप्रेक्षकाश्चैव दुष्टदोषोपशान्तिदाः ।
बलेन महता क्षिप्तदेवासुरमहोरगाः ॥ १५२ ॥
एकवीराऽसहायाश्च त्वप्रयत्नेन लीलया ।
आब्रह्मभवनं शश्वत्परिवर्तयितुं क्षमाः ॥ १५३ ॥

१८. 'वीरघ्नम्' इत्यारभ्य 'अनुलेपनम्' इत्यन्तं नास्ति - B, D, E

resembling the moon, eminent through strength, wearing a blue cloth, blue garland and blue unguent (smeared over the body). Mahāvīrya has a huge body, yellow in complexion, having huge arms, wearing a dress resembling coral (in its colour) and having red garland and red unguents. The deity called Aprameya shall be thought of as eminent through his unfavourable strength having the form like that of mongoose of green appearance and wearing all-yellow cloth, garland and unguent. Suśobhana has refined limbs, resembling pearls. He shall be thought of as having a dress similar to Atasī flower in complexion and garland and unguent. The deity called Vīrahā shall be thought of as slaying the warriors, resembling the Campaka (flower) and decorated with reddish garment and garland dyed with saffron. The deity Vikrama is the abode of prowess, with a colour resembling that of the belly of jay, with the garment of the complexion of jasmine and moon and having white garland and unguent. Bhīma shall be thought of as having a frightful form, resembling heated gold, having a silken garment whitish yellow and red in colour, and sandal-paste and garland (similar in complexion to the above). Śatāvarta shall be considered to wear a yellow cloth, bedecked with yellow garland, and sandal-paste and dark like Atasī flower.

These have two arms and ever having (experienced) inner rejoicing, all have the blazing axe in the right hand. They wear charming ear-rings and bear the radiant conch in the left hands. They are same, with well-proportioned limbs, calm exterior and stand in their own postures shining with halo. They have a clear face (countenance), calm, capable of lifting up (from distress) the three worlds, and bedecked with ornaments, necklace, anklet, armlet and others. They are expecting the commands from him and destroy the defects created by the wicked. They cast aside the gods, demons and huge serpent with their great strength, unrivalled warriors and requiring no assistance, they always have the power to turn upside down the world from Brahmā's abode without any efforts, as if, in sport.

[पञ्चमावरणद्वारपालादीनां लक्षणादि]

एतदावरणद्वारचतुष्के द्वारदेवताः ।
न्यस्येद् यु[१९]ग्मप्रयोगेन पूर्वद्वारादितः क्रमात् ॥ १५४ ॥
वज्रनाभं हरीशं च पूर्वस्यां दक्षिणोत्तरे ।
ध्यायेत् तु वज्रनाभाख्यं शतधामसमप्रभम् ॥ १५५ ॥
मुख्यदक्षिणहस्तेन निषेधाभिनयान्वितम् ।
वेत्रलतां द्वितीयेन चक्रराजं तृतीयतः ॥ १५६ ॥

पञ्चमावरणद्वारपालाष्टकस्य षष्ठावरणदेवानां च लक्षणमाह — **एतदावरण** इत्यादिभिः ।

मुख्यवामकरेणैव श्रोणीतटकृतार्पणम् ।
शङ्खराजं द्वितीयेन तथा वज्रं तृतीयतः ॥ १५७ ॥
धारयन्तं तथा रुक्मभूषणैर्विविधैरपि ।
रक्तमाल्याम्बरधरं रक्तस्रगनुलेपनम् ॥ १५८ ॥
एवं वामे हरीशं च[२०] निषेधाभिनयोज्झितम्[२१] ।
प्रवेशाभिनयाख्येन पाणिना किं तु चिह्नितम् ॥ १५९ ॥
एको ह्यत्र निषेधं च त्वभ[२२]क्तानां करोति वै ।
भक्तानामपरश्चैव प्रवेशं सम्प्रयच्छति । १६० ॥
द्वारे द्वारे प्रतीहारद्वयस्यैवं प्रयोजनम् ।
दक्षोक्तं वज्रनाभस्य तद्धरीशस्य वामगम् ॥ १६१ ॥
आद्यवामगतं सर्वमन्यद्दक्षिणपाणिगम् ।
धर्माध्यक्षनियन्त्रीशौ दक्षिणे दक्षिणोत्तरे ॥ १६२ ॥
कुर्यादन्तकसादृश्यौ पूर्ववद्भुजभूषितौ ।
पीतकौशेयवसनौ पीतमाल्यविलेपनौ ॥ १६३ ॥
किं तु दण्डगदाहस्तौ वज्रचक्रविवर्जितौ ।
शुद्धाक्षममृतानन्दं प्रतीच्यां दक्षिणादितः ॥ १६४ ॥

१९. नयेत् - B, D, E
२०. हरीशश्च - E
२१. नयान्वितम् - B
२२. क्व - B, E

(Marks and others of deities in the fifth enclosure)

154-169a. Deities at the entrance shall be placed at the four gates of this enclosure in pairs duly in the order from the east. Vajranābha and Harīśa are to be placed in south and north of the eastern gate. The deity called Vajranābha shall be meditated upon as having a splendour similar to that of the sun, conveying the gesture of prohibition for entrance with the frontal right hand, the cane stick with the second and the lordly discus with the third. The frontal left hand rests on the hip, conch is held in the second and the thunderbolt in the third and has various golden ornaments, red garland (of flowers) and dress and red garland and red perfumes. Similarly, Harīśa does display prohibition not with the left hand but has the mark of the hand with the gesture for entrance, but marked thus. One prevents (entrance) to the non-devotees and the other offers permission to the devotees. This is the purpose at each entrance for the two guardians at the doors. What was said for the right in the case of Vajranābha applies to the left for Harīśa. All that was stated to the frontal left applies to the right hand Dharmādhyakṣa and Niyantrīśa shall be in the right and left of the south (entrance). They shall be similar to the god of death and shall have the decorations for the arms, like those (described) before. They shall be dressed in yellow silken cloth and have yellow garlands and unguents but shall have the hands holding the staff and mace without the thunderbolt and discus. Śuddhākṣa and Amṛtānanda shall be in the right and left. They shall hold arrow and bow in

बाणकार्मुकमेकस्मिन् पाणौ पाशमथापरे ।
आद्यं करचतुष्कं यत् तद्व्यग्रं पूर्ववद् भवेत् ॥ १६५ ॥
आकृतौ जलनाथस्य सदृशौ सर्वदैव हि ।
नीलकौशेयवसनौ नीलस्त्रगनुलेपनौ ॥ १६६ ॥
वसुनाथं[२३] सुधानन्दमुदग्दिग्दक्षिणोत्तरे ।
खड्गमुद्गरहस्तौ च प्राग्वच्छेषं चतुष्टयम् ॥ १६७ ॥
कराणामनयोः कार्यं रूपेणोडुपतेः समौ[२४] ।
अतसीकुसुमश्यामकौशेयस्त्रग्विलेपनौ ॥ १६८ ॥
भूषणैर्भूषिता ह्येते विविधैर्वज्र[२५] नाभवत् ।

[षष्ठावरणदेवाः]

[षष्ठावरणदेवानां कालादीनां लक्षणादि]

षष्ठावरणदेवानां तद्वाःस्थानां विशेषतः ॥ १६९ ॥
शृणुध्वं ध्यानमधुना तत्त्वतो मुनिपुङ्गवाः ।
पूर्वादीशानपर्यन्तं षष्ठावरणसंस्थिताः ॥ १७० ॥
एताश्च देवता विप्राः तेजोरूपसमन्विताः[२६] ।
कालो वियन्नियन्ता च शास्त्रं नानाङ्गलक्षणम् ॥ १७१ ॥
विद्याधिपतयश्चैव सरुद्रः सगणः शिवः ।
प्रजापतिसमूहस्तु इन्द्रः सपरिवारकः ॥ १७२ ॥

[तन्मुख्यद्वारपाश्चक्रादयस्तेषां लक्षणानि]

मुख्ये द्वारचतुष्के तु पूर्ववत् संस्थिताः क्रमात् ।
चक्रशङ्खौपद्मगदे लाङ्गलं मुसलं शराः ॥ १७३ ॥
शार्ङ्गं चैते क्रमाद् ध्येया विद्युत्तुहिनकुन्दभाः ।
पीतनीलसितारक्तसितगोक्षीरसन्निभैः ॥ १७४ ॥

२३. वसुनाथ - B, E
२४. समम् - B, E
२५. ब्रह्म - B
२६. समाश्रिताः - D, E

one hand and the noose in the other. The four hands (described before) shall be employed as (described) before. In form, they shall ever be comparable to the lord of waters, with their dress in blue silk and having blue garland and unguents. Vasunātha and Sudhānanda shall be with sword and hammer in their hands and have the four remaining aspects as before for the hands for these. In form, they shall be same as the moon (lord of stones) They shall have the silk dark garland and unguent like the Atasī flower. These shall be adorned with various ornaments like Vajranābha.

(Deities of the sixth enclosure)

(Marks and others of Kāla and other deities in the sixth enclosure)

169b-172. O eminent sages! listen now, in reality, to the (method of) contemplation on the deities of the sixth enclosure and in particular of those who are stationed at its entrance. These deities are stationed in the sixth enclosure from the east upto north-eastern quarters, O brahmins! with their own lustrous forms. (They are) Kāla, Viyat,[15] Niyantā, Śāstra (with various limbs), Vidyādhipatis, Śiva with Rudra and hosts (*gaṇa*) the groups of Prajāpati and Indra with his retinue.

(Discus etc. which guard the chief (main) entrances and their marks)

173-177. Discus, conch, lotus, mace, ploughshare, pestle, arrows and bow are stationed in due order as stated before at the four main entrances. Meditation is to be undertaken on them, who are of the complexion of lightning, snow, Jasmine, are decorated with ornaments made of gems and resembling cow's milk and are yellow, blue, white, red and bright like day light and which has the colour reddish yellow like ornament, and garments, garlands and unguents. They are very strong, highly energetic, with single face and two hands. All these leaders have their heads (crests) marked by

15. Viyat: sky, atmosphere; Niyantṛ: controller; Nānāṅgalakṣaṇa: characterised by various limbs; Śāstra should mean Veda and the *aṅgas* are Śikṣā, Vyākaraṇā and others: Vidyādhipatayaḥ. See note on III. 71; *SKS. Brahma.* VI.73-74 Rudragaṇa: see note on III.72; Prajāpati: see under III.73.

हरितालारुणाभैस्तु वस्त्रमाल्यानुलेपनैः ।
सर्वरत्नमयैर्युक्तैर्भूषणैरप्यलङ्कृताः[२७] ॥ १७५ ॥
महाबला महावीर्यास्त्वेकवक्त्रा द्विबाहवः ।
एते तु नायकाः सर्वे स्वचिह्नाङ्कितमस्तकाः ॥ १७६ ॥

षष्ठावरणमुख्यद्वारपालाष्टकस्योपद्वारपालषोडशकस्य सप्तमावरणद्वारपालानां च लक्षणमाह — **मुख्ये द्वारचतुष्के तु** इत्यादिभिः ।

दुष्टौघं तर्जयन्तश्च दक्षिणेन करेण तु ।
कटिमालम्ब्य वामेन स्थानकैः सुसमैः स्थिताः ॥ १७७ ॥

[उपद्वारपाः, दृढव्रतादयस्तेषां वर्णलक्षणादि]

दृढव्रतो बहुशिरा महाकायो महाबलः ।
जितक्रोधो दुराधर्षो महोत्साहस्त्रिविक्रमः ॥ १७८ ॥
अतुलो दुष्टहार्चिष्मान् सर्वदृग्[२८] दुरतिक्रमः ।
विषमो गहनोऽमोघः षोडशोपप्रवेशदाः ॥ १७९ ॥
शक्राग्निमध्यमारभ्य शक्रेशानान्तरावधि ।
शुक्लशोणसुवर्णालिपिङ्गरक्तसितासिताः ॥ १८० ॥
रक्तपीतातसीहेमशोणशुभ्रसितासिताः ।
वर्णानुरूपसद्वस्त्रमाल्यालेपनभूषणाः[२९] ॥ १८१ ॥
नामानुरूपचारित्राः शङ्खमुद्गरधारिणः ।
सव्येतरक्रमेणैव प्रवेशकनिषेधकाः ॥ १८२ ॥
क्षणाद्भुवनसंहारसृष्टिस्थितिकृतिक्षमाः ।
उक्तानेतान् क्रमेणैव पूर्ववत् सम्प्रपूजयेत् ॥ १८३ ॥
मुनयः सप्त पूर्वेऽन्ये ग्रहास्तारादिकैर्वृताः ।
जीमूताश्चाखिला नागास्त्वप्सरोगण उत्तमः ॥ १८४ ॥

२७. कृतः - B
२८. सर्वदिक् - B, E
२९. भूषणः - B

their emblems. They threaten the host of the wicked with their right hand supporting (laying) the hip with the left hand and stand in their well-proportioned postures.

(Guardians of side-doors, like Dhṛḍhavrata and others, their colour, marks and others)

178-185. Dhṛḍhavrata, Bahuśiras, Mahākāya, Mahābala, Jitakrodha, Durādharṣa, Mahotsāha, Trivikrama, Atula, Duṣṭahā, Arciṣmān, Sarvadṛk, Duritakrama, Viṣama, Gahana, and Amogha are the sixteen guardians of side-doors. They are in the quarters beginning with the region between Indra and Agni upto that between Indra and Īśāna. They are white, purple, gold, blue (bee), tawny red, white, black, red, yellow darkish blue (Atasī) gold, crimson, bright (white), white and black (in their complexion). Their bright garments, garlands, unguents and ornaments are suited to their complexion and form. Their behaviour is consistent with their names. They bear the conch and hammer, entrance is forbidden with the right hand. They could do in a moment destruction, creation and maintenance of the worlds. Worship is to be done to these as stated before in this order. The

ओषध्यश्चैव पशवो यज्ञाः साङ्गाखिलास्तु ये ।
सूक्ष्मरूपेण तिष्ठन्ति पूर्ववत् सप्तमावृतौ ॥ १८५ ॥

[सप्तमावरणदेवाः]

[सप्तमावरणद्वारचतुष्टयपालानां सम्भवादीनां वर्णलक्षणादि]

सम्भवः प्रभवश्चैव पूर्णः पुष्कर एव च ।
आनन्दो नन्दनश्चैव वीरसेनः सुषेणकः ॥ १८६ ॥
तन्मुख्य[३०]द्वारशाखास्थौ द्वौ द्वौ दक्षिणवामयोः ।
सम्भवः श्वेतवर्णस्तु प्रभवः कुन्दसन्निभः ॥ १८७ ॥
पूर्णस्तु रक्तवर्णाभस्त्वतिरक्तस्तु पुष्करः ।
आनन्दः पीतवर्णस्तु हेमाभो नन्द उच्यते ॥ १८८ ॥
कृष्णाभो वीरसेनस्तु सुषेणोऽञ्जनसन्निभः ।
मकुटाङ्गदचित्राङ्गा गदाहस्ता द्विबाहवः ॥ १८९ ॥
चतुर्भुजा वा विप्रेन्द्राः शङ्खचक्रगदाधराः ।
पूर्ववत् पाणिनान्येन प्रवेशकनिषेधकाः ॥ १९० ॥
दंष्ट्राकरालवदना निग्रहानुग्रहक्षमाः ।

[तदुपद्वारपालाः क्षेमकृदादयः षोडश तेषां लक्षणं च]

क्षेमकृच्छिवकृत्प्राज्ञो होमकृद्भूतभावनः ॥ १९१ ॥
युगान्ताग्न्यशनश्चैव संवर्तो भीषणस्तथा ।
सङ्क्रन्दनश्चानिमिषः शतपर्वा शताननः ॥ १९२ ॥
औदुम्बरः प्रकृतिको विरामश्चांशुमाल्यपि ।
औपदौवारिकं त्वेत[३१]द्गणषोडशकं क्रमात् ॥ १९३ ॥

सप्तमावरणमुख्यद्वारपालाष्टकस्योपद्वारपालषोडशकस्य शोभादिदेवाष्टकस्याष्टमावरणदेवानां च लक्षण-माह — **सम्भवः प्रभवः** इत्यादिभिः ।

दृढव्रतादिसदृशं वर्णतः षड्भुजान्वितम् ।
वामदक्षिणयोगेन पृष्ठतः पूर्वपश्चिमम् ॥ १९४ ॥

३०. तन्मुखे - B
३१. दौवारिकस्त्वेतत् - B, दौवारिकात्वेतत् - E

seven sages, other planets, encircled by stars and others, all clouds, serpents, the excellent group of *Apsarasās*, medicinal herbs, animals, sacrifices with their limbs — all remain in their subtle forms as before in the seventh enclosure.

(Deities of the seventh enclosure)

(Colour, marks and others of Sambhava and others, who guard the four entrances of the seventh enclosure)

186-191a. Sambhava, Prabhava, Pūrṇa, Puṣkara, Ānanda, Nandana, Vīrasena and Suṣeṇa and two in the each north and south stationed at the doorposts of the main entrances there. Sambhava is of white colour, Prabhava resembling Jasmine, Pūrṇa red in colour, Puṣkara deep red, Ānanda yellow in complexion, Nandana is of golden hue, Vīrasena is black, Suṣeṇa resembles collyrium. They have limbs brightened by the crown and armlet. They have the mace in their two or four hands bearing conch, discus and mace. Like those (described before) they prohibit entrance with the other hand. They have their mouths frightful with huge teeth. They are capable of controlling and favouring (the people).

(Kṣemakṛt and other guardians of the side-doors, sixteen in number and their marks)

191b-196a. Kṣemakṛt, Śivakṛt, Prājña, Homakṛt, Bhūtabhāvana, Yugāntāgnyaśana, Saṃvarta, Bhīṣaṇa, Saṃkrandana, Animiṣa, Śataparvan, Śatānana, Audumbara, Prakṛtika, Virāma and Aṃśumālī, this group of sixteen hosts are in due order at the side-doors. This (group) is similar to Dhṛḍhavrata and others in complexion (colour), have six hands, with the left and right, back and front, east and west, having conch, hammer, lotus,

शङ्खमुद्गरपद्माक्षवराभयसमन्वितम् ।
नानावर्णस्रगुष्णीषवस्त्रालेपनभूषणम् ॥ १९५ ॥
प्रागुक्तगुणशौर्याढ्यं सर्वकर्मकृतिक्षमम् ।

[तच्छोभाष्टकदेवानां शतमन्य्वादीनां लक्षणादीनि]

तच्छोभाष्टकरक्षार्थं शतमन्युर्विरोचनः ॥ १९६ ॥
अप्रतर्क्यस्त्वनुल्लङ्घ्यस्त्वप्रमेयाभिधानकः ।
अमर्षी[३२] च महाभूतश्चकोराक्षस्तथाऽष्टमः ॥ १९७ ॥
इन्द्राग्निमध्योपद्वारपार्श्वशोभास्वनुक्रमात् ।
एकैकशः स्थिताः शूराः प्रवेशकनिषेधकाः ॥ १९८ ॥
नीलपीतजपाश्यामसितहिङ्गुलकेन्दुभाः ।
महाबला महावीर्याः सुदुर्लङ्घ्यपराक्रमाः ॥ १९९ ॥
नानाविधाम्बर[३३]स्रग्भिर्भूषणैरनुलेपनैः ।
अन्यैरनुपदिष्टैश्च यथाशोभमलङ्कृताः ॥ २०० ॥
षाड्गुण्यमहिमायुक्ताश्चतुर्हस्ताः क्रमेण तु ।
पृष्ठदक्षिणवामाभ्यां चक्रशङ्खसमन्विताः ॥ २०१ ॥
गदाग्रोपरिविश्रान्तमुख्यहस्तद्वयान्विताः ।
द्वारोपद्वारशोभेशानेतान् सम्पूजयेत् क्रमात् ॥ २०२ ॥

''सितहिङ्गुलकेन्दुभाः' इत्यत्र कं जलम्, इन्दुः चन्द्रः, जलसादृश्यात् महद्भूतस्याभास्वरशुक्लत्वम्, इन्दुसाम्याच्चकोराक्षस्य भास्वरशुक्लत्वमिति ज्ञेयम् । यद्वा कः सूर्य इत्यर्थ ।

[अष्टमावरणदेवाः [बाह्याः]]

[संसारदेवता विद्यादयः]

विद्या चैवापराऽविद्या पावकश्चैव मारुतः ।
चन्द्रार्कौ वारिवसुधे ह्येताः संसारदेवताः ॥ २०३ ॥
सूक्ष्मरूपेण तिष्ठन्ति बाह्यावरणभूतले ।

[तन्मूख्यद्वारपाला अष्ट, अमरेशादयः तल्लक्षणादिः]

अमरेशो विरूपाक्षः सुधर्मिष्ठो नियामकः ॥ २०४ ॥
सर्वसत्वाश्रयश्चेति गहनस्तदनन्तरम् ।
महाराजेश्वरश्चापि धनाध्यक्षेश्वरस्तथा ॥ २०५ ॥

३२. अमीषी - B, D अमीषम् - E

axle, granting boons and freedom from fear, having garland of various colours, turbans, garments, unguents and ornaments, rich in qualities like heroism as stated before and capable of doing all works.

(Marks of Śatamanyu and others who care the eight deities)

196b-202. Śatamanyu, Virocana, Apratarkya, Anullaṅghya, Aprameya by name, Amarṣī, Mahābhūta, Cakorākṣa are each stationed in the order (in charge) of the beauty on the sides of side-door lying between the directions of Indra and Agni for safeguarding the beauty at eight places. They are valorous, prohibiting the entry, and have the brilliance of blue, yellow, china rose, dark, white, vermillion, water and moon.[16] They are very strong, highly valorous and of formidable powers, and decorated with various garments, garlands, ornaments, unguents and by others not mentioned here according to their beauty. They possess the greatness of the aggregate of the six qualities (*ṣāḍgūṇya*) and four hands respectively (kept) at the back and right and left holding discus and conch with the two frontal hands resting on the top of the mace. Worship shall be done to these who are in charge of maintaining the beauty at the doors and side-doors.

(Deites of the eighth enclosure) (External)
(Deities of worldly life, Vidyās and others)

203-204a. Vidyā, Aparāvidyā, Agni, Māruta, sun and moon, water and earth — these are the deities of worldly life. They stand with their subtle form on the ground in the outer enclosure.

(Guardians of the main entrance of this enclosure eight in number, lords of mortals and their marks)

204b-214a. Amareśa, Virūpākṣa, Sudharmiṣṭha, Niyāmaka, Sarvasatvā-śraya, Gahana, Mahārājeśvara and Dhanādhyakṣeśvara — these are eight lords of groups, guardians of the main gates (there). They are to be

16. Sitahiṅgulakendubhaḥ: *ka* water; *indu*-moon; or *ka*, sun, *indu*, moon.

एते गणेश्वरास्त्वष्टौ तन्मुख्यद्वारपालकाः ।
ध्येयाश्चतुर्भुजाः सर्वे मुख्यपाणिद्वयेन तु ॥ २०६ ॥
अमरेशविरूपाक्षौ वज्रवेत्रलताकरौ ।
पृष्ठगाभ्यां तु पाणिभ्यां चक्रशङ्खसमुज्वलौ ॥ २०७ ॥
कुङ्कुमाञ्जनसङ्काशौ दंष्ट्रया विकृताननौ ।
दक्षिणोत्तरयोगेन लाञ्छनव्यत्ययान्वितौ ॥ २०८ ॥
द्वारदक्षिणवामस्थौ प्रवेशकनिषेधकौ ।
सुधर्मिष्ठो नियन्ता च सुसितश्यामलप्रभौ ॥ २०९ ॥
सुभीमदण्डहस्तौ च वज्रायुधविवर्जितौ ।
यथाक्रमोदितानन्यान् धारयन्तौ यथाविधि ॥ २१० ॥
सर्वसत्वाश्रयश्चातिगहनः श्यामलः सितः ।
किं तु पाशकरावेतौ पूर्ववद् भुजभूषितौ ॥ २११ ॥

अथाष्टमावरणमुख्यद्वारपालाष्टकस्योपद्वारपालषोडशकस्य शोभाधिदेवषोडशकस्य च लक्षणमाह — **अमरेशो विरूपाक्षः** इत्यादिभिः ।

महाराजेश्वरो रक्तो धना[३४]ध्यक्षेश्वरोऽसितः ।
शिशिरायुधसंयुक्तौ त्रिकमन्यद्यथा पुरा ॥ २१२ ॥
महाबला महावीर्या दुष्टदोषक्षयङ्कराः ।
दुर्निरीक्षाश्च दुर्धर्षा दैत्यदानवहिंसकाः ॥ २१३ ॥
नानामहार्घवासोभिः भूषालेपैरलङ्कृताः ।

[तदुपद्वारदेवाः षोडशमहर्षभादयः, तल्लक्षणादि]

महर्षभं प्रभूतं च गम्भीरं प्राणगोचरम् ॥ २१४ ॥
योगाङ्गं योगनिलयं सनातनमशृङ्खलम् ।
तारकान्तरितं तारं विरामं विषमं तथा ॥ २१५ ॥
दुरतिक्रमं[३५] दुर्ग्रहं च सुधूम्रमनिलाशनम् ।

३३. अम्बरैः - D, E
३४. धन्या - D
३५. दुराक्रमम् - पा

meditated upon as having four arms and all hold with the two frontal hands — Amareśa and Virūpākṣa (hold) the thunderbolt and cane in the hands, with the two hands behind hold the dazzling discus and conch, resembling saffron and collyrium, their faces disfigured with the big teeth, the markings transposed with reference to the northern and southern (parts) permitting entry and prohibiting it by being in the right and left of the entrance. Sudharmiṣṭha and Niyantā are of very white and black complexion hold a very dreadful staff in the hand, and are bereft of thunderbolt. They have others mentioned (above) in their order. Sarvasatyāśraya and Atigahana are black and white in complexion but hold the noose in the hand and have their arms decorated as stated before. Mahārajeśvara is red and Dhanādhyakṣeśvara black and have the weapon Śiśira and the other three hands as stated before. They are of great strength, and of great valour. They could destroy the defects created by from the wicked, hard to look at, formidable and cause injury to the Daityas and Dānavas and are adorned with various valuable garments and ornaments and unguents.

(Deities at the side-door, Maharṣabha and other sixteen in number and their marks)

214b-220. Maharṣabha, Prabhūta, Gambhīra, Prāṇagocara, Yogāṅga, Yoganilaya, Sanātana, Aśṛṅkhala, Tārakāntarita, Tāra, Virāma, Viṣama, Duratikrama, Durgraha, Sudhūmra, Anilāśana shall be placed as before at the side-doors of the ramparts. This group of sixteen deities shine with (or have) the colours of the guardians of the side-doors stated above. They have four hands. They hold, in the left hind hand upto main left hand,[17] the conch, Paṭṭasa,[18] the mark of the gesture of prohibition, mark of the gesutre

17. *gauṇavāmakam: gauṇa:* secondary as opposed to *mukhya*, principal, the word *mukhya* is used in the sense of frontal. Here *gauṇa* must be taken in the sense of hind.

18. Paṭṭasa: spear with a sharp edge. The correct form of this word is *paṭṭiśa*, cf. *paṭṭiśāśanadhāriṇaḥ: Rāmāyaṇa. Sundara* IV. 21a.

तत्सालकोपद्वारेषु विन्यसेत् पूर्ववर्त्मना ॥ २१६ ॥
उक्तोपद्वारपालानां वर्णतः सममुज्वलम् ।
गणषोडशकं त्वेतच्चतुष्पाणिसमन्वितम् ॥ २१७ ॥
गौणवामकराद्यं तु मुख्यवामकरावधि ।
शङ्खपट्टसहस्तं च निषेधाभिनयाङ्कितम् ॥ २१८ ॥
प्रवेशाभिनयाङ्कं च नानावर्णाम्बरस्त्रजम् ।
नानास्थानकसंयुक्तं नानाभूषणभूषितम् ॥ २१९ ॥
अक्षसूत्रधरं वाथ प्रपन्नानां प्रवेशकृत् ।
निषेधकृत्तथान्येषां न्यस्तव्यं मुनिसत्तमाः ॥ २२० ॥

[शोभाषोडशकदेवाः देवव्रतादयः तल्लक्षणादि]

देवव्रतं निरातङ्कं भीष्मं च पुरुषं तथा ।
उग्रं वीरेश्वरं रम्यमरिष्टं मुनिसत्तमाः ॥ २२१ ॥
निर्विषण्णं युगान्तांशं शतानन्दं शताननम् ।
तेजोधरं विशालाक्षं युगांशं देवनन्दनम् ॥ २२२ ॥
एतद् द्विरष्टशोभासु गणमेकैकशो न्यसेत् ।
उपद्वारेशसदृशं वर्णतो लाञ्छनैर्विना ॥ २२३ ॥
चतुर्भिः पाणिभिश्चैव पृष्ठदक्षिणपूर्वकम् ।
मुख्यदक्षिणहस्तान्तं शङ्खचक्रगदाधरम् ॥ २२४ ॥
निषेधकृच्च पापानामपापानां प्रवेशकृत् ।
नानास्त्रगम्बरोष्णीषभूषालेपाद्यलङ्कृताः ॥ २२५ ॥
अनन्ताचिन्त्यविभवाः सर्वभूतसमाश्रयाः ।
नानाशस्त्रास्त्रकुशलाः नानाज्ञानसमन्विताः ॥ २२६ ॥
निरस्तानेकदैत्येशाः साधूनां पालनोद्यताः ।

[द्वारद्वयान्वितसाले विशेषः]

द्वारद्वयान्विते साले मुख्यद्वारगतावुभौ ॥ २२७ ॥
तिष्ठतः सूक्ष्मरूपेण तदन्यद्वारपार्श्वयोः ।

of allowing entry, wear garments and garlands of various colours, having various postures decorated with various ornaments holding the rosary garland or permitting those who have surrendered to God to get in, prohibiting entry for others. O eminent sages! these should be stationed there.

(Devavrata and other deities of sixteen beauties, their marks etc.)

221-227 O eminent sages! Devavrata, Nirātaṅka, Bhīṣma, Puruṣa, Ugra, Vīreśvara, Ramya Ariṣṭa, Nirviṣaṇṇa, Yugāntāṃśa, Śatānanda, Śatānana, Tejodhara, Viśālākṣa, Yugāṃśa and Devanandana— this group shall be similar to the lords of side-doors in colour except the marks, have four hands, conch, discus and mace shall be held in the hands beginning with back, south and ending with the frontal right hand prohibiting the sinners (from entering there) and allowing the non-sinners to enter. They are decorated with various garlands, garments, turbans, ornaments, unguents and others. Their glory is infinite and beyond thought. They are support for all living beings. They are skilled (in the use) of the various *śastras*[19] and *astras*[20] and possess knowledge of various kinds. They had set aside many chiefs of Daityas and are bent upon protecting the good.

(Speciality in respect of the rampart having two entrances)

227b-228a. Both stand in their subtle form on the (two) sides of another gate, when they are in the main gate in the rampart having two gates.

19. *śastra:* a weapon, which is kept in the hand, kills the enemies like sword.
    vide: येन हस्तगतेनैव हन्यन्ते सर्वशत्रव: ।
    तच्छस्त्रमिति संप्रोक्तं क्रमादसिगदादि च ॥ *SKS. Ṛṣi.* X.39.
20. *astra:* a weapon which is meditated upon and then released when it kills the enemies by making them fall down; e.g. arrow.
    vide: विधाय मोक्षणाच्चैव हन्यन्ते सर्वशत्रव: ।
    धरायां च निपात्यन्ते तदस्मत्रमति कीर्तितम् ॥ *ibid.* 38.

[प्राकारकोणेषु पूज्या देवाः विशेषश्च]

प्राकारसर्वकोणेषु वह्निकोणादितो न्यसेत् ॥ २२८ ॥
प्रभवाप्ययरूपाणां मूर्तीनां चतुरात्मनाम् ।
तथा मूर्त्यन्तराणां च तत्कान्तानामनुक्रमात् ॥ २२९ ॥
मन्त्राणामस्त्रसंघादि तेषां रूपमनुस्मरन् ।

आवरणस्य द्वारद्वये सति मुख्यद्वारोक्तयोरेव तदन्यद्वारेऽपि सूक्ष्मरूपेणावस्थानमाह — **द्वारद्वयान्विते** इति ।

अथ प्राकाराणामाग्नेयादिकोणेषु वासुदेवादिन्यासमाह — **प्राकार** इति द्वाभ्याम् । मूर्तीनामित्यादि कर्मणि षष्ठी । प्रभवाप्ययरूपाणां, वासुदेवाद्यनिरुद्धान्तानामनिरुद्धादिवासुदेवान्तानामित्यर्थः । मूर्त्यन्तराणां केशवादिद्वादशमूर्तीनां, तत्कान्तानां श्र्यादीनामित्यर्थः । तेषां मन्त्राणां वासुदेवादीनामस्त्रसङ्घादिरूपं स्मरन् तेषां न्यासं कुर्यादित्यन्वयः ।

[आलयाद् बहिः भवनाथार्चनादिकम्]

चतुर्णामपि कोणानामव्यक्तं भवनाद् बहिः ॥ २३० ॥
संयजेद्भवनाम्ना वै यस्मान्नान्यो भवः स्मृतः ।

[तद्बहिः सुदर्शनार्चनादिकम्]

तेषां बहिः स्वमन्त्रेण दिक्क्रमेण तु हेतिराट्[३६] ॥ २३१ ॥
स्वमरीचिगणेनैव भासयन्तं निवेश्य च ।
न्यस्यैवमर्चनं कुर्यान्मन्त्रमुद्रान्वितेन तु ॥ २३२ ॥
निरीक्षणादिशुद्धेन अर्घ्यस्रक्चन्दनादिना ।

एवं च प्रथमावरण आग्नेयादिकोणेषु वासुदेवादयः । द्वितीयावरण अनिरुद्धादयः । तृतीये केशवादयः। चतुर्थे विष्ण्वादयः। पञ्चमे श्र्यादयः। षष्ठे श्री, वागीश्वरी, कान्ति, क्रियाः। सप्तमे शान्तिविभूतीच्छाप्रीतयः । अष्टमे रतिमायाधीमहिमाख्याश्च न्यस्तव्या इति ज्ञेयम् । पारमेश्वरव्याख्याने तु "प्राकारकोणेषु प्रभवाप्ययक्रमेण वासुदेवादीनां तत्तत्कान्तानां च तत्तदस्त्राणि स्मरन् यजेदित्याह" इत्युक्तम्, तद्विचारणीयम् ।

एवमन्तिमावरणत्रये भवोपकरणानामर्चनमुक्त्वेदानीमालयाद्बहिः साक्षाद्भवनाथार्चनमाह — **चतुर्णाम्** इति । अत्र षष्ठ्या अधिकरणत्वमर्थः । अव्यक्तं प्रकृतिसूक्ष्मावस्थाम् । भवनाम्ना 'भवाय नमः' इत्यत्र भवत्यस्मात् सर्वमिति व्युत्पत्तिसिद्धस्य भवशब्दस्यान्यत्राव्यभिचारात्, तेन नाम्ना यजनमिति ज्ञेयम् ।

३६. हेतिपम् - A

(Deities to be worshiped at the corners of the enclosures and speciality about them)

228b-230a. The forms of the four (*vyūha*) gods in the form of their rise and dissolution[21] are to be placed at all the corners of the temple beginning with the south-east (Vahni). Likewise, other forms[22] with their consorts shall be placed in due order thinking their forms and weapons and this group of the mantras.

(Worship of Bhavanātha outside the temple)

230b-231a. Worship is to be done outside the shrine to the unmanifest[23] at all the corners using the name Bhava,[24] as no one other Bhava is found to have that name.

(Worship of Sudarśana and others outside that place)

231b-233a. The lord of weapons shall be placed outside them using his mantra and in the order of directions; who illumines others with the group of his own rays. After placing him, worship is to be done with *arghya*, garland, sandal-paste and others made pure by beholding them using the mantra[25] with *mudrā*.[26]

21. rise: from Vāsudeva to Saṃkarṣaṇa: Pradyumna: Aniruddha and
 dissolution: Aniruddha: Pradyumma: Saṃkarṣaṇa: Vāsudeva.
22. others: Keśava, Nārāyaṇa, etc.
23. *avyakta:* unmanifest: subtle state of matter.
24. Bhava means the deity from whom everything is born. He must be worshipped with His name; *bhavatyasmāt:* primordial matter is to be worshipped as it is through it that Brahman creates the world. The twenty-four evolutes of matter are also to be respected; vide: *LT.* XXII. 32; XXX. 30,
 For a resume, see the commentary.
25. mantra of Sudarśana: *Oṃ sahasrāra huṃ phaṭ.*
26. Sudarśanamudrā also called Cakramudrā; vide: *JS.* III.39b-40.
 Pād. S. caryā. XXII.48b-49a.

तदेव कण्ठरवेणाह — **यस्मात्** इति । न एतावता ब्रह्मण उपादानत्वभङ्गः । तन्निष्ठोपादानस्याप्यव्यक्तद्वारकत्वात् । एवं भवोपकरणानां पूज्यत्वं सात्त्वत एवोक्तम् —

"चतुर्विंशतिसंख्यं च भवोपकरणं महत् । भवः साक्षात् प्रधानं तु व्यापको जडलक्षणः ॥ मन्त्रमन्त्रेश्वरन्यासात् सोऽपि पूज्यत्वमेति च ।" (सासं. ८४ १/२-८५ १/२) इति। किञ्चैतद्वचनमपि सात्त्वत एव मण्डलार्चनप्रकरणे उक्तम् । "चतुर्णामथ कोणानामव्यक्तं मण्डलाद् बहिः । संयजेद् भवनाम्ना वै यस्मान्नान्यो भवः स्मृतः ॥" (सासं. १०.२३) इति ।

तद्बहिः सुदर्शनन्यासमाह — **तेषाम्** इति ।

एतेषामर्चनमाह — **ह्यन्यस्य** इति ।

[वासुदेवस्यैव प्रासादरूपेणावस्थानम्]

वासुदेवाभिधानस्तु देवः षाड्गुण्यविग्रहः ॥ २३३ ॥
कर्मिणामुपकारार्थं प्रासादं स्थूलविग्रहम् ।
सर्वज्ञानक्रियाढ्यं[३७] च सर्वतत्त्वसमाश्रयम् ॥ २३४ ॥
समासाद्यानुगृह्णाति सदार्चान्तर्गतः प्रभुः ।

[प्राकाराष्टके क्रमेण पृथिव्यादिपञ्चभूतमनोऽहङ्कारबुद्धीनां न्यासः]

तस्मात् तदङ्गभूतेषु प्राकारेष्वष्टसु क्रमात् ॥ २३५ ॥
पृथ्व्यादि[३८] बुद्धिनिष्ठं तु बाह्यतत्त्वाष्टकं न्यसेत् ।

[प्रासादे प्रकृतेः, प्रतिमायां जीवस्य तदन्तः परमात्मनश्चावस्थानम्]

प्रासादश्चाङ्गसंयुक्तः प्रकृतिस्त्रिगुणात्मिका ॥ २३६ ॥
तद्गता प्रतिमा जीवस्तद्गतः परमः पुमान् ।

[तत्र कर्तव्यक्रमः]

अतोऽधिदैवतान्यत्र तत्त्वान्येतान्यनुक्रमात् ॥ २३७ ॥
सर्वत्र व्यापकत्वेन ध्यात्वा सम्पूजयेत् ततः ।
सर्वाधारमयेनैव सर्वसत्वाश्रयेण च ॥ २३८ ॥
सर्वदोषविषघ्नेन कालचक्राम्बुजेन तु ।
सम्पुटीकृत्य भवनं सप्राकारमथोर्ध्वतः ॥ २३९ ॥

३७. क्रियाणाम् - B, E
३८. प्रस्थादि - B

(Vāsudeva alone remains in the form of temple)

233b-235a. God called Vāsudeva, having the six qualities for his body, assumes the gross body namely, temple[27] in order to help those who are under the spell of Karma, endowed with all knowledge and actions, the substratum of all *tattvas*. The lord, who is always within the idol, shows favour to the worshipper.

(Nyāsa of the five elements, earth etc., mind, ego and intellect in the eight enclosures in due order)

235b-236a. Therefore the external eight *tattvas* which rest on earth etc. and in the intellect[28] that shall be placed in their order in the eight enclosures which form part of them.

(Matter's place is in the temple, of the individual soul in the idol and of the supreme soul within it the individual soul)

236b-237a. The temple has the limbs. Matter is of the nature of three *guṇas* idol there is, the soul in the idol and the supreme soul is in it (soul).

(Order of doing these)

237b-240. Therefore, these *tattvas*, which have the presiding deities should be worshipped in this order, as they pervade everywhere. Furnishing a covering for the temple with enclosures from above with the lotus in the form of Kālacakra,[29] which is the support for all, seat of all beings and destroyer (poison) of all defects. After worshipping, the Hṛdayamudrā shall

27. The temple is the gross body of god.
28. The primordial matter Buddhi, Ahaṅkāra and the five elements are conceived as the eight enclosures; cf. *Divyasūricarita* I.15.
29. Protection is to be arranged for the temple by enclosing it with a box in the form of Kālacakrāmbuja which destroys all defects. Kālacakra is a white lotus which is the seat of the unmanifested lotus (*avyaktapadma*). With three circles, it becomes a group of lotuses; vide: *Pāram. S.* V.14.

प्रासादस्य भगवत्स्थूलविग्रहत्वमाह — **वासुदेव** इति ।

बाह्यावरणादिप्रथमावरणान्तं क्रमेण पृथिव्यादिपञ्चभूतमनोऽहङ्कारबुद्धीनां न्यासमाह — **तस्मात्** इति ।

प्रासादे प्रकृतिन्यासं, बिम्बे जीवन्यासं, तदन्तः परमात्मस्थितिं चाह — '**प्रासादः**' इति ।

एकावरणादिस्थानेष्वपि पृथिव्यादितत्त्वानामर्चनं कार्यमित्याह — **अतः** इति । सप्राकारस्य मन्दिरस्य कालचक्राम्बुजेन सम्पुटीकरणादिकमाह — **सर्वाधारमयेन** इति सपादैस्त्रिभिः ।

सम्पूज्य हार्दयीं[३९] मुद्रां चक्रमुद्रासमन्विताम् ।
प्रदर्श्य[४०] सर्वतो दिक्षु कवचेनावकुण्ठयेत् ॥ २४० ॥

[एकमूर्तिविधाने एकद्वारे विशेषः]

एकमूर्तिविधाने च तथैकद्वारभूषिते ।
भवन इदं विधानं स्याद्दिग्व्यूहपरिनिष्ठिते[अ] ॥ २४१ ॥

[चतुर्द्वारान्विते स्थाने]

चतुर्द्वारान्विते गेहे दिग्द्वारग्रन्थमण्डपे ।

[आवरणचतुष्टयस्य नामानि]

सर्वतोभद्रसाले च अघनिर्मोचनेऽपि च ॥ २४२ ॥
सदध्वदेशधर्माख्ये द्वारद्विद्वितयान्विते ।

[तत्र प्रासादद्वारचतुष्टयदेवताः]

द्वारपालगणन्यासे[४१] विशेषोऽयं प्रकाश्यते ॥ २४३ ॥
चण्डाद्याश्च सुभद्रान्ताः प्रासादद्वारश्चतुष्टये ।
न्यसनीयाः क्रमेणैव पूर्ववद् द्वन्द्वयोगतः ॥ २४४ ॥

[द्वारचतुष्टयोर्ध्वोदुम्बरदेवताः]

द्वारोर्ध्वोदुम्बरद्वन्द्वद्वितयस्था यथाक्रमम् ।
लक्ष्मीः कीर्तिर्जया माया देव्यः प्रागुक्तलक्षणाः ॥ २४५ ॥

अथ चतुर्व्यूहप्रतिष्ठाहेतोः प्रासादादिचतुर्थावरणान्तानामपि चतुर्द्वारत्वे तद्द्वारपालान्यप्याह - **दिग्व्यूहपरिनिष्ठिते** इत्यादिभिः ।

अ- अत्र चतुर्थे पादेऽधिकमेकाक्षरं वर्तते ।

३९. हार्दधीम् - B
४०. प्रदृश्य - B, E
४१. गणान्यसेत् - B, D, E

be shown with the *mudrā* of Cakra and *avakuṇṭhana* shall be made with the Kavacamantra in all directions.

(Speciality in the case of a single entrance while worshipping a single deity)

241. This method shall be adopted in the temple having one idol, decorated with a single entrance and perfected in the divisions of the quarters.

(In a place having four gates)

241a. This shall be attended to in a pavilion in front of the gates in the quarters in a temple of four entrances.

(Names of the four enclosures)

242b-243a. Sarvatobhadrasāla, Aghanirmocana, Sadadhvadeśa and Dharma[30] having four entrances each.

(Deities at the four entrances of the temple)

243b-244. This speciality is made clear while doing *nyāsa* for the group of the guardians of the quarters. Those beginning with Caṇḍa and ending with Subhadra at the four entrances to the temple. They are to be placed in pairs as before in due order.

(Deities high up in the udumbara at the four gates)

245. Lakṣmī, Kīrti, Jayā and Māyā, the goddess whose marks have been stated (before) are to be placed in the order, in pairs at two *udumbaras* high up at the entrance.

30. The four enclosures around the pavilion are mentioned here to have the names Sarvatobhadra, Aghanirmocana, Sadadhva and Dharmākhya. The word *sāla* occuring in the name Sarvatobhadrasāla means rampart or wall. Perhaps the name of the enclosure gets it from that of the rampart. The name Sarvatobhadra is of frequent utterance in the texts on architecture and Āgama. It is the name of a pavilion (*Mayamata* XXV.164-169b; of a hall or *sabhā ibid.* 208-210a; of a particular kind of *liṅga ibid.* XXXIII.72-74a.

For further information, see M.M. Williams. Sanskrit-English Dictionary P.1189 col. 1.

These four names occur as those of the *maṇḍalas;* cf. *Paus.* V. 2.2-4a.

vide: मण्डलं सर्वतोभद्रं भद्रकृत् प्रथमं स्मृतम् ।
अघनिर्मोचनं नाम द्वितीयं यस्य दर्शनम् ॥
अनेकजन्मोपात्तं तु कल्मषं क्षयमेति च ।
सदध्वं स्यात् तृतीयं च धर्ममार्गप्रदर्शनम् ॥
धर्माख्यं स्याच्चतुर्थं तु धर्म यच्छति पूजनात् ॥

This explanation of the four names in this *saṁhitā* may be taken to be applicable to the four names of the enclosures.

[द्वारचतुष्टयाग्रगरुडाः तच्छाखाष्टकदेवताः तत्तद्वर्णलक्षणादि च]

सत्यः सुपर्णो गरुडस्ताक्ष्यस्त्वग्रेषु संस्थिताः ।
अनिवर्ती महावृत्तिर्दर्पहा सर्वजित्[४२] स्थिरः ॥ २४६ ॥
जयन्तो भयकृन्मानी त्वष्टमो द्विजसत्तमाः ।
दिगग्रमण्डपद्वारशाखापार्श्वे समास्थिताः ॥ २४७ ॥
अनिवर्ती महावृत्तिः[४३] कृष्णाभः शुकसन्निभः ।
दर्पहा सर्वजिच्चैव पाण्डुरक्तसुवर्णाभौ ॥ २४८ ॥
स्थिरो जयन्तः सततं श्यामाञ्जनसमद्युती ।
भयकृच्चैव मानी च पिङ्गलः पाण्डुरोज्ज्वलः ॥ २४९ ॥
द्विभुजाः सर्व एवैते दक्षिणेन करेण तु ।
नन्दकं शङ्खमन्येन दधानाः क्रूरविक्रमाः ॥ २५० ॥
यदा चतुर्भुजा ध्येयास्तदा चैते गणेश्वराः ।
मुख्यदक्षिणहस्तेन खड्गवेत्रलतान्विताः ॥ २५१ ॥
तथा वामकरे शङ्खं पृष्ठगे दक्षिणादितः ।
पाणिद्वये चक्रपद्मे[४४] बिभ्रतो ज्वलनप्रभाः[४५] ॥ २५२ ॥
नानावस्त्रास्त्रगुष्णीषभूषणालेपनान्विताः ।
व्यत्यस्तहस्तचरणा लाञ्छनव्यत्ययान्विताः ॥ २५३ ॥

[सर्वतोभद्राख्यप्रथमसालद्वारचतुष्टयपालाः तल्लक्षणं च]

ऊर्जितश्चामृताङ्गस्तु सर्वाङ्गः सर्वतोमुखः ।
शुभ्राङ्गो वरदश्चैव वागीशः शब्दविक्रमः ॥२५४ ॥
पाञ्चजन्यविशेषा हि द्वौ द्वौ चैव क्रमात् स्थितौ ।
सर्वतोभद्रसालस्थचतुर्द्वारेषु[४६] पूर्ववत् ॥ २५५ ॥

४२. सत्यजित् - B, E
४३. महावर्ती - B, D, E
४४. पद्मौ - B, D, E
४५. प्रभौ - D, E
४६. द्वारे तु - B, E

(Garuḍas in front of the four gates, deities at the eight doorposts, their colour, mark etc.)

246-253. Satya, Suparṇa, Garuḍa, and Tārkṣya are in front, Anivartī, Mahāvṛtti, Darpahā, Sarvajit, Sthira, Jayanta, Bhayakṛt, Mānī, O eminent brahmins! these eight are stationed on the side of the doorpost in the pavilion in front of the directions. Anivartī and Mahāvṛtti are respectively black and similiar to the parrot. Darpahā and Sarvajit are of the colours of white and of red and gold. Sthira and Jayanta are ever of the black colour and of the collyrium. Bhayakṛt and Mānī are tawny and of shinning white colour. All these are having two hands, holding the (sword), Nandaka and conch with the right and the other (left) hands and are of terrible prowess when they have four hands, they who are the lords of groups are to be meditated as holding the sword and cane with the main right hand the conch with the left hand, and discus and lotus with the hind right and (the other) hands. They are of the brilliance of fire. They have various kinds of cloths, weapons, garlands, head gears, ornaments and unguents and the hands and feet reversed having the marks in the reverse way.

(Deities at the four gates of the first rampart called Sarvatobhadra and their marks)

254-259a. Ūrjita, Amṛtāṅga, Sarvāṅga, Sarvatomukha, Śubhrāṅga, Varada, Vāgīśa and Śabdavikrama are the different kinds of Pāñcajanya standing in the end, two in their order. At the four entrances to the rampart in Sarvatobhadra rampart as before. They have to be thought of as having two

द्विबाहवस्तु संस्मर्याः[४७] दक्षिणेन करेण तु ।
गृहीतमुसलाः सर्वे शङ्खमन्येन पाणिना ॥ २५६ ॥
दधानाश्चैव चत्वारः पूर्वे बन्धूकसन्निभाः ।
अन्ये परभृताभास्तु सर्वभूषणभूषिताः ॥ २५७ ॥
बलेन महता क्षिप्तदेवासुरमहोरगाः ।
एकवीराऽसहायाश्च अप्रयत्नेन लीलया ॥ २५८ ॥
आब्रह्मभवनं शश्वत्परिवर्तयितुं[४८] क्षमाः ।

[अघनिर्मोचनाख्यद्वितीयसालस्य द्वारचतुष्टयदेवाः तल्लक्षणं च]

विश्वेशो विश्वकृद्विश्वो विश्वात्मा विश्वलोचनः ॥ २५९ ॥
विश्वपादो विश्वभुजस्तथा वै विश्वकर्मकृत् ।
एते द्वितीयसालस्य दिग्द्वारेषु नियामकाः ॥ २६० ॥
द्विबाहवः परिज्ञेया वामदक्षिणयोगतः ।
गदाखड्गास्त्रसंयुक्ताः करण्डमकुटान्विताः ॥ २६१ ॥
शोणपिङ्गसितश्यामरक्तपीतसितासिताः ।
सर्ववर्णाम्बरालेपस्रग्भूषाभिर्विराजिताः ॥ २६२ ॥
एकवीराऽसहायाश्च सर्वदोषनिवारकाः ।

[तद्द्वारान्तरभागचतुष्टयदेवा निधीशाः तल्लक्षणादिकं च]

तद्द्वारान्तरभागेषु वामदक्षिणयोगतः ॥ २६३ ॥
प्रासादाभिमुखान्न्यस्येन्निधिनाथेश्वरान् क्रमात् ।
शङ्खपद्मौ महापद्मशतधामाभिधौ ततः ॥ २६४ ॥
अखण्डितः सन्ततश्चानन्तधार इति श्रुतः ।
सर्वद्वार इति ख्यातः प्रथमौ पूर्वमीरितौ ॥ २६५ ॥
अन्येषां वक्ष्यते षण्णां वर्णरूपादिकं क्रमात् ।
रक्तः कृष्णः सुवर्णाभः सितारुणतमालभाः ॥ २६६ ॥

४७. संस्मार्याः - D, E
४८. परिवर्तनकृत् - B, E

hands holding the pestle with the right hand and conch in the other hand. The first four are like Bandhūka flower. Others have the complexion of the cuckoo, bedecked with all ornaments, who throw aside gods, demons and huge serpents with their huge strength, unique warriors, needing no assistants and are capable to turn or change without effort and as in sport, at any time, the regions beginning from Brahmā's abode.

(Deities at the four gates of the second rampart called Aghanirmocana)

259b-263a. Viśveśa, Viśvakṛt, Viśva, Viśvātmā, Viśvalocana, Viśvapāda, Viśvabhuja, Viśvakarmakṛt — these control the second rampart at the entrances to the quarters are to be understood to have two hands, with mace, sword and weapons in their left and in the right hands, crest in Karaṇḍaka form deep red, tawny, white, black, red, yellow, white and not white, shinning with garments, of all colours, unguents, garlands and ornaments unrivalled warriors needing no assistance and who remove all defects.

(Deities in the four spots within those gates, lords of treasures and their marks)

263b-268. The lords of treasures shall be placed in due order facing the temple in the left and right sides in the inner spots of those entrances (gates). They are Śaṅkha and Padma, Mahāpadma and Śatadhāman, Akhaṇḍita, Santata, Anantadhāra and the reputed Sarvadvāra. The first two have been described before; colour, form and others for the other six and are now stated in due order. This complexion are respectively red, black, golden, white, ruddy and dark. These have all the features that were stated for Śaṅkha and Padma. They are the lords of wealth, gems, gold, eight metals,[31] grains[32] and money. They control all medicinal herbs and are

31. *loha*: metal; *aṣṭaloha*: eight metals, or, eight kinds of iron when *loha* is taken in the sense of iron or copper from the word *loha* or any metal. The *Nāmaliṅgānuśāsana* (II.9.98) mentions *loha, śastraka, tīkṣṇa, piṇḍa, kālāyasa, ayas* and *āśmasāna* as the seven names of iron.

Pād. S. kriyā. XIX.41b mentions gold, silver and copper as pure and best elements. This implies that others also are meant, though not stated.

SKS. Brahma. VI.47 uses the word *loha* in the plural evidently intending the use of many metals.

32. *dhānya:* ten are mentioned:

तिलाश्चापि तथा-मुद्गाः सर्षपाः शालयस्तथा ।
प्रियङ्गुः शिम्बनिष्पावमाषश्यामकुलुत्थकाः ॥ 12a

Eight kinds alone are enumerated in *Pād. S. kriyā.* 79 and others are shown as intended by the words *ye cānye yājñikā matāḥ.*

शङ्खपद्मनिधीशोक्तसर्वलक्षणलक्षिताः ।
वसुरत्नसुवर्णाष्टलोहधान्यधनाधिपाः ॥ २६७ ॥
सर्वौषधीनिधीशानास्तेषामूर्ध्वे सुखासनाः ।
सर्वालङ्कारसंयुक्ताः स्वाश्रिताभिमतप्रदाः ॥ २६८ ॥

[सदध्वाख्यतृतीयसालद्वारचतुष्टयपालाः तल्लक्षणं च]

ततस्तृतीयावरणद्वारेषु द्वन्द्वयोगतः ।
तद्दक्षिणोत्तराभ्यां तु शाखाभ्यां विन्यसेत् क्रमात् ॥ २६९ ॥
पुरतश्चक्रगरुडौ हलतालौ तु दक्षिणे ।
पश्चिमे शार्ङ्गमकरौ सौम्ये नन्दकऋश्यकौ ॥ २७० ॥
चक्रपक्षीशसीराणां शङ्ख[४९]नन्दकयोरपि ।
स्वेषु स्थानेषु पूर्वोक्तं वर्णरूपादिकं द्विजाः ॥ २७१ ॥
अन्येषां तालपूर्वाणां त्रयाणामथ वक्ष्यते ।
तालो ध्वजः स्याद् भूतादिकालरूपाभिमानकः ॥ २७२ ॥
झषः सर्वाङ्गनिभृतो जगद्बीज उदाहृतः ।
ससर्वोपद्रवो ऋश्यो संसारश्चपलात्मकः ॥ २७३ ॥
एतान् सूक्ष्मस्वरूपेण ध्यात्वा सम्पूजयेत् क्रमात् ।

[धर्माख्यचतुर्थसालद्वारचतुष्टयदेवाः तल्लक्षणानि]

गङ्गा च यमुना गोदा नदी च महती तथा ॥ २७४ ॥
वितस्ता नर्मदा चैव जम्ब्वाख्या च सरस्वती ।
नद्यश्चतुर्थ[५०]सालस्य दिग्द्वारेषु क्रमात् स्थिताः ॥ २७५ ॥
गङ्गायमुनयोरुक्तं वर्णरूपादिकं पुरा ।
ताभ्यामन्याः समानास्तु वर्णशोभां विनैव तु ॥ २७६ ॥
सितारुणाः सितस्वर्णसितकुन्दसमप्रभाः ।
प्रमत्तप्रौढवेषाश्च नानाभरणभूषिताः ॥ २७७ ॥
सर्वधातुविचित्राङ्गाः सर्वरत्नविराजिताः ।
सुधाकुम्भधरा द्वाभ्यां कराभ्यां पूर्ववच्च ताः ॥ २७८ ॥

४९. शार्ङ्ग - B, D, E
५०. तुर्य - B, D

comfortably seated above them. They bedeck all ornaments and offer those who seek them what they desire.

(Guardians of the four entrances in the third rampart called Sadadhva)

269-274a. The deities are to be placed in due order and in pairs at the southern and northern doorposts at the entrances to the third enclosure. Discus and Garuḍa in front, ploughshare and Palmyra tree at the right, bow (called Śārṅga) and fish in the west, sword (Nandaka) and white footed antelope (Ṛśyaka) in the north, O brahmins! colours, forms etc. are as stated before in their places for discus, Garuḍa and ploughshare, conch and Nandaka. There is stated (mark) for the other three beginning with Tāla (Palmyra tree). Tāla shall be the flag, which is imagined to have the form of the spirits, time etc. Fish which has motionless limbs is stated to be the seed of the world. Ṛśya afflicts everybody and worldly life is fickle. Meditating on these subtle forms, they are to be worshipped.

(Deities at the four gates in the fourth rampart called Dharma and their marks and others)

274b-278. Gaṅgā, Yamunā, Godā,[33] Mahatī[34], Vitastā,[35] Narmadā, Jambū[36] and Sarasvatī[37] are the rivers situated in their order at the gates of the quarters of the fourth rampart. Colours, forms etc. were stated before for Gaṅgā and Yamunā. Other are the same as for these two, except for colour and brilliance. White and reds, white and golds, white like Jasmine are their complexions. Their appearance (dress) is excited and mighty. They are adorned with various ornaments. Their limbs are varieagated with all minerals. They shine with all precious stones. They bear as described before the pitchers filled with nectar in their two hands.

33. Godā: river Godāvarī.
34. Mahatī: river Mahānadī.
35. Vitastā: Jhelum flowing in West Punjab.
36. Jambvākhyā: vide: *JS.* VIII.12b-13, a river said to flow from Meru.

    Vide: Jambū is a tree there whose fruits are as big as hills. The fruits fall down and get scattered on all sides. The juice of that tree flows as a river which is named as Jambūnadī. *VP.* II.2.19-22.
37. Sarasvatī which was flowing from the Mūjavant peak of the Himālayas had a course to the south and then to the south-west. The climatic conditions changed in the Mūjavant reducing the flow of water. The river then dried up in the Rajputana desert, before having a chequered flow; vide: Vedāntadeśika. *Dayāśataka. śloka.* 52.

[निगमनम्]

एवं दिग्द्वारभवनद्वाःस्थस्थितिरुदाहृता[५१] ।

[एकमूर्तिदिङ्मूर्त्योर्द्वारदेवताकोणदेवताभेदाभावः]

एकमूर्तेषु दिङ्मूर्तेः प्राकारासूर्ध्वगेषु च ॥ २७९ ॥

द्वारादयस्तदीयाश्च सामान्याः समुदाहृताः ।

[द्वारपालानां स्थाप्य-ध्येयविभागः]

सर्वसालप्रतीहारशाखापार्श्वगतावुभौ ॥ २८० ॥

ध्येयौ वा स्थापनीयौ वा बाह्यागारगतौ यदि ।

यथोक्तलक्षणोपेतौ स्थापनीयौ यथाक्रमम् ॥ २८१ ॥

एवमावरणेशानान् ध्यात्वा संस्थाप्य वार्चयेत् ।

[आवरणदेवतासु साकारत्वनिराकारत्वविभागः देवानां पीठसद्मनोः स्थानपरिमाणादिकम्]

ध्यानोत्थाः पीठदेशेषु स्वाकारात्मसु सद्मसु ॥ २८२ ॥

पञ्चमावरणादीनां चतुर्द्वारदेवतास्तु पूर्वमेवोक्ताः ।

चतुर्मूर्तिविधानेऽपि समाना इत्याह — **एकमूर्तेषु** इति । उक्तानां द्वारावरणदेवानां स्वस्थानेषु बिम्बप्रतिष्ठैव कार्या तदशक्तौ केवलपीठोपरि ध्यानं वा कार्यमिति पीठलक्षणादिकमाह — **सर्वसाल** इत्यादिभिः ।

तदर्थमङ्गणक्षेत्रं त्रिधा वा पञ्चधा भजेत्[५२] ।

त्रिभागमेकभागं वा त्यक्त्वा तन्मध्यतो बहिः ॥ २८३ ॥

पीठं वायतनं कुर्यात् सर्वदिक्ष्वन्तरेऽथवा ।

अधरोत्तरनिष्ठाभ्यां प्रागुक्ते पूर्ववत् स्थिते ॥ २८४ ॥

शिलेष्टकादिभिः क्लृप्ताः पीठिका हस्तविस्तृताः ।

तदर्धेनोच्छ्रिताः सर्वाः सर्वालङ्कारशोभिताः ॥ २८५ ॥

चतुरश्राः सुवृत्ता वा सम्पूज्या वाथ केवलाः ।

५१. उदाहृतः - B

५२. भवेत् - B, E

(Conclusion)

279a. Thus their stands at the entrances facing the directions, at the entrance of mansions, have been described.

(The simple figure and figures facing the directions are not different from the deities at the entrances and at the corners)

279b-280a. Entrances etc., their belongings which are common to all have been stated as found among simple deities, deities facing the direction, in the enclosures and above them.

(Division of the guardians of the quarters to be stationed and meditated upon)

280b-282a. Both (guardians) who are on the sides of the doorposts of entrances to all the ramparts are to be meditated upon or installed there and if they are in the apartments or outside them, they should be installed in due order as possessing the features stated above. Thus the lords of the enclosures shall be meditated upon or to be worshipped after installing them.

(Division of the deities in the enclosures into those having form and not having it, their installation and size with reference to the seat and abode)

282b-286a. The deities, as they arise (for the priest) in meditation, are to be placed on the seats and mansions according to their nature. The region of the court is to be divided for this purpose into three or five parts. The seats or shrine shall be made leaving a third or one part outside its middle portion in between all the directions. Or, small seats broad with the length of the fore-arm are to be arranged with slabs and bricks there as described before stationed below and above. All figures shall be half as high (the seats are) beautified by all ornaments, they shall be squares (having four corner) or circular or without these features and worshipped.

[वास्तुदेवानां बलिहरणस्थानलक्षणप्रमाणादि]

ग्रामादिवास्तुदेवानां स्वदिग्भागगतेषु च ॥ २८६ ॥
गोमयादिविलिप्तेषु मण्डलेषु बलिं हरेत् ।
विस्तारोच्छ्रायमानाद्वै पीठाः प्रागुक्तलक्षणाः ॥ २८७ ॥
अर्धमानेन वा कार्या रथयात्राऽविरोधतः[५३] ।

[आवरणदेवानां प्रयोजनस्थानाभिमुख्यानि]

एवमावरणेशानाः पीठेषु स्वासु दिक्षु च ॥ २८८ ॥
दुष्टदोषनिरासार्थं प्रासादाभिमुखं[५४] स्थिताः ।

[यागगेहद्वारदेवताः]

चतुःस्थानावतीर्णस्य द्वारे च यजनालये ॥ २८९ ॥
स्थापनं गणनाथानां शृणुध्वं मुनिपुङ्गवाः ।
वास्तुक्षेत्रेशसंज्ञौ द्वौ प्राग्द्वारे पूर्ववत् स्थितौ ॥ २९० ॥
लक्ष्मी कीर्तिर्जया माया द्वारेषूर्ध्वस्थिताः क्रमात् ।
वज्रनाभादयो देवा द्वौ द्वौ दिग्द्वारशाखयोः ॥ २९१ ॥

अथ यागगेहद्वारदेवानाह — **चतुःस्थानावतीर्णस्य** इत्यादिभिः ।

प्रागादिद्वारकुम्भेषु सम्भवप्रभवादयः ।
कुमुदाद्यन्तरङ्गं च भूतानामष्टकं परम् ॥ २९२ ॥
द्वारान्तर्युग्मयुक्त्या तु भ्रमणीदेशमाश्रितम्[५५] ।
सुपर्ण[५६]श्चक्रसंज्ञश्च सत्यः कौमोदकी द्विजाः ॥ २९३ ॥

५३. विरोधकम् - D, E
५४. मुखे - B, मुखा - E
५५. आश्रितः - B, E
५६. सुवर्ण - B

सुसितासु पताकासु सत्याख्यो विहगाधिपः ॥
सुपर्णः शोणवर्णासु गरुडः पिङ्गलासु च ।
राजपाषाणवर्णासु तार्क्ष्यसंज्ञः प्रतिष्ठितः ॥
नानावर्णपताकायां संपूज्यो विहगेश्वरः । - पा

(Marks, size of the places where bali is offered to Vāstu deities)

286b-288a. *Bali* is to be offered to the Vāstu deities in village and other places in the *maṇḍalas* drawn in the particular directions and smeared with cowdung and others. Seats, with features described before, shall be made to the measurement of extent (width) and height or half (of those measurements) without obstruction to the movement of the chariot.

(The favourable nature of purpose and place of the deities in the enclosures)

288b-289a. Thus the deities of the enclosures remain favourably disposed in their seats and in the particular directions to set aside the defects arising from wicked people.

(Deities at the entrance of the hall of worship or Yāgageha)

289b-299a. O best among sages! listen to the installation of the lords of groups at the entrances of the four places where God gets worship and in the place of worship. The two, called the lords of Vāstu and Kṣetra are stationed as before at the eastern gate. Lakṣmī, Kīrti, Jayā and Māyā are stationed on the top of the entrance in due order. Vajranābha and other gods are to be place in twos at the doorposts in the direction. Sambhava,[38] Prabhava and others in the pitchers at the entrance in the east, Kumuda and other eight spirits of the inner areas occupy the ambulatory place through where they are taken in paths within gates. Suparṇa, Cakra, Satya, Kaumodakī, O brahmins! are to be placed in their order in the ground in front of the entrances. Satya holding the golden staff shall be in the west. They begin-

38. Sambhava and Prabhava: here these are to be worshipped in the pitchers. *Pāram. S.* X.188 but 92 mentions Sambhava, Prabhava, Pūrṇa, Puṣkara, Ānanda, Nandana, Vīrasena and Suṣeṇaka to be worshipped at the doorposts of the main entrance.

योजनीयाः क्रमेणैव द्वाराणामग्रभूतले ।
हेमदण्डगतः सत्यः किन्तु पश्चिमदिग्गतः ॥ २९४ ॥
चण्डाद्याश्च सुभद्रान्ता द्वौ द्वौ प्रागादिषु द्विजाः ।
दक्षिणोत्तरयोगेन तोरणस्तम्भमूलगाः ॥ २९५ ॥
चक्रद्वितयमध्यस्थः[५७] पक्षीशस्तोरणोपरि ।
तत्पार्श्वयोः स्थितं चक्रं नानावर्णपताकयोः ॥ २९६ ॥
सत्यादिकं चतुष्कं तु मध्यवेद्या ध्वजाष्टके ।
प्रभवाप्यययोगेन पूज्यं प्रागादियोगतः ॥ २९७ ॥
इन्द्रादिलोकपालास्ते सिद्धसङ्घपुरःसराः ।
वज्रादयस्तदस्त्राश्च स्वासु दिक्षु बहिः स्थिताः ॥ २९८ ॥
मुख्यकल्पेऽथ वान्येषु निमित्तेष्वेवमाचरेत् ।

[अनुकल्पः]

अनुकल्पेऽथ चण्डादीन् वास्तुनाथादिपूर्वकम् ॥ २९९ ॥
द्वारेषु केवलान्न्यस्य गरुडान्तं प्रपूजयेत् ।

एवं विस्तरेण द्वारयागाशक्तावनुकल्पमाह — **अनुकल्पे** इति ।

[अनुकल्पानुकल्पः]

सर्वद्वारेषु वा पूज्यः सहेतीशः पतत्रिपः ॥ ३०० ॥

[मुख्यकल्पादीनां विषयः]

विविधासु प्रतिष्ठासु जीर्णोद्धारविधावपि ।
महोत्सवेषु सर्वेषु ध्वजारोहणकर्मणि ॥ ३०१ ॥
मङ्गलाङ्कुररोपे च पवित्रारोहणादिषु ।
तथा चानन्तकलशाद्यभिषेकविधावपि ॥ ३०२ ॥
प्रायश्चित्तेष्वनित्येषु काम्येष्वपि च नित्यशः ।
मुख्यकल्पोक्तविधिना कुर्यादन्यत्र चान्यथा ॥ ३०३ ॥

५७. .... पक्षीशस्तोरणोपरि ।

ning from Caṇḍa and ending with Subhadra shall be in twos in the eastern and other directions, O brahmins! at the bottom of the pillars of the arch in the south and north. The lord of birds, who is at the middle of the two discus (wheels) shall be on the top of the arch. The discus is to be stationed on both sides having flags of different colours. The group of four (deities) beginning with Satya shall be worshipped in the east and other directions adopting the methods of rise and dissolution. Those guardians of the worlds of Indra etc. headed by the group of the *siddhas*, thunderbolt and other weapons are stationed outside in their own directions. This to be done in this way in the main method or under other conditions.

(Alternative method)

299b-300a. In the alternative method, Caṇḍa and others following the lord of Vāstu and others, are to be placed alone at the entrances and be worshipped, Garuḍa coming at the end.

(Alternate method under alternative)

300b. Garuḍa, the lord of birds along with the lord of weapons[39] (Hetīśa) is to be worshipped at all entrances.

(Matters coming within the main method)

301-303. Procedures, stated in the main method are to be adopted in the various acts of installations, act of renovation, all great festivals, in the act of flag-hoisting, in the auspicious germination of seeds, in putting the Pavitras, ablution (or giving both) with innumberable pitchers, in expiatory rites, not eternal and done with a purpose and in other cases in another way.

39. Hetīśa: lord of weapons, i.e. Sudarśana.

[प्रसिद्धप्राच्यादिवशेन भगवदभिमुखा देवाः]

सिद्धसङ्घास्तथेन्द्राद्यास्तदस्त्राश्च यथाक्रमम् ।
लोकदिक्पालकास्त्वेते स्वसेनाभिः समावृताः ॥ ३०४ ॥
प्रसिद्धप्राग्वशेनैव नित्यं स्व[५८]स्थानमाश्रिताः ।
दिक्पालकत्वादासृष्टेर्यतस्तेषां स्थितिः स्थिरा ॥ ३०५ ॥
भगवन्मन्त्रमूर्तीनामनन्तानां मुनीश्वराः ।
स्वस्थानस्था नमस्यन्ति पूजयन्ति जपन्ति च ॥ ३०६ ॥

तत्राप्यशक्तावनुकल्पानुकल्पमाह — **सर्वद्वारेषु** इति ।

मुख्यकल्पादीनां विषयमाह — **विविधासु** इति त्रिभिः ।

उक्तानां द्वारावरणदेवानां मध्ये उपेन्द्रादिसिद्धसङ्घस्येन्द्रादिलोकपालानां, वज्रादि तदायुधानाम्, कालादिवसुधान्तचतुर्विंशतिभवोपकरणदेवतानाम्, वज्रनाभादिद्वारपालाष्टकत्रयस्य च सयुक्तिकं प्रसिद्धप्राच्यावस्थानमाह — **सिद्धसङ्घाः** इत्यादिभिः ।

ध्वजाद्यैरुपचारैश्च सम्यक् परिचरन्ति च ।
कैवल्यसिद्धये शश्वद्बहुभिः स्वानुगैः सह ॥ ३०७ ॥
पालयन्ति च भक्तानां बलमोजो ददति च ।
ध्वंसयन्ति च विघ्नौघमनिशं मन्त्रयाजिनाम् ॥ ३०८ ॥
संरक्षन्ति फलं मान्त्रं वर्धमानं द्विलक्षणम् ।
अधिकारमनाद्यन्तं शक्तिबीजं जगत्प्रभोः ॥ ३०९ ॥
दिक्सिद्धये देशात्मत्वं[५९] तद्व्यक्त्यैष्टदिशात्मता[६०] ।
बाह्यत्रिसालभूमिष्ठाः कालाद्या भवदेवताः ॥ ३१० ॥
तत्साधकत्वात् पूर्वोक्तदिग्भागे नियताः सदा ।
वज्रनाभादयो देवाः लोकदिग्द्वारपालकाः ॥ ३११ ॥
तथाऽमरेशपूर्वाश्च सम्भवप्रभवादयः ।
प्रसिद्धप्राक्क्रमेणैव दिग्द्वारेषु स्थिताः क्रमात् ॥ ३१२ ॥

५८. स्वम् - A
५९. दशत्वं तद्व्यक्तयेष्ट - A
६०. दिशात्मका - E

(Deities facing Bhagavān by virtue of the well-known east and other directions)

304-312. Groups of *siddhas*, Indra and others, their weapons in due order, the guardians of the directions in the world there, surrounded by their armies, always occupying their place in the well-known east and other quarters. Their places are stable as they are the guardians from the time of creation. O lordly sages! they who are in their places, bow to worship and do *japa* of the boundless mantra forms of Bhagavān, always attend upon them with flags and other services, with many of their followers to attain perfect isolation. They protect the strength of devotees and offer them energy. They destroy, uninterruptedly the multitude of obstacles of those who worship with mantras. They protect the result pertaining to the mantra increasing it twofold. This authority has no beginning and no end. The seed of power of the lord of the world, nature of for establishing the directions, nature of being in eight directions to manifest them (ten directions) are there. Kāla and other deities of the world (*bhava*) stationed in the ground of the three external ramparts and are ever restricted (confined) to in the division of the quarter stated before to establish that task. Vajranābha and other gods, those who guard the entrances to the directions in the world, likewise, Sambhava, Prabhava etc. following the lord of immortals; they are stationed in their order at the entrances to the quarters according to the order of their celebrity.

[कालादीनां पौर्वापर्यक्रमः]

कालाद्यमष्टकं नित्यमिन्द्राद्यं रुद्रपश्चिमम्[६१] ।
नियन्ता कालतत्त्वान्ते तदन्ते सुस्थितं वियत् ॥ ३१३ ॥

भवोपकरणदेवतासु प्रथमाष्टकस्य यजनक्रमं दर्शयति — **कालाद्यम्** इति । 'कालाद्यमष्टकं नित्यमिन्द्राद्यं रुद्रपश्चिमम्' इति पाठक्रमं विनेन्द्रपुरस्कं रुद्रान्तमेव प्रागादीशानान्तं यष्टव्यमित्यर्थः । तथैव 'कालो वियन्नियन्ता' इति पाठक्रमं विहाय कालतत्त्वान्ते नियन्ता तदन्ते वियत्सुस्थितं ज्ञेयम् । एवं च 'प्राग्भागे इन्द्रः , आग्नेये कालः, याम्ये नियन्ता, नैर्ऋते वियत्, वारुणे शास्त्रम्, वायव्ये विद्याधिपतयः, सौम्ये प्रजापतिसमूहः , ऐशान्ये शिवश्च यष्टव्यः' इति फलितोऽर्थः । अत्र पारमेश्वरव्याख्याने कालतत्त्वान्ते नियता नित्याः, आकारापेक्षया नियतशब्दस्य पुल्लिङ्गत्वं कालाद्यमष्टकम्, तदन्ते प्रलयान्ते, सुस्थितं पुनर्प्रादुर्भूतमित्यर्थ इत्युक्तम् । एतदभिप्रायस्तद्व्याख्यात्रैव वर्णनीयः, नान्येन वक्तुं शक्यः ।

[विद्यादिषु विशेषः]

क्रमात् पूर्वोत्तरे कोणे न्यसेद् दक्षिणपश्चिमे ।
विद्याऽविद्याद्वयं यद्वै स्वपदस्थेऽग्निमारुते ॥ ३१४ ॥
चन्द्रादित्यावुदग्याम्यस्थानयोर्विनिवेश्य च ।
प्रत्यग्भागगतं तोयं प्राग्भागे विन्यसेद्धराम् ॥ ३१५ ॥

[देवप्राचीवशा देवाः]

कुमुदाद्या वृतीशाना लोहिताक्षादयस्तथा ।
वज्रनाभादिकं मुक्त्वा द्वारपालं त्रिरष्टकम् ॥ ३१६ ॥
द्वारपालगणास्त्वेते सालकोणगतास्तथा ।
प्रोक्तक्रमेण तिष्ठन्ति भगवत्प्रागपेक्षया ॥ ३१७ ॥

[तेषामेव स्थानविशेषे भेदः]

कुमुदादिगणेशानां पुरग्रामादिवास्तुनि ।
पालिकावसथे चैव दिक्पालोक्तवशात् स्थिताः ॥ ३१८ ॥

[कालत्रयेऽपि बलिदानविधिः]

त्रिसन्ध्यमेवं देवानां बलिदानं समाचरेत् ।

६१. पञ्चमम् - B

(Order of prior and posterior in regard to time and others)

313. The eight deities[40] beginning with Kāla are eternal beginning with Indra ending with Rudra are always to be worshipped. The controller shall be at the end of the *tattva* called Kāla[41] and Viyat be well placed.

(Special feature regarding Vidyā and others)

314-315. Vidyā and Avidyā shall be placed north-east in the order at the corner comprising south-east really in their places south-east and north-west, moon and sun in the places of north and south. The water to be placed in the western part and earth shall be placed in the eastern part.

(Deities in the east to god)

316-317. Kumuda and other lords of enclosures, Lohitākṣa and others, hosts of the guardians of the entrances except Vajranābha and other guardians of the gates twenty-four in number who are at the corners of the ramparts stand in the order mentioned expecting god in the east.

(Difference among them with reference to their places)

318. The lords of the groups like Kumuda, Gaṇeśa and others remain in the Vāstu, towns, villages, places where the small cup for the growth of grains are kept and the remaining are result of what has been said of the guardians of the quarters.

(Rules for offering bali on the three times in a day)

319a. *Bali* must be offered to gods on the three times called *saṃdhyā*.[42]

40. The eight deities are the guardians of the quarters from east to north-east.
41. The text कान्तो वियन्नियन्ता must be taken as कान्तो नियन्ता वियत् ॥ see commentary.
42. Three *saṁdhyās*: morning, midday and evening. Midday is not really *saṁdhyā* or may be the meeting point of forenoon and afternoon.

[सङ्कल्पितावरणेष्वेव बलिदानक्रमः]

सङ्कल्पितेषु सालेषु द्वारावरणवासिनाम् ॥ ३१९ ॥
असङ्कल्पितसालोक्तदेवानां नाचरेद् बलिम् ।

भवोपकरणदेवतातृतीयाष्टकस्य स्थानक्रमं दर्शयति — **क्रमात्** इति द्वाभ्याम् । इदं मूलभूते सात्वत एवोक्तम् -

"कालादीनां च विन्यासः कार्यश्चानुक्रमेण तु । यज्ञान्तानां महाबुद्धे षोडशानां यथास्थितम् ॥ क्रमात् पूर्वोत्तरे कोणे न्यस्येद् दक्षिणपश्चिमे । विद्याऽविद्याद्वयं यद् वै स्वपदस्थेऽग्निमारुते ॥ चन्द्रादित्यावुदग्याम्ये द्वारयोर्विनिवेश्य च । प्रत्यग्द्वारगतं तोयं प्राग्द्वारे विन्यसेद् धराम् ॥ (सासं. १०.२०-२२)" इति ।

अत्र मण्डलार्चनप्रकरणाद् द्वारभागेऽर्चनमुक्तम् । अत्र 'स्वपदस्थेऽग्निमारुते' इति नपुंसकप्रयोगो दिव्यत्वान्न दोषावहः ।

पूर्वोक्तव्यतिरिक्तानां सर्वेषामपि देवप्राच्यावस्थानमाह — **कुमुदाद्या** इति द्वाभ्याम्।

कुमुदादीनामेव स्थानविशेषे प्रसिद्धिप्राच्यैवावस्थितिमाह — **कुमुदादि** इति ।

उक्तक्रमेण कालत्रयेऽपि बलिदानमाह — **त्रिसन्ध्यम्** इति ।

अधिकावरणेषु सत्स्वपि प्रथमं सङ्कल्पितावरणेष्वेव बलिदानमाह — **सङ्कल्पितेषु** इति ।

[नित्योत्सवयात्राकाले तेभ्यो बलिदानम्]

तत्तन्निर्माणकाले तान् प्रतिष्ठाप्य यथाविधि ॥ ३२० ॥
देवयात्रासमेतं तु बलिदानं समाचरेत् ।

[महाबलिपीठे बलिदानक्रमः]

एवं सर्वं समापाद्य महापीठोर्ध्वभूतलम् ॥ ३२१ ॥
प्रक्षालितं समारुह्य प्राङ्मुखो वाप्युदङ्मुखः ।
तदूर्ध्वाम्बुजदिक्पत्रे कुमुदादीनथान्तरे ॥ ३२२ ॥
सर्वभूतान्पारिषदानाहूय ग्रहसंज्ञितान् ।
सम्पूज्य सोदकं तत्र बलिशेषं समुत्किरेत् ॥ ३२३ ॥
पश्चादाचम्य विधिवत् स्नात्वा वा संविशेद् गृहम् ।

[द्वारावृतिकोणदेवानां मन्त्रोद्धारः]

सर्वद्वारावृतीशानां कोणस्थानां समर्चने ॥ ३२४ ॥
नतिप्रणवसंयुक्तस्वनाम मन्त्र ईरितः ।

(Order in offering bali, only in the enclosure that have been chosen)

319b-320a. *Bali* is to be offered for the deities who dwell in the enclosures in the ramparts that have been arranged. *Bali* shall not be offered to the deities mentioned with reference to the ramparts about which decisions has not been taken.

(Offering of bali to them during processions in daily festivals)

320b-321a. Installing them duly at the time when they are made, *bali* must be offered to them during the processions of the deities.

(Offering of bali in the big Balipīṭha)

321b-324a. The priest shall make all the arrangements to climb up the upper surface of the huge *pīṭha* and stand facing east or north. He shall worship Kumuda and others on the petals of the lotus high above there, petals facing the directions, and calling all other beings who are members of the assembly named after the planets, worship them and scatter the remaining *bali* in the water. Having sipped water then or taking bath according to the rule, he shall enter the house.

(Forming the mantra for the deities at the corner of the enclosures at the entrances)

324b-325a. Mantra is said to consist of *namaḥ*, *Praṇava*, and the name of the deity at the enclosures of all gates, who are at the corners.

[भूतपार्षदग्रहाणां मन्त्रोद्धारः]

महापीठस्थभूतानां पार्षदानां ग्रहात्मनाम्[६२] ॥ ३२५ ॥
तारान्ते विष्णुशब्दं च नियुञ्ज्यादुदितक्रमात् ।

उक्तान् देवान् तत्तदावरणनिर्माणकाल एव प्रतिष्ठाप्य नित्योत्सवयात्राकाले तेभ्यो बलिं दद्यादित्याह — **तत्तत्** इति । पारमेश्वरव्याख्याने एतद्वचनस्य कुमुदादिविषयकत्वभ्रमेणोत्सवपरत्वमङ्गीकृतम् ।

महापीठे बलिदानक्रममाह — **एवम्** इति त्रिभिः । तदूर्ध्वाम्बुजदिक्पत्रे दलाष्टके कुमुदादयः, अन्तरे मध्ये विष्णुभूतादय इति ज्ञेयम् । पारमेश्वरव्याख्याने तु — दिक्पत्रे द्वौ द्वौ कुमुदादीन्, विदिक्पत्रे भूतान्, पारिषदानित्युक्तम्; तदसङ्गतम् । विदिक्पत्रावशेषस्य गत्यभावात् ।

[कोणस्थदेवमन्त्रोद्धारः, तथा होमकर्मणि मन्त्रक्रमः]

सर्वकोणगता मन्त्राः फडन्ताः समुदीरिताः ॥ ३२६ ॥
सर्वे समुदिता मन्त्राः स्वाहान्ता होमकर्मणि ।

[तेषामर्चनं मुद्रादर्शनं च]

ध्यात्वैवमर्च्य तन्मन्त्रैरर्घ्याद्यैरुपचारकैः ॥ ३२७ ॥
दर्शयेदावृतीशानां मुद्रां तर्जनीसंज्ञिताम्[६३] ।
द्वारपालगणानां तु चण्डाद्युक्तमनन्तरम् ॥ ३२८ ॥

[धर्माद्यावरणादूर्ध्वं केनचिद्धेतुना बलिदानविघ्ने मुख्यानुकल्पकथनम्]

धर्माद्यावरणादूर्ध्वं हेतुना येन केनचित् ।
बलिदानमशक्यं चेत् तत्रत्यानां यथाक्रमम् ॥ ३२९ ॥
सर्वतोभद्रपूर्वेषु द्विगुणीकृत्य चाचरेत् ।
मुख्यकल्पे तथान्यत्र यथाशक्त्यावृतिक्षितौ ॥ ३३० ॥
तद्बाह्यावृतिदेवानामावृत्यावृत्य तर्पयेत् ।

मन्त्रक्रममाह — **सर्व** इत्यादिभिः ।

मुद्राक्रममाह — **ध्यात्वा** इति सार्धेन । आवरणदेवानां तर्जनीमुद्रा, द्वारदेवानां तु चण्डाद्युक्तम्, उत्तरत्र चण्डादीनां वक्ष्यमाणैव मुद्रा ज्ञेया । धर्माद्यावरणादूर्ध्वं येन केन वा हेतुना बलिदानाशक्तौ तत्रत्यदेवानामपि प्रथमावरणादिष्वेव द्विगुणप्रदक्षिणद्विगुणवस्तुभिः बलिदानं मुख्यकल्पः । अनुकल्पे एकस्मिन्नेवावरणे आवृत्यावृत्य बलिदानम् । द्वारदेवानां तस्मिन्नेव द्वारे महापीठान्तस्थानां तद्वाराग्रमण्डल एव बलिदानं चाह—

६२. गृहात्मना - B, E
६३. संस्थिताम् - B

(Formation of mantra for the spirits, members of the courts and planets)

325b-326a. The word Viṣṇu shall be used at the end of Tārā[43] for the spirits which are the huge pedestal members of the assembly and of the nature of the planets in the order of their rise.

(Formation of the mantra for gods who are at the corners and the order for using the mantra while doing homa)

326b-327a. The mantras with reference to all corners are stated to end in *phaṭ*. All mantras which are formed, end in *svāhā* while *homa* is done.

(Worship of them and display of mudrā)

327b-328. Meditating thus and after worshipping them with their mantras, *arghya* and other services; *mudrā* called Tarjanī[44] and shall be shown to the lords of the enclosure and then to the group of the guardians of the entrances and to Caṇḍa and others.

(Main and alternative procedures when obstruction occurs to the offering of bali on account of some cause above Dharma and other enclosures)

329-331a. If for some reason, *bali* could not be offered above Dharma and other enclosures, then it shall be done twofold to the deities there in Sarvatobhadra in due order. This is in the case of main method. In other cases, the deities are to be pleased in the ground of the enclosures according to such capacity, this must be repeated and the deities in the enclosures outside that place must be pleased by repeating it.

43. *Tārā: Praṇava.*

44. Tarjanīmudrā See *SKS. Ṛṣi.* II.14a

धर्मात् इति सार्धैस्त्रिभिः । पारमेश्वरव्याख्याने तु "द्वारपालगणानां तु चण्डाद्युक्तमनन्तरम्" इति वाक्यमेतदवतारिकायामेव योजितम् । 'सर्वतोभद्रपूर्वेषु' इति पदं तु द्वितीयाद्यावरणपरत्वेन व्याख्यातम्; तन्मूलं विचारणीयम् ।

[द्वारोपद्वारदेवविषये]

द्वारोपद्वारपालानां तस्मिन् द्वारे समर्पयेत् ॥ ३३१ ॥

[महापीठोदितदेवविषये]

महापीठोदितानां च तद्वाराग्रस्थमण्डले ।

[अनुकल्पेऽप्याहूयाभिगम्यदानस्यव्यवस्था]

ध्यानोत्थानां त्वसञ्चारे न दोषः केन हेतुना ॥ ३३२ ॥
तत्तदावरणद्वारदेशेषूक्तक्रमेण तु ।
द्रव्यमूर्तिगतानां च सञ्चारः स्यादनिष्टकः ॥ ३३३ ॥

[कालत्रयेऽप्येवमेव बलिविधिः]

एवमावृतिदेवानां त्रिसन्ध्यं बलिमाचरेत्
नित्योत्सवार्थबिम्बस्य सन्निधौ तत् समाचरेत् ॥ ३३४ ॥
नृत्तगेयादिसंयुक्तं वेदघोषसमन्वितम् ।

[निगमनपूर्वकं बलिदानप्रशंसा]

द्वारावरणदेवानां ध्यानादीत्थं प्रकाशितम् ॥ ३३५ ॥
एवं हि बलिदानान्तं यत्र पूजां समाचरेत् ।
तत्र देवस्य सान्निध्यं नैरन्तर्येण सिद्ध्यति ॥ ३३६ ॥

धर्माद्यावरणादूर्ध्वं द्वारावरणदेवेष्वमूर्तेषु सत्स्वेव पूर्वोक्तमुख्यानुकल्पावकाशः ।

तेषु द्रव्यमूर्तिगतेषु सत्सु तत्र तत्र बलिदानार्थं सञ्चारो विरुद्ध इत्याह — **ध्यानोत्थानाम्** इति सार्धेन । कालत्रयेऽपि नित्योत्सवबिम्बसन्निधावेव वेदवाद्यघोषैः सह बलिदानं कार्यमित्याह — **एवम्** इति । उक्तस्यार्थस्य निगमनपूर्वकं बलिदानप्रशंसामाह — **द्वारावरणदेवानाम्** इति सार्धेन ।

स्वयंव्यक्तादिस्थलेषु त्रिकालार्चनस्य नित्यत्वं तदूर्ध्वं द्वादशकालादीनां विभवापेक्षत्वादैच्छिकत्वम्,

[कालत्रयेऽपि प्रभातकालस्य प्राधान्यम्]

एवं कालत्रये कुर्यात् पूजनं देशिकोत्तमः ।
न च कालत्रयान्न्यूनं पूजनं विहितं सदा ॥ ३३७ ॥

(About deities at the side gates)

331b. Worship for the guardians of the side gates shall be offered there.

(Regarding the deity appearing in the huge pedestal)

332a. Worship is to be offered who take their rise in the huge pedestal shall be offered in the *maṇḍala* in front of that entrance.

(Even in the case of secondary methods, settlement of offering after invocation and welcome)

332b-333. If the deities who make their appearance during meditation, remain there itself (without movement) there is nothing wrong in that. Movements bring undesirable results of deities in idols made of substances in the order that is stated in the regions of entrances in the various enclosures.

(Bali is to be offered in the same way on the three occasions)

334-335a. *Bali* is to be offered thus on these *saṁdhyās* for the deities at the conclusion in the presence of the idol used for daily festival, with dance and music and sounds caused by the recitation of the Vedas.

(Offering of bali is stated to the laudable before concluding this)

335b-336. This is made clear by way of meditation to the deities at the enclosures to the gates. Worship shall be done in this way ending with the offering of *bali.* Presence of god endures there permanently.

(Worship in the early morning is important among the three times)

337-340a. The eminent preceptor (priest) shall do worship like this on all three occasions (in a day). Worship that falls short of the three times is not always permitted (enjoined). O eminent brahmins! the (worship on) three occassions (in a day) is important in temples that are self-manifest. Worship beyond that (those occasions) could be done at the will (desire) of

प्रासादेषु स्वयंव्यक्तपूर्वेषु द्विजसत्तमाः ।
कालत्रयं प्रधानं स्यात् तदूर्ध्वं कर्तुरिच्छया ॥ ३३८ ॥
विभवापेक्षया चैव वर्धयेत् यथाक्रमम् ।
यावत् द्वादशमः कालस्तावद्वै मुनिपुङ्गवाः ॥ ३३९ ॥
श्रेष्ठः प्रभातकालः स्यात् त्रिषु कालेषु वै पुनः ।

[प्रभातकालादिषु कर्तव्यकर्मणां विभागः]

यथावन्मन्त्रविन्यासमात्मनः करदेहयोः ॥ ३४० ॥
हृद्यागं स्थानसंशुद्धिं सायामां भौतिकीं ततः ।
नित्यं प्राभातिके कुर्यादन्यत्रेच्छाऽनुरूपतः ॥ ३४१ ॥
स्नपनं बलिदानं च कुर्यात् कालत्रये सदा ।
मूर्तेरासनपूजा तु कार्या कालचतुष्टये ॥ ३४२ ॥
पञ्चकाले भवेन्न्यासः षट्काले हवनक्रिया ।
अत ऊर्ध्वेषु कालेषु जपान्तं पूजनं भवेत् ॥ ३४३ ॥
अलङ्कारासनाद्यं च पूर्ववत् क्रमयोगतः ।
विनोक्तेन प्रकारेण ह्यन्यथा न समाचरेत् ॥ ३४४ ॥

[नित्यनैमित्तिकाराधनस्य मुख्यकल्पानुकल्पौ]

मुख्यकल्पे तु होमान्तं नित्यनैमित्तिकात्मिकाम् ।

कालत्रयेऽपि प्रभातकालस्य प्राधान्यं चाह — **एवम्** इत्यादिभिः ।

प्रभातकालादिषु कर्तव्यकर्मणां विभागमाह — **यथावन्मन्त्रविन्यासम्** इत्यादिभिः ।

नित्यनैमित्तिकाराधनस्य होमान्तमनुष्ठानं मुख्यकल्पः, जपान्तमनुष्ठानमनुकल्प इत्याह — **मुख्यकल्पे तु** इति ।

मुख्यकल्पानुष्ठानेऽपि यागानां सति व्यवधाने तत्तद्यागानन्तरमेव तत्तद्धोमानुष्ठानम्,

पूजां क्रमेण वै कुर्यात् तत्तद्धोमावसानिकाम् ॥ ३४५ ॥
अनुकल्पे तु जप्यान्तं यागानन्तरितेषु च ।
यागेषु हवनान्तेषु नित्यनैमित्तिकादिषु ॥ ३४६ ॥
तत्तद्यागं जपान्तं च क्रमात् कृत्वा ततः परम् ।
तत्तद्धोमं मुनिश्रेष्ठाः क्रमात् कुर्याद् यथाविधि ॥ ३४७ ॥

the priest. This (number of occasions) may be increased in due order. Considering availability of funds, O eminent sages! this may be up to the twelfth period.[45] The early morning is the best among the three times.

(Division of works to be done early in the morning and other times)

340b-344. In the early morning work, Mantranyāsa in one's hands and body, Hṛdyāgamantra, Sthānaśuddhi (purity of the place), elaborate Bhūtaśuddhi shall always be done. On other occasions, this may be done according to the desire (of the priest). Bath and offering of *bali* shall always be done on the three occasions. Worship of seat of the idol shall be done when worship is done on four occasions. *Nyāsa* shall be done in worship of five occasions. *Homa* on six occasions and worship ending with *japa* shall be on occasions beyond that (six occasions) ending with Alaṃkārāsāna as before in due order. This shall not be done otherwise without following the method mentioned.

(Main and secondary arrangements for the worship of obligatory and occasional kinds)

345-347. O eminent sages! the various *homas* are to be done duly in the main arrangement, the obligatory and occasional worship ending with *homa* in due order ending. In the secondary arrangement upto the end of *japa* without prejudice to the *yāga* (worship). In doing the acts of worship ending with *homa* of obligatory and occasional kinds, the respective worships are to be done in due order upto *japa* and then the respective *homas* are to be done in due order and according to the rules.

45. Worship shall be done one, three, six or twelve times, For details, see *Pād. S. caryā.* V. 55b-60; *Pāram. S.* ch. IX.

[अनुकल्पयागेषूपकालोक्तेषु च कर्तव्यक्रमः]

अनुकल्पेषु यागेषु ह्युपकालोदितेषु वै ।
आसनार्घ्ये ततः पाद्यमाचामं सप्रतिग्रहम् ॥ ३४८ ॥
गन्धं माल्यं तथा दीपं धूपं मात्रां क्रमेण तु ।
दत्त्वा भोज्यावसानं तु क्रमाद् दद्याद् विधानतः ॥ ३४९ ॥

[निगमनम्]

इत्येवमर्चनविधिः साङ्गोपाङ्गः प्रदर्शितः ।
इतोऽन्यच्छ्रोतुमिच्छा चेत् कथ्यतां मुनिपुङ्गवाः ॥ ३५० ॥

अन्यथा सर्वेषां यागानामनन्तरमेव तत्तद्धोमाचरणमित्याह—**यागानन्तरितेषु** इति। यागानन्तरितेषूत्तरयागाव्यवहितेष्वित्यर्थः। पारमेश्वरव्याख्याने तु — 'यागानि' इति पृथक्पदाभिप्रायेण 'अन्तरितविषयमाह' इत्युक्तम्, तदपि विचारणीयम् ।

पूर्वोक्तानुकल्पयागेषूपकालोक्तेषु च कर्तव्यक्रममाह — **अनुकल्पेषु** इति द्वाभ्याम् ।

निगमयति — **इत्येवम्** इति ।

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य
श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां
सात्वतार्थप्रकाशिकाख्यायामीश्वरतन्त्रव्याख्यायां नवमोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां द्वारावरणदेवतालक्षणादिविधिर्नाम नवमोऽध्यायः ॥

(Order of doing the acts in the secondary arrangement and things to be done about those times)

348-349. In acts of worship to be done in the secondary arrangements and about those times (specified) seat, *arghya, pādya, ācamana* with spittoons, sandal-paste, garland, lamp, incense and *mātrā* shall be given in this order, till the food preparations are in due order.

(Conclusion)

350. Thus the rules for worship are explained with the parts and subsidiary parts. O eminent sages! if there is desire to listen any more than this, please tell.

Thus ends the ninth chapter called marks and other of the deities in the enclosures at the entrances in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra.*

दशमोऽध्यायः

महोत्सवध्वजारोहणान्तविधिः

[महोत्सवविधिः तत्र महोत्सवविधानप्रश्नः]

मुनयः -

भगवन् मुनिशार्दूल सर्वज्ञ वदतां वर ।
नित्यार्चनादिकं सर्वं श्रुतं त्वत्तः सविस्तरम् ॥ १ ॥
महोत्सवाद्युत्सवांस्तु साम्प्रतं वक्तुमर्हसि ।

[उत्सवशब्दस्य निरुक्तिः]

नारदः -

अथातः सम्प्रवक्ष्यामि महोत्सवविधिक्रमम् ॥ २ ॥
सव इत्युच्यते दुःखं विद्वद्भिर्मुनिपुङ्गवाः ।
उद्धृतः स सवो यस्मात् तस्मादुत्सव उच्यते ॥ ३ ॥

[नित्यादिभेदेनोत्सवस्य त्रैविध्यं तेषां लक्षणानि च]

नित्यो नैमित्तिकः काम्यस्त्रिविधः स महोत्सवः ।
वत्सरे वत्सरे यस्तु क्रियते स तु नित्यकः ॥ ४ ॥
भूमिकम्पे दिशां दाहे महोत्पातेषु सत्सु च ।
दुर्भिक्षे व्याधिते राष्ट्रे तथा वै शत्रुसङ्कटे ॥ ५ ॥
अनावृष्टौ च सर्वत्र नक्षत्रपतने च खात् ।
हसने भगवन्मूर्तेरङ्गानां चलने सति ॥ ६ ॥
रोदने चासनाद् बिम्बे परिभ्रमति सत्तमाः ।
व्यत्यासे शशिसूर्यस्य तथान्येष्वेवमादिषु ॥ ७ ॥
शान्त्यर्थं यत् प्रकुर्वीत स नैमित्तिक उच्यते ।
चतुर्णां पुरुषार्थानामुद्दिश्यान्यतमं फलम् ॥ ८ ॥

CHAPTER X

Procedure for Mahotsavadhvajārohaṇānta

(Rules for doing Mahotsava[1]*, question on performing Mahotsava)*

1-2a. Sages: Lord eminent sage! omniscient! best speaker! daily worship and all that have been listened (by us) from you in detail. It behoves you to tell now about Mahotsava and other festivals.

(Derivation of the word utsava)

2b-3. Nārada: Then I tell you the sequence in which Mahotsava is to be done. *Sava* is said to mean misery by scholars.[2] O eminent sages! that misery (*sava*) is removed (pulled out) and therefore *utsava* is the name (for the festival).

(Three kinds of festivals as obligatory and others and their features)

4-9a. That great festival is of three kinds, obligatory, conditioned and motivated (by desire)[3] that which is done year by year is obligatory.[4] That is

1. Mahotsava is also known as Brahmotsava.
2. *Utsava* is explained as that which destroys misery. See *Pād. S. caryā.* X.6; *Pāram S.* XVI.2b-3a; *Śrīpraśnasaṁhitā* XXX.8 defines it thus:
   उत्सूते हर्षमिति च तस्मादेष महोत्सवः ।
   महाप्रीतिर्येन उत्सवेन भविष्यति ॥
   It is worth noting here that the Vaikhānasa Āgama gives two explanations. One of them is that the festival is prominent and therefore it is *utsava* (*SA.* LIV.3a). The other takes the word *sava* in the sense of sacrifice which also means worship. *Utsava* means that all kinds of worship is meant here (*SA.* LIV.8b). The first definition conveys the negative way in which the festival is purposeful.
3. cf. *Pād. S. caryā.* X.7a.
   The Vaikhānasa text SA. classifies the festivals as three with the names Kālotsava, Śraddhotsava and Naimittikotsava. *SA.* LIV.3b, *VK.* names them as Nityotsava, Sāntyutsava, Śraddhotsava P. 338.
4. done every year.

उत्सवोऽनुष्ठितः काम्यः सङ्कल्पितफलप्रदः ।

अथ दशमोऽध्यायो व्याख्यास्यते ।

मुनयो महोत्सवादिकं पृच्छन्ति - **भगवन्** इति सार्धेन । एवं पृष्टो नारदः प्रथममुत्सवशब्दनिर्वचनमाह— **सवः** इति ।

उत्सवत्रैविध्यमाह - **नित्यः** इत्यादिभिः ।

[तीर्थनक्षत्रानुसारेण ध्वजारोहस्य कर्तव्यत्वम्]

ज्योतिःशास्त्रेषु कुशलैर्ब्राह्मणैः सह देशिकः ॥ ९ ॥

पूर्वं कृत्वा यथाशास्त्रं तीर्थऋक्षविनिर्णयम् ।

तीर्थयात्रानुसारेण ध्वजारोहं प्रकल्पयेत् ॥ १० ॥

said to be conditioned[5] which is done for propitiating the deity with a view to avert or mitigate the evil influence, when there are earth-quakes, preternatural redness of the directions (or horizon), serious portents, famine, diseases in the kingdom, danger from enemies, drought everywhere, fall of stars from the sky, when the idol of god laughs and its limbs move, cry (shed tears), rotates away from the seat, O good men! reverse change (of positions) of moon and sun, and others of this kind. The festival is done with a view to control (or destroy) these. The festival that is conducted to attain the results of any one of the four pursuits of life is of the Kāmya kind.[6]

(Hoisting the flag according to the star on the day of the (sacrificial bath)[7])

9b-10. The priest shall determine at first the star for the sacred bath according to the sacred texts, with (the help of) the exponents in astronomical science and brahmins. Hoisting the flag shall be arranged in conformity with the march for the bath.

5. Some of these incidents are mentioned in the *Mahābhārata* and *Ṣaḍviṃśabrāhmaṇa*;
vide: देवता प्रतिमा चैव कम्पन्ति च हसन्ति च ।
वमन्ति रुधिरं चास्यैः स्विद्यन्ति प्रतपन्ति च ॥ Mbh. Bhīṣma II.26
vide: अथ यस्यायुक्तानि यानानि प्रवर्तन्ते, देवतायतनानि कम्पन्ते । देवप्रतिमा हसन्ति, रुदन्ति, गायन्ति, नृत्यन्ति, स्फुटन्ति, स्विद्यन्ति, उन्मीलन्ति, निमीलन्ति, प्रतिप्रयान्ति नद्यः, कवन्धमादित्ये दृश्यते । *Ṣaḍviṃśabrāhmaṇa X.*
This raises an issue: Did temples and idols exist in the early period? Being a Brāhmaṇa attached to the *Sāmaveda*, the treatment of topics of this kind is justified; but the general view that has been prevailing among the Vedic scholars and historians is that topics of this kind were interpolated at a later periods.
6. Kāmyotsava may include any festival done out of personal desire to do it in order to gain god's grace. The Brahmotsava, Vasantotsava, Kalyāṇotsava and others which are done almost frequently every week at Tirumalai may be taken to come under this kind and are called Ārjitasevā in that temple. Kalyāṇotsava is usually done at Oppiliyappam Koil also near Kumbakaram, though not frequently.
7. Sacrificial bath: this is called *avabhṛtha*. This name goes back to the *Śrauta* rites which last for a period beyond a day. At the conclusion, the priests who do the sacrificial rite and the participants along with others proceed to the river or tank and take a bath there denoting that the sacrificial rite is over. Similarly, a bath is taken generally on the ninth day of the annual festival in a temple and marks the end of the festival.

[भगवत्प्रतिष्ठाकाल एव विमानाग्रे ध्वजप्रतिष्ठायामिदानीं तत्प्रसक्तेरनपेक्षितत्वम्]

मन्त्रमूर्तिप्रतिष्ठानकाल एव मुनीश्वराः ।
प्रासादस्य शिखाग्रे तु स्थापितः खगराड्ध्वजः ॥ ११ ॥
हेतिराजसमायुक्तो यत्र यत्र सदा द्विजाः ।
विना त्वन्यध्वजारोहमुत्सवं परिकल्पयेत् ॥ १२ ॥

[सति विभवे तत्रापि ध्वजारोहणम्, अन्यत्र ध्वजारोहणावश्यकत्वं च]

तत्राप्यन्यध्वजारोहं कुर्याद् वा विभवे सति ।
कुर्यादुत्सवमन्यत्र ध्वजारोहणपूर्वकम् ॥ १३ ॥

[नवाहादिभेदेनोत्सवत्रैविध्यम्]

नवाहं दैविकं प्रोक्तं सप्ताहं मध्यमं भवेत् ।
पञ्चाहमधमं विद्यात् त्रिविधं चोत्सवं स्मृतम् ॥ १४ ॥

[नवाहोत्सवविधिः]

तत्र तावत् प्रवक्ष्यामि नवाहस्य विधिक्रमम् ।

तीर्थनक्षत्रानुसारेण ध्वजारोहणमाह — **ज्योतिःशास्त्रेषु** इति ।

भगवत्प्रतिष्ठाकाल एव विमानाग्रे ध्वजे समारोपिते इदानीं तत्प्रसक्तिरेव नास्तीत्याह — **मन्त्रमूर्ति** इति ।

सति विभवे इदानीमप्यन्यद्ध्वजारोपः कार्य इत्याह — **तत्रापि** इति ।

विमानाग्रध्वजाभावे सर्वदा ध्वजारोहणपूर्वकमेवोत्सवमनुष्ठेयमित्याह — **कुर्यात्** इति ।

नवाहादिभेदेनोत्सवत्रैविध्यमाह — **नवाहम्** इति ।

तत्र नवाहक्रममुपदिशन् आचार्यस्य वपनपूर्वकं स्नानानुष्ठानं भूषणाद्यलङ्करणं वैष्णवानुज्ञां, विष्वक्सेनार्चनपूर्वकं शरीरशुद्ध्यर्थं पुण्याहवाचनप्रकारं चाह - **तत्र तावत्** इत्यारभ्य **एवं सर्वेषु यागेषु कुर्यात् पुण्याहवाचनम्** इत्यन्तैः ।

[आचार्यस्य वपनपूर्वकं स्नानानुष्ठानम्]

ध्वजाधिवासपूर्वेद्युः देशिको मन्त्रवित्तमः ॥ १५ ॥
स्नायाद्वपनपूर्वं तु भगवद्यागसिद्धये ।
निशामुखे प्रवृत्ते त्वाचार्यो मूर्तिपैः सह ॥ १६ ॥
स्नानादिनित्यनियमान् कृत्वा चैव यथाविधि ।

(If the flag (flag staff) has already been installed at the top of the vimāna at the time of the installation of god, then this act is not needed)

11-12. O eminent sages! if the flag of Garuḍa has been installed at the top of the temple[8] at the time when the lord, in the form of mantras was installed, O brahmins! wherever it is always associated with Sudraśana (lord of weapons) there, the festival is to be arranged without the hoisting of another flag.

(Hoisting the flag may be done there also, if funds permit. Elsewhere hoisting the flag is essential)

13. If funds are available, another flag may be hoisted there. In other cases, the festival is to be conducted after the flag is hoisted.

(Three kinds of festival, according to the differences in the number of days nine and others for conducting festival)

14. Nine-day festival[9] is called divine, seven day of the middle kind and five day of the low kind — the festival is considered to be of three kinds.

(Method of doing the nine day festival)

15-17a. I shall tell the order (method) of performing the nine day festival. The priest, who knows the mantras shall on the day prior to *adhivāsa*[10] of the flag, take bath after having a shave, for accomplishing the worship (festival) of Bhagavān. At the advent of nightfall, the priest shall attend, along with his assistants, according to rules.....

8. This practice is not generally found in South Indian temples. Perhaps the flag bearing the mark of Garuḍa is to indicate the identity of the temple as that of Viṣṇu.
9. The Vaikhānasa texts mention the nine-day festival with specific names. The festivals on the first and succeeding days are called Brāhma, Ārṣa, Raudra, Vāsava, Saumya, Vaiṣṇava, Sarvadaivatya, Yāmya and Vāruṇa; vide: *VK.* LVI; *KA.* XIV. 54-56.
10. The word *adhivāsa* is made up of *adhi* conveying the sense of the locative case and *vāsa* dwelling; being kept. An idol, flag or anything, that is produced is to be kept in a particular place to rest and settle itself. Generally, the idol is kept in water, so that impurities, if any, in it may get removed. Milk is also used instead of water. Grains, shade of a tree, costly bed and others are also to be used in case the idol is to be made of mud or if a flag is to be prepared. A special pavilion is required to be created for the purpose.
    See *Pād. S. kiyā.* XXV. 17-19; XXVI.59b-82.
    For further details see *KA.* VI.94-103; *VK.* P. 210.

[भूषणाद्यलङ्करणम्]

भूषणैर्विविधैर्वस्त्रैर्नूतनैश्च विभूषितः ॥ १७ ॥
सितोष्णीषोत्तरीयश्च चित्रमाल्यैरलङ्कृतः ।

[वैष्णवानुज्ञा]

प्रविश्य देवसदनं यजमानसमन्वितः ॥ १८ ॥
नित्यार्चनावसाने तु वैष्णवान् द्विजसत्तमान् ।
षट्कर्मनिरतांश्चैव पञ्चकालपरायणान् ॥ १९ ॥
समभ्यर्च्य ततस्तेभ्यो ह्यनुज्ञां प्रतिगृह्य च ।

[विष्वक्सेनार्चनपूर्वकं शरीरशुद्ध्यर्थं पुण्याहवाचनक्रमः]

विष्वक्सेनं समभ्यर्च्य यागविघ्नप्रशान्तये ॥ २० ॥
पश्चात् स्वदेहशुद्ध्यर्थं पुण्याहं वाचयेद् गुरुः ।
प्रकल्प्य भूतले शुद्धे धान्यपीठं यथाविधि ॥ २१ ॥
विन्यस्य मङ्गलं कुम्भं सम्पूर्णं गन्धवारिणा ।
रत्नहाटककूर्चस्रग्वस्त्रपल्लवसंयुतम् ॥ २२ ॥
चन्दनाद्युपलिप्तं च परितश्चार्घ्यचर्चितम् ।
तत्कुम्भस्य चतुर्दिक्षु चतुरो मूर्तिपान्यसेत् ॥ २३ ॥
अद्भिर्गन्धैस्तथा पुष्पैरक्षतैर्दक्षिणादिभिः ।
तोषयित्वा तु तान् सर्वान् ततः कुम्भे सुदर्शनम् ॥ २४ ॥
समावाह्य समभ्यर्च्य ध्यायमानोऽच्युतं हृदि ।
दर्भैः स्पृशंस्तु कलशं ब्राह्मणैः सह देशिकः ॥ २५ ॥
ॐकाराद्यं पवित्रान्तं मन्त्राणां प्राक्चतुष्टयम् ।
पाठयेच्च सपुण्याहं गायत्रीत्रितयान्वितम् ॥ २६ ॥
ततश्चात्मानुवादं चात्मव्यूहं तथैव च ।

(Decoration with ornaments)

17b-18a...... shall bedeck himself with ornaments of different kinds and new clothes and wear white turban and upper garment and garlands of different kinds.

(Permission from the Vaiṣṇavas)

18b-20a. He (priest) shall enter the abode (shrine) of god, along with the patron. He shall worship, after the conclusion of daily worship, the Vaiṣṇavas, the eminent brahmins, those who are devoted to the performance of the six acts,[11] who are attached to performing the duties relating to the fivefold divisions of the day and receive their permission.

(Worship of Viṣvaksena and then doing Puṇyāhavācana[12] for purifying the body)

20b-27a. After worshipping Viṣvaksena for the control of obstacles (that may rise) for the (performance) of worship, the priest shall then arrange for the recitation of *puṇyāha* for the purification of his own body.[13] A pedestal with the grains shall be duly arranged on a pure ground. An auspicious pitcher shall be placed filled with scented water.[14] It shall have within it gems, gold, clump of grass,[15] garland (in flowers), cloth (piece) and shoots (of mango and other trees). It shall be smeared with sandal-paste and others and rubbed all round with *arghya*. Four assistants shall be placed in the four directions for that pitcher. All of them are to be pleased with water, sandal-

11. *ṣaṭkarma*: the six acts which a Brahmin is to practice are—(1) *Adhyayana*: study of the Veda, (2) *Adhyāpana:* teaching the Vedas to others, (3) *Yajana:* performing the sacrifice, (4) *Yājana*: officiating as priest assisting others in performing the sacrifice. (5) *Dāna:* giving gifts and (6) *Pratigraha:* receiving gifts.
12. Puṇyāhavācana: the word *puṇyāha* means auspicious day, *vācana*: reading or reciting the passages that convey the wishes for an auspicious day for others. Water is filled in a pitcher whose mouth is then covered with mango leaves and a coconut. With preliminary worship to the lord of waters, mantras beginning with the words *hiraṇyavarṇāśucayaḥ* are uttered. Finally, the water there is sprinkled with mango leaves on the persons and objects for whose purification this is done.
13. This means *puṇyāha* is to be done by others for the sake of the priest who is to be sprinkled with the holy water by the reciters of these mantras.
14. *Gandhavāri:* water slightly mixed up with sandal-paste.
15. *kūrca:* a handful of *darbhas* tied together and placed in the pitcher. It is to be used to sprinkle the holy water in the pitcher upon other, articles used then for purifying them.

[शुद्धिमन्त्राः]

ततश्च शुद्धिमन्त्रास्तु पठेदेवं समाहितः ॥ २७ ॥
शुद्धयेऽस्तु परो देवो वासुदेवोऽस्तु शुद्धये ।
सङ्कर्षणः शुद्धयेस्तु प्रद्युम्नश्चाऽस्तु शुद्धये ॥ २८ ॥
शुद्धयेस्त्वनिरुद्धोऽपि केशवश्चाऽस्तु शुद्धये ।
नारायणोऽस्तु विश्वेशः शुद्धये सर्वकर्मसु ॥ २९ ॥
शुद्धये माधवश्चास्तु सर्वलोकहिते रतः ।
गोविन्दः शुद्धये चाऽस्तु परमात्मा सनातनः ॥ ३० ॥

ओङ्काराद्यं पवित्रान्तं मन्त्रचतुष्टयमाथर्वणे द्रष्टव्यम् । "ॐ भगवान् पवित्रं, वासुदेवः पवित्रं, तत्पादौ पवित्रं, तत्पादोदकं पवित्रम्" इति । पुण्याहम् — 'ॐ तत्सत्पुण्याहं भवन्तो ब्रुवन्तु' इत्यनेन सहितमित्यर्थः। गायत्रीत्रितयान्वितं प्रसिद्धगायत्री, विष्णुगायत्री, तुरीयगायत्रीसहितम्, तुरीयगायत्री तु 'ॐ एकपदी' इत्यादि । आत्मानुवादः "ॐ एष सा परा प्रकृतिः, एष तत्परं ब्रह्म, एषः प्रभवः, एषोऽव्ययः" इति । 'एष आत्मा चतुर्विधः' इत्यारभ्य 'न ते विदुः' इत्यन्तश्च । अयं मूलवेदान्तर्गतः, सहस्रनामभाष्ये 'विष्वक्सेनो जनार्दनः' इत्यत्रोदाहृतः । आत्मव्यूहः 'एषा कृतिरेष भगवान्' इत्यादि 'अनिरुद्ध' इत्यन्तम् ।

शुद्धये विष्णुरस्त्वाद्यः शुद्धये मधुसूदनः ।
सर्वलोकहितो देवः शुद्धयेऽस्तु त्रिविक्रमः ॥ ३१ ॥
वामनः शुद्धये चास्तु श्रीधरोऽद्यास्तु[1] शुद्धये ।
शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥ ३२ ॥
सदा दामोदरो देवः शुद्धयेऽस्तु जगत्पतिः ।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः ॥ ३३ ॥
अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये ।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ॥ ३४ ॥
सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा ।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥ ३५ ॥

१. अन्यत्र - B

paste, flowers, Akṣata,[16] *dakṣiṇā*[17] and others. Sudarśana is to be invoked in the pitcher and adored. The pitcher shall be touched with *darbhas*, thinking of Acyuta. The priest shall have the firstfour mantras beginning with *Praṇava* and ending with the word *pavitra*,[18] together with three Gāyatrīs,[19] Ātmānuvāda[20] and Ātmavyūha.[21]

(Purificatory mantras)

27b-57. He (priest) shall, with composed mind, recite thus (in the following way) the purificatory mantras, 'May the supreme lord[22] be for purification (purify). May Vāsudeva be for purification. May Saṃkarṣaṇa purify and Pradyumna purify. May Aniruddha purify and Keśava purify. May Nārāyaṇa, the lord of the universe be for purification of all undertakings. May Mādhava, who is interested in the well-being of all worlds, purify. May

16. Akṣata: unbroken rice mixed up with turmeric powder and little ghee.
17. *dakṣiṇā:* a fee in cash or kind presented to the priests and others who officiate in the conduct of a religious rite or ritual; vide: अवामे विष्णु यज्ञादिविधिदाने (मेदिनी).
18. This refers to the four mantras, according to the commentator, taken from the *Atharvaveda.* They are: ओं भगवान् पवित्रम्; वासुदेवः पवित्रम्; तत्पादौ पवित्रम्; तत्पादोदकं पवित्रम् ।
19. The three Gāyatrīs are the well-known Gāyatrī, Viṣṇugāyatrī (ओं नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्) । Turīyagāyatrī (ओं एकपदी) ।
20. Ātmānuvāda: ओं एष सा परा प्रकृतिः, एष तत्परं ब्रह्मः, एष प्रभवः, एषोऽव्ययः ।
    This refers to the nature of soul.
21. Ātmavyūha: एष आत्मा चतुर्विधः... न ते विदुः ।
    The commentator observes that these (also under 19) are included in the Mūlaveda, i.e. Ekāyanaveda, cf. Parāśarabhaṭṭa: *Bhagavadguṇadarpaṇa* on *Viṣṇusahasranāma śloka* 14a.
22. The names of god as given here are:
    1. Paradeva 2. Vāsudeva 3. Saṃkarṣaṇa 4. Pradyumna 5. Aniruddha 6. Keśava 7. Nārāyaṇa 8. Mādhava 9. Govinda 10. Viṣṇu 11. Madhusūdana 12. Trivikrama 13. Vāmana 14. Śrīdhara 15. Hṛṣīkeśa 16. Padmanābha 17. Dāmodara 18. Padmanābha 19. Dhruva 20. Ananta 21. Śaktyātmā 22. Madhusūdana 23. Vidyādhideva 24. Kapila 25. Viśvarūpa 26. Vihaṅgama 27. Kroḍātmā 28. Baḍabānana 29. Dharma 30. Vāgīśvara 31. Ekārṇavaśaya 32. Kūrma 33. Varāha 34. Narasiṃha 35. Amṛtāharaṇa 36. Śrīpati 37. Kāntātmā 38. Rāhujit 39. Kālanemighna 40. Pārijātahara 41. Lokanātha 42. Dattātreya 43. Nyagrodhaśāyī 44. Ekaśṛṅgatanu 45. Vāmana 46. Trivikrama 47. Nara 48. Nārāyaṇa 49. Hari 50. Kṛṣṇa 51. Paraśurāma 52. Rāma 53. Vedavit 54. Kalkin 55. Pātālaśayana
    Among these, Śāntātman is mentioned between Lokanātha and Dattātreya in SS. IX. 81 a and *Ahs.* V.54. This name is not included here and also in *LT.* XI. 19. This a deliberate omission or left off by oversight.

क्रोडात्मा शुद्धये चास्तु शुद्धये बडबानन:[२] ।
शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥ ३६ ॥
देव एकार्णवशय: शुद्धयेऽस्तु निरन्तरम् ।
शुद्धयेऽस्तु सदा देव: कूर्म: पातालधारक: ॥ ३७ ॥
वराह: शुद्धये चास्तु नारसिंहोऽस्तु शुद्धये ।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥ ३८ ॥
श्रीपति: शुद्धये चास्तु कान्तात्मा चास्तु शुद्धये ।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च[३] ॥ ३९ ॥
पारिजातहरश्चास्तु लोकनाथोऽस्तु शुद्धये ।
सर्वत्र शुद्धये चास्तु दत्तात्रेयो महाप्रभु: ॥ ४० ॥
न्यग्रोधशायी भगवान् शुद्धये चास्तु सर्वदा ।
एकशृङ्गतनुश्चास्तु वामनश्चापि शुद्धये ॥ ४१ ॥
त्रिविक्रम: शुद्धयेऽस्तु शुद्धयेऽस्तु नर: सदा ।
नारायण: शुद्धयेऽस्तु हरि: कृष्णश्च शुद्धये ॥ ४२ ॥
ज्वलत्परशुधृग्राम: शुद्धयेऽस्तु धनुर्धर: ।
रामश्च शुद्धये चास्तु वेदविद्भगवांस्तत: ॥ ४३ ॥
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयंकर: ।
शुद्धयेऽस्तु सदा देव: पातालशयन: प्रभु: ॥ ४४ ॥
शुद्धये सन्तु[४] सर्वेषां सर्वे सर्वत्र सर्वदा ।
एते सर्वे सदा देवा: शान्तये सन्तु पूजिता: ॥ ४५ ॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च ।
शिवाय मुक्तये सन्तु वृद्धयै सर्वकर्मणाम् ॥ ४६ ॥
मन्त्राणां देशिकानां च स्थानानामपि सर्वदा ।
पुत्रमित्रकलत्राणां दासीदासगवामपि ॥ ४७ ॥

२. बलबानन: - B, C, E
३. एव हि - B
४. स तु - B

Govinda, the eternal supreme soul purify. May the primeval Viṣṇu purify and Madhusūdana purify. May Trivikrama, the lord interested in the welfare of all worlds, purify. May Vāmana purify and also Śrīdhara purify. May Hṛṣīkeśa purify and Padmanābha purify. May lord Dāmodara, the lord of the worlds, purify forever. May Padmanābha purify and Dhruva always purify. May Ananta purify and Śaktyātmā purify. May Madhusūdana be for purification in all undertakings. May Vidyādhīdeva always purify and Kapila be likewise. May Viśvarūpa purify. May Vihaṅgama purify. May Kroḍātmā purify. May Baḍabānana purify. May Dharma always purify and likewise Vāgīśvara. May lord Ekārṇavaśaya purify uninterruptedly. May lord Kūrma, who supports the Pātāla always purify. May Varāha purify. May Nārasiṃha purify. May Amṛtāharaṇa purify all deeds. May Śrīpati purify. May Kāntātmā purify. May Rāhujit purify. May Kālanemighna also (do it). Pārijātahara may (purify). Let Lokanātha purify. May the great powerful Dattātreya purify everywhere. May Lord Nyagrodhaśāyī always purify. May Ekaśṛṅgatanu (purify) and Vāmana purify. May Trivikrama purify and may Nara always purify. May Nārāyaṇa purify. May Hari and Kṛṣṇa purify. May Rāma, holding the axe, purify. May Rāma, holding the bow, purify. May the Lord, who knows the Veda (that is, Lord Kṛṣṇa) purify. May Kalkī, who brings all evils to destruction, always purify. May all purify for all everywhere and for all times. May all these gods, who are (when) worshipped, bring calmness. May they before prosperity, nourishment, accomplishment (for undertakings) devotion, auspiciousness, growth (or success of all undertakings), for the mantras, priests, always for all conditions, for sons, friends and wives, man and maid-servants and cows, Vedas, Śāstras and Āgamas, observances and desired acquisitions, all desires, always for the benefits, longevity, health, intelligence, acquisition of wealth and grains, virtues (virtuous acts), minuteness[23] and others, qualities and fortune, king, people (inhabiting the country),

23. Lāṅgalī: one who has the ploughshare (*lāṅgala*) in his hand evidently a weapon. He is Saṃkarṣaṇa identified later with Balarāma.

वेदशास्त्रागमादीनां व्रतानामिष्टसम्पदाम् ।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥ ४८ ॥
आयुष्यारोग्यमेधानां धनधान्यादिसम्पदाम् ।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥ ४९ ॥
राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम् ।
वैष्णवानां विशेषेण परत्र हितमिच्छताम् ॥ ५० ॥
पञ्चकालविशुद्धानां सत्त्वस्थानां शुभात्मनाम् ।
स्वस्त्यस्तु च शिवं चास्तु शुभं चास्तु पुनः पुनः ॥ ५१ ॥
अविघ्नमनिशं चास्तु दीर्घमायुष्यमस्तु वै[५] ।
समाहितं[६] मनश्चास्तु सम्पदश्चोत्तरोत्तरम् ॥ ५२ ॥
पुण्याहं शुद्धये चास्तु वासुदेवादिमूर्तयः ।
शङ्खचक्रगदापद्मयुक्तः सर्वेश्वरेश्वरः ॥ ५३ ॥
प्रीयतां भगवान् देवो लाङ्गली प्रीयतां सदा ।
प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः ॥ ५४ ॥
नारायणः सुरेशोऽपि[७] कर्मणां पूरणाय च ।
न्यूनाधिकानां शान्त्यर्थं प्रीयतां प्रीयताम् विभुः ॥ ५५ ॥
पुण्याहं स्वस्ति ऋद्धिं च संवाच्य सह मूर्तिपैः ।
तदद्भिः शतधारेण स्थानानीत्यादिकेन च ॥ ५६ ॥
आत्मानं प्रोक्षयेत् पश्चाद्देशिकस्त्वात्म[८] शुद्धये ।
एवं सर्वेषु यागेषु कुर्यात् पुण्याहवाचनम् ॥ ५७ ॥

[आचार्यस्य शरीरशुद्ध्यर्थं गोहिरण्यादिदानम्]

गोहिरण्यादिदानैश्च शुद्धिं प्राप्याथ देशिकः ।

[भूतशुद्ध्यादिमन्त्रासनान्तमर्चनम्]

देवस्य सन्निधिं गत्वा ह्युपविष्टस्तथासने ॥ ५८ ॥

५. नः - D, E
६. समाहित - D, E
७. सुरेशोऽस्तु - D, E
८. स्यात्म - C

patrons, ministers, Vaiṣṇavas in particular, for those who desire for advantages hereafter, and for those who adhere to the quality of *sattva* of auspicious (good) nature and pure by (pursuing the duties according to) the fivefold periods of time. May there be well-being, happiness and auspiciousness for ever. Let there be no obstalces at any time. May there be long life. May the mind be composed and prosperity further and further. May *puṇyāha* purify. May the lord Bhagavān, having the conch, discus, mace and lotus, who is the lord of all lords be pleased. May the lord having the ploughshare[24] be always pleased. May Pradyumna be always pleased. May lord of gods, Aniruddha, Nārāyaṇa, the lord of gods, be (helpful) for accomplishing the deeds (undertaken) and for putting down the effect of what is wanting and is inexcess (among the undertakings).' After uttering with the assistants *puṇyāha, svasti*[24] and increase, the priest shall then sprinkle on himself those waters with (the mantra) *śatadhāreṇa sthānāni*[25] and others for his own purification. Puṇyāhavācana shall be done in this way in all worships.

(Gift of cows and gold for purifying the body of the Ācārya)

58a. On acquiring purification through the gifts of cows, gold and others, the priest.

(Worship beginning Bhūtaśuddhi and ending with Mantrāsana)

58b-60a. Going to the shrine[26] of god and occupying a seat, the (priest) shall do lengthy Bhūtaśuddhi with Prāṇāyāma and two *dhāraṇās.*[27] Placing

24. *svasti:* well; this word is uttered while doing Puṇyāhavācana.
25. *śatadhāreṇa sthānāni*: *TA*. I.1.3.
26. *sannidhi:* vicinity. In its concrete sense, it means a shrine individually set for each deity, such as Deva, Devī and others.
27. Two *dhāraṇās*: see under II.58; Five *dhāraṇas* are mentioned; vide: *Paus. S.* XXXII.242a.

सायामां भूतसंशुद्धिं धारणाभ्यां समाचरेत् ।
देहविन्यस्तमन्त्रोऽथ मानसं यागमाचरेत् ॥ ५९ ॥
मन्त्रासने ततो देवं समभ्यर्च्य यथाविधि ।

[देवस्य नवकलशस्नपनविधिः]

स्नानासनं ततो नीत्वा स्नापयेन्नवभिर्घटैः ॥ ६० ॥

शुद्ध्यर्थं गोहिरण्यादिदानं चाह — **गोहिरण्यात्** इति ।
भूतशुद्ध्यादिमन्त्रासनान्तमर्चनमाह — **देवस्य** इति द्वाभ्याम् ।
अथ देवस्य नवकलशस्नपनविधिमाह — **स्नानासनम्** इत्यारभ्य **कृत्वा देवस्य पूर्ववत्** इत्यन्तैः ।

देवस्य पुरतो भूमिं स्नपनार्थं यथाविधि ।
त्रेधा विभज्य कोष्ठानां नवके द्विजसत्तमाः ॥ ६१ ॥
धान्यपीठादिकं कृत्वा कलशानधिवास्य च ।
पाद्यमर्घ्यं तथाऽऽचामं सर्वौषधिजलं तथा ॥ ६२ ॥
प्रागाद्युत्तरपर्यन्तं न्यसेत् कोष्ठचतुष्टये ।
दधि क्षीरं मधु घृतमाग्नेयादिषु विन्यसेत् ॥ ६३ ॥
शुद्धाम्भःकलशं मध्ये विन्यस्य तदनन्तरम् ।
हरिद्राचूर्णकुम्भं तु तेषां च पुरतो न्यसेत् ॥ ६४ ॥
पुण्याहं वाचयित्वा तु प्रोक्षयेत् तज्जलैस्तु तान् ।
प्रागादिदिक्षु विन्यस्तकुम्भेषु प्रभवक्रमात् ॥ ६५ ॥
चतुरो वासुदेवादीन् विदिक्स्थकलशेषु तु ।
ईशादिवह्निपर्यन्तं तानेवाप्यययोगतः ॥ ६६ ॥
मध्ये शुद्धोदकलशे यजेन्नारायणं विभुम् ।
अर्घ्यालभनपुष्पैश्च धूपेन मुनिपुङ्गवाः ॥ ६७ ॥
हरिद्राचूर्णकुम्भे तु श्रियं देवीं समर्चयेत् ।
स्नानासनोदितैर्भोगैर्मुखलेपान्तिमैः क्रमात् ॥ ६८ ॥
सम्पूज्य देवदेवेशं कुम्भैः संस्नापयेत् ततः ।
प्रथमं विष्णुगायत्र्या तथेदं विष्णुरित्यृचा ॥ ६९ ॥

the mantras in his own body he shall do mental worship. Having then worshipped the Lord duly in the Mantrāsana.

(Method of giving bath to the lord with nine pitchers)

60b-76a. Taking him to Snānāsana, he shall give bath with nine pitchers (filled with water). The ground (lying) in front of god shall be divided into three parts, O eminent brahmins! a pedestal made of grains shall be prepared into nine compartments (*koṣṭha*), the pitchers shall have *adhivāsana*. (Provision shall be made for *pādya, arghya, ācāmana* and water with all medicinal herbs in the four compartments from the east to the north. Curds, milk, honey and ghee shall be placed (in the pitchers) in the (intermediate) directions beginning with south-east. Then the jar, filled with pure water, shall be placed in the middle and the pitcher filled with turmeric powder shall be placed in front of them. After reciting *puṇyāha*, these (pitchers) shall be sprinkled with those waters (of *puṇyāha*). The four gods beginning from Vāsudeva shall be worshipped in the order of their rise in the jars placed in the east and other directions. The very same deities shall be worshipped in the order of merging in the pitchers placed in the intermediate directions from north-east to south-east. Lord Nārāyaṇa shall be worshipped in the middle pitcher (containing) pure water, O eminent sages! Śrīdevī shall be worshipped in the pitcher containing turmeric powder with *arghya*, sandal-paste, flowers and incense. Then after worshipping the lord of the gods, with the enjoyable services mentioned in Snānāsana upto anoining the face. He shall be given bath, with the mantras Viṣṇugāyatrī[28] at first, then the *ṛk idaṃ viṣṇuḥ,*[29] and then three words beginning with *viṣṇoḥ karmāṇi*[30] and both shall be given in due order with *pādya* and others kept in the east and other directions. The lord must then be given bath with the curds and others (kept) in the jars placed in the intermediate directions with the mantras *dadhikrāviṇṇa,*[31] *āpyāyasva,*[32] *madhuvātā*[33] and the *ṛk śukramasi.*[34] Then he shall be smeared with turmeric (powder) (uttering) the Śrīsūkta.[35] He

28. Viṣṇugāyatrī: *Oṃ nārāyaṇāya vidmahe vāsudevāya dhīmahi tanno viṣṇuḥ pracodayāt.*
29. *idaṃ viṣṇuḥ: RV.* I.22. 17a.
30. *Viṣṇoḥ karmāṇi paśyata.* *ibid.* I.22-19.
31. *dadhikrāviṇṇo: ibid.* IV. 39-6a.
32. *āpyāyasva: ibid.* I. 91-117.
33. *madhuvātā: ibid.* I. 90-8a.
34. *śukramasi: VS.* I. 31.
35. Śrīsūkta: This forms part of *Ṛgveda Khila.*

ततस्त्रीणि पदाद्येन विष्णोः कर्माणि मन्त्रतः ।
प्रागादिदिक्षु विन्यस्तैः पाद्याद्यैः स्नापयेत् क्रमात् ॥ ७० ॥
दधिक्राविण्णमन्त्रेण आप्यायस्वेति मन्त्रतः ।
मधुवातेति मन्त्रेण ततः शुक्रमसीत्यृचा ॥ ७१ ॥
विदिक्षु न्यस्तकलशैर्दध्याद्यैः स्नापयेद् विभुम् ।
श्रीसूक्तेन ततो देवं हारिद्रेण[९] विलेपयेत् ॥ ७२ ॥
ततः पुरुषसूक्तं तु पठद्भिर्ब्राह्मणैः सह ।
सहस्रधारया देवं शुद्धोदेनाभिषेचयेत् ॥ ७३ ॥
प्रतिद्रव्यं तु वस्त्रेण ह्यर्घ्यालभनमाल्यकैः ।
धूपेन च समभ्यर्च्य ततस्तेनाभिषेचयेत् ॥ ७४ ॥
यद्वार्घ्यपाद्यमाचामं गन्धस्रग्धूपदीपकम् ।
नैवेद्यं चार्पयेत् सर्वं केवलं चार्घ्यमेव च[१०] ॥ ७५ ॥
ततो नीराजिनादींश्च कृत्वा देवस्य पूर्ववत् ।

[अलङ्कारासनम्]

अलङ्कारासनं नीत्वाऽऽसनादिक्रमाद्यजेत् ॥ ७६ ॥
भोगैः सांस्पर्शिकैः प्राग्वद्विविधैरौपचारिकैः ।
हृदयङ्गमसंज्ञैश्च समभ्यर्च्य यथाविधि ॥ ७७ ॥
स्तुत्वा स्तोत्रैर्जितन्ताद्यैः प्रणमेद्देशिको विभुम् ।

९. हरिद्रेण - B, E
१०. वा - D, E

(priest) shall then give ablution to the lord with pure water flowing through thousand holes[36] along with brahmins reciting the Puruṣasūkta. After worshipping, while using each material, with cloth, *arghya*, sandal-paste garlands and incense, he shall give ablution with that (material), Or, he shall offer *arghya, pādya, ācamana*, sandal-paste (scented material), garland, incense, light, food-preparations and mere *arghya* alone. Then *nīrājana* and others shall be given to god as before.

(Alaṃkārāsana)

76b-78a. The (lord) shall be taken to Alaṅkārāsana and worshipped in the order of seats.[37] He shall be duly worshipped with enjoyable services such Aupacārika[38] of various kinds Sāṃsparśika as mentioned earlier and named Hṛdayaṅgama[39] After praising with Jitantā[40] and other *stotras*, the priest shall bow before the lord.

36. *Sahasradhārā:* a dish made of a metal, silver or gold is provided with thousand holes. It is held by two assistants above the head of the idol. Water is poured by the priest into it from above with two conches. Drops of water trickle down through the holes falling on the crown and other parts of the body of the idol.

37. Seats *(āsanas)* for god during worship.

They are six in Mantrāsana, Snānāsana, Alaṅkārāsana, Bhojyāsana, Mantrāsana and Paryaṅkāsana.

Mantrāsana: offering of *arghya, pādya, ācamana*, sandal-paste, garland, incense, light, etc.

Snānāsana: giving bath.

Alaṅkārāsana: bedecking with apparels, umbrella, playing of musical instruments, dance, praises.

Bhojyāsana: *arghya, pādya, ācamana*, curds, ghee, milk.

madhuparka: offering of food preparations.

Mantrāsana: same as the first mentioned *āsana*, offering of *tāmbūla*, music, prostration.

Paryaṅkāsana: offering couch or bed, *tāmbūla* and prostration.

Vide: *Ahs*. XXXIII; *LT*. XXXIX.

38. Services, attendances to god are of four kinds: (1) Sāndṛṣṭika, like offering lights, vehicles and others; (2) Ābhyavahārika - includes food offerings; *ācamanīya* and others; (3) Sāṃsparśika: pleasurables; (4) Ābhimānika: music, stotras and others.

vide: *LT*. XXXVI.89b-92.

39. Hṛdayaṅgama: pleasing to the heart.

40. Jitantā stotra: this is held to form part of the *Ṛgveda* (*Khila*). It contains five parts, called first, second, third, fourth and fifth Jitantā. The opening verse is:

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥

This *stotra* is an important one for the Pāñcarātra system. It is stated in the *Mbh*. that sages Ekata, Dvita and Trita were constantly reciting this near Śvetadvīpa; vide: *Mbh*. *Śānti* CCC. XLVI.

The first verse gets an exposition in *Ahs*. LIII.

[अङ्कुरार्पणविधिः]

अथाङ्कुरार्पणं कुर्याद् देशिको मन्त्रवित्तमः ॥ ७८ ॥

[पालिका-घटिका-शरावभेदात् पात्रस्य त्रिविधत्वम्]

तद्विधानं विस्तरेण शृणुध्वं मुनिसत्तमाः ।
त्रिविधानि च पात्राणि मङ्गलाङ्कुररोपणे ॥ ७९ ॥
पालिका घटिकाश्चेति शरावश्चेति[११] भेदतः ।

अलङ्कारासनादिप्रणामान्तोपचारानाह— **अलङ्कारासनम्** इति द्वाभ्याम् ।

अथाङ्कुरार्पणं वदन् प्रथमं पालिकादिलक्षणमाह— **अथाङ्कुरार्पणम्** इत्यारभ्य **सिद्धिकाङ्क्षिभिः** इत्यन्तैः ।

[पालिकालक्षणम्]

पालिकानामथोच्छ्रायः पञ्चविंशाङ्गुलो भवेत् ॥ ८० ॥
तदाननस्य विस्तारो भवेद् वै षोडशाङ्गुलः ।
अष्टाङ्गुलस्तदुच्छ्रायो ह्यङ्गुलं वलयं ततः ॥ ८१ ॥
भवेत् कण्ठबिलं विप्रास्ततोऽष्टाङ्गुलविस्तृतम् ।
आरभ्य वक्त्रवलयाद्यावत्कण्ठबिलं द्विजाः ॥ ८२ ॥
ह्रासयेदनुपातेन[१२] तन्नालं द्वादशाङ्गुलम् ।
उच्छ्रायादथ विस्तारान्मध्यतस्तु षडङ्गुलम् ॥ ८३ ॥
अधस्तादङ्गुलानां तु चतुष्कं विस्तृतं भवेत् ।
ततः कण्ठबिलाच्चैव ह्रासयेदनुपाततः[१३] ॥ ८४ ॥
पादपीठमधोत्सेधाद्विज्ञेयं चतुरङ्गुलम् ।
दशाङ्गुलस्तद्विस्तारस्तत्सन्धिश्चाङ्गुलो भवेत् ॥ ८५ ॥
तत्सन्धेश्च भवेन्नालं सार्धमेकाङ्गुलं द्विजाः ।
उन्मत्तकुसुमाकारं वक्त्रं पद्माकृतिर्भवेत् ॥ ८६ ॥

अत्रैवमर्थः - पालिकानामुच्छ्रायः पञ्चविंशाङ्गुलमितः। तद्विवरणं त्वाननमष्टाङ्गुलमितं नालं द्वादशाङ्गुलं, पीठं चतुरङ्गुलं पीठनालयोः सन्धिरेकाङ्गुल, आहत्य पञ्चविंशाङ्गुलोच्छ्रायः । अष्टाङ्गुलमिते

११. शरावाश्च त्रि - B, C, D', E
१२. वादेन - B, E
१३. वादतः - B, E

(Method of doing germination)

78b. The priest, who knows best the mantras, shall attend to Aṅkurārpaṇa,[41]

(Three kinds of vessels Pālikā, Ghaṭikā and Śarāva)

79-80a. O eminent sages! listen to the elaborate process of it. The vessels are of three kinds for raising the auspicious sprouts (namely) Pālikā, Ghaṭikā and Śarāva.

(Marks of Pālikā)

80b-87. The height of the Pālikās shall be twenty-five inches,[42] its mouth shall be sixteen inches in width, the ring shall be eight inches in height, the

41. Aṅkurārpaṇa: a ritual involving the sowing of the grains in small crops called *pālikā* and attending to their growth by watering them for a fixed number of days. Their growth determines the nature and outcome of the ritual that is undertaken for which this is a preliminary ritualistic act. This is an indispensible ritual for almost all the festivals in temples. cf. under VII. 25.

42. The units of measurements in architecture and ritualistic practises in temples are of three kinds: 1. Mānāṅgula 2. Mātrāṅgula and 3. Dehalabdhāṅgula. The minutest particles of dust seen in the rays of the sun as they pass through the window are called *aṇu* or *paramāṇu*. This *aṇu* called atom must not be taken to be identical with the atom of modern science or that admitted in the Vaiśeṣika system of Indian philosophy. For practical purposes involving measurement, it is essential that the unit of measurement is admitted to be visible.

Under Mānāṅgula:
8 *paramāṇus* make one *adhareṇu*
8 *adhareṇus* make one *romāgra* (tip of the hair)
8 *romāgras* make one *likhyā*
8 *likhyās* make one *yūka*
8 *yūkas* make one *yava*
8 *yavas* make one *mānāṅgula* or digit

twelve digits make one span (*vitasti*)
twelve spans make one cubit (*hasta*) or *kiṣku*
twenty-five digits make one *prājāpatya*
twenty-six digits make one *dhanurmuṣṭi*
twenty-seven digits make one *dhanurgraha*

Mātrāṅgula: length or height of the space between the upper and lower joints in the middle finger in the right hand of the priest. This unit is variable as this cannot be the unit, as the fingures of the priests could not be uniformly equal. For practical purposes, this alone holds good when measurements are to be made for bed, seat, vehicles, vessels, *sruk*, *sruva*, *jubūḥ*, etc.

The third is Dehalabdhāṅgula. The height of the object is to be determined as ten *tāla* and others. One tenth of that is Dehalabdhāṅgula. *SA*. 22.5b-6a. This is used for making measurements of Dhruvabera and all idols.

आननैकाङ्गुलमग्रवलयं कार्यम् । आननविस्तारस्तु षोडशाङ्गुलः । तदन्तः कर्णबिलविस्तारोऽष्टाङ्गुलः । नालविस्तारः षडङ्गुलः । नालाऽधोभागविस्तारश्चतुरङ्गुलः । एवमाननादारभ्य विस्तारह्रासादुन्मत्तकुसुमाकृतिः सिद्ध्यतीति ज्ञेयम् । पादपीठविस्तारस्तु दशाङ्गुलः पीठनालसन्धेर्नालः सार्धाङ्गुलमित इति पालिका-लक्षणम् ।

पालिकोत्सेधतुल्यास्तु घटिकाः समुदाहृताः ।
अङ्गुलत्रयहीना वा तदूर्ध्वं कलशाकृतिः ॥ ८७ ॥

[घटिकालक्षणम्]

घटिकाः पञ्चवक्त्राः स्युरेतासां मध्यमं मुखम् ।
षडङ्गुलं च विस्तीर्णं चतुर्दिक्षु चतुष्टयम् ॥ ८८ ॥
चतुरङ्गुलविस्तारं कलशोदरविस्तृतिः ।
षोडशाङ्गुलमानोत्था शेषं प्राग्वत् समाचरेत् ॥ ८९ ॥
यदाङ्गुलत्रयन्यूनास्तदा सप्ताङ्गुलोच्छ्रितम् ।
तदाननं तु तन्नालमर्धोत्तरदशाङ्गुलम् ॥ ९० ॥
सार्धत्रयाङ्गुलं पीठं प्राग्वत् सर्वत्र विस्तरः ।

घटिकाऽप्युच्छ्रायेण पालिकासदृशाः ; किन्तु तदाननभागः कलशाकारः पञ्चवक्त्रयुतः कार्यः । तत्र मध्यमं मुखं षडङ्गुलविस्तीर्णम् । चतुर्दिक्षुस्थितमुखचतुष्टयमपि चतुरङ्गुलविस्तीर्णम् । कलशोदरविस्तारस्तु षोडशाङ्गुलमितः । तन्नालपीठतत्सन्धयस्तु प्राग्वदेव कार्याः । घटिकानां द्वाविंशाङ्गुलोच्छ्रायपक्षे तदाननं सप्ताङ्गुलमितं नालमर्धादिकदशाङ्गलं पीठं सार्धत्र्यङ्गुलम्, तयोः सन्धिरेकाङ्गुल, आहत्य द्वाविंशाङ्गुलो-च्छ्रायः। विस्तारस्तु पूर्ववदेव, इति घटिकालक्षणम् ।

[शरावलक्षणम्]

शरावाः पालिकोत्सेधतुल्याः पञ्चभिरङ्गुलैः ॥ ९१ ॥
हीना वा वक्त्रविस्तारात् समारभ्य मुनीश्वराः ।
पादपीठस्य विस्तारं यावत् तावत् क्रमेण तु ॥ ९२ ॥
पूर्वोक्तात्पादहीना तु भवेत् सर्वत्र विस्तृतिः ।
भवेत् त्रिपादहीना तु पादपीठस्य विस्तृतिः ॥ ९३ ॥
यदा शरावा हीनाः स्युरङ्गुलैः पञ्चभिस्तदा ।
मुखं षडङ्गुलोच्छ्रायं तन्नालं तु दशाङ्गुलम् ॥ ९४ ॥
त्र्यङ्गुलं पादपीठं स्यात् प्राग्वत् सर्वत्र विस्तृतिः ।
एतदुत्तममानं तु पात्राणां कथितं द्विजाः ॥ ९५ ॥

cavity of the neck, O brahmins! eight inches in width, O brahmins! its spout twelve inches by proportionate reduction from the ring at the neck upto the cavity of the neck, six inches from the height, then from width and from the middle, and the width below (width) be four inches in width. Proportionate reduction shall be made from the cavity of the neck. The foot-stool is to be understood to be four inches from the elevation below. Its (foot-stool's) width shall be twelve inches and its joint shall be one inch. O brahmins! the spout shall be one and a half inches from its joint. Its mouth, which has the shape of *unmattakusuma*[43] shall be of the form of lotus. The Ghatikās are said to be of the pitcher above that short by three inches.

(Ghaṭikā's marks)

88-91a. The Ghaṭikās[44] shall have five mouths. The middle mouth shall be six inches broad and quadrangular in the four directions. Its width, like the middle portion of the pitcher, shall be four inches and sixteen inches in height and the rest shall be as before. If they fall short by three inches, then its mouth shall have the height of seven inches. Its spout shall be ten and a half inches, the fool-stool shall be three and a half inches and its width shall be as before.

(Marks of Śarāva)[45]

91b-97a. The Śarāvas are equal to Pālikās in height or short of them by five inches. O eminent sages! from the width of the mouth upto the width of foot-stool, the width shall be at all places (parts) less by a quarter (*pāda*)

See *Mayamata*: Translation by B. Dagens, ch. 5.
cf. *Pād. S. kriyā.* XII.25-32a; *Pāram. S.* XVIII. 2;
Paus. S. IV.5-10; *JS.* XX.4-66a,
Parama S. XXIII.17b-31,
VS. XIV. 73b-10b,
SKS. Brahma. VII.110b-161,
SS. XXIV.258-432
Thus *aṅgula* is not inch but corresponds to a digit, *yava.* Grain or corn was used for linear measurements in early times.

43. *unmattakusuma:* of the form of the flower called *unmatta,* poisonous, thorn apple. It is also called *Dhattūra.* It is forbidden for use in worship; vide: *SKS. Śiva.* VI.8a.
44. *SKS. Śiva.* IX.7b tells that *ghaṭikā* shall be 12 *aṅgulas* in *āyāma,* (may be height). The *Pālikās* are Vaiṣṇava in the sense that Viṣṇu is the presiding deity. *Ghaṭikā* is presided over by Brahmā and Śarāva by Śiva. *ibid.* 9b-10a,
cf. *Pād. S. kriyā.* XXIV. 25b-38.
45. *Śarāva:* see under 44.

एत[१४]देव मुनिश्रेष्ठाः पादहीनं तु मध्यमम् ।
अर्धहीनं तु तन्मानमधमं परिकीर्तितम् ॥ ९६ ॥
अतो न्यूनं न कर्तव्यं कदाचित्सिद्धिकाङ्क्षिभिः ।

[पालिकादीनामुपादानद्रव्यम्]

हेमादिलोहजाः सर्वे मृन्मया वा यथावसु ॥ ९७ ॥

शरावाश्चापि पालिकासदृशोच्छ्रायाः । पालिकोक्तविस्तारात् पादहीनविस्ताराः । एवं च शरावाणामाननं द्वादशाङ्गुलविस्तीर्णं, कर्णबिलं षडङ्गुलविस्तीर्णं, नालं सार्धचतुरङ्गुलविस्तीर्णं, नालाधोभागः त्र्यङ्गुलविस्तीर्ण इति ज्ञेयम् । तत्पादपीठविस्तारस्तु सार्धद्व्यङ्गुलमितः । शरावाणां विंशत्यङ्गुलोत्सेधपक्षे तु तदाननं षडङ्गुलं नालं दशाङ्गुलं पादपीठं त्र्यङ्गुलं, तत्सन्धिरेकाङ्गुलः विस्तारस्तु प्राग्वदेव, इति शरावलक्षणम् । एवमुक्तस्य पालिकादीनामुच्छ्रायस्य विस्तारस्य पादहीनत्वे मध्यममानम्, अर्धहीनत्वेऽधममानम् । अतो हीनं न कार्यमित्यर्थः ।

पालिकादीनामुपादानद्रव्यमाह — **हेमादि** इति ।

[उत्तमादिभेदेन पालिकादीनां संख्याभेदः]

प्रत्येकं पालिकादीनां द्विषट्कं चोत्तमं भवेत् ।
द्विरष्टकं वा षट्त्रिंशद्विभवे सति कल्पयेत् ॥ ९८ ॥
प्रत्यष्टकं मध्यमं स्याच्चतुष्कमधमं भवेत् ।

[पालिकानामेव सर्वप्रत्याम्नायत्वम्]

सर्वार्थे पालिकाः प्राग्वच्छोडशाष्टौ यथाबलम् ॥ ९९ ॥
चतस्रो वा ततस्तासु मङ्गलाङ्कुरकल्पनम् ।

[दैवमानुषयोः पालिकादिसंख्याभेदः]

अयुग्मा मानुषे कार्ये दैवे युग्मास्तु पालिकाः ॥ १०० ॥

[उत्तमादिसंख्यानां कर्मक्षेत्रेषु विनियोगः]

महोत्सवे प्रतिष्ठायां पवित्रारोपणे तथा ।
जीर्णोद्धारविधौ चापि सहस्रकलशे तथा ॥ १०१ ॥
त्रिवर्गपालिका यद्वा भवेदुत्तमसंख्यया ।
भवेन्मध्यमया वाऽपि नान्यथा द्विजसत्तमाः ॥ १०२ ॥
कर्मस्वन्येषु सर्वेषु यथावित्तं यथारुचि ।

१४. एते - B, E

from what was stated before. The width of the foot-stool shall be short by three quarters. If the Śarāvas are short by five inches, then their mouth shall be six inches height and their spout ten inches, the foot-stool shall be of three inches and width shall be as stated before in every part. O brahmins! this best measurement for the vessels is stated. O eminent sages! this itself falling short by a quarter is of the middle kind. That measurement short by half is stated to be of the low kind. Therefore, those who seek to have success in their undertakings, shall never to take up the low (short) kind.

(The material substance for the Pālikā and others)

97b. All those could be produced from gold and other metals or mud according to the funds (available).

(Number regarding the Pālikās according as the kinds are best and others)

98-99a. In each of Pālikā and others twelve numbers (indicate) the best kind, or sixteen or thirty-six according to the available wealth. Eight under each shall be of the middle kind and four of the low kind.

(Pālikās alone are to be finally used)

99b-100a. The Pālikās shall be sixteen or eight according to capacity in all undertakings or four auspicious sprouting shall be in them.

(Difference in the number of Pālikās and others on the difference between divine and mortal)

100b. Uneven in the Pālikās in the (case of the) work of mortals and even in that of the divine.

(Best and other numbers shall be of use in the regions of the deeds)

101-103a. The Pālikās of the three groups shall be used in Mahotsava, installation, raising the *pavitra*, renovating (bath with) one thousand pitchers or of the best number or even of the middle kind, O eminent brahmins! not otherwise. It shall be according to funds and one's liking in other deeds.

उत्तमादिभेदेन पालिकादीनां संख्यामाह — **प्रत्येकम्** इति सार्धेन ।

सर्वप्रत्याम्नायत्वेन केवलपालिका एव वा कल्पनीया इत्याह—**सर्वार्थे** इति ।'वस्त्रार्थेऽक्षता' इतिवत्। क्वचित् पारमेश्वरव्याख्यानान्तरे'सर्वार्थेऽङ्कुरसापेक्षसर्वकर्मणि'इत्युक्तम्।दैवमानुषयो: संख्याभेदानाह— **अयुग्मा** इति । उत्तमादिसंख्यानां कर्मभेदेषु विनियोगमाह — **महोत्सवे** इति सार्धद्वाभ्याम् ।

[अङ्कुरार्पणस्थानानि]

अङ्कुरावापनस्थानमण्डपं परिकल्पयेत् ॥ १०३ ॥
प्रथमावरणे वाऽपि द्वितीयावरणेऽपि वा ।
तृतीयावरणे वाऽपि चतुर्थावरणेऽपि वा ॥ १०४ ॥
शुभे विविक्तेऽभिमते देशे वै देशिकोत्तम: ।
चतुर्दिक्षु चतुर्द्वारं चतुर्वन्दनमालिकम् ॥ १०५ ॥
दर्भमालापरिक्षिप्तं मुक्तादामविराजितम् ।
विततक्षौमसञ्छन्नं गोमयालिप्तभूतलम् ॥ १०६ ॥
प्रदीपमालावितितमक्षतैश्चापि सर्वत: ।
सुधाचूर्णैश्च धवलैश्चित्रिताभ्यन्तरस्थलम् ॥ १०७ ॥
मण्डपं कल्पयित्वैवं यद्वा स्नपनमण्डपे ।
यागाख्यमण्डपे वाऽपि कुर्यादङ्कुररोपणम् ॥ १०८ ॥

[रात्रावेवाङ्कुरार्पणकालत्वं सयुक्तिकम्, अह्निकरणे दोष:]

अङ्कुरानर्पयेद् रात्रौ य इच्छेद् राष्ट्रवर्धनम् ।
बीजानामधिप: सोम ओषधीशोऽमृतात्मक: ॥ १०९ ॥

अङ्कुरार्पणस्थानमाह—**अङ्कुरा** इत्यादिभि:।वन्दनमालिकानामतोरणद्वयमध्यलम्बितमाला।''नन्दिकौ तोरणस्तम्भौ शुककूटस्तयो: सृजि: । सैव वन्दनमालाऽपि'' (३.६.५८) इति वैजयन्ती । रात्रावेवाङ्कुरार्पणकर्तव्यत्वं सयुक्तिकमाह — **अङ्कुरान्** इत्यादिभि: ।

न प्रीणाति सदा तत्र अङ्कुरार्पणमह्नि चेत् ।
तस्मात् सर्वप्रयत्नेन रात्र्यामेवाङ्कुरार्पणम् ॥ ११० ॥
कुर्यात् सम्यग्विधानेन भगवद्भक्तिसंयुत: ।
तस्मिन् जगत्प्रिये प्रीते शीतांशौ प्राणिजीवने ॥ १११ ॥
तद्देशे सर्वसस्यानां संपत्तिर्महती भवेत् ।
गवां च लोकमातृणां नृणामपि च सर्वश: ॥ ११२ ॥

(Places for germination of the sprouts)

103b-108. A pavilion shall be arranged to be the place for sowing the sprouts, in the first enclosure or second enclosure or third enclosure or fourth enclosure, by the eminent priest in an auspicious, lonely (isolated) and desirable place. (It shall have) with four festoons of leaves[46] at the four entrances in the four directions, encircled by a garland of *darbhas* shinning with strings of pearls, covered with fully stretched out silk, the ground smeared with cowdung, extended[47] by a series of lights and Akṣatas everywhere, with the interior portion painted by white powders of lime, or the sprouts are to be raised in the pavilion for bath or the pavilion called *yāga.*

(Night is the appropriate time for germination of the sprouts and the disadvantage of doing it during the day (time))

109-113. The sprouts shall be placed (grown) to the night by one who desires the growth of the kingdom. Soma is the lord of seeds and the lord of the medicinal herbs is of the nature of nectar. He is not always pleased, if sowing the sprouts (germination) of the seeds is done during the day. Therefore Aṅkurārparaṇa shall be done by any means only during the night in a perfect way with devotion to god. Prosperity (produce) for all crops will be great in that land where the moon (coal-rayed) the life of living beings and fond of the world, is pleased, and also for the cows, the mother[48] of the

46. *vandanamālikā:* A garland of leaves suspended in between two arches; vide: *Vaijayantī.* III.6.58.
47. *pradīpamālāvitatam:* extended by a series of lights. This refers to the pavilion. The radiance of the series of lights extends all round. The pavilion having a series of burning lights seems to be extended that is more extensive.
48. *gavām ca lokamātṛṇām:* cows give milk like mother to the child. Thus they are mentioned as the mother of the worlds.

अज्ञानादह्नि कुर्याच्वेदङ्कुराणामथार्पणम् ।
अशोभनं भवेद् राष्ट्रमसमृद्धजनान्वितम् ॥ ११३ ॥

[प्रायश्चित्तादि सद्यःकालीनाङ्कुरेऽह्नोऽभ्यनुज्ञा]

सद्यःकालीनके विप्राः कर्मणि स्याद् दिवाऽपि वा ।

[सम्भारसम्भरणादिः]

यद्यत्तत्रोप[१५]योग्यं स्यात् तत्सर्वं च समार्जयेत् ॥ ११४ ॥
सम्भृत्य सर्वसम्भारानाचार्यो मूर्तिपैः सह ।
तदर्थमर्पयित्वा तु यजमानसमन्वितः ॥ ११५ ॥

'गवां च लोकमातृणाम्' इत्यत्र सर्वेषामपि स्तन्यप्रदानात् लोकमातृणामिति गोविशेषणम् । पारमेश्वर-व्याख्यानान्तरे तु 'लोकमात्राणाम्' इति पाठान्तरमङ्गीकृत्य मात्राशब्दस्य कृत्स्नार्थकत्व-मुक्तम् ।

प्रायश्चित्तादि सद्यःकालनिवृत्तिकर्मणि पुष्पाङ्कुरो दिवाऽपि वा कार्य इत्याह —**सद्यःकालीनके** इति ।

पारमेश्वरव्याख्याने त्वनुकल्पमाह — **सद्यः इति** इत्युक्तम्, तदयुक्तम्; कर्मभेदात् तस्य कालस्य तदनुकल्पत्वाऽसङ्गतेः ।

अथ सर्वसम्भारसम्भरणपूर्वकं भगवते बीजपात्रनिवेदनादिकमाह — **यद्यत्तत्रोपयोग्यम्** इत्या-दिभिः।

भगवन्तं जगद्योनिं पूजयित्वा विधानतः ।

[द्वादशबीजानि]

ततस्त्वभिनवे पात्रे सौवर्णे राजतेऽथवा ॥ ११६ ॥
तिलसर्षपनीवारशालिमाषप्रियङ्गवः ।
कुळुत्थमुद्गनिष्पावयवगोधूमवैणवाः ॥ ११७ ॥
बीजानि द्वादशैतानि पृथक् पात्रेषु वा द्विजाः ।

[तदानयनप्रकारः, तेषामाराधनं भगवते निवेदनं च]

सम्भृत्य तु मुनिश्रेष्ठाः स्थापयित्वा तु मूर्धनि ॥ ११८ ॥
दीक्षितस्य तु विप्रस्य पुष्पाक्षतकराञ्जलिः ।
आचार्यः प्रविशेत् सार्धं साधकैर्भगवन्मयैः ॥ ११९ ॥
प्रासादाभ्यन्तरं विप्राः तत्राधारोपरि न्यसेत् ।
बीजपात्रं ततोऽर्घ्येण गन्धैः पुष्पैश्च धूपकैः ॥ १२० ॥

१५. यद्यदत्रोप – पा

world and for men also. If Aṅkurārpaṇa is done during the day out of ignorance, there will be misfortune (inauspiciousness) in the kingdom and people there, and loss of opulence.

(To get the result then and there, acts of expiation are to be performed, Aṅkurārpaṇa *is then permitted to be done even during the day)*

114a. O brahmins! this Aṅkurārpaṇa could be done even during the day, when the results are sought to be obtained at once.[49]

(Bringing together the materials)

114b-116a. Whatever is fit for use shall be procured. The chief priest shall then set them for the purpose with the assistants and patron. He shall duly worship Bhagavān, the cause of the world.

(Twelve kinds of seeds)[50]

116b-118a. He (the priest) shall then place them in a new gold or silver vessel. Seasamum, mustard, wildrice, good rice (*śāli*), black gram, *panio* seed (Priyaṅgm) Kuluttha (horse-gram), beans (Mudga) Niṣpāva, (a kind of rice), barley (Yava), wheat (Godhūma) and bamboo corn (Vaiṇavā), O brahmins! these are the twelve seeds that are to be kept separately in the vessels.

(Bringing them and worship of them and offering them to god)

118b-124. O eminent sages! after procuring them and placing them on the head of the brahmin who had initiation, the high priest shall enter, with flowers and akṣatas in his palms accompanied by Sādhakas[51] and assistants, their thinking set on Bhagavān, into the interior of the temple, O brahmins!

49. *sadyāṅkura:* When germination is required urgently, then the grains could be sown during the day. The Vaikhānasa text *Vimānārcanakalpa* offers this note: एवं कर्तुमशक्तः सद्य एवासन्ने अङ्कुरार्पणोक्तक्रियाः सर्वाः कृत्वा श्वेततण्डुलैः पद्माद्यैः श्वेतपुष्पैश्च पालिकादीन् तत्तन्मन्त्रेण पूरयित्वा आरभेत ।

    VK. P. 202 cf. Note on the MS. text No. 285-19 Des. Catalogue of MSS. Vol. II. French Institute, Pondicherry.

50. Twelve names of grains are mentioned here for use in Aṅkurārpaṇa. Seven among them and Śyāmāka in adition to it are stated in *Pād. S. kriyā.* XXIV.79; *SKS. Śiva.* IX.11b-12a enumerates ten kinds of seeds of which eight are included in this text, two others being pea (Śimba) and Śyāmāka.

51. Sādhakas: One among the four trainees. Other three being Samayin, Putraka and Ācārya. For details, see *SKS. Brahma.* V.118-124.

सम्पूज्य मूलबिम्बस्थं तथा चोत्सवबिम्बगम् ।
बीजपात्रं ततोऽभ्यर्च्य देवाय विनिवेदयेत् ॥ १२१ ॥
सह शङ्खनिनादैश्च मङ्गलैर्गीतनिस्वनैः ।
तूर्यनादैश्च विविधैः श्रुतिघोषैः समन्ततः ॥ १२२ ॥
स्थापयित्वा तु तत्पात्रं दीक्षितस्यैव मूर्धनि ।
साधकैः सहितो विप्राः बहिर्निर्गत्य देशिकः ॥ १२३ ॥
धाम प्रदक्षिणीकृत्य न्यसेदङ्कुरमण्डपे ।

[मृत्सङ्ग्रहणप्रकारः, यागशालागमनं च]

विष्वक्सेनं तु वा तार्क्ष्यं हनुमत्प्रमुखं तु वा ॥ १२४ ॥

अथ मृत्सङ्ग्रहणमाह — **विष्वक्सेनम्** इत्यारभ्य **प्रविशेन्मण्डपं ततः** इत्यन्तैः । अङ्कुरपात्रकैः यात्रालङ्कारार्थं पूर्वमेवामन्त्रकमुत्पादिताङ्कुरपात्रैरित्यर्थः ।

हेतीशं वापि वस्त्राद्यैरलङ्कृत्य विशेषतः ।
यानादिकं समारोप्य प्रक्षाल्याद्भिः खनित्रकम् ॥ १२५ ॥
नवेन वाससाऽऽच्छाद्य भूषयित्वा तु माल्यकैः ।
देशिको वाहयेद्विप्रैः शूद्रैर्वा दीक्षितैर्द्विजाः ॥ १२६ ॥
चित्रध्वजपताकाभिः सार्धमङ्कुरपात्रकैः ।
त्रिविधैः पालिकाद्यैश्च शङ्खतूर्यादिभिः सह ॥ १२७ ॥
आम्नायोद्घोषणपरैर्भक्तैर्भागवतैर्विभोः ।
गायकैर्गणिकाभिश्च तथान्यैर्मङ्गलैः सह ॥ १२८ ॥
क्रमात् प्रदक्षिणीकृत्य सर्वेष्वावरणेषु च ।
दिशं प्राचीमुदीचीं वाऽथवा प्रागुदग्दिशम् ॥ १२९ ॥
अदूरं समनुप्राप्य तत्रोद्याने मनोहरे ।
केवले वा शुचौ देशे मृदं शुद्धां समाहरेत् ॥ १३० ॥
अस्त्रमन्त्रेण धरणीं सम्प्रोक्ष्य प्रथमं गुरुः ।
महीसूक्तेन संस्पृश्य ध्यायन्नेकाग्रचेतसा ॥ १३१ ॥
मूर्तिं देवस्य वाराहीमभ्यर्च्य कुसुमैर्भुवम् ।
अस्त्राम्बुना प्रोक्षितेन पुष्पैरभ्यर्चितेन च ॥ १३२ ॥

he shall place them on the support. The vessel, which is intended for the seeds, shall be worshipped with *arghya*, sandal-paste, flowers and incense, shall be placed near the Mūla idol and the idol of the festival and be offered for god. The chief priest shall place that vessel on the head of the initiated person and shall come out of that place to the accompaniment of all the sounds (ringing) from the conches, auspicious sounds of songs, sounds of tabor, various sounds of recitation of the Vedas, O brahmins! he shall circumambulate the temple and then place it in the pavilion for germination.

(Method for collecting the mud for Aṅkurārpaṇa and going to Yāgaśālā)

124b-136a. Viṣvaksena or Garuḍa or Hanumān (and others) or Sudarśana is to be specially adorned with clothes and others and is to be mounted on a vehicle. A small shovel shall be washed and covered with a new cloth and be adorned with garlands. O brahmins! the chief priest shall have it carried by brahmins, Śūdras or initiated and (carry) the flags of various colours and banners together with the vessels intended for germination, the three kinds of *pālikās* with the (sounds of) conches and tabors and servants of god devoted in the recitation of the Vedas, singers and courtersans and other auspicious things materials and go circumambulating all enclosures. Towards the east or north or north at first and proceed a short distance. Pure mud shall be taken from a pure isolated or purified spot in an attractive park. The ground is to be sprinkled at first with water, (uttering) the Astramantra. The priest shall touch it uttering Bhūsūkta[52] and meditate upon it with a closely attentive mind. He shall then draw the form of Varāha descent of god. Flowers are thus to be sprinkled (scattered) over the ground. The ground shall be dug uttering the Varāhamantra[53] facing the east. With a spade spinkled with water (sanctified) by the Astramantra and adored with flowers, the soft mud shall be taken in a metallic vessel or one made of cane, as he (priest) desires. It is to be tied with a fresh cloth uttering the Mūlamantra.

52. Bhūsūkta *T.S.* I.5.3.1.

53. Varāhamantra: *Oṃ yajñāṅgadehāya mahāvarāhāya purāṇapuruṣāya prajāpataye namaḥ* (commentary on *ĪS*).

Oṃ namo bhagavate mahāvarāhāya ekādaṃṣṭrāya megholkāya meghavarṇāya chandomayāya brahmamayāya namo'stu te

खनित्रेण खनेद् भूमिं प्राङ्मुखः क्रोडमन्त्रतः ।
लोहजे भाजने मृत्स्नां वेत्रजे वा यथारुचि ॥ १३३ ॥

क्रोडमन्त्रः तः वराहमन्त्रेण, स च वक्ष्यमाणो ज्ञेयः – 'ॐ यज्ञाङ्गदेहाय महावराहाय पुराणपुरुषाय प्रजापतये नमः' इति ।

गृहीत्वा मूलमन्त्रेण वेष्टयित्वा च वाससा ।
प्रत्यग्रेण तथा नद्या वालुकां गोमयं तथा ॥ १३४ ॥
गोकुलात् पूर्ववत् पात्रे गृहीत्वाऽऽच्छाद्य वाससा ।
यानादिके समारोप्य यद्वा दीक्षितमूर्धनि ॥ १३५ ॥
गत्वा प्रदक्षिणं ग्रामं प्रविशेन्मण्डपं ततः ।

[पालिकादिस्थापनाय कोष्ठसिद्धये सूत्रास्फालने पक्षाः]

मण्डपं शोधयित्वा तु यथोक्तविधिना द्विजाः ॥ १३६ ॥
ततो मण्डपमध्ये तु सूत्राण्यास्फालयेत् क्रमात् ।
प्रागायतानि प्रथमं क्रमात् सप्तदश क्षिपेत् ॥ १३७ ॥
उदगायत सूत्राणि चतुर्दश निपातयेत् ।
सूत्रात् सूत्रादन्तरालं षोडशाङ्गुलसंमितम् ॥ १३८ ॥
त्रयाधिकदशैव स्युः पूर्वपश्चिमपङ्क्तयः ।
एवं षोडशसङ्ख्याता दक्षिणोत्तरपङ्क्तयः ॥ १३९ ॥
बीजपात्रप्रतिष्ठार्थं पूर्वपश्चिमपङ्क्तिषु ।
मध्ये पङ्क्तित्रयं स्थाप्य वीथ्यर्थं द्वितयं मृजेत् ॥ १४० ॥
भूयश्च पङ्क्तित्रितयं स्थापयेत् पार्श्वयोर्द्वयोः ।
दक्षिणोत्तरमध्ये तु स्थाप्य पङ्क्तिचतुष्टयम् ॥ १४१ ॥
द्वितयं द्वितयं पार्श्वे वीध्यर्थं विमृजेत् पुनः ।
चतुश्चतुश्च पङ्क्तीनां स्थापयेत् क्रमयोगतः ॥ १४२ ॥
आशास्वष्टासु मध्ये च शरावघटपालिकाः ।
द्वादश द्वादश स्थाप्याः शतमष्टोत्तरं भवेत् ॥ १४३ ॥
आग्नेये दक्षिणे भागे नैर्ऋतेऽपि च पालिकाः ।
घटिका वारुणे ब्राह्मे तथा पौरन्दरेऽपि च ॥ १४४ ॥

Sand shall again be brought as before from the river and cowdung from cowpen, in a vessel and be covered with a cloth. They shall be placed on a vehicle or the head of an initiated person. He shall circumambulate the village with it and enter the pavilion.

(Alternate views on the movement of the strings to have columns for placing the Pālikās and others)

136b-159. O brahmins! clean the pavilion according to the rules laid down for it. More than the threads (for drawing of the lines) in due order, in the central portion of the pavilion. Seventeen lines[54] are to be drawn at first lengthwise facing the east and fourteen facing the north. The space between one line and another shall be sixteen inches. The rows between the east and west shall be thirteen, those between south and north be sixteen. Three rows are to be made in the rows running east to west for placing the vessel of grains. Two (of them) shall be cleared for (laying down) the pathway. Three rows shall again be made on both sides. Four rows are to be made between the south and north. Again, a group of two shall be had twice as one side for pathway. Two rows of four each are to be laid down in due order. *Śarāva, ghaṭa* and *pālikās* are to be placed in the midst of the eight directions. Two dozens shall be placed making one hundred and eight. The

54. *sūtrāṇi*: strings in the context, this word means lines to be drawn with the help of the strings.

पालिकादिस्थापनार्थं कोष्ठसिद्ध्यै सूत्रास्फालनक्रममाह — **मण्डपं शोधयित्वा** इत्यादिभिः ।

शरावा मारुते सौम्ये त्वीशाने च यथाविधि ।
प्रत्येकं पालिकादीनां षोडशत्वेन कल्पने ॥ १४५ ॥
दक्षिणोत्तरगं सूत्रपञ्चकं विनिवेशयेत् ।
प्रागायतानि सूत्राणि पूर्ववद् विनिवेशयेत् ॥ १४६ ॥
आचरेत् पूर्ववद् विप्राः प्राक्प्रत्यक्पङ्क्ति कल्पनम् ।
तत्र दक्षिणतः पङ्क्तिचतुष्के स्थापयेत् क्रमात् ॥ १४७ ॥
पालिकाः षोडश पुरो मध्ये पङ्क्तिचतुष्टये ।
घटिकाः षोडश न्यस्य उत्तरे विनिवेशयेत् ॥ १४८ ॥
शरावानपि तत्संख्यानथ द्वादशकल्पने ।
दक्षिणोत्तरसूत्राणि चत्वार्यत्र विनिक्षिपेत् ॥ १४९ ॥
पूर्वापराणि सूत्राणि पूर्ववद् विनिपातयेत् ।
अष्टाधिकानि कोष्ठानि चत्वारिंशद्भवन्ति हि ॥ १५० ॥
याम्ये द्वादशकोष्ठानि स्थापयित्वा ततो मृजेत् ।
वीथ्यर्थं भागषट्कं तु मध्यतः स्थापयेत् ततः ॥ १५१ ॥
भागद्वादशकं पश्चाद् भागषट्कं विलोपयेत् ।
भूयश्चोत्तरदिक्स्थाप्यं कोष्ठद्वादशकं क्रमात् ॥ १५२ ॥
न्यसेत् तु पालिकादीनि भागद्वादशकत्रये ।
आग्नेयादीशपर्यन्तं दक्षिणाशादितः क्रमात् ॥ १५३ ॥
प्रत्येकं पालिकादीनामष्टसंख्याप्रकल्पने ।
दक्षिणोत्तरसूत्राणि त्रीण्येवं तु नियोजयेत्[१६] ॥ १५४ ॥
अन्यत्सर्वं भवेत् प्राग्वदथ प्रति चतुष्टये ।
दक्षिणोत्तरगं सूत्रत्रितयं विनिपातयेत् ॥ १५५ ॥
पूर्वपश्चिमसूत्राणि ह्येकादश विनिक्षिपेत् ।
सर्वार्थे पालिकानां तु षोडशानां परिग्रहे ॥ १५६ ॥

१६. त्रितयं तु निपातयेत् – B, E

pālikās are to be placed in south-east, south and south-west. The *ghaṭikās* in the west, Brāhma[55] and east and śarāvas in the north-west, north and north-east according to rule. The śarāvas are to be placed duly in the north-west, north and north-east according to rule. The *śarāvas* are to be placed duly in the north-west, north and north-east. If the *pālikās* and others are to be sixteen for each, five strings (lines) are to be drawn from south to north. The lines are to be drawn as before extended to the east, o brahmins! the rows from east to west are to be drawn as before. (The *pālikās*) are placed in the order in the four rows (drawn) from the south. Sixteen *pālikās* are to be placed in the midst of four rows. After placing sixteen *ghaṭikās*, the *śarāvas* also of that number are to be placed in the north. If twelve are to be arranged, four lines are to be drawn from the south to the north. The lines from the east to west are to be drawn as before. The columns, which are more by eight become forty. Placing twelve columns in the south, they are to be cleared. Six parts are to be placed in the middle of four pathways. Twelve parts are then to be made and six are to be left out. Twelve columns are to be placed again in due order in the northern quarter. *Pālikā* and others are to be placed in the three parts having twelve divisions in due order from south-east to north-east directions starting from the southern quarter. When eight is the number for each *pālikā*, only three lines are to be drawn from the south to the north. All others shall be as before. Then three lines are to be drawn from south to the north for each group of four. Eleven lines are to be drawn from east to west. When sixteen *pālikās* are taken for all things, five lines are to be drawn in the south, and likewise the same in the east. Five lines are to be drawn from the eastern lines and eight from the three *sūtras* in the south. When twenty-four *pālikās* are taken up, seven and five are to be drawn from

55. Brahmā: centre, middle, portion;
vide: *LT.* XXX VII. 4; fig. 3 & 4. PP. 17 & 18: *Mayamata*: Translation by B. Dagens.

पञ्च दक्षिणसूत्राणि प्राक्सूत्राणि तथा क्षिपेत् ।
प्राक्सूत्रात् पञ्च चाष्टानां दक्षसूत्रत्रयं क्षिपेत् ॥ १५७ ॥
चतुर्विंशतिसङ्ख्यानां पालिकानां परिग्रहे ।
पूर्वदक्षिणसूत्राणां सप्तकं पञ्चकं क्षिपेत् ॥ १५८ ॥
चतुःपरिग्रहे सूत्रं त्रितयं त्रितयं क्षिपेत् ।
पूर्ववत् सूत्रपातः स्यादाद्यसङ्ख्यासु पञ्चसु ॥ १५९ ॥

[धान्यपीठकल्पनम्]

एवमास्फाल्य सूत्राणि विभवेच्छानुसारतः ।
पदेषु पालिकादीनां शालिभिर्व्रीहिभिस्तथा ॥ १६० ॥
आढकादिमितैः प्रागवदुत्तमादिव्यपेक्षया ।
वृत्तं वा चतुरश्रं[१७] वा कल्पयेत् पीठिकां क्रमात् ॥ १६१ ॥

[पालिकाद्यलङ्कारादिः]

पालिकादीनि पात्राणि क्षालयेन्मूलमन्त्रतः ।
सहदेवीं च दूर्वां च सार्धमश्वत्थपल्लवैः ॥ १६२ ॥
शिरीषपल्लवैश्चापि निशापत्रैस्तथैव च ।
कण्ठेषु पालिकादीनां बन्धयेत् तदनन्तरम् ॥ १६३ ॥
कुशकाशतृणैस्तेषां बिलमूलानि पूरयेत् ।
बिलानि प्रथमं मृद्भिर्वालुकाभिरनन्तरम् ॥ १६४ ॥
करीषचूर्णैरुपरि समृद्धं पूरयेद् बिलम् ।
यद्वा मृदादिकं विप्राः सर्वं संमिश्र्य पूरयेत् ॥ १६५ ॥
कोष्ठेषु विन्यसेत् तानि पालिकादीन्यनुक्रमात् ।

धान्यपीठकल्पनमाह — **एवम्** इति द्वाभ्याम् ।

पालिकाद्यलङ्करणमाह — **पालिकादीनि** इति चतुर्भिः ।

१७. वृत्तां वा चतुरश्राम् - A

the east and southers lines. When four are taken up, three groups are to be drawn twice. The drawing of the lines shall be as before on the first five numbers.

(Arranging a pedestal made of grains)

160-161. Laying down the lines thus, according to the availability of funds and personal liking, a small pedestal shall be arranged in the places of *pālikā* and others with fine rice, grains (Vrīhi)[56] to the measurement of *āḍhakas*[57] as before, as belonging to the best and other kinds. It (pedestal) could be circular or quadrangular in shape.

(Decoration of Pālikā and others)

162-166a. *Pālikā* and others vessels are to be washed[58] with the Mūlamantra. The necks of the pālikās and others are to have the shoots of Aśvattha, Sahadevī,[59] Dūrvā, Śirīṣa and leaves of turmeric tied to them. Their (pālikās') hollows are to be filled with *darbha*, seeds and grass. They are to be filled then at first with mud and then sand. The cavity should be completely filled above (these) with the powder of charcoal. Or, O brahmins! all the mud and others are to be mixed and be used to fill it. Those pālikās shall be placed in their order on the columns.

56. Vrīhi: a general name for grains.
57. *Āḍhaka:* a measure of grain: 1/4 *droṇa.*
58. washing: a Tāntrika concept that an object could be held to become clean by the utterance of a mantra.
59. Sahadevī: a cluster of the sprouts of many plants.
See note under II.38.

[पालिकादिविन्यासक्रमः]

आग्नेयादीशपर्यन्तं प्रतिस्कन्धं द्विजोत्तमाः ॥ १६६ ॥
द्वादशानां तु नवकमष्टोत्तरशतं न्यसेत् ।
ब्रह्मादीशानपर्यन्तमुदितक्रमयोगतः ॥ १६७ ॥

[सोमकुम्भस्थापनम्]

तेषां तु पश्चिमे स्थाने धान्यराशौ सलक्षणम् ।
विन्यसेत् सोमकुम्भं तु वेष्टितं नववाससा ॥ १६८ ॥
गन्धसर्वौषधिरत्नकूर्चपल्लवसंयुतम् ।

[मन्त्रन्यासः अर्घ्यादिपरिकल्पनम्, द्वारपालाद्यर्चनं पुण्याहवाचनमित्यादि]

एवं सर्वं समापाद्य दीक्षितैः परिचारकैः ॥ १६९ ॥
तत्तत्सर्वं समापाद्य यद्यत्प्रागनुपार्जितम् ।
समारभेत् ततः कर्म देशिकः प्राङ्मुखः पदे ॥ १७० ॥
पश्चिमे घटिकास्थानादुपविश्यासने शुभे ।
न्यासमुद्दीप्य विधिना प्रोक्षणार्घ्यं प्रकल्पयेत् ॥ १७१ ॥
देहविन्यस्तमन्त्राणां कुर्यादर्घ्यादिनार्चनम् ।
द्वारपालार्चनं कृत्वा विभवेच्छानुरूपतः ॥ १७२ ॥
तोरणानि ध्वजांश्चैव द्वारकुम्भांश्च पूजयेत् ।
पुण्याहं वाचयित्वा तु पूर्वोक्तविधिना गुरुः ॥ १७३ ॥

पालिकादिविन्यासक्रममाह — **आग्नेयादीशपर्यन्तम्** इति । एकैकस्मिन् द्वादशके प्रतिकोष्ठमेकैकस्य न्यासक्रमः । ब्रह्मादीशानपर्यन्तमिति द्वादशकानां न्यासक्रमः । आग्नेयादीशपर्यन्तन्यासक्रमस्तु पूर्वमाग्नेयादिनैर्ऋतान्तकोष्ठचतुष्टयेऽनन्तरं वारुणादिपूर्वान्तकोष्ठचतुष्टये, पश्चाद्वायव्यमारभ्येशानान्तकोष्ठचतुष्टये द्वादशपालिकान्यासः । एवमत्र सर्वत्र ज्ञेयम् ।

अथ सोमकुम्भस्थापनमाह — **तेषाम्** इति सार्धेन ।

अथ मन्त्रन्यासार्घ्यादिपरिकल्पनद्वारदेवार्चनपुण्याहवाचनादिकमाह— **एवं सर्वं समापाद्य** इत्यादिभिः ।

[पालिकाद्यधिदेवतार्चनम्]

यजेदर्घ्यादिभिः पश्चात् पालिकाद्यधिदेवताः ।
अब्जनाभं[१८] परं चैव पद्मनाभं ध्रुवं तथा ॥ १७४ ॥
पात्रस्कन्धत्रिके विप्राः क्रमेण परिपूजयेत् ।

१८. अज्ञनाभम् - A

(Method of placing the pālikās)

166b-167. O brahmins! the hundred-eight, nine in each of twelve (pālikās) are to be placed in each division from the south-east to north-east and in the order of their rise from Brahma[60] to north-east.

(Placing of Somakumbha)

168-169a. Somakumbha,[61] with good features wrapped in a new cloth and having sandal-paste, all medicinal herbs, gems, *kūrca* and sprouts, is to be placed on the heap of grains in the western part of the pālikās.

(Mantranyāsa, arrangement for arghya and others, worship of the guardians at the gates and Puṇyāhavācana and others)

169b-173. Having procured all this with the help of the initiated and attendants and procuring all that not procured before, the priest shall begin the work, facing the eastern direction. He shall sit in an auspicious seat at the place west of ghaṭikās. He shall do *nyāsa* and got the *arghya* ready for sprinkling. The mantras, placed in his body, shall be worshipped with *arghya* and others. After worshipping the guardians and others at the entrance according to the available funds and (personal) desire, the arches, flags and pitchers at the entrances are to be worshipped. The priest shall recite *puṇyāha*, according to the rule stated above.

(Worship of the deities presiding over the pālikās)

174-175a. Later, the deities presiding over the pālikās are to be worshipped with *arghya* and others. O brahmins! Abjanābha,[62] the great Padmanabha and Dhruva are to be worshipped in this order in the three groups of vessels.

60. Brahma: see under 55.
61. Somakumbha: a pitcher placed on honour of *soma*-moon whose grace is required for the growth of the grains.
62. *Abjanābhaṃ param padmanābham dhruvam, ibid.* 22
Abjanābha *para* is Padmanābha the cause of the world. The commentator identifies him with Viśākhayūpa, cf. *SS.* XII.3. The other Padmanābha represents the effect. This is like Paravāsudeva and Vyūhavāsudeva.

पालिकाघटिकाशरावाख्यपात्राणां समूहत्रयेऽधिदेवतात्रयमाह — **यजेत्** इति सार्धेन । 'अब्जनाभं प चैव पद्मनाभं ध्रुवं तथा' इत्यत्र परोऽब्जनाभ: कारणभूतपद्मनाभ:, स तु विशाखयूप एव । अन्य: पद्मनाभस् तत्कार्यभूत: । परवासुदेववासुदेवयोर्भेदवत् । 'विशाखयूपो भगवान् स्वयं विश्वसिसृक्षया' इत्यारभ्य 'वैभवीयस्य यूथस्य पतित्वेनावतिष्ठते' इति ।

''आप्तकाम: स भगवान् स्वव्यापारवशेन तु । स्वां शक्तिमवलम्ब्यास्ते पद्मनाभात्मना पुन: ॥'' (स सं. ९.९७-९७ १/२)

इति च सात्वतोक्तत्वात् । परपद्मनाभकेवलपद्मनाभयो: भेदोऽपि स्फुट एव । पारमेश्वरव्याख्यानेऽप्येव-मेवोक्तम् । किन्तु 'अब्जनाभ:' इत्यत्र 'अञ्जनाभ:' इत्येव पाठ: । स तु विशाखयूपस्यापरपर्याय: ''एतदेवाञ्जनाभस्य'' इति सात्वतोक्तत्वादित्युक्तम्, तदसङ्गततमम् । तथहि सात्वतेऽपि ''एतदेवाब्जनाभस्य'' (सा सं. ९.६७) इत्येव पाठ: । तत्राब्जेत्यत्र बकारे ञकारभ्रान्त्या तथोक्तं व्याख्यात्रा । तथ भ्रान्तिमूलकस्याबद्धपाठस्य याथार्थ्येऽपि न साधकं स्वपक्षस्य सात्वते —

''विद्धि सर्वेश्वरस्येदं बीजं निर्बीजकारणम् । एतदेवाब्जनाभस्य विसर्गसहितं स्मृतम् ॥'' (सा सं ९.६७-६७ १/२)

इत्यत्र 'इदं बीजम्' पूर्वोक्त 'नम्' इति बीजं सर्वेश्वरस्य विशाखयूपस्येति विद्धि । एतदेव नकारात्मवं बीजमेव विसर्गसहितं चेत्; अब्जनाभस्य पद्मनाभस्य बीजं भवतीत्यर्थ: । एवं च 'अब्जनाभ:' इति 'अञ्जनाभ:' इति वा पाठस्य पद्मनाभापरपर्यायत्वमेव सिद्धम्; न तु विशाखयूपपर्यायत्वम् । एतत्सर्वमनालोच वृथा पाण्डित्यं दर्शितं व्याख्यात्रा ।

[अधिदेवता:]

पालिकानां द्वादशके वह्न्यादीशानपश्चिमम् ॥ १७५ ॥
अनन्तादिद्वादशकं घटिकाद्वादशे तत: ।
कूर्मादिकं द्वादशकं शरावाणां तु द्वादशे ॥ १७६ ॥
द्विषट्कमेकशृङ्गाद्यं क्रमेण परिपूजयेत् ।
प्रत्येकं पालिकादीनां कृते षोडशकल्पने ॥ १७७ ॥
अनन्ताद्यं च षट्त्रिंशत्पातालशयनान्तिमम् ।
लक्ष्म्यादिमतिपर्यन्तं शक्तिद्वादशकं यजेत् ॥ १७८ ॥
प्रत्येकं पालिकादीनां षट्त्रिंशत्परिकल्पने ।
चतुष्टयं तु मूर्तीनां स्वप्नाख्यपदसंस्थितम् ॥ १७९ ॥
प्रभवाप्यययोगेन जाग्रद्रूपं तथाऽष्टकम् ।
मूर्त्यन्तर[१९]द्वादशकं तच्छक्तीनां चतुस्त्रयम् ॥ १८० ॥

१९. मूर्त्यन्तराणाम् - B, D, E

(Presiding deities)

175b-185a. Agni to Īśāna are the deities for the twelve pālikās, twelve deities beginning from Ananta[63] in the twelve ghaṭikās, twelve from Kūrma[64] in the twelve śarāvas and twelve deities from Ekaśṛṅga[65] are to be worshipped in their order. When sixteen pālikās taken for each, the deities are thirty-six beginning with Ananta and ending with Pātālaśayana. Worship is to be done to twelve powers[66] beginning from Lakṣmī and ending with Mati. While making thirty-six pālikās for each, four are settled for the idols in the state called dream. The form of the walking state becomes eight through rise and dissolution. Twelve other idols have twelve powers (belonging to them),[67] thirty-six deities beginning from Ananta and ending with Pātālaśayana[68] then thirty-four powers beginning from Svadhā.[69] The discus and conch

63. See, *ibid.* 22.
64. *ibid.*
65. *ibid.*
66. *SS.* IX.85.
67. *ibid.*
68. See under 22.
69. Vide: स्वधाविद्याणिमा माया मूर्तिर्ह्रीश्रीः कलाद्युतिः ।
निष्ठा ऋज्वी रुचिश्श्रेष्ठा शोभा शुद्धिर्विभूत्यतः ॥
वृत्तिर्व्याप्तिर्गतिस्सुप्तिर्भागा वागीश्वरीरतिः ।
सिद्धिर्नतिः प्लुतिः क्रीडा संपत् कीर्तिशिखा मतिः ॥
गायत्री चापि मर्यादा सृष्टिश्चेत्यब्जसंभव ॥ *Paus.* XXI.3-5a.

अनन्ताद्यं च षट्त्रिंशत्पातालशयनान्तिमम् ।
स्वधादीनां च शक्तीनां चतुस्त्रिंशच्च तत्परम् ॥ १८१ ॥
चक्रशङ्खौ क्रमाद् भोगैरर्घ्यगन्धादिभिर्यजेत् ।
अष्टके केशवाद्यांश्च तदीयाः शक्तयो यजेत् ॥ १८२ ॥
चतुष्के केशवाद्यांस्तु केवलान् द्वादशार्चयेत्[२०] ।
सर्वार्थं पालिकानां तु क्रमाच्छोडशके यजेत् ॥ १८३ ॥
वासुदेवादिचतुरः केशवादींश्च द्वादश ।
अष्टके वासुदेवादीन् प्रभवाप्ययोगतः ॥ १८४ ॥
चतुष्के वासुदेवादीन् प्रभवानुक्रमेण तु ।

अथ तत्तत्पक्षभेदानुसारेण प्रत्येकं पालिकाद्यधिदेवताक्रममाह — **पालिकानाम्** इत्यादिभिः । लक्ष्म्यादिमतिपर्यन्तं शक्तिद्वादशकं सात्वते विभवदेवार्चनप्रकरणे उक्तम् -

''लक्ष्मीः पुष्टिर्दया निद्रा क्षमा कान्तिः सरस्वती । धृतिर्मैत्री रतिस्तुष्टिर्मतिश्च द्वादश स्मृताः ॥'' (सा सं. ९.८५) इति । स्वधादिचतुस्त्रिंशच्छक्तयस्तु पौष्करोक्ता — (२९.३.५) ''स्वधा च विद्या रम्या च माया मूर्तिश्च ह्रीस्तथा । श्रीः कलापी च विद्युच्च निष्ठा ऋक् च रुचिस्तथा ॥ इष्टा शोभा च शुद्धिश्च विभूतिर्भूतिरेव च । व्याप्तिर्गतिश्च सुप्तीश्च भागा वागीश्वरी रतिः ॥ सिद्धिर्नीतिः प्लुतिः क्रीडा सम्पत्कीर्तिः शिखा मतिः । गायत्री चापि मर्यादा हृष्टिश्च'' इति ।

[सोमकुम्भार्चनम्]

एवमिष्ट्वा ततः सोमकुम्भपूजां समाचरेत् ॥ १८५ ॥
कुम्भे सोमात्मकं देवं करके च सुदर्शनम् ।
अष्टदिक्षु च विन्यस्तकुम्भेष्विन्द्रादिकान्यजेत् ॥ १८६ ॥

[बीजानां पयसा क्षालनम्, पूजनम्, वासोपवेष्टनम्, घृतारोपणं च]

एवं कुम्भार्चनं कृत्वा बीजक्षालनमाचरेत् ।
गव्येन पयसा सम्यङ्मूलमन्त्रेण वै द्विजाः ॥ १८७ ॥

२०. द्वादशे यजेत् - B, D, E

shall be worshipped with enjoyable services like *arghya*, sandal-paste and others, Keśava and others and their powers[70] in the eight and they twelve alone in the *catuṣka*. The pālikās are to be worshipped in the sixteen for the sake of all. The four beginning with Vāsudeva, twelve beginning with Keśava and others are to be worshipped in the group of eight in their rise and dissolution and Vāsudeva and others in the *catuṣka* in the order of their rise.

(Worship of Somakumbha)

185b-186. After worshipping thus, worship is to be done to Somakumbha. The Lord in the form of Soma shall be worshipped in the pitcher, Sudarśana in the karaka, and Indra and others in the pitchers placed in the eight directions.

(The grains to be washed with milk, their worship, wrapping them with the cloth and smearing them with ghee)

187-195. After worshipping the pitcher, the seeds are to be washed well with cow's milk uttering Mūlamantra, O brahmins! with the names of the

70. *LT.* XX.35-36

बीजानां नामधेयैस्तु चतुर्थ्यन्तैः पृथक् पृथक् ।
अर्घ्याद्यैः पूजयित्वा तु वाससा परिवेष्ट्य च ॥ १८८ ॥
कुण्डे वा स्थण्डिले वाऽग्निं प्रतिष्ठाप्य यथाविधि ।
कृत्वा सन्तर्पणं चाग्नेस्तस्मिन् मन्त्रासनादिकम् ॥ १८९ ॥
परिकल्प्य च तन्मध्ये देवमावाह्य पूर्ववत् ।
सन्निधानादिकं सर्वं प्राग्वदेव समाचरेत् ॥ १९० ॥
समिद्भिश्चैव नित्याभिः काम्यैश्च जुहुयात् ततः ।
पालिकाद्यधिदेवानां मन्त्रैश्चापि यथाक्रमम् ॥ १९१ ॥
अष्टौ चतुः सकृद् वापि हुनेदाज्येन वै द्विजाः ।
हुत्वा सोमादिमन्त्रैश्च सम्पाताज्यं समाहरेत् ॥ १९२ ॥

अथ सोमकुम्भार्चनबीजक्षालनतदर्चनाग्निसन्तर्पणघृतारोपणबीजावापबलिदानाचार्यादिसम्मान पालिकादि-संरक्षणप्रायश्चित्तहोमप्रतिदिनकर्तव्यक्रमाङ्कुरशुभाशुभलक्षणादीन्याह — **एवमिष्ट्वा** इत्यारभ्य 'रात्रिशेषं समापयेत्' इत्यन्तैः । भूतक्रूरबलिर्नाम नारदीयोक्तो ज्ञेयः —

"निशाचूर्णं तु पललं सलाजं दधिसक्तुभिः । भूतक्रूरमिति प्रोक्तं तेषां तेन बलिं हरेत् ॥" इति । पललं नाम पाद्मोक्तं ज्ञेयम् - "पुटदग्धतिलानिक्षुरसपाकपरिप्लुतान् । मरीचिजीरकैर्युक्तान् पललं परिचक्षते ॥" इति ।

हुतावशिष्टमाज्यं तु तदन्यं वाऽपि संस्कृतम् ।
आदाय लोहजे पात्रे मृन्मये वा यथारुचि ॥ १९३ ॥
उभाभ्यां चैव हस्ताभ्यां दूर्वामादाय मूलतः ।
घृते निमज्य चाग्राणि पालिकादिषु सेचयेत् ॥ १९४ ॥
हस्तव्यत्यासमार्गेण वह्न्यादीशानपश्चिमम् ।
प्रतिस्कन्धं घृतारोपे दूर्वाभेदः प्रकीर्तितः ॥ १९५ ॥

[बीजावापक्रमः]

एवं कृत्वा घृतारोपं भूयः स्कन्धाधिदेवताः ।
प्रपूज्य सर्वबीजानि मन्त्रयेन्मूलमन्त्रतः ॥ १९६ ॥

grain used separately in the dative case. After worshipping them with *arghya* and others and wrapping them with cloth, fire is to be duly installed in the fire-pit or ground. After pleasing the fire, arrangements are to be made for Mantrāsana and others there (fire) and the deity must be invoked in its midst as before and preserved and all matters about it must be attended to as before. *Homa* is to be done then with the obligatory and desirable faggots[71] using the mantras of the presiding deities of the pālikās in due order. O brahmins! *homa* is to be done with ghee eight times, four times or once and with the mantras[72] of Soma and others the ghee for Sampāta[73] Homa is to be collected. Ghee, remaining after the offerings are made with it or any other that has been sanctified, is to be taken in a metallic or mud vessel according to one's taste. The *dūrvā* grass are to be taken at its root using both the hands and be dipped in ghee, their tips (with ghee flowing) are to be sprinkled in the *pālikā* and others. While smearing every division with ghee by changing the hands from south-east to north-east, different *dūrvās* are to be used.

(Order in sowing the seed)

196-206a. Having smeared (them) with the ghee, the deities at the divisions are again to be worshipped. All the grains are to be sanctified in the *pālikā* and others at an auspicious *muhūrta* with Mūlamantra and are to be

71. There is no classification of the *samits* as obligatory and Kāmya. Probably, some of them are kept at cut to serve such purposes like Nitya and Kāmya.
72. Vide: *Pād. S. caryā.* XXX.197.
73. Sampātahoma: *LT.* XL1.19-26.

आचार्यादीननुज्ञाप्य देशिकेन्द्र उदङ्मुखः ।
प्राङ्मुखो वा मुहूर्ते तु शोभने पालिकादिषु ॥ १९७ ॥
अष्टाक्षरेण मन्त्रेण सर्वबीजानि वापयेत् ।
यद्वा जितन्तामन्त्रेण ह्युभयेनाथ वा द्विजाः ॥ १९८ ॥
आग्नेयादीशपर्यन्तं प्रतिस्कन्धं क्रमेण तु ।
शङ्खदुन्दुभिनिर्घोषजयनादसमन्वितम् ॥ १९९ ॥
बीजानि द्वादशोक्तानि वपेद् द्वादशसु क्रमात् ।
यद्वा सर्वाणि संमिश्र्य वपेदिच्छानुसारतः ॥ २०० ॥
बीजानामप्यलाभे तु मुद्गमेकं तु वा वपेत् ।
आचार्यानुगताश्चान्ये देशिकाः साधका अपि ॥ २०१ ॥
वपेयुर्ध्यानसंयुक्ताः केवलं गुरुरेव वा ।
हरिद्राचूर्णसंमिश्रैर्जलैः कुसुमवासितैः ॥ २०२ ॥
बहुभिः सेचयेद् विप्राः देशिकेन्द्रः क्रमेण तु ।
प्रतिस्कन्धोपरिष्टात् तु चन्द्रमण्डलमध्यगम् ॥ २०३ ॥
तत्कान्तिसन्निभं देवं स्वदेहोत्थैर्निरन्तरैः ।
सिञ्चन्तममृतोघैस्तु बीजान्युप्तानि सर्वतः ॥ २०४ ॥
ध्यात्वाऽर्चयित्वा पात्राणि नवैस्तु सदशैः शुभैः ।
आच्छादयित्वा वसनैः प्रतिस्कन्धं क्रमेण तु ॥ २०५ ॥
वासुदेवं जगद्योनिं सर्वेषामूर्ध्वतो यजेत् ।

[भूतक्रूरबलिः प्रयोजनं च]

भूतक्रूरबलिं दद्यादष्टदिक्षु द्विजोत्तमाः ॥ २०६ ॥
भूतानां कुमुदादीनां पूर्वादिक्रमयोगतः ।
तदाप्रभृति ते सर्वे रक्षन्ति कुमुदादयः ॥ २०७ ॥

[आचार्यादीनां सम्मानं पालिकादिसंरक्षणं च]

आचार्यान् गुरुपूर्वांश्च साधकान् वैष्णवानपि ।
प्रभूतैस्तु तथोद्दिष्टैस्ताम्बूलैः सुमनफलैः ॥ २०८ ॥
गुरुं च तोषयेद् वित्तैर्यजमानः प्रयत्नवान् ।
क्रमादुद्धृत्य तान् सर्वान् सुगुप्ते स्थापयेत् ततः ॥ २०९ ॥

sown with Aṣṭākṣaramantra by the eminent priest facing east or north. After getting permission from the preceptors. Or, O brahmins! Jitantāmantra or both shall be used. The twelve grains which have been stated are to be sown in due order in every division from south-east and north-east to the accompaniment of the sounds of conch, tabor, and cries of victory. Or, all (the grains) could be mixed up and sown according to one's liking. The beans (Mudga) alone could be sown, if (all) the grains are not available. Other priests following the chief priest and sādhakas also shall sow (them) with concentration (*dhyāna*) or the priest alone shall do it. O brahmins! the chief priest shall sprinkle them with much water mixed up with turmeric powder and scented with flowers. The priest shall meditate upon god as having gone to the middle of the moon's disc from above each division, god resembling its (moon's) splendour (meditating or thinking) as sprinkling the seeds sown on all sides with the flood of nectar. After worshipping god, the vessels shall be covered with auspicious and new garments having fringes in all the divisions in due order. Then Vāsudeva, the source of the world, shall be worshipped above all of them.

(Bhūtakrūra bali[74] and its purpose)

206b-207. O eminent brahmins! Bhūtakrūrabali shall be offered in the eight directions, for all the spirits Kumuda and others in the order from the east and others. All of them Kumuda and others protect (them) from that time.

(Honouring the preceptors and others and protection of the pālikās and others)

208-212a. The rich patron shall please the priest and preceptor after honouring the gurus, Sādhakas and Vaiṣṇavas with profuse Tāmbūla, flowers and fruits and wealth notified (in texts). Raising them all up, they

74. Bhūtakrūrabali: see below for its description: निशाचूर्णं तु पललं सलग्नं दधिसक्तुभिः । भूतक्रूरमिति प्रोक्तं तेषां तेन बलिं हरेत् ॥ cited in the commentary. cf. *SKS. Śiva.* IX. 22a; *VS.* XV. 45b.

मण्डपेशानकोणे वा देशेऽन्यत्र यथारुचि ।
तत्रापि पालिकादीनां परितोऽष्टासु दिक्षु च ॥ २१० ॥
भूतानां कुमुदादीनामैन्द्रादिक्रमयोगतः ।
बलिं तु मण्डपे दद्याद् भूतक्रूरविधानतः ॥ २११ ॥
दीपान् बहूननिर्वाणान् परितः परिदीपयेत् ।

[प्रायश्चित्तहोमः]

ऊनाधिक्योपशान्त्यर्थं शतमष्टोत्तरं हुनेत् ॥ २१२ ॥
पूर्णाहुत्यादिकं कृत्वा देशिकेन्द्रो यथाविधि ।
ततः[२१] कुण्डगतं देवं विसृज्य हृदयान्तरे ॥ २१३ ॥
चतुर्द्वाराधिदेवानां मन्त्रैश्चापि यथाक्रमम् ।
हुत्वाऽऽज्येन ततो वह्निं विसृजेत् तु यथाविधि ॥ २१४ ॥

[प्रतिदिनं कर्तव्यक्रमः]

परितः पालिकादीनां प्रतिरात्रं पृथक् पृथक् ।
दद्याद् दिवा रजन्यां वा बलिं कालद्वयेऽपि वा ॥ २१५ ॥
प्रातः कर्मदिने दद्याद् बलिं देशिकसत्तमः ।
यदा चोप्तानि बीजानि तदाप्रभृति नित्यशः ॥ २१६ ॥
न कश्चित् प्रविशेत् तत्र न स्पृशेद् वा कथञ्चन ।
आचार्य एव प्रविशेत् तच्छिष्यो वा समाहितः ॥ २१७ ॥
उच्छिष्टादीनि सर्वाणि दूरतः परिवर्जयेत् ।
अदत्त्वा तु बलिं काञ्चिन्न कुर्यात् पालिकाक्रियाम् ॥ २१८ ॥
हरिद्रावारिभिः सिञ्चेदङ्कुराण्यभिवृद्धये ।

[अङ्कुरेषु शुभाशुभलक्षणम्]

अङ्कुरान् श्यामलान् रक्तान् कृष्णांस्तिर्यग्गतांस्तथा ॥ २१९ ॥
अप्ररूढान् मुनिश्रेष्ठाः वर्जयेत् तु प्रयत्नतः ।
श्यामेषु द्रव्यनाशः स्याद् रक्तेषु कलहो भवेत् ॥ २२० ॥

२१. ततत् - B

shall be placed in a well secured place. *Bali* shall be offered in the pavilion, following the process for Bhūtakrūra in the north-east quarter of the pavilion or in some other place according to one's desire around to *pālikā* and others and all the eight directions to the spirits Kumuda and others in the order of the east and other (directions). Many lamps, not extinguishable, shall be lighted (made to glow) all round.

(Prāyaścittahoma)

212b-219a. *Homa* is to be done for one hundred times for mitigating the evils of shortcomings and excesses. After doing Pūrṇāhuti duly the chief priest shall let god who is in the fire-pit, within his heart and shall do *homa* with ghee to the deities presiding over the four entrances with mantras in the prescribed manner and gives end off to fire according to rule. *Bali* shall be offered every night or day or night or at two periods[75] around the *pālikā* and others separately. The best priest shall offer *bali* early in the morning on the day of work. No one shall enter there or touch them, at any time from that period, the seeds sown there. The priest or his pupil shall enter there with a composed mind. What all remains there after use shall be kept way at a distance. Nothing shall be done in the pālikās without offering *bali*. Turmeric water shall be sprinkled for the growth of the sprouts.

(Auspicious and inauspicious marks (notified) in the sprouts)

219b-222. O eminent sages! sprouts dark, red, black, horizontally grown and not well-grown shall be carefully avoided. There will be loss of wealth (or materials) when they are black, strife when red, mental ailment if they are black, disease (afflicting the people) if they grow horizontally and death when they are not well-grown. There is no doubt in this. The result will be auspicious, when (they are) yellow, white, upright, grown upwards — increase of all kinds of wealth will be for him (priest) who does this and for him (patron) who arranges for it.

75. *kāladvaya*: morning and evening.

कृष्णेषु मानसी पीडा रोगी तिर्यग्गतेषु च ।
अप्ररूढेषु मरणं भवेत् तत्र न संशयः ॥ २२१ ॥
शुभं पीतेषु शुक्लेषु ऋजुषूर्ध्वगतेष्वपि ।
सर्वसम्पत्समृद्धिश्च कर्तुः कारयितुर्भवेत् ॥ २२२ ॥

[प्रथमारम्भकस्यैव समाप्तिपर्यन्तता, पुत्रशिष्ययोरभ्यनुज्ञा च]

कर्मार्थमङ्कुराण्यादौ यः समारोपयेद् गुरुः ।
स एव कर्म कात्स्न्र्येन कुर्यात् प्राज्ञोऽपि नेतरः ॥ २२३ ॥
अनुज्ञया वा तत्पुत्रः शिष्यो वा तत् समाचरेत् ।
एवं सर्वेषु यागेषु चाङ्कुरारोपणं भवेत् ॥ २२४ ॥

[देशकालाद्यानुगुण्येनैवमङ्कुरार्पणस्यान्यत्रातिदेशः]

देशं कालं तथा वित्तं ज्ञात्वा स्वाधीनतां तथा ।
उक्तं सर्वं समभ्यूह्य कुर्यात् कर्म प्रधानकम् ॥ २२५ ॥
एवं कृत्वाङ्कुरारोपं गत्वा देवस्य सन्निधिम् ।
देवमर्घ्यादिनाभ्यर्च्य नैवेद्यान्तं यथाविधि ॥ २२६ ॥
अनिर्वाणं यथादीपं रात्रिशेषं समापयेत् ।

[ध्वजपटलक्षणं तन्मानादिकं च]

तदन्येद्युः प्रभातायां ध्वजार्थं पटमाहरेत् ॥ २२७ ॥
यथावित्तानुसारेण क्रीतं वाऽभिनवं शुभम् ।
दुकूलपट्टं देवाङ्गं चित्रक्षौममथापि वा ॥ २२८ ॥
अथ कार्पासकं वाऽपि नीलरोमादिवर्जितम् ।
सुलक्षणं दृढं स्निग्धं पटमानमिहोच्यते ॥ २२९ ॥
आयतं नवभिर्हस्तैः सप्तभिर्पञ्चभिस्तु वा ।
मूलबेरसमायामं द्वारायाममथापि वा ॥ २३० ॥
आयामार्धेन विस्तीर्णं पादेन कृतशेखरम् ।
शेखरेण समं पुच्छं तदर्धं कर्णपुच्छकम् ॥ २३१ ॥
बालाख्यध्वजवस्त्रं तु पटाख्यपरिसम्मितम् ।
विस्तारं पटतुल्यं तु पूर्ववच्छिखरं भवेत् ॥ २३२ ॥

(He (priest) who begins this shall continue till the end and permission is to be given for this to his son and his pupil)

223-224. That priest alone who attends to the growth of the sprouts for the work shall attend to the entire work and not any one else, though he may be learned. His son or pupil shall do it. Germination shall be done thus in all acts of worship.

(The act of germination is to be undertaken only in conformity with the place and time)

225-227a. The main work shall be done applying reason (to find out) the place, time, wealth (funds) and one's independent powers. After doing thus germination, the priest shall go near god (shrine), worship him with *arghya* and others, upto the offering of food preparations according to rule. He shall spend the remaining part of the night seeing that the lamps do not get extinguished.

(Features of the flag cloth and its measurements)

227b-232. Early in the next morning, he (priest) shall get the cloth for (making) the flag, purchased according to the availability of funds or a fresh and auspicious one or a piece of white silk[76] or Devāṅga[77] or silk with varieagated colour or cotton, free from blue fringes. The cloth shall have good marks, and should be firm and glossy. The measurements of the cloth is given now. It shall be long by nine *hastas* or seven or five or of the full length (height) of the Mūlabera or height of the entrance, half of its length in width and the head measuring a fourth of it (length) and the tail equal to the chest, the hair at the ears one eighth of it (length). The cloth of the flag is called Bāla[78] and is of the measurement of the cloth called Paṭa[79] and width like that of the cloth and head as before.

76. *dukūla*: white silk; *paṭṭa*: woven silk.
dukūlapaṭṭa: this must mean a piece of woven silk; *kṣauma* is linen; the lexicon makes *kṣauma*, *paṭṭa* and *dukūla* as meaning one and the same cloth,
vide: क्षौमपट्टे दुकूलेऽस्त्री ।
vide: Bhānujī's com. on *Amarakośa*. II.6.113b. It is hard to make out the real sense of each of these occurring in the same line 228b.

77. Devāṅga: a kind of cloth. 'Name of an emanation from Sadāśiva's body'.
M.M. Williams: Sanskrit-English Dictionary, P. 495. The commentator cites *Vaijayantī*:
क्षेत्रं पट्टाशुकं देवाङ्गम् ।

78. Bāla is the name given here for the cloth of the flag, appearing like the tail.

79. Paṭa is the cloth in which the figure is drawn.
vide: 'पटाश्चित्रपटे वस्त्रेस्त्री' Medinī cited by the commentator on *Amarakośa* II.6, 116a.

[पटे छत्रादिलेख्यानि]

निर्णेजितं खलीयुक्तं शोषितं लक्षणान्वितम् ।
पटं विचित्रयेद् विद्वान् शिल्पिना कुशलेन वै ॥ २३३ ॥

अथ ध्वजपटलक्षणं तन्मानादिकं चाह — **तदन्येद्युः** इत्यादिभिः । देवाङ्गं नाम पट्टवस्त्रभेदः । "नेत्रं पट्टांशुकं देवाङ्गम्" इति वैजयन्ती ।

पटे छत्रादिलेख्यान्याह — **निर्णेजितम्** इत्यादिभिः । निर्णेजितं प्रक्षालितम् । खलीयुक्तं लेपद्रव्य-विलिप्तम् ।

छत्रं शिखरे कुर्यात् पार्श्वयोः श्वेतचामरे ।
अधोऽनेकदलं पद्मं तदधः पूर्णकुम्भकं ॥ २३४ ॥
कुम्भस्य पार्श्वे विलिखेत् साङ्कुरं पालिकागणम् ।
दीपौ सुशोभनौ कुर्यात् पालिकानां तु पार्श्वयोः ॥ २३५ ॥

[एकमूर्त्यादिभेदेन गरुडादिध्वजभेदः]

ध्वजं तु गरुडाकारमेकमूर्तेस्तु सत्तमाः ।
सत्यः सुपर्णो गरुडस्ताक्ष्यश्च चतुरात्मनः ॥ २३६ ॥
पञ्चमूर्तेस्तु चत्वारो विहगेश्वरसंयुताः ।
सुपर्णतालमकरऋश्या[२२] वा चतुरात्मनः ॥ २३७ ॥
तत ऊर्ध्वं तु सर्वेषां व्यूहानां गरुडो ध्वजः ।

[गरुडलक्षणम्]

पटमध्ये तु गरुडं द्विभुजं विधृताञ्जलिम् ॥ २३८ ॥
पुष्पाञ्जलिपुटं वाऽथ सुवर्णा[२३] चलसन्निभम् ।
गगने गमनारम्भपक्षविक्षेपणान्वितम् ॥ २३९ ॥
कुञ्चितो वामपादस्तु दक्षिणः पृष्ठतः स्थितः ।
किञ्चिदायतवृत्ताक्षं नीलदीर्घाग्रनासिकम् ॥ २४० ॥
अतीव शान्तवेषं तु तथा प्रहसिताननम् ।
बालचन्द्रसमाकारं दंष्ट्राद्वयविराजितम् ॥ २४१ ॥

२२. ऋग्या – B, E
२३. सुपर्णा – B, E

(Drawings of umbrella and others on the cloth)

233-235. The priest (who is a learned person) shall take a cloth, well-washed,[80] smeared over with the deposit of oil,[81] dried up and possessing the (good) marks. The figures shall be drawn by a skilled artist. The umbrella shall be drawn at the head with white chowries on both sides, lotus with many petals below and pitcher filled with water beneath it. Groups of pālikās with sprouts are to be drawn on the side of the pitcher and two auspicious lamps on both the sides of the pālikās.

236-238a. O good man! the flag for a single form (of Garuḍa) shall be of the form of Garuḍa. Satya, Suparṇa, Garuḍa and Tārkṣya belong to him (Garuḍa) having four forms. The four mentioned here together with Vihageśvara belong to him having five forms. Or, Surparṇa,[82] Tāla,[83] Makara, Ṛśya[84] are the four to him (Garuḍa) with four forms. Above this, Garuḍa is the flag for all (these) divisions.

(Marks of Garuḍa)

238b-261. The figure of Garuḍa is to be drawn in the middle of the cloth (flag) as having two hands, with folded palms (in Añjalipose) or flowers in the *añjali* resembling a golden hill, tossing the wings indicating his impending move (upwards) in the sky, with the left foot bent and the right kept behind and with the eyes slightly long and round; with blue and long projecting nose; having a calm appearance; with face beaming with laugh-

80. *nirṇejita:* well-washed.
81. *khalīyuktam:* smeared with the deposit of oil.
82. *suparṇa:* beautiful leaf.
83. Tāla: palmyra tree, Makara: fish,
84. Ṛśya: white-footed antelope. These denote the figures to be drawn or painted in the cloth of the flag.

कुटिल[२४]भ्रुकुटीभङ्गं भङ्गुरालकशोभितम् ।
कम्बुग्रीवं बृहद्बाहुं पीनांसं[२५] दृढवक्षसम् ॥ २४२ ॥

एकमूर्त्यादिभेदेन गरुडादिध्वजभेदानाह — **एकमूर्तेः** इति सार्धद्वाभ्याम् ।
गरुडलक्षणमाह — **पटमध्ये तु गरुडम्** इत्यादिभिः ।

पृथूदरं निम्ननाभिं रोमराजिविराजितम् ।
सुवृत्तकनकस्तम्भपीवरोरुद्वयान्वितम् ॥ २४३ ॥
हेमरम्भासमाकारजङ्घाक्रान्तपदद्वयम् ।
करण्डमकुटाक्रान्तपुष्पापीडविराजितम् ॥ २४४ ॥
वृत्तवैपुल्यमानेन लोचने पद्मपत्रवत् ।
भ्रूयुग्मं नारसिंहोत्थं घ्राणाग्रं शुकतुण्डवत् ॥ २४५ ॥
सिंहवन्मध्यदेशस्तु तद्वंशं गजपृष्ठवत् ।
तदेवं दैवदीर्घेण विस्तृतं हंसपक्षवत् ॥ २४६ ॥
स्वपक्षमानाद् द्विगुणं तत्पुच्छं शतशाखिनम् ।
सर्वेषामेव सामान्यं विशेषाख्यमथोच्यते ॥ २४७ ॥
मकुटादिसपादान्तं नानारत्नेन शोभितम् ।
हारकेयूरकटकब्रह्मसूत्रविभूषितम् ॥ २४८ ॥
प्रलम्बकर्णपाशान्तविश्रान्तशुभकुण्डलम् ।
ललाटतिलकोपेतं पुष्पकर्णावतंसकम् ॥ २४९ ॥
रत्नाङ्गुलीयकोपेतं शिञ्जिनीरञ्जिताङ्घ्रिकम् ।
अन्यैराभरणैर्दिव्यैर्भूषितं सर्पभूषितम् ॥ २५० ॥
नीलाम्बरधरं नीलवारवाणविराजितम् ।
फुल्लरक्तोत्पलदलस्रग्भिर्मण्डितकन्धरम् ॥ २५१ ॥
तथा विचित्रकुसुम[२६]स्रग्भिरन्याभिरुज्ज्वलम् ।
अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ॥ २५२ ॥

२४. कुटिलम् - E
२५. पीवांसम् - A
२६. कुसुमैः - B, E

ter; the exterior (of the face) resembling the rising moon; shining with two prominent teeth; the curved eyebrows knit together; shining with curled (wavy) forelocks of hair; the neck resembling the conch; with huge arms and plumpy shoulder; strong chest; huge paunch; depressed navel (with) shining rows of hair; with two thighs plumpy like well-rounded golden pillars; the two feet pressed by the shanks of the form of golden plantains, (trees); with the flower ornament over-spreading the basket like crest, the two eyes resembling the lotus-petals round and long in measurement, the pair of eyebrows rising (as if) from Nārasiṃha's[84a] body; with a nose painted like that of a parrot, the middle part of the body resembling that of a lion; the back-bone like the back (hind part) of elephant broad (spread out) with divine length[85] like the wing of the swan; its tail twice in size in measurement to its wings having one hundred branches; these are common to all, now are stated the particular aspects. The body shines with different gems from the crown to the foot, bedecked with necklace, armlet, bracelet and sacred thread; the splendid ear-ring resting on the pendulous and beautiful ears.[86] The forehead with the ornamental mark; flowers[87] adorning the ears having gemset rings; feet beautified with twinkling rings; with other ornaments; adorned with serpents, wearing a blue-coat of-mail;[88] the neck decorated

84a. *Nārasiṃhottham bhrūyugmam:* The pair of eyebrows resembling these found in the face of Narasiṃha. This is to show that Garuḍa's face had eyebrows instilling terror in the enemies.

85. *daivadīrgheṇa:* divine length; wings are stated to be long; they are as long to fit in with the divine bird Garuḍa. Hence the length is stated to be divine.

86. *karṇapāśa:* beautiful ear; *pāśa:* a suffix denoting excellence.

87. *avataṃsaka:* ornament for the ear; also for the head. Vide: *Nāmaliṅgānuśāsana* III.3.227b.

88. *vāravāṇa:* cost of mail, armour; this is an incorrect form for *vārabāṇa,* that which keeps of the arrows from its weaver. vide: *Nāmaliṅgānuśāsana* III.8.63.

तक्षकः कटिसूत्रं तु हारः कार्कोटकस्तथा ।
पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः ॥ २५३ ॥
शङ्खः शिरःप्रदेशे तु गुलिकश्च भुजान्तरे ।
एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमैः ॥ २५४ ॥
अनन्तः शुक्लवर्णाभो रक्तवर्णस्तु वासुकिः ।
तक्षकः पीतवर्णाभो धूम्रः कार्कोटकस्था ॥ २५५ ॥
शङ्खस्तुहिनवर्णाभो गुलिकस्त्वलिसन्निभः ।
पद्मः पद्मसमानाभो महापद्मस्तु पिङ्गलः ॥ २५६ ॥
पञ्चवर्णैर्लिखेदेवं देवं पञ्चायुधं तथा ।
चक्रं शङ्खं शरं चैव शङ्खं शार्ङ्गं गदां तथा ॥ २५७ ॥
पटोर्ध्वे ह्युभये पार्श्वे विलिखेच्च यथाविधि ।
तदधो दक्षिणे पार्श्वे वह्निमण्डलमालिखेत् ॥ २५८ ॥
तद्वल्लिखेद् वामभागे स्वस्तिकं लक्षणान्वितम् ।
लेपयेत् पटशेषं तु श्यामलेनासितेन वा ॥ २५९ ॥
विचित्रपुष्पसंयुक्तपत्रवल्लीसमन्वितम् ।
एवं शिल्पिवरेणैव कारयेद् देशिकोत्तमः ॥ २६० ॥
शूद्रेण वा द्विजश्रेष्ठाः दीक्षितेन यथाविधि ।
कुलालेनाथवा मन्त्री कारयेत् कुशलेन च ॥ २६१ ॥

[गरुडध्वजाधिवासविधिः]

एवं सर्वं समापाद्य देशिकः सुसमाहितः ।
सायंकाले तु सम्प्राप्ते सहितो मूर्तिधारकैः ॥ २६२ ॥
कारुशालां प्रविश्याथ तोषयित्वा तु शिल्पिनम् ।
तत्पटं तु समादाय विन्यसेच्छिष्यमूर्धनि ॥ २६३ ॥
शङ्खदुन्दुभिनिर्घोषैः काहलध्वनिभिस्तथा ।
गीतैश्च विविधैरन्यैः श्रुतिघोषैः पृथग्विधैः ॥ २६४ ॥

अथ पटाहरणपूर्वकं गरुडाधिवासविधिमाह — **एवं सर्वं समापाद्य** इत्यारभ्य **कृत्वा गर्भगृहं व्रजेत्** इत्यन्तम् ।

with garlands (made) of petals of blossomed red lotuses; shining forth likewise with other garlands having varieagated flowers; having Ananta for the bracelet in the left (hand) (or charming bracelet); Vāsuki the sacred thread, Takṣaka the waist band, Kārkoṭaka the necklace; Padma treasure on the right ear, Mahāpadma on the left ear, Śaṅkha on the region of the head, Gulika in the chest (between the arms) and decorated by these primeval eight prominent serpants. Ananta is white in complexion, Vāsuki red, Takṣaka yellow, Kārkoṭaka grey, Śaṅkha of the colour of snow, Gulika resembling the bee, Padma of hue like that of lotuses, and Mahāpadma tawny. The five weapons, which are to be painted with five colours are discus, arrow, conch, bow (Śārṅga)[89] and mace are to be drawn only on both sides above the cloth (of the flag). A halo of fire is to be drawn beneath it on the right side and the *Svastika*[90] with marked features on the left. The remaining part of the cloth is to be painted with dark or black colour and beautified with creepers the leaves of which are to be painted with various colours. The eminent priest, who knows the mantra, shall have this done with the help of an artisan or Śūdra, O best brahmins! or an initiated person according to the rule or an efficient patter.

(Adhivāsa method for the Garuḍa flag)

262-304. After doing (bringing together) all this, the priest, who is well-composed, shall enter the hall of the artisan in the evening with those who carry the idols. After pleasing the artisan (with presents), he shall take that cloth (of the flag) and place it on the head of his pupil. The cloth shall be

89. Śārṅga: name of the bow of Viṣṇu; the word *śaṅkha* occurs twice, evidently a case of error.

90. *Svastika:* a mystical form consisting of four spokes crossing each other at right angles with short fragments of the periphery of the circle at the end of each spoke turning round in one direction.

Vide: M.M. Williams: Sanskrit-English Dictionary, P. 1283. This is the name of the *Maṇḍala* described in *Paus. S.* V.151 - 190.

सहध्वजपटं तस्मादानयेन्मुखमण्डपे ।
प्रविश्याभ्यन्तरं मूलबिम्बस्थं परमेश्वरम् ॥ २६५ ॥
अभिवाद्यार्घ्यगन्धाद्यैः पूजयेत् पुष्पधूपकैः ।
विसृज्य शिल्पिनं पश्चात् सम्प्रोक्ष्यार्घ्याम्भसा पटम् ॥ २६६ ॥
सिद्धार्थकान्वितैः पुष्पैस्ताडयेदस्त्रमन्त्रतः ।
दर्शयेद् देवदेवस्य सम्मुखं साधकोत्तमः ॥ २६७ ॥
दहनाप्यायने कुर्याद् विधिदृष्टेन कर्मणा ।
भूयोऽर्घ्यगन्धपुष्पाद्यैः प्रपूज्य परमेश्वरम् ॥ २६८ ॥
गिरोच्चया त्विमं मन्त्रं बद्धाञ्जलिकरः पठेत् ।
भगवन् पुण्डरीकाक्ष सर्वेश्वर जगन्मय ॥ २६९ ॥
त्वया यथा तु कथितं तथा कर्तुं न शक्यते ।
अस्वातन्त्र्यादसामर्थ्याच्छ्रद्धादीनामभावतः ॥ २७० ॥
तस्मान्मानादिसर्वेषामूनाधिक्योपशान्तये ।
समालोकय नेत्राभ्यां शीतलाभ्यां पटस्थितम् ॥ २७१ ॥
सर्वदोषापहारिभ्यां वैनतेयं प्रसीद ओम् ।
दीक्षितानां ततो विप्राः हस्ते दत्त्वा तु तं पटम् ॥ २७२ ॥
चतुःप्रदक्षिणीकृत्य तेन सार्धं तु देशिकः ।
प्रथमावरणे वाऽपि द्वितीयावरणेऽपि वा ॥ २७३ ॥
प्रविशेद् यजमानेन प्रासादाग्रस्थमण्डपम् ।
तत्र न्यस्य भद्रपीठं तदूर्ध्वे शालितण्डुलैः ॥ २७४ ॥
वेदिं कृत्वा तु तत्पृष्ठे भद्राख्यं मण्डलं लिखेत् ।
विभवे सति वस्त्रं तु समास्तीर्य तदूर्ध्वतः ॥ २७५ ॥
तिलराशिं समुत्कीर्य तन्मध्ये स्वस्तिकं लिखेत् ।
तस्योपरिष्टात् संस्थाप्य प्रासादाभिमुखं पटम् ॥ २७६ ॥
उपविश्यासने पश्चादाचार्यः सुसमाहितः ।
करशुद्ध्यादिपूर्वोक्तं स्वदेहार्चनपश्चिमम् ॥ २७७ ॥
सर्वं खगेशमन्त्रेण साङ्गेन तु समाचरेत् ।
द्वाःस्थातोरणकुम्भादियजनं प्राग्वदाचरेत् ॥ २७८ ॥

carried from there to the Mukhamaṇḍapa,[91] attended with the sounds of the conch, kettle-drum and others, of large drum, of various kinds of singing and of the different kinds of utterances (recitation) of the Vedas. He shall enter within and bow to the supreme lord in the Mūla idol and worship him with *arghya, pādya,* flowers and incense. After sending away the artisan, he shall sprinkle the (flag) cloth with *arghya* water. He shall gently strike it with flowers together with white mustards uttering the Astramantra. The eminent priest shall show (it) to god of gods (*sammukham*) and attend to the burning and nourishment in accordance with the prescribed rules. After worshipping again supreme lord with *araghya,* sandal-paste, flowers and others, he shall recite this mantra[92] in a loud tone with folded palms: "O lord! Lotus-eyed lord of all! having the whole world! it is not possible (for me) to do as you have stated,[93] because of lack of independence, incapacity, lack of faith and others. Therefore behold with (your) two eyes, which are calm and capable of destroying all the defects, Garuḍa as painted in the cloth, in order to pacify (compensate) deficiency or excess in measurement (*māna*) etc. Be pleased." O brahmins! he shall place the flag in the hand of the intiated person and circumambulate (with him) with the flag four times (around the temple) and enter with the patron the pavilion situated in front of the temple in the first or second enclosure. He shall place the auspicious seat (Bhadrapīṭha) and draw behind the *maṇḍala*[94] called Bhadra. If funds

91. Mukhamaṇḍapa: pavilion built in front of the sanctum sanctorum.
92. mantra : this is not actually mantra. *Ślokas* are often treated as mantra as here. cf. *Paus. S.* XXX.133a; *SKS. Brahma.* IX.107a; *LT.* XXX.76.
93. This does not refer directly to any direction given by the lord. This may be taken to refer to many of lord's utterances in the sacred texts like Viṣṇu-purāṇa, Harivaṃśa and others.
94. Bhadramaṇḍala is also called Sarvatobhadramaṇḍala which is described in *Paus. S.* V. 21-29a.

ततः पुण्याहघोषं तु कारयेत् पूर्ववद्द्विजाः ।
गरुडस्याग्रतः प्राग्वत् कुम्भं करकसंयुतम् ॥ २७९ ॥
भारमात्रोपक्लृप्ते तु धान्यपीठे तु विन्यसेत् ।
जलद्रोण्यादिकं पात्रं गन्धतोयैः सुपूरितम् ॥ २८० ॥
दक्षिणे करकस्याथ विनिवेश्य च तत्र तु ।
सद्यश्छायाधिवसनमाचरेद् गरुडस्य तु ॥ २८१ ॥
अधमाधममार्गेण स्नपनं तु समाचरेत् ।
अग्रतो वैनतेयस्य वेदिकोपरि संस्थिते ॥ २८२ ॥
दर्पणे तु ततः पश्चान्मुहूर्ते शोभने गुरुः ।
नयनोन्मीलनं कुर्याद् वक्ष्यमाणविधानतः ॥ २८३ ॥
सर्वेषामपि सर्पाणां नेत्रोन्मीलनमाचरेत् ।
प्राग्वत् संशुद्धदेहस्तु शिल्पी प्रकटतां नयेत् ॥ २८४ ॥
सर्वं तु विधिवत् कुर्यान्नेत्रयोः पूरणादिकम् ।
कुम्भे च करके चैव आसनं परिकल्प्य च ॥ २८५ ॥
कुम्भे गरुडमावाह्य करके मन्त्रमस्त्रपम् ।
पूजयित्वाऽर्घ्यगन्धाद्यैस्ततो दिक्कलशाष्टके ॥ २८६ ॥
इन्द्रादिलोकपालांस्तु प्रादक्षिण्येन पूज्य च ।
भित्तिसंसेचनं कृत्वा भूयः संस्थाप्य तत्र तु ॥ २८७ ॥
ततो ध्वजपटे प्राग्वदासनं परिकल्प्य च ।
ततो गरुडमन्त्रं तु सहस्रादित्यभास्वरम् ॥ २८८ ॥
सर्वरोगप्रशमनं सर्वोपद्रवनाशनम् ।
सर्वसिद्धिप्रदं नृणां सर्वदारिद्र्यनाशनम् ॥ २८९ ॥
हृदयाद्रेच्य विप्रेन्द्राः पटस्थगरुडे न्यसेत् ।
सकलीकरणं कृत्वा सन्निधिं च समाचरेत् ॥ २९० ॥
सन्निरोधं च साम्मुख्यं मुद्राबन्धं तथैव च ।
लययागं भोगयागं यथावद् द्विजसत्तमाः ॥ २९१ ॥
सर्वं गरुडमन्त्रेण साङ्गेन तु समाचरेत् ।
कुम्भे च करके चैव पटे च क्रमयोगतः ॥ २९२ ॥

permit, seasamum is to be shown, the cloth spread over it (Bhadrapīṭha) and draw the *Svastika* in its midst. The cloth shall be placed (spread) facing the temple. The priest shall occupy a seat and remain calm. He shall recite the mantra of Garuḍa with the parts *(aṅgas)*. He shall do (eats from) cleaning (his) hand (upto) ending with worship it (mantra) in his own body. He shall worship as before the pitchers at the arch of the entrance. O brahmins! he shall have *puṇyāha* recited as before. He shall place the pitcher and the water-vessel in front of Garuḍa on a raised platform made of grains to the weight of *bhāra*.[95] Water-bucket filled with scented water, shall be placed to the right of the water vessel. Chāyādhivāsa[96] shall be done to Garuḍa in the flag and bath be given of the lowest of the low.[97] Then the priest shall do Nayanonmīlana[98] in an auspicious *muhūrta*, according to the following method, in the mirror kept on the platform of Garuḍa. He shall do it (Nayanonmīlana) to all serpents. The artisan shall have his body purified as before and make it (eye) evident (or manifested). This shall be done completely for both the eyes according to rule. Seats shall be provided in the pitcher and water-vessel. Garuḍa is to be invoked in the pitcher and Astramantra in the water vessel. Offering worship with *arghya*, sandal-paste and others, Indra and other guardians of the worlds shall be worshipped in the pitchers kept in the eight directions in the circumambulatory way. Sprinkling the walls and placing them again there, seat shall be arranged as before in the flag cloth. O eminent brahmins! he (priest) shall bring out from his heart Garuḍamantra having the radiance of thousand suns, which eradicate all diseases, destroy all calamities (evils), grant all success (*siddhis*) to all and expel all poverty. He shall expel it from his heart and place it on

95. *bhāra*: weight equivalent to 20 tolas or 2000 palas.
96. Chāyādhivāsa: the flag shall be kept under the shade of the tree.
97. *adhamamārgeṇa*: bath shall be given in the low cadre of the low.
    see chart.: *Pāram S.* Introduction. Pl. 20, 28.
    There are nine kinds as Uttama, Madhyama and Adhama, each having the three kinds with this name.
98. Nayanonmīlalana: opening of the eyes of the idol. It is not really opening the eyes that are closed. It is in the form of making the shape of the eyes in the idol. Vide: *Pād. S. kriyā.* XXVII.49. which enjoins the use of a needle smeared with ghee. It does not mention the use of the needle. The mirror (*darpaṇa*) is to be kept perhaps because it is the artisan (*śilpin*) and not the priest that should do this. The priest shall look at the mirror when this is done.

महता विभवेनैव पूजनं च समाचरेत् ।
अलङ्कारासनान्तं च यथोक्तेन क्रमेण तु ॥ २९३ ॥
कृत्वा सम्पूजनं विप्राः गरुडस्य ततः परम् ।
प्रासादाभ्यन्तरे विप्राः देशिकानुमतेन तु ॥ २९४ ॥
अन्येन गुरुणा यद्वा साधकेन विशेषवत् ।
पूजनं कारयेत् सम्यङ्मूलमूर्तिगतस्य च ॥ २९५ ॥
यात्रामूर्तिगतस्यापि विभोर्दानान्तमेव च ।
तत्परं वैनतेयस्य भोज्यासनपुरःसरैः ॥ २९६ ॥
विविधैर्मधुपर्कान्तै[२७] र्हृद्यैः सफलमूलकैः ।
अन्यैरतिप्रभूतैश्च तथान्यैर्विविधैरपि ॥ २९७ ॥
भोगैरिष्ट्वा जपान्तं च पूर्ववत् क्रमयोगतः ।
सम्प्रदानं पृथक् कुर्यात् कारिभ्यस्तु यथाविधि ॥ २९८ ॥
मन्त्रास्त्रकुम्भयोर्दत्तमाचार्येभ्यो ददेत्ततः ।
पटस्थस्यापि नैवेद्यं किञ्चिदादाय पात्रगम् ॥ २९९ ॥
देशिकः स्वयमादद्याद् गुर्वादिभ्योऽपि वै ददेत् ।
मूलबिम्बस्थितस्यापि यात्राबिम्बस्थितस्य च ॥ ३०० ॥
देवस्य मधुपर्काद्यैर्नैवेद्यं प्रतिपादितम् ।
दापयेद् देशिकादिभ्यस्ततो होमं समाचरेत् ॥ ३०१ ॥
कुण्डं सलक्षणं कृत्वा प्राग्भागे गरुडस्य तु ।
तत्रानलं तु संस्कृत्यावाह्य विहगेश्वरम् ॥ ३०२ ॥
समिधां सप्तकं हुत्वा शान्त्यर्थं तु तिलैर्घृतैः ।
आहुत्यष्टोत्तरशतं हुत्वा पूर्णां निवेदयेत् ॥ ३०३ ॥
यद्वा नैमित्तिके कुण्डे होमं कुर्यात् तु देशिकः ।
एवं ध्वजाधिवासं तु कृत्वा गर्भगृहं व्रजेत् ॥ ३०४ ॥

२७. मधुपर्कान्तम् - B, D, E

Garuḍa in the cloth. Differentiating (*sakalīkṛtya*) it, he shall make it (Garuḍa) remain there. Retaining it (there) and making it favourable, he shall form the *mudrā* and do, O eminent brahmins! Layayāga[99] and Bhogayāga. All these shall be done with Garuḍamantra together with its parts.[100] Worship is to be done with much glory (on a large scale) in the pitcher, water vessel and cloth in due order. After doing worship till the end of Alaṅkārāsana to Garuḍa in the prescribed manner, O brahmins! worship shall be arranged within the temple through another preceptor or an aspirant (*sādhaka*) with the permission of the priest, properly in a special way for the Mūla idol and processional idol till the end of offerings. Then Garuḍa shall be worshipped with Bhojyāsana with various pleasant fruits and nuts and other profuse and various enjoyables till the end of offering Madhuparka till *japa* is completed, done duly as before. Gifts are to be duly given to the Kāris[101] separately. Then what is placed in the pitchers of mantra and *astra* shall be given to the preceptors. A portion of the offerings made to Garuḍa (in the cloth) shall be placed in the vessel which the priest shall take it for himself and (later) give it to the preceptors. Offerings that are made to Mūla idol and processional idol in the form of Madhuparka and others shall be arranged to be given to the preceptors. He and others shall be arranged to be given to the preceptors. He shall then do *homa*. The fire-pit shall be prepared in the eastern direction to Garuḍa. The fire is to be consecrated (ignited) there. Garuḍa, the lord of birds shall be invoked. *Homa* shall be done with seven *samits*,[102] for one hundred times using seasamum and ghee for pacifying the evils. Pūrṇāhuti is then to be offered. Or, the priest shall do *homa* in a specially made (Naimittika) fire-pit.[103] After doing Dhvajādhivāsa thus the priest shall go to the sanctum sanctorum.

99. Layayāga : see under III.34;
 Bhogayāga: see under III.35.
100. *Aṅga* of Garuḍa mantra: *Suparṇāya namaḥ hṛdayam; vakratuṇḍāya śiraḥ; suparṇāya śikhā; khageśvarāya kavacam; anantavīryāya astram.* Vide: *SKS. Brahma.* XI.8, P. 94.
101. Kāri: see under V. 30.
102. Seven samits see under V. 95.
103. Naimittika kuṇḍa: this is a fire-pit, used purposed for Naimiotika homas.

[रक्षाबन्धनविधिः]

रक्षाबन्धं ततः कुर्याद् यथाविधि मुनीश्वराः ।
मूलमूर्तिगतं देवमर्घ्याद्यैः सम्प्रपूज्य च ॥ ३०५ ॥
तत्पादगौ करौ कृत्वा देवं विज्ञापयेदिदम् ।
भगवन् पुण्डरीकाक्ष करिष्ये कौतुकक्रियाम् ॥ ३०६ ॥
महोत्सवार्थं देवेश तदर्थं त्वं प्रसीद मे ।
इति विज्ञाप्य देवेशमावाह्योत्सवकौतुके ॥ ३०७ ॥
अर्घ्यगन्धादिनाभ्यर्च्य वासोभिर्विविधैः शुभैः ।
भूषणैर्दिव्यगन्धैश्चाप्यलङ्कृत्य विशेषतः ॥ ३०८ ॥
सौवर्णं यानमारोप्य शङ्खभेर्यादिसंयुतम् ।
छत्राद्यैश्च समायुक्तं प्रादक्षिण्यक्रमेण तु ॥ ३०९ ॥
आस्थानमण्डपं नीत्वा सौवर्णे भद्रविष्टरे ।
तत्र मुक्तावितानाद्यैरुपरिष्टाद्विभूषिते ॥ ३१० ॥
सर्वसाधनसंयुक्ते समारोप्य विधानतः ।
पूजयित्वा जगन्नाथं प्रभूतान्नं निवेद्य च ॥ ३११ ॥

रक्षाबन्धनविधिमाह — '**रक्षाबन्धं ततः कुर्यात्**' इत्यारभ्य '**रात्रिशेषं समापयेत्**' इत्यन्तम् ।

कृत्वा सन्तर्पणान्तं च प्रासादं सम्प्रवेशयेत् ।
ततस्तु हेमजं पात्रं राजतं वा समाहरेत् ॥ ३१२ ॥
शालिभिस्तण्डुलैर्विप्राः भारमात्रैः सुपूरितम् ।
तदर्धैर्वाऽपि तत्पादैः षडंशैर्वाऽष्टमांशकैः ॥ ३१३ ॥
तदूर्ध्वे हेमजं सूत्रं क्षौमं कार्पासमेव वा ।
पट्टजं पञ्चभिः सूत्रैश्चतुर्भिः सप्तभिस्तु वा ॥ ३१४ ॥
कृतं न्यस्य सताम्बूलं तत्पात्रं विन्यसेत् ततः ।
गर्भाग्रमण्डपे पीठे शालिभिः परिकल्पिते ॥ ३१५ ॥
भारमानैस्तदर्धैर्वा एवं शालिविनिर्मिते ।
पीठे पात्रान्तरे न्यस्येदापूपिकसमन्वितम् ॥ ३१६ ॥
अर्घ्यादिना समभ्यर्च्य सम्यगाच्छाद्य वाससा ।
पात्रद्वयं दीक्षितयोर्न्यस्य शिरसि देशिकः ॥ ३१७ ॥

(Rakṣābandhana-vidhi)

305-334. O eminent sages! Rakṣābandha[104] shall then be done according to rule. God in the Mūlabera shall be worshipped with *arghya* and others. The priest shall then place his own hands at the feet of god (Mūla idol) and make the declaration to Him, 'O lord lotus-eyed! I shall do this auspicious (Kautuka)[104a] act, O lord of god, for (conducting) Mahotsava. Be pleased with me for that', having thus made a request, he shall invoke the lord of gods into the *utsava*. After worshipping with *arghya*, sandal-paste and others especially, the idol[104b] of *utsava* shall be adorned with various and auspicious clothes, ornaments and fine sandal-paste. The deity shall be placed in a golden vehicle and taken to the hall of audience attended with the soundings of the conch, kettle-drums and others and umbrellas and others in a circumambulatory way. The deity shall then be duly seated in a golden auspicious seat, adorned above with canopy set with pearls and having all the conveniences. The lord of the world shall be worshipped and offered considerable rice preparations ending it with Santarpaṇa.[105] The lord shall then be taken inside the temple. A gold or silver vessel shall be brought there filled with good rice weighing a *bhāra* or half or quarter, one sixth or one eight part, O brahmins! a golden or silken or cotton string or Paṭṭaja[106] shall be placed which is made of five, four, or seven strings. A vessel shall be placed

104. Rakṣābandha: cf. *Pād. S. caryā.* XI.27-39 and under VII.26.
104a. The word *kautuka* has many meanings, the string used in the Rakṣābanda, marriage, festivity idol, and curiosity.
104b. Kautuka: ocurring here means idol.
105. Santarpaṇa: pleasing by giving water for drink.
106. Paṭṭaja: a kind of cloth or silken.

यानादिके वा संस्थाप्य विभवानुगुणं द्विजाः ।
सह ताभ्यां पात्राभ्यां नृत्तगीतादिसंयुतम् ॥ ३१८ ॥
प्रदक्षिणं परिभ्राम्य सर्वेष्वावरणेष्वपि ।
एकस्मिन् वा चतुःकृत्वा ग्रामादौ वा प्रदक्षिणम् ॥ ३१९ ॥
नीत्वैकधा[२८] ततो विप्राः प्रविशेन्मूलमन्दिरम् ।
यद्वा सुदर्शनोपेतं विष्वक्सेनेन वा द्विजाः ॥ ३२० ॥
खगेशं वा हनूमन्तं विभीषणसमन्वितम् ।
यानादिकं समारोप्य भ्रामयेत् तु यथारुचि ॥ ३२१ ॥
गर्भगेहं प्रविश्याऽथ देवदेवस्य सन्निधौ ।
पात्रद्वयं तु विन्यस्य आधारोपरि पूजयेत् ॥ ३२२ ॥
अष्टाक्षरेण मन्त्रेण अर्घ्यगन्धादिकैस्तथा ।
कृत्वा पुण्याहघोषं तु देवमर्घ्यादिभिर्यजेत् ॥ ३२३ ॥
ततः प्रतिसरं चेष्ट्वा गन्धधूपाधिवासितम् ।
प्रथमं देवदेवस्य मूलमूर्तिगतस्य च ॥ ३२४ ॥
बन्धयेत् कौतुकं सूत्रैर्हेमजैः पट्टजैस्तु वा ।
हेमजं सूत्रमादाय गन्धेनालिप्य बन्धयेत् ॥ ३२५ ॥
देवस्य दक्षिणे हस्ते यात्रामूर्तिगतस्य च ।
जितन्ताख्येन मन्त्रेण शङ्खगीतादिसंयुतम् ॥ ३२६ ॥
स्पृष्ट्वा दक्षिणहस्तेन सूत्रमस्त्रशतं जपेत् ।
श्रियो वामकरे कुर्यात् पट्टसूत्रेण कौतुकम् ॥ ३२७ ॥
श्री सूक्तमुच्चरन् वाऽपि तन्मन्त्रेण द्विजोत्तमाः ।
पुष्ट्यास्तु वामहस्ते तु क्षौमसूत्रेण बन्धयेत् ॥ ३२८ ॥
कुर्यात् स्नपनबिम्बस्य पट्टसूत्रेण कौतुकम् ।
बलिबिम्बादिकानां च कृत्वैवं कौतुकं ततः ॥ ३२९ ॥
कौतुकं देशिकेन्द्रस्तु कार्पासेन स्वदक्षिणे ।
करे तु मूलमन्त्रेण बन्धयेत् तु ततः परम् ॥ ३३० ॥

२८. नीत्वा कथा - B, E

which is made of five, four or seven strings. A vessel shall be placed there with Tāmbūla. A pedestal shall be prepared with rice measuring *bhāra* or half or it in the pavilion in front of sanctum sanctorum. Or, another vessel be placed filled with the cakes of flour. It shall be worshipped with *arghya* and others and completely covered with a cloth. The priest shall place the two vessels on the head of two initiated persons, O brahmins! or on a vehicle according to availability of funds. They shall be taken in a circumambulatory way in all the enclosures attended with dance and music or for four times in one enclosure or in the village. O brahmins! he shall enter the sanctum sanctorum with them, or O brahmins! with Sudarśana or Viṣvakseana or lord of birds (Garuḍa) or Hanumān with Vibhīṣaṇa. They shall be mounted on the vehicles and taken (through the streets) at his choice (or pleasure). Entering the sanctum sanctorum, he shall place the two vessels near god of gods on a support and worship. Puṇyāhamantra shall then be uttered with Astramantra. God shall be worshipped with *arghya*, sandal-paste and others.

Pratisara[107] shall be worshipped, made fragrant with sandal-paste and incense and be tied at first (in the hand) god of gods in the *Mūla* idol, the string which is made of gold and Paṭṭaja strings. The golden string shall be already be smeared with sandal-paste and then tied in the right hand of lord and also of the deity (processional). He shall touch the string with the right hand, uttering the Jitantāmantra attended by blowing the conch and singing. *Japa* of Astramantra shall be done one hundred times touching the string with the right hand, O eminent brahmins! the string of Paṭṭa shall be wound in the left hand for Śrī uttering the Śrīsūkta[108] or her mantra (Śrīmantra).[109] O brahmins! the silken string shall be tied in the left hand for Puṣṭi. The Paṭṭa string shall be tied to the *snapana* idol. It (Kautuka) shall be tied to the Balibera and others. The priest shall tie the cotton string in his

107. Pratisara: a string smeared with turmeric powder and consecrated with mantra and tied to the wrist.
108. Śrīsūkta: *ṚV* (*Khila*) V.87.
109. Śrīmantra: see under VII. 6.

तथैव कर्मकर्तॄणां कौतुकं बन्धयेत् क्रमात् ।
विभवे सति सर्वेषां सूत्रं हेममयं भवेत् ॥ ३३१ ॥
देवमर्घ्यादिनाभ्यर्च्य अपूपादीन्निवेदयेत् ।
ताम्बूलादीन् समर्प्याथ ताम्बूलैस्तोषयेद् द्विजान् ॥ ३३२ ॥
दीक्षितान् वैष्णवांश्चापि देशिकेन्द्रपुरःसरम् ।
आचार्यः स्वयमादद्यात् तदर्थं तण्डुलादिकम् ॥ ३३३ ॥
एवं सर्वेषु यागेषु कार्यं कौतुकबन्धनम् ।
रक्षाबन्धं तु कृत्वैवं रात्रिशेषं समापयेत् ॥ ३३४ ॥

[ध्वजस्तम्भप्रतिष्ठाविधिः]

ततः प्रभाते सुस्नातस्वाचान्तो देशिकोत्तमः ।
नित्यार्चनं विभोः कृत्वा विशेषयजनं तथा ॥ ३३५ ॥
वैनतेयं ततोऽभ्यर्च्य कुम्भपूर्वं यथाविधि ।
महाहविर्निवेद्याथ होमं कृत्वा तु पूर्ववत् ॥ ३३६ ॥
ततः कुर्याद् ध्वजस्तम्भस्थापनं देशिकोत्तमः ।
प्रथमावरणे वाऽपि द्वितीयावरणादिके ॥ ३३७ ॥
स्थापयेद् गोपुरस्यान्तर्बहिर्वा स्तम्भमुत्तमम् ।
अथवा बलिपीठस्य पुरोभागे मुनीश्वराः ॥ ३३८ ॥
पश्चाद्भागेऽपि वा कुर्यात् ध्वजपीठप्रकल्पनम् ।
तयोस्तदन्तरं कुर्याद्धस्तं वा तालमेव वा ॥ ३३९ ॥
उत्तरे ध्वजपीठस्य पूर्वस्यां दिशि वा द्विजाः ।
शाययेच्च ध्वजस्तम्भं ध्वजयष्टिसमन्वितम् ॥ ३४० ॥
पूर्वाग्रमुत्तराग्रं वा लक्षणाढ्यं सुशोभनम् ।
अन्तःसारो बहिःसारो निःसारस्त्रिविधस्तरुः ॥ ३४१ ॥
अन्तःसारश्चन्दनादिः प्रशस्तः स्तम्भकल्पने ।
क्रमुकादिर्बहिःसारः सोऽपि शस्तो मुनीश्वराः ॥ ३४२ ॥
किंशुकाद्यं तु निःसारं वर्जयेत् स्तम्भकर्मणि ।
आर्द्रं नवमृजुं स्निग्धं वक्रस्फोटनवर्जितम् ॥ ३४३ ॥

own right hand uttering the Mūlamantra. The string shall be tied to those who are workers there in due order. If funds permit, golden strings shall be tied to all. God shall be worshipped with *arghya* and others. Cakes of flour and others should be offered to him. After offering Tāmbūla to him, O brahmins! all these (persons) be pleased by giving them Tāmbūla including those who are initiated and Vaiṣṇavas with the eminent priest (receiving it) at first. The priest shall take the rice for himself and for others sake. The string shall be tied in all cases of worship. After doing Rakṣābandha, the priest shall spend the remaining part of the night.

(Method of consecration of the flag-staff)

335-356. The eminent priest shall take bath at dawn, do *ācamana* duly and attend to special worship of lord. Garuḍa shall then be worshipped duly after worshipping the pitchers. After offering huge *homa* shall be done as before. The eminent priest shall then instal the flag-staff in the first enclsoure or second or others. The splendid pillar (flag-staff) is to be fixed within the tower or without it, or, O eminent sages! in front of the Balipīṭha or behind it. The pedestal for *bali* shall be arranged. The space between the two shall be of two *hastas* or *tāla* (in measurement),[110] O brahmins! the flag-staff shall be laid down to the north of the pedestal for the flag or east of it along with the Dhvajayaṣṭi,[111] the tip facing east or north, auspicious and having good marks.

The tree for making the flag-staff shall be of three kinds, having enough (internal) strength, externally and having no essence. They which have inner strength, are sandalwood tree and others which are recommended for making the staff. O eminent sages! betel nut and other trees which have a external strength are also commended. Kiṃśuka[112] and others, which are devoid of strength, are to be avoided in making the staff. The flag-staff, which shall be selected should be moist, fresh, straight, glossy, devoid of openings

110. *hasta, tāla:* see under 42.
111. *yaṣṭi:* stick; here it means flag-staff, main part of Dhvajadaṇḍa.
112. Kiṃśuka: a tree with deep red coloured flower without good smell, cf. *Kumārasambhava* III. 28.

अयुग्मपर्वकं स्निग्धं सत्वचं सुस्थिरं तथा ।
ग्राहयेत् तु ध्वजस्तम्भं शास्त्रदृष्ट्या परीक्ष्य तु ॥ ३४४ ॥
शततालं तु मुख्यं स्याद्विंशन्यूनमथापि वा ।
षष्ठितालमितं वाऽपि मानाङ्गुलवशेन तु ॥ ३४५ ॥

तदपरेद्युर्नित्यार्चनानन्तरं ध्वजस्तम्भप्रतिष्ठाविधिमाह — **ततः प्रभाते** इत्यारभ्य **तथा कुर्याद्वि-चक्षणः** इत्यन्तम् ।

मात्राङ्गुलवशेनापि प्रमाणं परिकल्पयेत् ।
प्रासादशिखराग्रोच्चं प्रासादोच्चमथापि वा ॥ ३४६ ॥
कर्णोच्चं गोपुरोच्चं वा यथाशक्ति प्रकल्पयेत् ।
चतुर्धा विभजेत् स्तम्भमेकांशेनैव मस्तकम् ॥ ३४७ ॥
तस्य चाधारभूतानां छिद्रितानां त्रिमूलतः ।
त्रयाणामपि पीठानां स्तम्भाग्रे विनिवेशनम् । ३४८ ॥
अग्रे पीठद्वयच्छिद्रे ध्वजयष्टिं तु योजयेत् ।
दर्भमुष्टिं तदूर्ध्वे तु बन्धयेत् घण्टया सह ॥ ३४९ ॥
वेष्टयेद् दर्भमालाभिर्ध्वजदण्डं प्रदक्षिणम् ।
एवं कृत्वा ध्वजस्तम्भं प्रोक्षयेदस्त्रवारिणा ॥ ३५० ॥
ध्वजपीठस्थिते गर्ते रत्नधान्यानि निक्षिपेत् ।
देशिकस्तार्क्ष्यमन्त्रेण ततो ब्राह्मणसत्तमैः ॥ ३५१ ॥
शूद्रैर्वा दीक्षितैर्विप्राः देवदासैरथापि वा ।
शङ्खभेर्यादिनिर्घोषगीतवादित्रसंयुतम् ॥ ३५२ ॥
स्थापयेत् तु ध्वजस्तम्भं तस्मिन् गर्ते ऋजुस्थितम् ।
प्रासादाभिमुखं स्थाप्य वालुकाभिश्च पूरयेत् ॥ ३५३ ॥
हस्तपादादिभिः कृत्वा सुदृढं तु यथा भवेत् ।
स्तम्भमूलस्थले वेदिं पञ्चहस्तसमुच्छ्रिताम् ॥ ३५४ ॥
त्रिहस्तैरुच्छ्रितां वाऽपि एकहस्तसमुच्छ्रिताम् ।
तावद्भिरेव विस्तीर्णां चतुरश्रां प्रकल्पयेत् ॥ ३५५ ॥
तदूर्ध्वे मध्यदेशे तु पद्ममष्टदलैर्युतम् ।
कर्णिकास्थो यथा स्तम्भस्तथा कुर्याद् विचक्षणः ॥ ३५६ ॥

in the mouth,[113] shall have old number of joints, greasy, possessing barks and firm. This is to be selected after examining the trees accordings to the Śāstras. The main kind (of the staff) shall be one hundred *tāla* is or short by twenty or sixty (*tālas*) according to Mānāṅgula or Mātrāṅgula.[114] It (staff) shall be lofty upto the height of the top of the spire of the temple or that of the temple, of that of joinery[115] or that of the tower according to the capacity (of the patron). The staff shall be divided into four parts, head (top) which shall be one division. The three parts from the bottom, shall be the pedestals supporting it, shall be perforated and be placed at the top of the staff. The flag-staff shall be fixed at the top of the staff. The flag-staff shall be fixed at the top in the cavities of the two pedestals. A clump of *darbha* shall be tied above it with the bell. The flag-staff shall be wound in circumambulatory way with strings of *darbha*. Having done thus the flag-staff shall be sprinkled with the water (consecrated) by of Astramantra. Gems and grains are to be placed in the pit in the pedestal for flag. The priest shall use Garuḍamantra[116] for fixing up the flag-staff with the help of eminent brahmins or Śūdras or the initiated or servants of god attended with the soundings of conch, kettle drum, singing and playing the musical instruments. He shall make it (staff) remain straight in that pit; facing the temple. The pit shall be filled with sand so as to make it firm, using hand and feet pressing it. A platform having four corners shall be prepared out at the base of that staff to the height or five *hastas* or three or one *hasta* and wide of the same measurement. The skilled priest shall draw, in the midst of the above area, the (figure of a) lotus with eight petals so that it (staff) will be in the pericarp (of the lotus).

113. *vaktrasphoṭana* = *vaktra-mouth*, in the context this word means the trunk of the tree is cut to form a pole. The portion where it is cut and is to mark one end of the pole must having an opening. That portion must be free from creakings (*sphoṭana*).
114. Mānāṅgula: see under 42,
  tāla: span = 12 *aṅgulas*,
  mātrāṅgula = see under 42.
115. Karṇocca = to the height of joinery, projecting part.
116. Garuḍamantra: *Oṃ kham khagānanāya namaḥ.*

[ध्वजारोहणविधिः]

प्रासादान्तः प्रविश्याथ मूलमूर्तिगतं विभुम् ।
अर्घ्यगन्धादिनाभ्यर्च्य तस्मादुत्सवकौतुके ॥ ३५७ ॥
किञ्चिदावाह्य तं चापि देवीभ्यां सहितं ततः ।
पूजयित्वा जगन्नाथं पादुके विनिवेद्य च ॥ ३५८ ॥
याने[२९] प्ररोप्य तदनु सौवर्णप्रभयान्विते ।
एवमेव हि बल्यर्चामिष्ट्वा याने निवेशयेत् ॥ ३५९ ॥
आचार्यो मूर्तिपैः सार्धं गत्वा गरुडसन्निधिम् ।
रथे वा कुञ्जरे याने ध्वजमारोप्य यत्नतः ॥ ३६० ॥
प्रभया चित्रकुसुमैः कृतया भूषयेद् ध्वजम् ।
वासोभिर्भूषणैः स्रग्भिर्विचित्राभिश्च भूषयेत् ॥ ३६१ ॥
छत्रचामरपूर्वैश्च मयूर[३०]व्यजनैस्ततः ।
विचित्रैस्तालवृन्तैश्च आतपत्रैर्मनोहरैः ॥ ३६२ ॥
केतुदण्डैर्विचित्रैश्च दुकूलपटशोभितैः ।
चतुर्वेदमयोद्घोषैः स्तोत्रघोषसमन्वितैः ॥ ३६३ ॥
गीतकैर्विविधैर्वाद्यैः शङ्खकाहलनिःस्वनैः ।
भेरीमृदङ्गपूर्वाणां घोषैरन्यैश्च मङ्गलैः ॥ ३६४ ॥
ब्राह्मणैर्ध्रियमाणैश्च साङ्कुरैः पालिकागणैः ।
सुवेषगणिकासङ्घैः सदा भक्तजनैः सह ॥ ३६५ ॥

ध्वजारोहणविधिमाह — **प्रासादान्तः प्रविश्याथ** इत्यारभ्य यावदध्यायपरिसमाप्तिः । अत्र ध्वजयात्राकाले बलिदानपूर्वकं ग्रामप्रदक्षिणमुक्तम् । तत्र कुमुदादिभ्य एव बलिदानमिति ज्ञेयम् ।

ननु तद्रात्रौ किल कुमुदादीनां ग्रामवीथीष्वावाहनं वक्ष्यति ।

क्ष्वेलितास्फोटितैर्युक्तं जयशब्दसमन्वितम् ।
बलिबिम्बं पुरस्कृत्यं मध्ये ध्वजपटं ततः ॥ ३६६ ॥
यात्रामूर्तिं च तदनु क्रमेण भ्रामयेत् ततः ।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम् ॥ ३६७ ॥

२९. यानम् - B, C, E
३०. मायूर - D, E

(Rules for hoisting the flag)

357-412. He (priest) shall then enter within (sanctum sanctorum) and worship god who is within Mūla idol with *arghya*, sandal-paste and others. He shall bring down a portion of the power from it to the *utsava* idol. Then he shall worship the lord of the world (*utsava*) idol with the two consorts and offer the sandals. He shall make them mount a vehicle having a golden Prabhā.[117] The priest shall worship the *bali* idol in the same away and place it on the vehicle. The preceptor shall then go to the shrine of Garuḍa with the priests and place the flag with effort on the chariot, elephant or vehicle. He shall decorate the flag with the Prabhā made of flowers of various colours, apparels, ornaments, garlands of variegated colours. Then the *bali* idol, the flag cloth and *utsava* idol are to be taken round (in the streets) in this order, with umbrellas and chowries, fans made of peacocks, feathers, fans made of varied palymyra leaves, beautiful umbrellas, various kinds of flag-staffs, beautified by silken clothes, sounds of reciting the four Vedas, with the sounds of *stotra* songs and various musical instruments, sounds of conch and large drums, loud sounds of kettle drums, drums and others and other auspicious sounds, accompanied by (or with) brahmins holding a number of cups with sprouts, groups of well-dressed courtesans, always with the devoted people with jumping and clapping the hands, and sounds of uttering the word victory. Then the idol (for procession) shall be taken round, beginning from the first enclosure upto the street through which the chariot is drawn keeping the *bali* idol in the front and the flag in the centre. The priest shall circumambulate the village offering *bali* there. Then the processional deity shall be taken to the audience, pavilion and placed on the golden seat in front of the pedestal of the flag. The preceptor along with the priests shall take Garuḍa and shall approach the pedestal for the flag in a circumambulatory way attended with the blowing of the conch and others. The flag-staff shall be washed with pure water. If funds permit, it shall be wrapped with a cloth. A rope which is made strong with the strings of cotton wound threefold shall be taken which the priest shall bind to the machine fixed at the top of the staff. The top of the flag shall then be fastened there. He shall approach the pitcher along with the attendants. He shall take up the pitcher and place it on head of the pupil. The eight subsidiary pitchers shall

117. Prabhā: a semicircular wooden frame coated with gold. It is well-decorated and placed in a vehicle beneath which the idol is placed.

बलिदानपुरस्कं तु कृत्वा ग्रामप्रदक्षिणम् ।
यात्राबिम्बं च तदनु नयेदास्थानमण्डपे ॥ ३६८ ॥
निवेश्य विष्टरे हैमे ध्वजपीठस्य सम्मुखम् ।
आचार्यो मूर्तिपैः सार्धमादाय गरुडध्वजम् ॥ ३६९ ॥
सह शङ्खनिनादाद्यैः प्रादक्षिण्येन योगतः ।
ध्वजपीठं समानीय स्तम्भं प्रक्षाल्य सज्जलैः ॥ ३७० ॥
विभवे सति वस्त्रेण संवेष्ट्य ध्वजदण्डकम् ।
त्रिवृत्कृतैस्तु कार्पाससूत्रैरतिदृढैः कृताम् ॥ ३७१ ॥
रज्जुमादाय तदनु सुदृढां देशिकोत्तमः ।
यष्ट्यग्रसंस्थिते यन्त्रे योजयित्वा तया ततः ॥ ३७२ ॥
ध्वजस्य शिखरं विप्राः बन्धयेत् सुदृढं ततः ।
सर्वैः परिजनैः सार्धं कुम्भपार्श्वं समाश्रयेत् ॥ ३७३ ॥

तत्पूर्वमेव तेषां बलिदानं कथं क्रियत इति चेत्; सत्यम् । इदानीं ध्वजयात्राङ्गबलिदानार्थं कुमुदादीनां सद्य एवावाहनं विसर्जनं च । तद्रात्रौ तूत्सवाङ्गं तेषां प्रधानावाहनम् । विसर्जनं तूत्सवान्तरमेवेति बोध्यम् ।

तत्कुम्भं तु समुद्धृत्य विन्यसेच्छिष्यमूर्धनि ।
उपकुम्भाष्टकं चैव वाहयेद् ब्राह्मणैः सह ॥ ३७४ ॥
वर्धनीं च समादाय आचार्यः स्वकरेण तु ।
अच्छिन्नधारया युक्तं वाद्यघोषपुरःसरम् ॥ ३७५ ॥
देवागारं परिभ्राम्य स्तम्भमूलं समाश्रयेत् ।
पुण्याहं वाचयित्वा तु सम्प्रोक्ष्यास्त्रेण वै ध्वजम् ॥ ३७६ ॥
गारुडेनैव मन्त्रेण पटस्थं गरुडं यजेत् ।
अर्घ्यं पाद्यं तथाचामं गन्धं माल्यं च धूपकम् ॥ ३७७ ॥
अपूपान् पृथुकांश्चापि पानकं तर्पणं ततः ।
नालिकेरजलैर्युक्तमाचामं तदनन्तरम् ॥ ३७८ ॥

be borne by the brahmins. The preceptor shall take the pitcher (*vardhanī*)[118] in his hand and go round the shrine attended with the sound of the musical instruments going ahead and the water from the pitcher flowing without a break and reach the foot of the staff. Getting *puṇyāha* recited, the flag shall be sprinkled with the Astramantra. Garuḍa (in the flag) in the cloth shall be worshipped with Garuḍamantra. He shall be offered *argya, pādya* and *ācamana* sandal-paste, garland, cakes of flour, pounded rice,[119] *pānaka*[120] water for drinking and *ācamana* with coconut water. Tāmbūla of a splendid kind shall then be offered containing camphor. Garuḍa shall be shown his *mudrā*[121] and be sprinkled with the water kept in the big pitcher reciting Puruṣasūkta. Garuḍa, who is in the big pitcher shall be kept in the cloth. The eight serpents[122] shall be sprinkled with the water in the eight subordinary pitchers and the weapons with the water kept in the small pitcher reciting the Astramantra. The eminent priest shall thus sprinkle and do Mantranyāsa and others and attend (on him) with palmful of flowers, to keep him near, restrain him (from going away) and be favourably disposed. After worshipping him with *arghya* and others, he (priest) shall make many offerings. Rice mixed up with Mudga shall be offered and Tāmbūla afterwards. The priest shall fold his palms and praise Garuḍa with eulogies: 'O vehicle of Mahāviṣṇu! Tārkṣya of unlimited lustre! my obeisance to Garuḍa who is death for all worldly serpents. O lord of birds! my salutations to you having the Vedas for the body[123] you have uprooted the divine tree;[124] you have brought the

118. *vardhanī:* water jar, smaller than *kumbha* in size.
119. Pṛthuka: rice or grain soaked with hot water-dried and grounded in a mortar.
120. *pānaka:* a drink prepared with pieces of jaggery and cardamon mixed up with water.
121. Garuḍamudrā: See *JS.* VIII.42a-46a; *Pād. S. caryā.* XXII.55-58.
122. Aṣṭanāgas: Serpents are of two kinds, Nāga and Sarpa. Sarpas creep while Nāgas take the shape of their liking.
Vide: *SKS. Śiva.* III. 36b-37; the eight Nāgas also referred to as Naga are Ananta, Vāsuki, Takṣaka, Kārkoṭaka, Padma, Mahāpadma, Śaṅkha, and Gulika; vide: *ĪS.* X.252-254.
123. *Svādhyāyavapuṣe:* Garuḍa having the *svādhyāya,* i.e. Veda, for his body, that is, Garuḍa is the soul for the Vedas, cf. *vedātmā vihageśvara* = Yāmunācārya's *Catuśślokī.* Or, he may be taken to represent the body having the Vedas for the soul. Any way, Garuḍa shall be taken as the presiding deity for the Vedas.
124. *samutpāṭitakalpaka:* one who uprooted the desire-yielding tree (Kalpaka), i.e. Pārijāta tree; vide: *V.P.* V.30-38 which mentions that Kṛṣṇa placed the Pārijāta tree on Garuḍa to carry it. According to *Bh. P.* (X.59-39) Kṛṣṇa uprooted that and placed it on Garuḍa. Both these texts do not refer to Garuḍa as having uprooted the tree.

कर्पूरादिसमायुक्तं[३१] दत्त्वा ताम्बूलमुत्तमम् ।
तन्मुद्रां दर्शयित्वा तु ततः पुरुषसूक्ततः ॥ ३७९ ॥
महाकुम्भस्थतोयेन सम्प्रोक्ष्य गरुडं ततः ।
महाकुम्भस्थगरुडं पटस्थे तु निवेशयेत् ॥ ३८० ॥
उपकुम्भाष्टकेनैव अष्ट नागान् यथाक्रमम् ।
आयुधानां तथैवोक्तं करकास्त्रजलेन तु ॥ ३८१ ॥
एवं क्रमेण सम्प्रोक्ष्य ततो देशिकसत्तमः ।
मन्त्रन्यासादिकं कृत्वा पुष्पाञ्जलिपुरःसरम् ॥ ३८२ ॥
सन्निधिं सन्निरोधं च साम्मुख्यं च समाचरेत् ।
ततस्त्वर्घ्यादिभिः पूज्य उपहारान् बहूनपि ॥ ३८३ ॥
मुद्रान्नादीन्निवेद्याथ ताम्बूलादीन् समर्पयेत् ।
स्तोत्रैः स्तुवीत गरुडं बद्धाञ्जलिपुटो गुरुः ॥ ३८४ ॥
वाहनाय महाविष्णोः तार्क्ष्यायामिततेजसे ।
गरुडाय नमस्तुभ्यं सर्वसर्पेन्द्रमृत्यवे ॥ ३८५ ॥
नमो नमस्ते पक्षीन्द्र स्वाध्यायवपुषे नमः ।
विहगेन्द्र नमस्तेऽस्तु समुत्पाटितकल्पक ॥ ३८६ ॥
आहृतामृतकुम्भाय जननीदास्यमोचिने[३२] ।
सुरासुरेन्द्रजयिने नागेन्द्राभरणाय ते ॥ ३८७ ॥
यदाधारमिदं सर्वं तदाधाराय ते नमः ।
पक्षौ यस्य बृहत्साम रथन्तरमपि द्वयम् ॥ ३८८ ॥
अक्षिणी चापि गायत्री त्रिवृत्साम शिरः स्मृतम् ।
स्तोम आत्मा नमस्तस्मै वामदेव्याङ्गसम्पदे ॥ ३८९ ॥
नमः प्राणादिवायूनामीशानाय गरुत्मते ।
दोषानपनयाखण्डान् गुणानावह सर्वतः ॥ ३९० ॥
विघ्नानि जहि सर्वाणि आत्मसात्कुरु मामपि ।
स्तुत्वैवं श्रावयेत् तस्य बृहत्साम रथन्तरम् ॥ ३९१ ॥

३१. समोपेतम् - B, C, E
३२. मोचने - B, C

pitcher containing nectar,[125] you have rescued (your) mother from slavery.[126] You have conquered the lords of gods and demons. You have the chief of serpents for your ornaments. Salutation to you, the support of that which supports all this (world). Bṛhatsāman and Rathantara[127] are your two wings. Gāyatrī[128] respresents your two eyes. Trivṛtsāman[129] is held to be your head.

125. Sage Kāśyapa had two wives with the names Kadrū and Vinatā. The former had serpents born to her, while the latter had Garuḍa as her son. On seeing the divine horse Uccaiśravas, which was sprung from the milky ocean, Kadrū and Vinatā had a wager regarding the colour of the tail of that horse. Kadrū held the tail to be black, while Vinatā stated it to be white. The serpents, the children of Kadrū, turned round the tail of the horse, presenting the tail to be black in colour. Vinatā had then to accept defeat and as per the condition of the wagers, Vinatā had to serve Kadrū as slave. Garuḍa was asked by Kadrū to bring nectar as a condition for the release of Vinatā from slavery. Garuḍa went to heaven and fought with gods and brought the pitcher containing nectar. He asked the serpents to take bath and then approach the pitcher. While the serpents went to take bath, Indra appeared there and snatched away the pitcher containing nectar. The serpents had to lick the drops of nectar split over *darbhas* and had their tongues forked.
126. Any way the pitcher containing nectar was brought and this was enough for Kadrū to free Vinatā from slavery. Garuḍa was instrumental for his mother's getting freedom from slavery.
127. Bṛhatsāma: this is also called Brahmasāman. This is described in Mādhava's *Jaiminīyanyāyamālā* XI.2.12. This *sāman*, a method of singing, is declared to be eminent as stated by Sāyaṇa in his *Sāmavedabhūmikā* P. 99; Rathantara: अभित्वा शूर नोनुमो।
(*Purvārcika* III.5.1) is said to be Rathantara. It is a particular kind of singing. These two together are represented by the two wings of Garuḍa.
128. Gāyatrī: two eyes of Garuḍa. Gāyatrī is a *stotra*. A *stotra* is praising the deity by singing the mantra concerned while *śāstra* is also praising the deity without singing the mantra. Singing here means setting the mantra to the *sāma* method of singing.
Vide: अप्रगीतमन्त्रसाध्या स्तुतिः शास्त्रम् ।
प्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रम् ॥
Sāyaṇa's *upodghāta* to *Sāmavedabhāṣya* P. 84. In the context, it is not Gāyatrīmantra that is meant here but any Vedic passage belonging to other Vedas are set to the *sāma* mode of singing. They are discussed by Sāyaṇa in the *Ṛgvedabhāṣyabhūmikā* P. 13 and *Sāmavedabhāṣyabhūmikā* P. 82, 86 Vedāntadeśika writes 'नेत्रं गायत्रमूचे' *Garuḍapañcāśat*, *śloka* 3a. The reading Gāyatrī is incorrect in the text. It must be *Gāyatra*.
129. Trivṛtsāman is the head of Garuḍa. This word means a group of nine *ṛks* (*Uttarārcika* I.12.3). This is a way of *sāma's* singing. The word *tri* does not mean three but *stoma* which means praise; a typical form of *sāma* chant. The hymn referred to above is meant here.
Vide: त्रिवृदिति शिरो नामधेयम् ।
Garuḍapañcāśat, śloka 3a.

तत्काले देशिकेन्द्रस्तु ध्यायमानः खगेश्वरम् ।
नैवेद्यं कबलीकृत्य मन्त्रयित्वा तु मन्त्रवित् ॥ ३९२ ॥
पौरुषैर्गारुडैर्मन्त्रैः वन्ध्यानामपि योषिताम् ।
क्षिपेदञ्जलिषु ध्यात्वा गरुडं चाच्युतं हरिम् ॥ ३९३ ॥
भक्षयित्वा स्त्रियः पिण्डान् जनयेयुः सुतान् बहून् ।
ततस्तु गरुडाग्रे तु ताम्बूलैर्गन्धमाल्यकैः ॥ ३९४ ॥
दैवज्ञं पूजयित्वा तु लब्ध्वा लग्नं शुभप्रदम् ।
सुमुहूर्ते सुलग्ने च आशीर्वादपुरःसरम् ॥ ३९५ ॥
घण्टाशब्द[३३]मृदङ्गैश्च सर्ववाद्यरवैः सह ।
रज्जूनारोहयेद्धीरं[३४] सुपर्णोऽसीति मन्त्रतः ॥ ३९६ ॥
रज्जुं च बन्धयेत् स्तम्भे प्रादक्षिण्यक्रमेण तु ।
प्रासादाभिमुखं स्तम्भे स्थापयेद् गरुडध्वजम् ॥ ३९७ ॥
पूर्वाह्णे वाऽथ मध्याह्ने ध्वजस्यारोहणं महत्[३५] ।
यात्रामूर्तिं च तदनु यानमारोप्य देशिकः ॥ ३९८ ॥
ध्वजस्तम्भसमीपं तु नीत्वा च दर्शयेत् ध्वजम् ।
आह्वानार्थमशेषाणां भक्तानां पतगेश्वरम् ॥ ३९९ ॥
नियुज्य देवस्तदनु प्राप्नुयान्मण्डपावनिम् ।
प्रार्थयेत् सन्निधिं चाथ गरुडस्य ध्वजोदरे ॥ ४०० ॥
अस्माद्दिनात् समारभ्य यावत्तीर्थदिनान्तिमम् ।
सन्निधिं कुरु पक्षीन्द्र राज्ञो जनपदस्य च ॥ ४०१ ॥
ग्रामस्य यजमानस्य वैष्णवानां विशेषतः ।
तुष्टये पुष्टये चैव सर्वशत्रुजयाय च ॥ ४०२ ॥
अपमृत्युजयार्थाय वैनतेय प्रसीद ॐ ।
इति विज्ञाप्य पक्षीन्द्रं विकिरेत् कुसुमाञ्जलिम् ॥ ४०३ ॥

३३. शङ्ख - C, D, E
३४. द्वीरम् - B, C, E
३५. भवेत् - B, C, E

Stoma[130] is self. I bow to him who is the wealth for Vāmadevyaṅga.[131] Salutations to Garuḍa, the controller of the airs, (Prāṇa and others). Remove all the defects and bring virtue everywhere. Destroy all obstacles. Make me your own. After praising thus, Bṛhatsāma and Rathantara shall be recited (for him to hear). At that time, the chief priest shall meditate upon the lord of birds. He (priest) who knows the mantra, shall differentiate (divide) the food offerings and make them sanctified with Puruṣasūkta, mantra of Garuḍa[132] and offer them into the hands of even barren women, who, on meditating upon Garuḍa and lord Acyuta, shall eat them and give birth to many sons. The astrologer shall be worshipped with Tāmbūla, sandal-paste and garlands in front of Garuḍa and ascertain from him the zodiacal sign[133] which would yield good results. At a good *muhūrta* and *lagna*,[134] the ropes shall be brought firmly (raised to a height) with the benediction of elders attended by the soundings of the bells, drums and all musical instruments, uttering the mantra, 'You are Suparṇa'[135] the rope shall be tied to the staff in the *pradakṣiṇā* way. Garuḍa's flag shall be stationed in the staff facing the temple. Raising (hoisting) the flag shall be done in the forenoon or noon. The priest shall place the processional deity in a vehicle bring it near the flag-staff and show him the flag.

130. *Stoma* is soul; vide: यस्य स्तोमात्मन: — *Garuḍapañcāśat, śloka* 3c. Garuḍa represents the *Sāmaveda* singing and that is the soul of the *Sāmaveda*. Here Garuḍa is described fully as the embodiment of the *Sāmaveda*.
131. Vāmadevyaṅga: here the word *vāmadevī* refers to the *Sāma* chant called Vāmadevyam. This is said to be the fifth *sāman*. See *Sāmavedabhāṣyabhūmikā* P. 76. Garuḍa is the soul for the chant Vāmadevya vide: विग्रहो वामदेव्यम् — *Garuḍapañcāśat, śloka* 3b. Vāmadevya is the body.
132. Mantras of Garuḍa; vide: *JS*. VI.174b-178; *Pād. S. caryā*. 316-365a.
133. *rāśi:* a sign of the zodiac, one twelfth part of the ecliptic.
134. *lagna:* the division of the equator which rises in succession. The moment of the sun's entrance into the zodiacal sign.
135. सुपर्णोऽसि — *TS*. IV.1.10.5.

सन्निधौ देवदेवस्य गत्वा पुष्पाञ्जलिं क्षिपेत् ।
ज्ञानतोऽज्ञानतो वाऽपि यथोक्तं न कृतं मया ॥ ४०४ ॥
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ।
ओमच्युत जगन्नाथ मन्त्रमूर्ते जनार्दन ॥ ४०५ ॥
रक्ष मां पुण्डरीकाक्ष क्षमस्वाद्य प्रसीद ॐ ।
इति विज्ञाप्य देवेशं यात्रामूर्तिगतं विभुम् ॥ ४०६ ॥
अन्यत्र मण्डपे नीत्वा विशेषार्चनपूर्वकम् ।
प्रभूतान्नं निवेद्याथ सर्वं हवनपश्चिमम् ॥ ४०७ ॥
कृत्वा यथाक्रमेणैव प्रासादं तु प्रवेशयेत् ।
कल्पयेद् ध्वजपीठोर्ध्वे चतुःस्तम्भान्वितां प्रपाम् ॥ ४०८ ॥
यद्वा स्तम्भाष्टकोपेतां षोडशस्तम्भसंयुताम् ।
चतुस्तोरणसंयुक्तां दर्भमालापरिष्कृताम् ॥ ४०९ ॥
भूषितां तु पताकाद्यैर्बाह्ये यवनिकान्विताम् ।
दीपान् प्रदीपयेत् तत्र अनिर्वाणान् समन्ततः ॥ ४१० ॥
तद्वासरात् समारभ्य पुष्पयागदिनान्तिमम् ।
त्रिसन्ध्यमर्चनं कुर्यात् सविशेषं जपान्वितम् ॥ ४११ ॥
बलिकाले बलिं दद्यादस्यापि प्रतिवासरम् ।
एवं ध्वजाधिरोहान्तं दिवाकृत्यमुदीरितम् ॥ ४१२ ॥

[॥ इति श्रीमौञ्ज्यायनकुलतिलकस्य भगवच्छास्त्रपारीणस्य यदुगिरीशचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन अळशिङ्गभट्टेन विरचितायां सात्वतार्थप्रकाशिकाख्यायाम् ईश्वरतन्त्रव्याख्यायाम् दशमोऽध्यायः ॥]

॥ इति श्रीपाञ्चरात्रे ईश्वरसंहितायां महोत्सवध्वजारोहणान्तविधिर्नाम दशमोऽध्यायः ॥

The priest shall commission the lord of birds to call all devotees and then go to the pavilion. He shall then request God (Garuḍa) to be present in (within) the flag. O lord of birds! Be present beginning from today upto the end of the day of ritualistic bath. O Vinatā's son! be pleased (to accomplish) for delight and nourish the village patron, Vaiṣṇavas in particular for the victory over all enemies and over premature death. Requesting thus the lord of the birds, he shall scatter the palmful of flowrs (on all sides). He shall throw the palmful of flowers going near the lord of gods. 'I have not done what I should knowingly and unknowingly. All that shall be abundant (satisfactory). Be ever well-satisfied. O Acyuta! lord of the worlds, having mantras for your form! Janārdana! O lotus-eyed protect me. Pardon me and be now pleased.' Having made this request to the lord present in the processional idol, he shall take it to another pavilion and offer abundant food (preparation) after offering special worship and doing *homa* at the end. God shall be taken into the temple. A water trough with four pillars shall be arranged above the pedestal of the flag or with eight or sixteen, four arches, adorned with a string of *darbha*, ornamented with banners and curtain outside. He shall light the lamps unextinguisable on all sides. Worship is to be done on the three sandhyās, beginning from that day upto the end of the Puṣpayāga[136] and do special *japa*. *Bali* is to be offered at the time of offering bali every day. The work is to be done during the day is stated thus upto the flag hoisting.

Thus ends the tenth chapter called *Mahotsavadhvajārohaṇāntavidhi* in the *Īśvarasaṁhitā* of *Śrī Pāñcarātra*.

136. Puṣpayāga: this is to be done on the tenth day of the festival when there will be Dhvajāvarohaṇa.

M. A. Lakshmithathachar is a renowned Indological scholar who combines in himself the erudition and depth of traditional learning as well as the critical acumen of western approach. He is well versed in a number of branches of Indological learning including Nyāya, Viśiṣṭādvaita-Vedānta and Sanskrit literature. He is also deeply involved in bringing to light contribution of ancient Indians to the areas of science and technology, also himself very efficient in developing computer software for the study of various branches of Sanskrit learning. His software for learning Sanskrit grammar with ease has been greatly acclaimed. He has been founder chairman of the Academy of Sanskrit Research in Melkote, besides being Member and Advisor to various Academic bodies in Mysore, Bangalore and Chennai.

Prof. V. Varadachari (1914-2006) was a great doyen of Indological studies having command over a number of disciplines of Sanskrit learning especially its grammar, literature, the Viśiṣṭādvaita philosophy and Vaiṣṇava Āgamas. He attracted the attention of Sanskrit scholars and students alike by his very first stupendous work, A History of Sanskrit Literature (1952) which is still the most informative reference work on this subject His Sanskrit Self-teacher (1966) also became quite famous and served young students and lovers of Sanskrit very well. In the later part of his life, he was attracted more and more towards the works of the Ācaryas of Viśiṣṭādvaita and towards the Pāñcarātra literature. In 1982 came out his *Āgamas and South Indian Vaiṣṇavism*, later works on Vedantadeśika (1983) and Yāmunācārya (1984) and finally his valuable introduction to the philosophy of Lakṣmītantra in English and Sanskrit (1996). He has been associated with the French Institute of Indology, Pondicherry for a long time and has also prepared a Descriptive catalogue of its manuscripts (1986).